Barcode : 4990010095914
Title - Shabda Koustabha
Author - Bhattojibhatta
Language - sanskrit
Pages - 340
Publication Year - 1876
Barcode EAN.UCC-13

B 8172

"	Benares 1878	भारतेन्दु	हरिश्चन्द्र	

Gollection of Modern Hindi Literature : Bharatendu Harischandra
Gift of Dr. Norvin Hein
1964

S/C
191.25
1515.

अथशब्दकौस्तुभःआरभ्यते

श्रीगणेशायनमः॥ विश्वेशंसच्चिदानंदंवंदेहंयोरिवलंजगत्॥ चरीकर्त्तिवरींभक्तिंसिंजयेहर्त्तिलीलया॥१॥ नमस्कुर्वेजगद्वंद्यंपाणिन्यादिमुनित्र
यं॥श्रीभर्तृहरिमुख्यांश्चसिद्धांतस्थापकान्सुधान्॥२॥ नत्वालक्ष्मीधरंनतंक्रमनोद्दृदंदितं॥ [illegible]भाषितभाष्याब्धेःशब्दकौस्तुभमुद्धरे॥३॥
परिभाव्यबहून्ग्रंथान्योर्थःकृशेनलभ्यते॥ तमशेषमनायासादितोगृण्हीतसज्जनाः॥४॥ सर्म्पयेलक्ष्मीरमणेभक्त्याश्रीशब्दकौस्तुभं॥ भट्टो
जिभट्टोजनुषःसाफल्यंलब्धुमीहते॥५॥ प्रेक्षावत्प्रवृत्तयेव्याकरणस्यविषयंभगवान्भाष्यकारःप्रादर्शयत्॥ अथशब्दानुशासनमिति॥ अथश
ब्दःप्रारंभस्योतकःनतुवाचकःनिपातत्वात्॥ उपसर्गवत्॥ नचनेपिवाचकाएवेतिवाच्यं॥ उपास्यतेगुरुरनुभूयतेसुखमित्यादौधातोःसकर्म
कक्रियापरत्वंविनाकर्मणिलकारायोगेनवाचकत्वेस्थितेउपसर्गाणांद्योतकत्वस्यैवयुक्तत्वात्॥ ननूक्तयुक्त्याऽस्तूपसर्गाणांद्योतकता॥ निपातानां
रंतुवाचकमेवेतिचेत्॥ न॥ साक्षात्क्रियतेअर्चक्रियतेऽर्चीक्रियतइत्यादौकर्मणिलकारेणकर्मीभूतस्यगुर्वादेरभिधानसिद्ध्येधात्वर्थप्रतिकर्मतस्य
वाच्यत्वात्॥ उपसर्गस्यापेक्षयानिपातत्वस्याधिकवृत्तितयातद्वच्छेदेनैवद्योतकताकल्पनाच्च॥ सामान्येप्रमाणानांपक्षपातात्॥ निपातत्वंचा
खंडोपाधिरूपंजातिरूपंशब्दस्वरूपमेवचेतिपक्षत्रयेपिप्रादित्वादिसाधारणमेव॥ प्रत्वादिप्रत्येकपर्यवसन्नंनदितिपक्षेपिप्रादीनांचादिभ्योवैल
क्षण्यानिरुक्तेः॥ केवलानामप्ययोगेणअन्यलभ्यतापितुस्त्रैव॥ विजयतइत्यत्रधातोर्विशिष्टजयइवघटश्चेत्यत्रसमुच्चितघटे घटशब्दस्यापि
लक्षणायाःसंभवात्॥ किंचचादीनांवाचकत्वेसमानाधिकरणप्रातिपदिकार्थयोरभेदान्वयइतिव्युत्पत्तिर्निपातेतरविषयकतयाविनाप्रमा
णंसंकोचनीयास्यात्॥ स्याच्चसमुच्चयादिशब्दयोगइवचादियोगेपिघटादेःषष्ठी॥ किंच समुच्चयादिपदैरुपस्थितेयथाविशेषणसंबंधस्तथा
चादिभिरुपस्थितेस्यात्॥ द्योतकत्वपक्षेतुपदार्थैकदेशत्वान्नतत्रविशेषणान्वयः॥ अपिच॥ शरैरुस्त्रैरिवोदीच्यानुद्गिरन्नरसानिवेत्यादौच

स्त्रसदृशैः शरैः रसमदृशानुदीच्यानुदूरिष्यनित्यादिरर्थः॥ सच्चउस्त्रादिशब्दानांतत्सदृशपरत्वेइवशब्दस्यचतात्पर्यग्राहकत्वेसत्येवलभ्यते॥
अन्यथाप्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधजनकतापिभज्येत॥ इवशब्दात्तुतृतीयादुर्लभा॥ असत्वार्थकतयाकारकविभक्त्ययोगात्॥एवमप्यु
स्त्रादिभ्यस्तृनीयानन्वयस्यानुद्धाराच्च॥ ननुएवंनञ्तत्पुरुषस्योत्तरपदार्थोदिप्राधान्यमित्यादिसिद्धांताभज्येरन्निति चेन्न॥पूर्वपदद्योत्यंप्र-
तिप्राधान्यमितितदर्थात्॥द्योत्यार्थेनाप्यर्थवत्तेतिप्रातिपदिकत्वसिद्धिः॥ अतएवयेषांद्योत्योप्यर्थोनास्तितुहिचस्महवैपादपूरणेइत्यमरकोशात्
कमीमिहितिपादपूरणार्थादितिनिरुक्ताच्च॥ तदर्थेनिपातस्यानर्थकस्येतिवार्त्तिकारंभइत्यवधेयम्॥स्फुटञ्चेदृङ्यदादिग्रन्थेषु॥अतएवाकृत्य
धिकरणेभट्टैरुक्तम्॥ चतुर्विधेपदेचात्रहिविधस्यार्थनिर्णय॥ क्रियतेसंशयोत्पत्तेर्नोपसर्गनिपातयोः॥तयोरर्थाभिधानेहिव्यापारोनैवविद्यते।
यदर्थद्योतकौतौतुवाचंकस्मविचार्यतइति॥ यत्तुअर्थवत्सूत्रेअधीतइत्यादौधातोरनर्थकताउपसर्गविशिष्टस्यवाचकतेतिकैश्चिदुक्तंतदभ्यु
पगमात्रम्॥ सर्वस्यहेइतिसूत्रेकैयटादिग्रन्थोप्येवमेव॥पूर्वोत्तरमीमांसयोस्तत्रतत्रनञः पर्य्युदासेलक्षणेतिग्रन्थाअप्येवमेव उक्तपुक्तेः अ
स्त्रकवाक्यांतरंनिपातावाचकाइति सर्वथापिप्रादयोद्योतकाश्चादयस्तुवाचकाइत्येवंरूपमर्वाजरतीयं नैयायिकाभ्युपगतमप्रामाणिकमेवेतिदि
क्॥ अनुपूर्वकः शासिर्विविच्यज्ञापनेदृष्टः॥तद्यथा॥ अक्षेत्रवित्क्षेत्रविदंत्यप्राट्सप्रैतिक्षेत्रविदानुशिष्टः यथावा॥ संपूर्वस्यदुषानयथो अज्ञ
सानुशासति॥ एवेदमिति ब्रुवत् अत्रहिगुणत्रयोपेतेनसद्गुरुणास्मान्शिक्षयेतिपूषाप्राध्यनेतत्र---अज्ञसेतिशैघ्र्यमुक्तम्॥ अनुशा
सतीतिविविच्यबोधकत्वेवहेलञ्छन्दसीतिशपोनलुक्॥ इदमित्थमेवेति गोब्रूणादितिप्रेक्षणेक्षउक्तः ब्रवदित्यत्रलेटोडाटावित्यट्॥त
थाचअनुशिष्यन्तेविविच्य असाधुभ्योविभज्यबोध्यन्तेयेनेति करणेल्युट्॥तत्रशब्दानामिति कर्मणिषष्ठीतदन्तेनसमासः नचकर्मणि

चेतिसूत्रेणसम्प्रसारणनिषेधःशङ्कयः॥ तत्रचशब्दस्यइतिशब्दार्थेनतथाकर्म्मणीतिशब्दवताउभयप्राप्तावितिसूत्रेणषष्ठीतदंतेनसमस्यतेइत्य
र्थात्॥ इयंतुकर्तृकर्मणोरिविधिहिनाषष्ठी॥ ननूभयप्राप्तावितिआचार्यस्यकर्तुर्वस्तुतःसत्वेपीहानुपादानात्॥ चित्रंगवांदोहोअगोपेनेत्यत्र
हिआश्चर्यंप्रतिपाद्यं॥ तच्चेहनुशिष्यितोदोग्ध्यादुर्दोहागावश्चदोग्धव्यास्तदैवनिर्वहतिनत्वन्यथा॥ अतःकर्तृकर्मणोर्विशिष्योपादानादस्त्युभ
यप्राप्तिः॥ इहनुशब्दानामिदमनुशासनंनत्वर्थानामिति अर्थेनिरूपितपरंवाक्यंनतुकर्तृविशेषनिरूपितपरंअतोनास्त्युभयप्राप्तिः॥ अस्तुवायथा
कथंचिदुभयप्राप्तिः॥ तथापिनक्षतिः॥ उभयप्राप्तावितिसूत्रेअविशेषेणविभाषेतिपक्षस्यापिवक्ष्यमाणतयानियमाप्रवृत्तिपक्षेआचार्यस्यश
ब्दानुशासनमितिप्रयोगसंभवात्॥ शेषलक्षणाषष्ठीवास्तु तस्माद्वैदिकालौकिकाश्चसाधवःशब्दाइहविषयइतिस्थितं॥ वेदेभवावैदिकाः
अध्यात्मादित्वाट्ठञ्॥ एवंलोकेभवालौकिकाः॥ पद्धा॥ लोकेविदितालौकिकाः तत्रविदितइतिवर्त्तमानेलोकसर्वलोकाट्ठञ्॥ प्रातिशाख्येषि
वनवैदिकैकदेशमात्रमिहविषयः॥ नवाव्याकरणांतरेष्विवछांदसपरित्यागइतिसूचयितुमुभयोपादानं॥ इतिविषयनिरूपणं॥ स्यादेतत्
गौरित्यादिःशब्दइहविषयः॥ तत्रचगकारऔकारोविसर्गश्चघटकः॥ व्युत्पाद्यतेतुडोप्रत्ययसुप्रत्ययवादेशादिकं॥ नचैतद्गौरितिबोधेभास
ते॥ तथाचार्थांतरता॥ गौरित्यनेनपरिनिष्ठितेनसहडोप्रभृतीनांसंबंधविशेषस्तत्रतिपत्युपयोगिताचास्तीतितद्व्युत्पादनमितिचेन्न॥ शब्दांतर
व्यावृत्तस्यसंबंधस्योपयोगस्यचदुर्वचत्वात्॥ द्रव्यगुणादिपदार्थानामिहव्युत्पाद्यनापत्तेश्च॥ अस्तिहितेषांगौरित्यनेनवाच्यवाचकभावादिः
संबंधः॥ अतएवशब्दबोधेगविसमवायेनगोत्वमिवशक्त्याख्यसंबंधेनशब्दोविशेषणतयाभासते॥ चाक्षुषबोधेपिव्यक्त्यास्मारितःशब्दोवि
शेषणमित्यभ्युपगमः॥ आहच॥ नसोस्तिप्रत्ययोलोकेयःशब्दानुगमादृते॥ अनुविद्धमिवज्ञानंसर्वंशब्देनभासते॥ ग्राह्यत्वंग्राहकत्वंचहेश

क्तीतेजसोयथा॥नचैवसर्वशब्दानामेतेपृथगवस्थितेइति॥यत्संज्ञास्मरणंतत्रनतद्व्यन्यहेतुकं॥पिंडएवहिदृष्टःसन्संज्ञांस्मारयितुंक्षमइति च॥युक्तंचैतत्॥गृहीतशक्तिकंप्रतिशब्देनार्थस्यैवअर्थेनशब्दस्यापिस्मरणेबाधकाभावात्॥अतएवगोत्वस्यैवगोशब्दस्यापिव्यक्तिविशेषपक्षे विशेषात्संसर्गोपितादात्म्यमेवास्तु॥एवंगोगुणादिभिरपितद्भिन्नाभिन्नस्यतद्भेदादित्याशयेनाथगौरित्यत्रकःशब्दइतिपर्यटृकेद्रव्यगुणकर्म सामान्यैःसहशब्दस्याभेदोभाष्यकृद्भिराशंक्यनिराकृतः॥तत्रनिराकरणग्रंथस्यायमाशयः॥समभिव्याहारभेदाभेदौविरुद्धावेव॥अन्यथात्वदुक्तौ त्यासुत्तापुण्यत्वाद्यभेदात्स्वरदुःखस्वर्गनरकादेरप्यभेदापत्तौप्रवृत्तिनिवृत्तिव्यवस्थानस्यात्॥नस्याच्चभेदग्रहाङ्गमनिवृत्तिः॥जातिव्यक्त्यादि संबंधस्त्वनिरिक्तएवेति॥एवमेवशब्देनापिसहास्त्येवसंबंधोद्रव्यादीनामितिस्थितं॥अस्तिचद्रव्यादिव्युत्पादनस्यप्रकृतेउपयोगोपि॥अस्मि न्नर्थेयंसाधुरित्यर्थेविशेषंपुरस्कृत्यैवसाधुत्वस्यवक्तव्यत्वात्॥अतएववाजिनिदरिद्रेचक्रमेणअश्वशब्दोअस्वशब्दश्चसाधुर्न्यूनक्रमेणत्वस्म धुरितिसिद्धांतः॥ननुयद्यवैशेषिकादीनांएतच्छास्त्रमिद्धमेवप्रकृतिप्रत्ययविभागमुपजीव्यपदार्थव्युत्पादनायप्रवृत्तिःप्रकृतिप्रत्ययादिकिंवा रूढ्यनुसारिकःप्रक्रियांगिकः॥नद्येहापिलोकप्रसिद्धंदर्शनांतरसिद्धंचपदार्थजातमुपजीव्यशब्दमात्रव्युत्पादनंनविरुध्यतइतिचेत्॥अस्तुतावदेवं तथापिडोप्रभृतिव्युत्पादनंनिष्फलमेवेतिचेत्॥अत्रोच्यते॥गौस्तिष्ठतिदेवदत्तःपचतीत्यादयःशृंगग्राहिकयातावज्जन्मसहस्रेणापिबोधयितुं बोद्धुंचाशक्याः॥आनंत्यात्॥अतःप्रकृतिप्रत्ययविभागकल्पनारूपोलघुभूतउपायःसमाश्रीयतेलिपिवत्॥आरोपितएवचतत्रसंबंधः॥प्रसिद्धो हिस्थूलारुंधतीशरावादेर्दृष्टांतोलोकेपंचकोशावतरणन्यायश्चोत्तरमीमांसायां॥तात्पर्यविषयाबाधाच्चप्रामाण्यं॥एषैवत्र्यर्थवादेष्वपिगति ॥आत्मवयोत्ववेदनप्रभृतीनांबाधेपितात्पर्यविषयीभूतस्यप्राशस्त्यस्याबाधितत्वात्॥उक्तंचहरिणा॥उपायाःशिक्षमाणानांबालानामुपलालन

नाऽसत्येवर्त्मनिस्थित्वातनःसत्यंसमीहतइति॥उपेयप्रतिपत्त्यर्थाऽपायाऽव्यवस्थितइतिच॥अतएवहिकेचित्सुप्रत्ययंविदधति॥अपरेतु
॥तथासूत्रशेत्यापाठेऽपिक्त्वित्यत्रदत्तप्रत्ययः॥भाष्यशेत्यातप्रत्ययः॥सूत्रशेत्यात्तावानितिवक्तुंप्रकृतावतावर्थेवैशेष्यादितिवार्तिकोक्तशेत्याऽव
स्तुमितिदिक्॥एतेनपचतीत्यादेशेःस्मार्यमाणलडादयोबोधकाइतिवदंतःपरास्ताः॥तथाहि॥रूढ्यवहाराच्छक्तिग्रहइतिनिर्विवादं॥
ततश्चप्रयोगसमवायिनामेवतिप्रभृतीनांशक्तिःसिध्यति॥नत्वलौकिकानांलादीनांएवंहुपचष्डुकृञ्इत्यादिप्रकृतयोविचक्षिकषादिप्रत्ययान्त
शक्ताः॥किंतुअपाक्षीत्पपाचपाक्यतेकरोतिचकरीतीत्यादिप्रयोगसमवायिनः अपाक्रपपाच्इत्यादयएव॥श्रूयमाणेनहुपचप्रभृतीनां
स्मारणंतेनार्थबोधइतिचेन्न॥लाघवाद्व्यवस्थितत्वाच्चश्रूयमाणानामेवार्थसंबंधकल्पनात्॥औत्सर्गिकस्यस्मरणकल्पनेगौरवात्॥अव्य
वस्थापत्तेश्च॥पचतिदेवदत्तःपचंतंपश्येतितिपृशतृभ्यांस्मारितस्यलटएवबोधकत्वेएकत्रआधाराधेयभावेनसंसर्गेणदेवदत्तेआख्याता
र्थेयत्नोविशेषणंकृतरत्नतुअभेदेनसंसर्गेणकृदर्थः कर्त्तृविशेषणमितित्वत्सिद्धांतभंगापत्तेश्च॥एतेनकर्त्रभिधानेआख्यातार्थत्वंकर्त्तुर्निरस्त
मजभ्यमानाधिकरणेशानजर्थत्वंस्वीकुर्वतोमीमांसकाअपिपरास्ताः॥यत्तुतैरुक्तंशानजंशेकर्त्तरिरूढिरितिव्याकरणंशक्तिग्राहकमस्तीति॥तद्
प्यापातनतः॥रूढ्याक्यशेषोयमनिर्दिष्टार्थेषुण्वुलादिषूपनिष्ठतेनतुशत्रादिषुस्थान्यर्थेननिराकांक्षत्वादितिवक्ष्यमाणत्वात्॥आकांक्षितविधाने
ज्यायइतिन्यायात्॥अन्यथाक्रियमाणइतिकर्मणिशानचोदौर्लभ्यापत्तेश्च॥किंच॥कर्त्तरिरूढिरितियत्कर्त्तृग्रहणंतदेवलः कर्मणीत्यत्राप्यनुवृ
त्तंतत्कथंकृतांतिङंनचवैलक्षण्यं॥अन्यलभ्यत्वादेरुभयत्रसाम्यात्॥यत्तुनामार्थयोरभेदएवसंसर्गइतिहिशानजादेःकर्त्तावाच्यइत्युक्तं॥तत्तु
पचतिकर्त्यपचतिरूपंदेवदत्तइत्याद्यनुरोधान्निरस्तमेव॥तस्मात्परीक्षानकश्चिच्छत्रंतान्तिङंतेवैषम्यहेतुः॥अस्मद्दीक्षातुभावप्रधानमा

रव्यानंसत्त्वप्रधानानिनामानीतिनिरुक्तकारोक्तेः प्रत्ययार्थप्राधान्यमौत्सर्गिकंतिङ्सुत्यज्यते॥ प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वादिति सूत्राच्च॥ शतृशानच्त्विधौरूपविधौचभाष्येपिस्फुटमेतत्पाचकोव्रजतीतिवत्पचतिव्रजतीतिप्रयोगोप्यतएवनोपपद्यते॥ पचतिभवतीत्यादिचो पपद्यते॥ पचनोरूपंपचंतिरूपमित्यादौरूपबाद्यंतेहिवचनादिनभवति॥ तस्मात्तिङ्सुप्तुचविशेषणविशेष्यभावव्युत्पासमात्रमस्तीतिव स्यते॥ यत्तुभट्टैरुक्तं। कर्त्तरियदेकत्वंतत्रैकवचनंतिप्रत्तिलादिविधेर्द्वैकयोरित्यादेश्चैकवाक्यतयाव्याख्यानान्नकर्त्रर्थोच्यतासूत्रादायातीति तदप्यापाततः हिवचनादिसंज्ञात्यादेशनिष्ठातनश्चतद्विधिनाद्वैकयोरित्यस्यैकवाक्यता॥ नचैतन्नकर्त्तरीत्यस्तियत्हित्वादिविशेषणतयाकर्त्रर्थ चित्वौज्येन॥ लविधितिवादिविध्योरप्येकवाक्यतास्तीतिचेत्॥ सत्यं। वाक्यैकवाक्यतायाननुपदैकवाक्यता॥ आदेशविधेर्लविधिलभ्यलकाराद्ध वादेनप्रवृत्तेः॥ लविधौतुकर्त्तृग्रहणंसचद्विवचनादिसंज्ञाविनिर्मुक्तएव॥ अतएवआदेशस्मारितालकारावोधकाइतिपक्षेएकत्वादिभानायआ देशाएवश्रुत्यारणीकर्त्तव्याः॥ एवंणलादौतिवादिह्वारकलिङादिस्मरणंकल्प्यमितिमहदेवगौरवं॥ नचपरंपरासंबंधेनणलेवबोधकः॥ इतिभूत्य त्वात्॥ अतएवापभ्रंशानांसाधुस्मारकताभ्युपगमस्तवापीतिदिक्॥ तस्मात्सूर्वन्नासिद्धमित्यादौषष्ठ्याआहार्योरोपेणैवव्याख्यानंसर्वसंमतंत थाशास्त्रीयप्रक्रियायांसर्वत्र॥ वस्तुतस्तुवाचकतास्फोटैकनिष्ठा॥ तत्रचाष्टौपक्षाः॥ वर्णस्फोटः१पदस्फोटः२वाक्यस्फोटः३अखंडपदस्फोटः४ तदखंडवाक्यस्फोटः५इत्यंशेचत्वारस्फोटाः॥ वर्णपदवाक्यभेदेनत्रिविधोजातिस्फोट इति॥ तथाहि॥ किंचिद्वर्णव्यत्यासादिनाशक्तताबच्छेद कानुपूर्वीभंगस्यप्रतिपत्तौसौत्सर्गिकत्वाज्जत्रचकेनचित्कुचित्प्रथमंशक्तिग्रहात्केनकस्मात्स्मारणमित्यत्रविनिगमनाविरहाद्दशोवृषभोव षइत्यादाविवकरकारकुरुचकरइत्यादीनांप्रयोगसमवायिनांसर्वेषामेववर्णानांतत्तदानुपूर्व्यवच्छिन्नानांवाचकतेतिवर्णस्फोटपक्षः॥

कृत्रभृतयोवाचकाननेतित्रेहविप्रतिपत्तिशरीरं॥१॥रामोरामेणरोमांयैहरयेहरौहरिनिकायेपरिनिष्ठितेरूपेक्रियानंशोद्रव्यादिवाचकःकिंपांश्वक
र्मत्वादेरित्यस्यविनिगंतुमशक्यतयारामइत्यादिपरिनिष्ठितंपरमेववाचकंकर्मत्वादिविशिष्टस्येतिपदस्फोटपक्षः॥२॥दधीदंहरेवविष्णोवेत्या
दावपिविनिगमनाविरहतोत्यादेरयमेवविशिष्टार्थेशक्तमितिवाक्यस्फोटः॥३॥एकःपदइतिवदेकंपदंवाक्यंवेत्यबाधितप्रतीतेर्वर्णानिरिक्तमे
वपदंवाक्यंवाअखंडंवर्णव्यंग्यंएकत्वप्रतीतिरौपाधिकीतिचेत्॥पटेपितथात्वापत्तेः॥कःपदार्थोसावितिचेत्॥भावः॥भावविशेषेषुक्रांतभे
दनीतिचेत्॥त्वत्परिभाषितेषुद्रव्यादिषुगांतर्भूत्॥नत्वेनावताप्रमाणसिद्धंप्रत्याख्यातुंशक्यते॥अनियतपदार्थत्वादेगौरवमितिचेत्॥व्य
क्तीयत्तेतवापिनास्ति॥उपाधीयत्तातुसर्वैःसुवचा॥भावत्वाभावत्वाभ्यांनित्यत्वानित्यत्वादिनावाविभजनात्॥भावविभाजकोपाधयस्तूपदंविभाज
कोपाधिवदेवनावश्यकाः॥अस्मिंश्चपक्षेहयेवर्णाभ्यनावश्यकाः॥नन्वनुभवसिद्धास्तइतिचेत्॥व्यंजकध्वनिविशेषोपहितस्फोटएवकथंगा
द्यात्मनाव्यवहियतइत्यभ्युपगमात्॥भट्टमतेतारोमंदोगकारइतिवत्॥अद्वैतसिद्धांतेविषयसंबंधजन्यरक्तिवैचित्र्येणव्यंग्येस्वरूपसुखेवैचि
त्र्यवच्च॥अतएववाचस्पतिमिश्राःतत्त्वबिंदौवस्तुतःककारादतिरिच्यमानमूर्ध्नेर्गकारस्याभ्युपादितिस्फोटवादिमतमुपन्यास्यत्॥यथावा॥
अखंडेष्वपिऋकारादिषुवर्णेषुवर्णांतरसमानाकारैकदेशावभासः॥तथात्रपक्षेवर्णावभासोपिभविष्यति॥उक्तंचवोपदेवेन॥शक्यतइदंव
क्तुंवेजातेर्लाघवमीप्सितं॥औपाधिकोवाभेदोस्तुवर्णानांतारमंदवत्इति॥भर्तृहरिरप्याह॥पदेनवर्णाविद्यंतेवर्णेष्ववयवानच॥वाक्यात्स
दानामत्यंतंप्रविवेकोनकश्चनेति॥तस्मादखंडंपदंवाक्यंवेतिपंचापिव्यक्तिस्फोटावांतरभेदाः॥५॥जातिस्फोटवादिनस्तुघोत्तरटत्वादिकंश
क्तावच्छेदकतयाअद्यपक्षत्रयेपियथायथंवाच्यं॥अन्यथासरोरसइत्यादावर्थविशेषप्रतीत्यनापत्तेः॥तच्चउपाधिरूपं॥उपाधिश्चपरंपरासं

बह्वाजातिरेव॥सा चसर्वाधिष्ठानब्रह्मस्वरूपात्मिका॥तथाचशाक्यांशङ्कवशङ्कांशेपिन्यायसाम्येनाकृत्यधिकरणरीत्याब्रह्मतत्त्वमेवन
न्तदुपहितंवाच्यंवाचकंच॥अविद्यावाअविद्यकधर्मविशेषोवाजातिरितिपक्षेमेवंवाचिकास्त्वित्याहुः॥८॥अष्टावप्येतेपक्षाःसिद्धांतग्रंथे
षुतत्रतत्रोपनिबद्धाः॥तथाहि।स्थानिवत्सूत्रेसर्वेसर्वपदादेशाइतिभाष्यग्रंथः॥पद्यतेर्थोऽनेनेतिअर्थवदिहपदंननुसुप्तिङंतमेव॥तथा
चरुरित्यस्यतेरूकारित्यर्थः इतिटीकाग्रंथश्चवर्णस्फोटेनुकूलः॥तथास्थान्यर्थाभिधानसमर्थस्यैवादेशत्वमितिस्थानेंतर
ग्रहणेषुस्थस्थमिपामित्यादिषुनिर्वाहान्तदर्थंयथासंख्यसूत्रंनारब्धव्यमितिभाष्यमपि॥पदंस्फोटवाक्यस्फोटौनुइहैवप्रघट्टकेयेनोच्चा
रितेमेतिभाष्यप्रतीकमुपादायकैयटेनभाष्यार्थतयावर्णितौ॥वर्णव्यतिरिक्तस्यपदस्यवाक्यस्यवेतिवदतातयोरखंडतोक्ता॥नित्येषु
शब्देषुकूटस्थैरित्यादिभिर्वर्णैर्भवितव्यमितितत्रतत्रभाष्येसखंडतोक्ता॥मायानिश्चलयंत्रेषुकेतवानंतराशिषु॥अयोघनेशैलशृंगेसीरांगे
कूटमस्त्रियामित्यमरेणापिसशायामेवप्रघट्टकांतरेकिंपुनरित्यादिभाष्यमुपादायकेचिद्वर्णस्फोटंअपरेपदस्फोटंवाक्यस्फोटंचाहुरितिवद
ताकैयटेनअड्उण्दित्यत्रव्यक्तिस्फोटजातिस्फोटयोर्बलाबलंचिंतयतात्पर्याहारान्हिकांतेअसरंनसरंविद्यादितिभाष्यव्याख्यावसरेव्यव
हारनित्यतानुवर्णपदवाक्यस्फोटानांनित्यत्वंतुजातिस्फोटस्येतिप्रतिपादयताभानुपदमेवब्रह्मतत्त्वमेवहिशब्दरूपतयाप्रतिभातीत्यर्थः
इतिव्याचख्यौनसर्वेपक्षाःसूचिताएव॥यदातुअविद्येवजातिरितिपक्षस्तदभिप्रायेणजातिस्फोटस्यापिव्यवहारनित्यतेतिअसरंनसरंवि
द्यादित्यस्यकैयटीयेफक्किंतरं॥आद्यंतौटकिनाविनिसूत्रेचभाष्यएववर्णस्फोटपदस्फोदावुक्तौ॥असत्यमेवप्रकृतिप्रत्ययविभागंतदर्थंचा
श्रित्यैरवागवयन्यायेनसत्यस्यपदस्फोटस्यव्युत्पादनमभिप्रेतमितितत्रैवकैयटः॥अर्थवद्धातुःस्वरूपंशब्दस्यतपरस्तत्कालस्येत्यादि

सूत्रेष्वपिस्पष्टमिदंभाष्यकैरुदाहृतादिति स्थलबहुत्वात्॥ जातश्चात्र ह्यात्मैकत्वमुक्तंहरिणा॥ संबंधिभेदात्तत्तैवभिद्यमानागवादिषु॥ जातिरित्युच्य
तेतत्स्थासर्वशब्दाव्यवस्थिता॥ तामप्यनिषदिकार्थेचधात्वर्थेक्रियाविशेषेसानित्यासामहानात्मेतामाहुस्त्वतलादयइति॥ जातेःस्फोटत्वमपि
प्रपञ्चयिष्यन्नेकस्यैवाभिव्यंग्यजातिःस्फोटइतिस्मृना॥ केचिद्व्यक्तयएवास्याध्वनित्वेनप्रकल्पिताइति॥ यद्यपीहाष्टीपक्षा
उक्तास्तथापिवाक्यस्फोटपक्षेतात्पर्यग्रंथकृतां॥ तत्रापिजातिस्फोटइत्यवधेयं॥ पूर्वपूर्वोपमर्देनैवोत्तरोत्तरोत्पत्तेरन्यासात्॥ तथाचप्रथमव्युत्प
त्तेर्व्यवहाराधीनतयासंपूर्णस्यवाक्यस्यविशिष्टेप्राथमिकःशक्तिग्रहइतिनिर्विवादं॥ सचावयवेभ्योवयवानांशक्तिरितिन्यायोपष्टंभे
नत्यन्यमइतिदर्शनानुसारिणांपक्षाः॥ एकादिशादिस्थलेउक्तरीत्याविनिगमनाविरहेणकेचित्पररूपादिस्थलेपूर्वलोपाद्यभ्युपगमेनचव्या
करणनयकलङ्केसतिअवयवशक्तेर्दुरुपपादतयाप्राथमिकशक्तिग्रहएवप्रमारूपइतिनुसैद्धांतिकःपंथाः॥ उक्तंचहरिणा॥ तत्रयव्युत्पत्त्यमेके
षांतुत्रैतेषांविपर्ययइति॥ ब्राह्मणार्थीयथानास्तिकश्चिद्ब्राह्मणकंबले॥देवदत्तादयोवाक्येतथैवस्युरनर्थकाइतिच॥ एवंस्थितेनिपाताद्यो
तकाविकरणाअनर्थकाइत्यादिविचारोपिप्रक्रियादशायामेव॥ आहच॥ अडादीनांव्यवस्थार्थेपृथक्तेनप्रकल्पने॥ धातूपसर्गयोःशास्त्रे
धातुरेवनुतादृशइति॥ नादृशोऽखंडइत्यर्थः॥ एवंचनामार्थयोरभेदएवसंसर्गःप्रत्ययार्थेःप्रधानमित्यादिव्युत्पत्तयोपिप्रक्रियाश्रयणएव
॥ उक्तंच॥ किंगर्भजन्येकिंगर्भकीदृग्भातीतिनोमते॥ विचारःफलितःसर्वैःप्रकृतिप्रत्ययाश्रयइति॥ आरोपितस्यापिपारमार्थिकेउपयोगान
विरुद्धा॥ लिपिस्थूलारुंधतीशारवाचंद्रादीनांलौकिकदृष्टांतानांअर्थवादवाक्यपंचकोशावतरणादीनांतंत्रांतरसिद्धानांपूर्वत्रासिद्धादी
नांचेतच्छास्त्रसिद्धानांप्रागेवदर्शितत्वात्॥ तदेवंपक्षभेदेनअविद्यैवब्रह्मैववास्फुटत्यर्थोस्मादितिव्युत्पत्त्यास्फोटइतिस्थितम्॥

आहच।शास्त्रेषुप्रक्रियाभेदैःअविद्येवोपवर्ण्यतेइति॥समारंभस्तुभावानामनादिब्रह्मशाश्वतमितिच॥तदेवंवरादिकान्वेषणायप्रवृत्तश्चिंतामणिंलब्धवानितिवासिष्ठरामायणोक्ताभाणकन्यायेनशब्दविचारायप्रवृत्तःसन्प्रसंगाद्धेतेऔपनिषदंब्रह्मण्यपिव्युत्पद्यतामित्यभिप्रायेणभगवान्भर्तृहरिर्विवर्त्तवादादिकमपिप्रसंगाद्ब्रुवादयत् तत्तुतंत्रांतरेस्फुटंप्रकृतेनातीवोपयुक्तंचेतिनेहतन्यते॥इतिस्फोटस्वरूपव्युत्पादने॥स्यादेतत्॥चंलिखवचकारस्तुटिनडित्यादिव्यवहाराल्लिपावेवशब्दभ्रमवतांतत्रैववाचकत्वाभिमानजुषांबालानांपुस्तकमुपयुज्यतेमथातथैषभेदग्रहवतामपीतिवस्तुस्थितिः॥एवमिहापिप्रकृत्यादिविभागंपारमार्थिकत्वाभिमानवतामपिउपयुज्यतएवशास्त्रंतत्किमर्थंकर्त्तव्येनाव्युत्पादनक्लेशः॥अतएवहिभाष्यकारोपिशब्दोनित्योऽनित्योवेतिविकल्प्यउभयथापिव्याकरणारंभस्यनिष्प्रत्यूहत्वाद्यथातथास्त्वित्युदाचिष्कतइतिचेत्॥सत्यं। व्युत्पत्त्यर्थंवस्तुस्थितिःकथिता॥पक्षभेदेषुहिगौणमुख्येषुव्युत्पादितेषुतत्रतत्रपरस्परविरुद्धतयाभासमानाअपिविरोधंप्रकल्प्यव्यवस्थापयितुंशक्यंते॥स्वार्थद्रव्यादीनांपंचानांक्रमेणभानमित्यादिवक्ष्यमाणमपिकल्पनयैवोपपादयितुंशक्यतइतिदिक्॥ननुवक्तुस्मधुशब्दोविषयःअस्तुचप्रकृतिप्रत्ययादिकल्पनयातद्व्युत्पादनोपपत्तिः।तथापिव्याकरणाध्ययनस्यानुष्ठापकंकिमितिचेत्॥नित्याध्ययनविधिरितिगृहाण॥श्रूयतेहि॥ब्राह्मणेननिष्कारणोधर्मःषडंगोवेदोध्येयोज्ञेयश्चेतिषडंगवेदाध्ययनंनित्यइतियावत्॥कर्मणेनुष्ठाप्यतेनेनेतिकारणंफलं॥ब्राह्मणेनषडंगोवेदोध्येयोज्ञेयश्चेत्यन्वयः॥तथाचसांगवेदाध्ययनतदर्थज्ञानरूपोयंधर्मोनित्यःसंध्योपासनादिवदित्यर्थः॥श्रुतिरेषेतिहरदत्तादयः॥स्मृतिरितितुभट्टाचार्याः॥तत्रयदिस्मृतिरेवेतिप्रामाणिकंतर्हिआगमःखल्वपीतिभाष्येव्यागममूलकत्वादागमःस्मृतिरेवेतिव्याख्येयं॥अंगत्वंत्वंगत्वेनसंस्तवात्॥उक्तंहिशिक्षायां॥मुखंव्याकरणं

तस्यज्योतिषंनेत्रमुच्यते॥निरुक्तंश्रोत्रमुदिष्टंछंदसांविचितिःपदे॥शिक्षाघ्राणंतुवेदस्यहस्तौकल्पान्प्रचक्षतइति॥उपकारकतयाप्यंगत्वं॥व्याकरणेहिअर्थविशेषमाश्रित्यस्वरविशेषादीन्विदधत्पदार्थविशेषनिर्णयेउपयुज्यते॥ज्योतिषमपिस्वाध्यायोपयोगिनंअनुष्ठानोपयोगिनंचकालविशेषंप्रतिपादयति॥निरुक्तंतुव्याकरणस्यैवपरिशिष्टप्रायंबाहुलकादिसाध्यानांलोपागमविकारादीनांप्रायशस्तत्रसंग्रहात्॥छंदोविचितिरपिगायत्र्यादिकृष्णहरिणगायत्र्युष्णिगजनीत्यादिविध्यर्थनिर्णयेउपयुज्यते॥शिक्षापिवर्णोच्चारणप्रकारंदर्शयति॥कल्पसूत्राण्यपिप्रकरणांतरपठितस्यन्यायलभ्यस्यशास्त्रांतराधीतस्यचांगजातस्योपसंहारेणप्रयोगंदर्शयंति॥तस्मात्सडंगानितेष्वपिप्रधानंव्याकरणं॥पदप्रदीर्थोक्यमस्त्वव्याकरणाधीनत्वात्॥वाक्यार्थज्ञानस्यतन्मूलकत्वात्॥अतएवतस्यशिक्षायांमुखत्वेननिरूपणंकृतं॥मन्वादिस्मृतिष्वपिअंगाध्ययनविधयःप्रसिद्धाएव॥तथाचाध्ययनविधिर्व्याकरणाध्ययनस्यानुष्ठापकइतिस्थितं॥तथाचसंध्योपासनादेरभावेप्रत्यवायोनुष्ठानेचपापक्षयइतियथाभ्युपेयतेतथाव्याकरणाध्ययनस्याप्यननुष्ठानेअनुष्ठानेचबोध्यम्॥रक्षाप्रभृतीनिफलांतराण्यपिसंति॥तथाचभाष्यं॥कानिपुनरस्यप्रयोजनानि॥रक्षोहागमलघ्वसंदेहाःप्रयोजनमिति॥अत्रप्रयुज्यतेप्रवर्त्यतेनेनेतिकरणल्युडंतः॥प्रयोजयतीतिकर्त्रर्थेव्युत्पत्त्याबाहुलकात्कर्तर्ल्युडंतोवा॥उभयथापिप्रवर्त्तकविधिपरःपुल्लिंगःप्रयोजनशब्दएकः॥फलपरःक्लीबोपरः॥उभयोर्नपुंसकमनपुंसकेनेतिनपुंसकैकशेषएकवद्भावस्यवैकल्पिकत्वात्प्रश्ने बहुवचनंउत्तरेएकवचनंचबोध्यम्॥तत्रआगमःप्रवर्त्तकः॥रक्षोहलाद्यर्थासंदेहास्तुफलानिइतिविवेकः॥तत्रप्रवर्त्तकआगमोव्याख्यातः॥फलानिव्याख्यायंते॥तत्ररक्षावेदसंरक्षणं॥तथाहि॥भाषायामदृष्टलोपागमवर्णविकाराश्छंदसिदृश्यंते॥तेकेवलप्रयोगशरणैःश्यामादिकाःसंभाव्येरन्॥वैयाकरणस्तु

लक्षणदर्शनेनदेवरूपंस्थापयति॥तत्रलोपेदाहरणं॥त्मनादेवेषुविविदेमितद्रुः।त्मनाआत्मनेत्यर्थः॥मंत्रेष्वाङ्यादेरात्मनइत्याकारलोपः॥आगमोयथा॥देवासःब्राह्मणासः।आज्जसेरसुगित्यसुगागमः॥लोपागमौयथा॥देवाअदुहू॥अदुहतेत्यर्थः॥दुहेर्लङोझस्यादादेशेतेरलोपस्तआत्मनेपदेष्वितितलोपः॥बहुलंछंदसीतिशपोलुगागमः॥एतेननाशिरंदुहेविश्वादेवेधनवोदुहूइत्यादिलडंतमपिन्याख्यातं॥वर्णविकारोयथा॥गृभ्णामेतेसौभगत्वाय॥त्वग्रहोर्भश्छंदसिहस्येतिवक्तव्यमितिभकारः।प्रत्ययोपिछंदसीति यथा॥उद्ग्राभंचनिग्राभंचेति॥उदिग्रहइतिसूत्रेउद्ग्राभनिग्राभौचछंदसिस्तुगुद्यमननिषतननयोरितिवचनादुन्निपूर्वाद्ग्रहेर्घञ्॥तत्रउत्पूर्वात्सूत्रेणलोकेपिसिद्धोघञ्॥निपूर्वात्तुवार्त्तिकोक्तश्छंदस्येव॥सन्निवेशविशेषयुक्ताःपात्रविशेषाःस्रुचः॥इहतुजुहूपभृतोरेवग्रहणं॥उद्ग्राभंचेतिजुहूमुद्यच्छति॥निग्राभंचेत्युपभृतंनियच्छतीतिवचनात्॥भकारादेशःप्राग्वत्॥ऊहोपिप्रयोजनं॥तथाहि॥यत्रांगजातंसंपूर्णमुपदिष्टंसाप्रकृतिः॥यथादर्शपूर्णमासौ॥यत्रनिःशेषमनुपदिष्टंसाविकृतिः॥यथाश्येनंयजेतेत्यादिविहितोयागः॥तत्रवैकृतस्यविधेर्विषयभूतायांभावनायांकरणीभूतेषागेउपकारकांक्षायांतन्मुखेनप्राकृतमंगजातंप्राप्यते॥वैदिकेकरणेतादृशानामेवांगानामपेक्षितत्वात्॥तेषामेवप्रकृतौकृत्स्नसामर्थ्यत्वात्॥तहिशेषस्यचैकदेशस्यात्रिनाशकृत्तानत्वात्॥तस्मात्प्रकृतिवद्विकृतिःकर्त्तव्येतिपूर्वमीमांसायांस्थितं॥तत्रयस्यांगस्यप्रकृतौयउपकारःकृत्स्नस्तस्यविकृत्यवसंभवेनिवृत्तिः॥यथाप्रकृतावबघातस्यवैतुष्यमुपकारःतयाकृत्स्नंतस्यरूष्णलेष्वसंभवादबघातस्यनिवृत्तिः॥मंत्राअप्यंगानांतेषांचानुष्ठेयार्थप्रकाशनंकार्यं॥तत्रप्रकृतौयस्यमंत्रस्ययदभिधेयंतच्चेद्विकृतौसाकल्येननास्तिनदाकृत्स्नस्यमंत्रस्यनिवृत्तिः॥यथा॥अवरोदिवःसपत्नंवध्यासमित्यबघातमंत्रस्यकृष्णलेषुयस्यत्वेकदेशस्याभिधेयंनास्तितस्यतावन्मात्रस्यमंत्रस्यनिवृत्तिः॥यथा॥अवरोदिवः

त्रनिवर्त्तते॥ यथा॥अग्नयेत्वाजुष्टंनिर्वपामीत्यस्यमंत्रस्यावयवभूतंदेवताभिधायिपदंओषधद्रव्यकत्वेनएकदेवताकत्वेनचाग्नेयविकारभूतेसो
र्यनिवर्त्तते॥अग्निशब्देचलुप्तद्वारकतयानिवर्त्तमानेएकारोपिनिवर्त्तते॥अकारांतेतरप्रकृतिसन्निधामेनैवहिएकारस्यसंप्रदानंवाच्यं॥अ
सांतानुपशब्दस्य॥ततश्चतुर्थ्यंतंसूर्यायेत्याद्युदात्तंअग्नयइत्यस्यमध्योदात्तस्यस्थानेऊत्वं॥सोयंप्रकृत्यूहः॥लिंगस्यक्वचिदूहः॥यथा॥दे
वीरापःशुद्धाःस्थेत्यपसुप्रनिनियुक्तोमंत्रःतस्याज्येऊहः॥देवाज्यंशुद्धमसीति॥प्रत्ययमात्रस्यक्वचिदूहःयथा॥माभेर्मासंविक्थाइतिपुरोडा
शेवदानमंत्रः॥तस्यधानासूहः॥माभेर्मासंक्रिज्विध्वमित्यादिरितिहरदत्तादयः॥याज्ञिकास्तुसंविग्ध्वमित्यूहमाहुः॥युक्तंचैतत्॥प्रकृता
वनिदृतमनिनिरूपणावदृत्यस्यप्रयोगोनतुओविजीभयचलनयोरित्यस्येत्यवधारणात्॥लाघवमपिप्रयोजनं॥तथाहि॥अध्यापनेब्रा
ह्मणस्यवृत्तिः॥अध्यापनंनिर्वाहश्चवेदव्याधीनः॥वेदव्यंचसाधुसाधुविवेकः॥सचनप्रतिपदपाठादिनासंभवति॥शब्दानामानंत्यात्॥तस्माद्गुरुसं
गोप्यादरूपलक्षणद्वारातद्बोधनेलाघवं॥अन्यथातुगौरवं॥असंदेहोपिप्रयोजनं॥तथाहि॥स्थूलपृषतीमनड्वाहीमालभेतेतिश्रूयते॥तत्रसं
देहःकर्मधारयोयंबहुव्रीहिर्वेति॥तत्रकर्मधारयपक्षेपृषतीशब्देनमत्वर्थलक्षणयापृषत्वतीबिंदुमतीगौरेवाभिधीयतेस्थूलापिसैव॥बिंदूना
स्थौल्यंनानवंवायथातथास्तु॥बहुव्रीहौतुस्थौल्यंपृषत्वेवेति॥गौस्तुस्थूलारुशावेत्यत्रानादरः॥तत्रलकाराकारेउदात्तत्वंदृष्टापूर्वपदप्र
कृतिस्वरेणबहुव्रीहिंवैयाकरणोनिश्चिनोति॥ततश्चनिश्चयेनप्रतिबंधात्संशयानुत्पादः॥सएवासंदेहः॥अर्थाभावेव्ययीभावादसंदेहमि
तिस्यादिनिचेन्न॥पर्यायेणाव्ययीभावतत्पुरुषसंज्ञाद्वयमपीहभवतीतिद्वितीयेउपपादयिष्यमाणत्वात्॥अतएवोभयथामुनिप्रयोगः॥अ
दुतायामसंहितमिति॥अथासंहितयेतिच॥एवंइंद्रपीतस्योपहूतोभक्षयामीत्यादावपिस्वरेणैवबहुव्रीहिर्निर्णयेइंद्रपीताधिकरणंअवै

याकरणान्यतिसार्थकं॥ कृत्वाचिंतान्यायेनवानेयमितिदिक्॥ तदेवंरलोहलाघवासंदेहारव्यानिचत्वारिफलान्यव्याख्यातानि॥ आगमस्तु प्रवर्त्तकइत्युक्तं॥ भाष्येतुसंदर्भशुध्यर्थंफलचतुष्टयस्यप्राकृपश्चाद्वाप्रवर्त्तकेवक्तव्येमध्येतदुक्त्याफलसंदेशेनित्यानामपिफलपर्यवसानमस्तीतिसूचितं॥ फलंतुपापक्षयःप्रत्यवायानुत्पत्तिर्वा॥ धर्मेणपापमपनुदतिं॥ विहितस्याननुष्ठानान्निंदितस्यचसेवनात्॥ अनिग्रहाच्चेंद्रियाणां नरःपतनमिच्छतीत्यादिवचनानीहसाधकानीतिदिक्॥ इमानिचभूयइत्यादिभाष्येणप्रवर्त्तकवचनांतराणिउदाहृत्यव्याख्यातानि॥ तद्यथा॥ ये सुराहेत्योहेलयइतिकुर्वंतःपराबभूवुस्तस्माद्ब्राह्मणेननम्लेच्छितवैनापभाषितवैम्लेच्छोहवाएषयदपशब्दइतिब्राह्मणं॥ अत्रनम्लेच्छितवाएतस्यविवरणंनापभाषितवैइति॥ उभयत्रापिकृत्यार्थेतवैकेनेकेन्यत्वनइतितवैप्रत्ययः॥ धातूनामनेकार्थत्वान्निंदावचनान्म्लेछधातोःकर्मणिघञ्॥ तेनापशब्दसाधुत्वानाधिकरण्येनविरुध्यते॥ अत्रनम्लेच्छितव्यमितिनिषेधस्यतेसुराइत्यर्थवादः॥ नचेहरात्रिसत्रन्यायेनआर्थवादिकंफलमस्तितिवाच्यम्॥ द्रव्यसंस्कारकर्मसुपरार्थत्वात्फलश्रुतिरर्थवादःस्यादितिन्यायेनअपापश्लोकश्रवणवत्याशास्त्यमात्रपरत्वात्॥ प्रकरणात्त्वंगंह्यंनिषेधइतियर्वाणस्तर्वाणोनामेत्यादावुत्तरग्रंथेभाष्यकारैरेवस्फुटीकरिष्यते॥ अतएवइहापिपराभूतामाभूमेत्यध्येयंव्याकरणमितिनोपसंहृतं॥ किंतुम्लेछामाभूमेत्येव॥ म्लेछानिंद्याः॥ शास्त्रबोधितविपरीतानुष्ठानादितिभावः॥ अत्रहैहेप्रयोगेहैहयोरितिप्लुतेप्लुतत्वमुक्तेप्रकृतिभावेचकर्त्तव्येतदकरणंम्लेछनमित्येके॥ ननुसर्वःप्लुतःसाहसमनिच्छताविभाषाकर्त्तव्यइतिभाष्यरुताविस्यमाणत्वान्नैषदोषइतिचेत्॥ सत्यं॥ अतएवापीतोषाह्याक्यहिर्वचनंम्लेच्छनमित्यपरैर्व्याख्यातं॥ सर्वस्यहेइत्यत्रपदग्रहणस्यचोदितत्वादितितेषांभाक्तंनुपेदशस्त्रीयंहिर्वचनंकिंतुतात्पर्यद्योतनार्थमेछिकःपुनःप्रयोगः॥ अनावृत्तिःशब्दान्नावृत्तिःशब्दादितिवदितिचेत्॥ तत्त्यांप्रेदितस्वरानुपपत्तिः

॥यदितुतत्राम्रेडितस्वरविनिर्मुक्तएवपाठस्तर्हिअरिशब्देरेफस्यलत्वमपिशब्दइत्यवधेयम्॥इदंचभाष्यादिषुप्रसिद्धंश्रुतिपाठमनुसृत्यव्याख्या
तम्॥अयंचपाठःक्वचिच्छाखायामन्वेषणीयः॥माध्यंदिनानां॥शतपथब्राह्मणेतुहेलवोहेलवइतिवर्तइतिपठित्वातस्माद्ब्राह्मणोनम्लेच्छेदि
तिपठ्यते॥तत्रयकारस्थानेवकारोपशब्दइतिस्पष्टमेव॥तथाशिक्षासुपठ्यते॥मंत्रोहीनःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह॥सवा
ग्वज्रोयजमानंहिनस्तियथेंद्रशत्रुःस्वरतोपराधादिति॥स्वरेणस्वरतः।हीयमानपापयोगाच्चेतिनंसिः॥मिथ्याप्रयुक्तः।यदर्थप्रतिपादनायप्रयु
क्तस्ततोऽर्थांतरंस्वरवर्णदोषात्प्रतिपादयन्॥अतएवतमर्थंनाहेत्यर्थः॥वागेववज्रः।हिंसकत्वात्॥यजमानंहिनस्तीति॥यथाध्वर्युकृताद्धो
माद्यजमानेधर्मोत्पत्तिः॥एवमध्वर्युकृतादपशब्दप्रयोगाद्यजमानेप्रत्यवायइत्यर्थः॥यथेत्युदाहरणे॥इंद्रशत्रुः॥इंद्रशत्रुशब्दःपुराकि
लविश्वरूपाख्यस्त्वष्टुःपुत्रेइंद्रेणहतेसतिकुपितस्त्वष्टाइंद्रस्यहंतारंवृत्राख्यंपुत्रोत्पादयिषुराभिचारिकंयागंकृतवान्॥तत्रचइंद्र
स्यशातयिताशत्रुर्हिंसकइतियावत्तथाभूतःसन्वर्धस्वेतिप्रतिपादितुंइंद्रशत्रुर्वर्धस्वेतिप्रयुक्तं॥ण्यंताच्छेदेगौणादिकःकृन्प्रत्ययः॥
प्रज्ञादिगणेनिपाताद्रूपम्॥इंद्रशत्रुत्वस्यविधेयत्वान्नसंबोधनविभक्तिः॥तस्याअनुवाद्यविषयकत्वात्॥अतएवराजन्युध्यस्वराजाभवयु
ध्यस्वेत्यनयोर्व्यवस्थयैवप्रयोगः॥राजत्वस्यसिद्धत्वेसंबोधनविभक्तिर्नतुविधेयत्वेपीति॥एवंस्थितेइंद्रशत्रुशब्देतत्पुरुषसमासप्रयु
क्तेनोदात्तेवक्तव्येप्रमादादाद्युदात्तःकिलोक्तः॥तथाचपूर्वपदप्रकृतिस्वरेणबहुव्रीह्यर्थोलभ्यः॥इंदेर्हिधातोरौणादिकेरक्प्रत्ययेकृतेइंद्रशब्दआद्युदात्तोव्युत्पादितः॥नेनेंद्रएवास्यहिंसकःसंपन्नइतिश्रुतौतिहासपुराणादिषुप्रसिद्धं॥तदिहोदाहरणतयोक्तं॥स्यादे
तत्॥यज्ञकर्मण्यनेकमुत्वेहभवितव्यं॥साचतत्पुरुषबहुव्रीह्योरविशिष्टेति॥अत्राहुः॥जप्यादिपयुदासेनमंत्रेष्वेवैकमुतिर्विधीयते॥से

च्छणाप्रयुज्यमानश्चमंत्रोनभवति॥तदुक्तंभेदलक्षणेजैमिनिना॥अनाम्नातेष्वमंत्रत्वमिति॥आपस्तंबस्त्वाह॥अनाम्नाताअमंत्रायथाप्रवरोह
नामधेयग्रहणानीति॥अतएवमंत्रोहीनइतिपाठस्यशिक्षायांप्रसिद्धत्वेपिऊह्यमानस्यामंत्रतयायथेदृशान्वितिवास्यशेषोअसंगतःस्याद्
तोमंत्रशब्दशब्दमात्रपरइत्याशयेनभाष्येदुष्टःशब्दइतिपठितं॥ननुस्याहेदृशान्ववर्द्धस्वेतिवेदेपठ्यतएवेति॥सत्यं॥ऊहितंयदमंत्रभूतंश्रुत
कार्यंतदनुकरणस्यपाठेपिअर्थपरस्यानुकार्यस्यलौकिकत्वानपायात्॥नन्विदृशान्वशब्दस्यलौकिकत्वेकथंस्वरप्रयुक्तोगुणदोषयोःप्रसक्तिः
स्वरस्यवेदमात्रविषयकत्वादितिचेत्॥न॥स्वरविधौछंदोधिकाराभावात्॥एतावानेवहिभेदः॥यच्छंदसित्रैस्वर्यमेकश्रुतिश्चव्यवस्थाश्री
यते॥लोकेत्वेच्छिकोविकल्पः॥अतएवएकश्रुत्यासूत्रपाठस्त्रैस्वर्येणवेतिपक्षद्वयमपितत्रतत्रोपन्यस्तमितिवस्यामः॥नन्वेवंउञ्छैस्तरोवे
तिसूत्राद्विकल्पानुवृत्त्यैवसिद्धौविभाषाछंदसीत्यत्रविभाषाग्रहोव्यर्थःस्यात्॥प्रसज्यप्रतिषेधेतुनायंदोषः॥यत्तुकर्मणीत्यस्यनिवृत्तयेपुनर्वि
भाषाग्रहणात्॥नचपर्युदासपक्षेप्येवमेवास्तिति॥वाच्यम्॥नित्यविकल्पविध्योर्विषयभेदस्यावश्यकतयाआरभसामर्थ्यादेवतन्निवृत्तिसि
द्धेः॥प्रसज्यप्रतिषेधेतुनारभसामर्थ्यं॥ऊहादिष्वमंत्रेषुचरितार्थस्यपूर्वविधेरुत्तरेणछंदोमात्रविषयकेणबाधसंभवात्॥नत्वूह्यादीनांछंदस्त्व
मस्ति॥मंत्रब्राह्मणेतरत्वात्॥तस्मादसमर्थसमासमाश्रित्यापिप्रसज्यप्रतिषेधएवागत्यास्वीकर्तुमुचितइतिचेन्न॥पर्युदासपक्षेपिमंत्रेनि
त्यंब्राह्मणेवेतिविषयविभागसंभवेनपञ्चकर्मनिवृत्तयेविभाषाग्रहणसंभवात्॥उक्तपरितोषादेवतुकेचिन्नञादिषुप्रसज्यप्रतिषेधमाश्रित्य
इहाप्येकश्रुतेःप्राप्तौसत्यांतदकरणंबहुव्रीहिस्वरकरणंचस्वरतोपराधादित्यस्यार्थइत्याहुः॥श्रूयतेच॥यदधीतमविज्ञातंनिगदेनैवशब्द्यते
॥अनग्नाविवशुष्केधोनप्रज्वलतिकर्हिचित्॥निगदेन॥पाठमात्रेण॥शुष्कैधइतिसांतेनक्लीबेनएधशब्देनअक्षरांतेनवापुल्लिंगेननिर्वृत्तौ॥

नज्वलति॥ नमकशतेनिष्फलंभवतीत्यर्थः॥ निरुक्तेतु॥ अथापिज्ञानप्रशंसाभवंत्यज्ञाननिंदाचेत्युपक्रम्य॥ स्थाणुरयंभारहारः किलाभूद्धीत्य वेदंनविजानातियोऽर्थंयोऽर्धज्ञद्दत्सकलंभद्रमश्नुतेनाकमेतिज्ञानविधूतपाप्मेतिमंत्रमुदाहृत्यगृहीतमविज्ञातमित्यादिपठितं॥ तत्रापिगृहीतंशब्दतः॥ अविज्ञातंतुअर्थतः॥ प्रकृतिप्रत्ययादिविभागेनवेत्यादिशेषंप्राग्वत्॥ अन्यत्रापिश्रूयते॥ एकःशब्दःसम्यक्ज्ञातःसुष्ठुप्रयुक्तःस्वर्गलोकेच मधुग्भवतीति॥ एतच्चएकःपूर्वपरयोरितिसूत्रेभाष्यकृद्वक्ष्यति॥ एतन्मूलकमेवकात्यायनप्रणीतेषुभ्राजारव्येषुश्लोकेषुस्मर्यते॥ यस्तुप्रयुङ्क्तेकुशलोविशेषशब्दान्यथावद्व्यवहारकाले॥ सोनंतमाप्नोतिजयंपरत्रवाग्योगविद्ध्यनिचापशब्दैरिति॥ दुष्यतिचापशब्दैरित्यत्रअवैयाकरणः कर्त्तासामर्थ्याद्बोध्यः॥ तथा॥ अविद्वांसःप्रत्यभिवादेनाम्नोयेनप्लुतिंविदुः॥ कामंतेषुतुविप्रोष्यस्त्रीष्विवायमहंवदेत्॥ अयमहमित्यस्यअनुकरणंचानितिपरमितिगतिसंज्ञा॥ ततोगतिसमासेपिअस्यवामीयमित्यादाविवानुकरणत्वादेवविभक्तेर्लुङ्न। यास्निकाःपठंति॥ प्रयाजाःसविभक्तिकाःकार्याइति॥ यद्यपिप्रकृतौप्रयाजमंत्राःसविभक्तिकाएवपठ्यंते॥ तथापियदिआधानादनंतरंयजमानउदरव्यथावान्स्याद्यदिवा संवत्सरमध्येतस्यमहतीविपत्स्यात्तदानैमित्तिकींपुनराधेयेष्टिंविधायतत्रेदमाम्नातंप्रयाजाःसविभक्तिकाइति॥ तत्रकेवलविभक्तेःप्रयोगानर्हत्वात्प्रकृतिराक्षिप्यते॥ साचाग्निशब्दरूपा॥ ननुयाकाचित्॥ निरुक्तेदेवताकांडेअथकिंदेवताःप्रयाजानुयाजाइतिप्रश्नमवतार्यमंत्रवर्णो रीनुदात्तत्वआग्नेयाइतिनुस्थितिरित्युपसंहारात्॥ तस्माद्यादितस्मानुर्षुप्रयाजेषुचतत्स्तोविभक्तयोग्निशब्दप्रकृतिकाःपठ्यंतेइत्यादिश्रौतग्रंथेषुद्रष्टव्यं॥ तथान्यत्रापियोवाइमांपदशःस्वरशोक्षरशोवाचंविदधातिसआर्त्विजीनइति॥ पदंपदमितिसंख्यैकवचनाच्चवीप्सायामिति शस्॥ स्वरउदात्तादिः॥ अक्षरंव्यंजनसहितोच्॥ ऋत्विजमर्हतीत्यार्त्विजीनोयजमानः॥ ऋत्विक्कर्मार्हतीत्यार्त्विजीनोयाजकः॥ यज्ञर्त्विग्भ्यां

घस्त्रञ्चाविति सूत्रेण यज्ञर्त्विग्भ्यां तत्कर्माहतीति चोपसंख्यानमिति वार्त्तिकेन च खञ्॥ यजनेयाजने च विदुषएवाधिकारइति भावः॥ ऋग्वेदेपि बह्वो मंत्रवर्णाः॥ चत्वारिशृंगा॥ चत्वारिवाक्॥ उतत्वःपश्यन्॥ सक्तुमिवेत्यादयः॥ नितउपरिपवनंभवतीति भाष्यं॥ चालनीतितउः पुमानितितु असम्भस्त्रमादृत्येके॥ वस्कनस्तूक्तभाष्यानुरोधादमरग्रंथेपुंस्त्वायोगमात्रंव्यवच्छेद्यंनत्वन्ययोगेपि॥ नचाचषुंनपुंसकवर्गे॥ स्याद्वास्तुहिंगुनितउद्भूनिम्बकांडशेषः॥ अतएवनितउमाचष्टेनितापयतीत्यभियुक्तग्रंथा अपिसंगच्छंतेतदनिदिक्॥ याज्ञिकाःपठंति॥ आहिताग्निरपशब्दंप्रयुज्यप्रायश्चित्तीयांस्रुवस्तीमिष्टिंनिर्वपेदिति॥ तथा॥ दशास्यनरकालंपुत्रस्यजातस्यनामविदध्याद्यौषवद्याद्यंनरंतस्यमद्वंत्रिपुरुषानूकमनरिप्रतिष्ठित तद्विप्रतिष्ठितनतमंभवतिह्यस्रंचनुरस्रंवानामकृतंकुर्वन्नतद्विनमिति॥ नामकरणेअधिकारिणःपितुर्यत्रयः पुरुषास्तानन्वुकायतिअभिधत्तेदतित्रिपुरुषानूकं॥ अन्येषामपिदृश्यतइतिदीर्घः॥ त्रिपुरुषइत्यत्रपात्रादित्वात्स्त्रीत्वाभावः॥ मूलविभुजादित्वात्कः॥ यत्तुउपपदाविवक्षयाआतश्चोपसर्गइतिकंकृत्वानतःषष्ठीनत्सुरुषइति॥ तत्तुकर्मण्यणितिसूत्रेअकारादनुपपदात्कर्मोपपदोविप्रतिषेधेनेतिवार्त्तिकस्थनदीसूत्रेस्त्र्याख्याविति मूलविभुजादित्वात्कइतिभाष्यस्यचअननुगुणं॥ अतएवगंगाधरादिशब्दानांसंज्ञाशब्दत्वमितिप्राचः॥ वस्कनस्कः॥ प्रथमंकर्माविवक्षायांअनूकपदंव्युत्पाद्यपश्चात्कर्मसंबंधेप्यदोषः॥ वार्त्तिकादिकंतुप्रथममेवकर्मविवक्षामभिप्रेत्य॥ अन्यथाऽनुपूर्व्यादिष्वकागतिः॥ अतएवशकंचस्कदुपहेतुमितिभाष्यव्याख्यायांबहिरंगस्त्रीत्वप्रतीत्याअंतरंगःपदसंस्कारोनविहन्यतइतिकैयटोपिवक्ष्यति॥ विवक्षाचलोकप्रसिध्यनुसारिणीनतुस्वायत्तेतिविपराभ्यांजेरित्यादावपिपूर्ववधानुःसाधनेनयुज्यतइतिपक्षमुपेष्टभ्रविजयतीत्यादिनापादनीयमितिदिक्॥ तथाचऋग्वेदएवपठ्यते॥ सुदेवोअसिवरुणयस्यतेसप्तसिंधवः॥ अनुक्षरंतिकाकुदंसूर्म्यंसुषिरामिवेति॥ अस्यार्थः॥ हेवरुणसत्यदेवो

सि॥यस्यनेकाकुदंतालुकाकुर्जिह्वासाउद्यतेउत्क्षिप्यतेस्मिन्निति काकुदंतालव्यदेरुत्क्षेपणमर्थः॥धातूनामनेकार्थत्वात्॥ततोघञर्थेकविधानमित्यधिकरणेकः॥संप्रसारणंषष्ठीतत्पुरुषेशकंध्वादित्वात्पररूपं॥नुदप्रेरणेइत्यस्मादधिकरणेकः पृषोदरादित्वान्नुशब्दस्यलोपइत्यन्ये॥निरुक्तस्वरसोप्येवं॥सप्तसिंधवइवसिंधवोविभक्तयः॥अनुस्वरंतिनालुप्राप्यप्रकाशंतेइत्यर्थः॥अत्रदृष्टांतः॥यथासच्छिद्रांलोहमयींप्रतिमांप्रविश्याग्निःप्रकाशनेनस्थितिं॥ अग्निर्हितत्रस्थंमलं भस्मीकृत्यप्रतिमांशुद्धांकरोतितथाविभक्तयोपिशरीरंपापमपाकुर्वंतीतिभावः॥सूर्मीस्त्यूणाप्रतिमेत्यमरः॥स्मर्यतेच॥सूर्मीज्वलंतीमालिंगेन्मृत्यवेगुरुतल्पगइति॥अभिपूर्वइत्यत्रवाछंदसीत्यनुवृत्तेर्पणादेशः॥सुषिरामित्यत्रार्शआद्यच्॥अभेदोपचारोवेत्याहुः॥वस्कनस्क॥ऊषसुषिमुष्कमधोरइतिमत्वर्थीयोरप्रत्ययः॥रंध्रंस्त्रंवपासुषिरित्यमरः॥मरंध्रेसुषिरंत्रिष्विति च॥सुष्ठुस्यतीतिसुषिरितिक्षीरस्वामी॥गर्त्तेगर्त्तान्विनेवाद्येविशेषेसुषिरंत्रिष्वितिशाश्वतः॥इतिप्रयोजनप्रपंचः॥इत्येवंविषयप्रयोजनयोरुक्तयोःसंबंधाधिकारिणावुक्तप्रायावेवेतिपृथङ्नोक्तौ॥इहयेनप्रयोजनेपृष्टंततोन्यएवतटस्थइत्यंप्रत्यवनिष्ठते॥ननुयथाअधीष्वेत्याचार्येणोक्तेप्रयोजनप्रश्नमकृत्वैवेदमधीयते॥तद्वदंगभूतंव्याकरणमप्यध्येष्यंते॥तत्किंप्रयोजनवर्णनक्लेशेनेति॥अत्रेदमुत्तरं॥प्रायेणेदानींतनानामल्पायुष्कत्वाद्विप्रबहुलत्वाच्चप्रधानभूतोवेदस्तावत्प्रत्यते॥तद्ध्ययनकालेचबाल्यात्प्रयोजनादिकंप्रष्टुमसमर्थाःशिष्यागुरुणाउपदिश्यमानंवेदंगृह्णंतीतियुक्तं॥ततोगृहीतवेदाःप्रौढिमापन्नाविवाहार्थंत्वरमाणाव्याकरणाध्ययनायगुरुणाप्रेर्यमाणाअपिनसहसाप्रवर्त्तंते॥वेदान्नोवेदिकाःशब्दाःसिद्धालोकाच्चलौकिकाः॥अनर्थकंव्याकरणंइतिप्रत्यवतिष्ठंते॥तान्प्रतियुक्तमेवप्रयोजनादिवर्णनं॥पूर्वकल्पेषुव्याकरणशिक्षादीनिसूक्ष्मेक्षणानिप्रथमंपाठयित्वातत्तत्सूक्ष्मेक्षणानुसंधापनपूर्वकंतस्यभूतंवेदंग्राहयंतःस्थिताः॥ततःपरंबाल्यावस्थायांव्याकरणपाठात्प्रयो

जनप्रश्नविरहेतत्प्रतिपादनमपिनकर्त्तव्यमेवेति॥यद्यपिश्रावण्यांप्रौष्ठपद्यांवाप्युपाकृत्ययथाविधि॥युक्तश्छंदांस्यधीयीतमासान्विद्योर्ऽर्ध्वपंचमा
न्॥ततःपरंतुछंदांसिशुक्लेषुनियतःपठेत्॥वेदांगानिरहस्यंचकृष्णपक्षेषुसंपठेदितिमनुवचनस्यइतऊर्ध्वमनध्यायेषंगान्यधीयीतेत्यादिस्मृ
त्यंतराणांचपर्यालोचनयावेदवेदांगाध्ययनसमकालतालभ्यते॥तथापिऋषिवचनत्वाविशेषाद्व्याकरोक्तेर्मानवादेश्चब्रीहियववद्विकल्प
एवेतितत्त्वं॥तदेवमनुबंधचतुष्टयस्यसुस्थत्वात्साधुशब्दव्युत्पादनंकर्त्तव्यमितिस्थितम्॥ननुकिमिदंसाधुत्वं॥साधयतिबोधयतीतिसाधुरि
तिव्युत्पत्त्याबोधकत्वंनदितिचेन्न॥गाव्यादावपितत्प्रसक्तेः॥शक्तत्वंनदितिचेन्न॥पचतीत्यादौविकरणानामसाधुतापत्तेः॥तेषामनर्थकत्वा
त्॥ड्वपचषड्दृदित्यादीनांसाधुतापत्तेश्च॥लाक्षणिकेष्वव्याप्तेश्च॥तेषामपिलक्ष्येर्थेशक्तेः॥क्वचिच्छक्तानास्तुअश्वास्वादिष्वतिप्रसक्ते
॥वृत्तिमत्त्वंतदितिचेत्॥न॥द्योतकेषुनिपातेष्वव्याप्तेः॥औपसंदानिकीशक्तिरेवद्योतनेतिचेत्॥न॥प्रोत्तरसित्वद्योत्तरटत्वयोरविशेषेणविनि
गमनाविरहाच्छक्तितापत्तौव्यासज्यवृत्तिशक्तौविश्रांतेः॥ततश्चअदृष्टिर्वचनाद्यव्यवस्थापतिः॥नचजातिविशेषएवसाधुतेतिवाच्यं॥क
त्वादिनासंकरापत्तेरिति॥अन्याहुः॥अनपभ्रष्टतानादिर्यद्वाभ्युदययोग्यता॥व्याक्रियाव्यंजनीयावाजातिःकापीहसाधुता॥अस्यार्थः॥शक्तिरेवैकत्वादि
प्रयुक्तमन्यथोच्चारणमपभ्रष्टत्वंतदिहोच्यतेअपभ्रष्टता॥॥सैवसाधुतासाचार्थविशेषांतर्भावेणैव॥तथाहि॥यमर्थंशक्त्यास्मरणयावाबोधयितुंद्यो
तयितुंवाप्रयुक्तश्छोनादिःप्रयुक्तस्तस्मिन्नर्थेदोषादन्यथात्वंप्राप्तःसोसाधुः॥अन्यथात्वसाधुरिति॥येऽपिगाव्यादिष्वेवप्रथमंव्युत्पन्नाःसंत
स्तान्प्रयुंजतेतेषामप्यन्यथोच्चारणमस्त्येव॥तत्रचदोषप्रयोज्यतास्त्येव॥मूलप्रयोक्तुर्भ्रमाद्यन्यतमत्वात्॥यद्वा॥अनादिनासाधुता॥अना
दिरितितुश्लोकेभावप्रधानोनिर्देशः॥आदेरभावोऽनादिरितिवा॥असंदेहइतिवत्तत्पुरुषः॥अभ्युदययोग्यतावास्तुसाधुता॥रत्वनत्ववद्

च्छास्त्रपरिशीलनशालिभिर्गम्योजातिविशेषोवेति॥यत्तुजातिसंकरइत्युक्तमन्यै॥गुणगतजातौतस्यादोषत्वात्॥तथाहि॥यस्यदेवदत्तादेरनो
ष्ठ्यावर्णाएवपूर्वेषुतास्तस्यकुड्यादिव्यवहितस्यओष्ठ्यवर्णेषुश्रुतेषुयदनुमानंजायतेतदोष्ठ्यानोष्ठ्यसाधारणतदनुमापकजात्यंगीकारे
सत्यवघटते॥ननुतत्तज्जात्याश्रयानाजातिस्वीकारे॥ओष्ठ्यवर्णत्वसाधारणजातेःप्रागगृहीतत्वेनानुमितिर्नसामग्रीवैकल्यात्॥वस्तुतस्तुउ
पाधिसंकरवदेवजातिसंकरोपिसर्वत्रास्त॥दूषकताबीजानिरुक्तेः॥विनिगमकाभावेनभूतत्वमूर्त्तत्वयोरिवशरीरत्वपृथिवीत्वयोर्हयो
रपिजातित्वभंगापत्तेश्च॥तस्माच्चतुर्विधमपिसाधुत्वंनिर्दोषं॥व्याकरणैकगम्यंच॥एवमसाधुत्वमपिचतुर्द्धा॥अपभ्रष्टत्व॥सादित्व॥प्र
त्यवायोग्यता॥तद्वच्छेदकजातिविशेषोवेति॥दिघुभादिसंज्ञासुयद्यपिपुण्यपापजनकतारूपेसाधुत्वासाधुत्वेनस्तस्तथापिअनप
भ्रष्टत्वरूपंसाधुत्वमस्त्येव॥तदेवानुशासनप्रवृत्तावुपयोगि॥भस्येत्यादिसौत्रनिर्देशात्कुत्वेकस्मान्नभवतीत्यादिभाष्याच्चेत्याहुः॥ए
वंचानादित्वमभ्युदययोग्यत्वंवाअनपभ्रष्टतामात्रेणनसिध्यति॥किंतुपौरुषेयसंकेतविरहविशिष्टेनेत्यवधेयं॥तदेतदुक्तं॥यास्त्वेताःस्वे
च्छयासंज्ञाःक्रियंतेदिघुभादयः॥कथंनुतासांसाधुत्वंनैवताःसाधवोमताः॥अनपभ्रंशरूपत्वान्नाप्यासामपशब्दता॥हस्तचेष्टायथालो
केतथासंकेनिताइमाः॥सनश्च॥नासांप्रयोगेभ्युदयःप्रत्यवायोपिवाभवेत्॥लाघवेनार्थबोधार्थंप्रयुज्यंतेतुकेवलमिति॥तदयंनिर्गलितो
र्थः॥यास्त्वेताःस्वेच्छयासंज्ञाःक्रियंतइतिपक्षेअनिदंप्रथमाःशब्दाःसाधवःपरिकीर्त्तिताः॥तएवशक्तिवैकल्यप्रमादालसतादिभि॥
अन्यथोच्चारिताःसंभिरपशब्दाइतीरिताइतिचसाध्वसाधुलक्षणेआश्रीयमाणेदिघुभादीनांसाध्वसाधुबहिर्भावःस्पष्टएव॥तेषाम
प्यनादितेतिपक्षेतुचतुर्विधापिप्रागुक्तासाधुतास्त्येव॥उक्तंच॥व्यवहारायनियमःसंज्ञायाःसंज्ञिनिक्वचित्॥नित्यएवतुसंबंधो

डित्यादिषुगवादिवत्॥ २ द्यादीनांचशास्त्रेस्मिन्नुक्तन्यायवच्छब्दलक्षणः॥ अकृत्वमाभिसंबंधावशेषणावशेष्यवादिति॥ [illegible]
नविषयनानिर्विवादेति॥ नामकरणेत्वयंविशेषः॥ कृतेकुर्यान्नतद्धितमित्यादिगत्यसूत्राविरोधिनामेवसाधुता॥ नहिरोधिनांनुदेशभाषातु
सारेणक्रियमाणानांकूचीमंचीत्यादिनामधेयानामसाधुनैव॥ तदेतदुक्तंसूत्रेवार्तिकव्याख्यावसरेस्फुटीकरिष्यते॥ इतिसाधुत्वनिर्वच
नं॥ व्युत्पादनंचप्रकृतिप्रत्ययादिकल्पनयाउत्सर्गापवादरूपलक्षणेरेव॥ ननुसाध्वसाध्वोर्वाअन्यतरस्यवाप्रतिपदपाठेन॥ शब्दानामानंत्यं
ननदंसंभवादित्युक्तं॥ स्यादेतत्॥ लक्षणप्रणयनमपिकिंजातिपक्षमाश्रित्यउतव्यक्तिपक्षंआद्येसकृद्गतौयद्बाधितंतद्बाधितमेवेतिनसिध्येत्॥
तथाहि॥ जातौपदार्थेहूयेर्विध्योःपरस्परपरिहारेणनतज्जात्याक्रांतव्यक्तिविशेषेचरितार्थयोःक्वचिदेकत्रप्रसंगेपरस्परप्रतिबंधात्प्रति पत्तिरेव॥
स्यात्सत्स्वनिपक्षवत्॥ तथाचवक्ष्यति॥ अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति॥ तत्रचविप्रतिषेधसूत्रंविध्यर्थंपरंतावद्भवतीति॥ तस्मिंश्चकृ
तेयदिपूर्वस्यनिमित्तमस्तितर्हिभवत्येवतत्॥ यथाभिंधकीत्यत्रभिनद्धिइतिस्थितेपरत्वाद्धिभावेकृतेपुनःप्रसंगविज्ञानादकृब्भवति॥ त
देवंजातिपक्षेपुनःप्रसंगविज्ञानंयद्यपिसिध्यतितथापिसकृन्नाविनसिध्यति॥ तथाचजुहुनात्त्वमित्यत्रजुहुहिइतिस्थितेधिभावंबाधित्वा
परत्वात्तातङिकृतेस्यांनिवृत्तावेनस्यादेवधिः॥ व्यक्तिपक्षेतुसकलव्यक्त्युद्देश्यकस्यशास्त्रस्यव्यक्त्यंतरेचरितार्थत्वासंभवाद्विकल्पप्रसंगे
नियमार्थंसूत्रंपरमेवभवति॥ ननुपूर्वमिति॥ तथाचैतत्सूत्रबलेनतत्रपूर्वलक्षणस्यव्यक्त्यंतरमात्रविषयकल्पकल्प्यतइतिएतद्व्यक्तिविषय
कलक्षणाभावस्वयंवक्ष्यति॥ तथाचजुहुतात्त्वमित्यादेःसिद्धावपिभिंधकीत्यादिव्यक्तिपक्षेनसिध्यति॥ तस्मादशक्यमन्यतरपक्षाश्रयणेन
लक्षणप्रणयनमितिचेत्॥ सत्यं॥ अतएवलक्ष्यानुरोधात्पक्षद्वयमप्याश्रीयते॥ क्वचित्कस्मिंत्सदर्थइति॥ तत्रजातिवादिनामयंभावः॥ लघ

वाज्जातिर्वाच्या॥व्यक्तीनामानंत्येननासांवाच्यत्वेगौरवं॥वाहद्रोहाद्यन्वयस्तुलक्षिनायांव्यक्तावितिं॥व्यक्तिवादिनस्त्वाहुः॥अनुपपत्तिंविना
पिव्यक्तिप्रतीतेरनुभवसिद्धतयाव्यक्तिरेववाच्या॥त्वप्रत्ययादिकंविनाजातेःप्राधान्येनाप्रतीतेश्च॥वाहाद्यनुरोध्येवंसमंजसः॥यत्तूक्तंव्यक्ती
नामानंत्यमिति॥नैतद्बाधकं॥शक्यतावच्छेदिकायाजातेरैक्यात्॥नन्वेवंजातेरपिवाच्यत्वमायातमितिचेन्न॥अकार्यत्वेपिकार्यतावच्छेदकर
त्ववदशक्यत्वेपिशक्यतावच्छेदकत्वसंभवात्॥अतएवलक्ष्यतावच्छेदकेलक्षणानेतिनैयायिकाभ्युपगमः॥तस्माज्जातिरुपलक्षणंव्यक्तिमात्रेनु
वाच्यमिति॥यत्तुसरूपसूत्रेभाष्येवक्ष्यते॥नत्वाकृतिपदार्थैकस्यद्रव्यंनपदार्थइत्यादि॥तत्तुजातिव्यक्त्योरन्यतरेणविशिष्टस्यापरस्यवाच्यत्वेत्येवंरूपंमतंन
॥तथाचाकृत्यधिकरणेभट्टैरुक्तं॥नियोगेनविकल्पेनहेवासहसमुच्चिते॥संबंधःसमुदायोवाविशिष्टावैकयेतरेति॥तत्रजातिरेवव्यक्तिरेववावा
च्येतिद्वितीयंमतद्वयंनियोगेनेत्यनेनोपनिबद्धं॥चतुर्थचरणेनतुसरूपसूत्रोक्तंमतद्वयमुपनिबद्धमितिविवेकः॥यद्यपिजातिव्यक्तिपक्षयो
रन्यतरस्यन्यायेननाधिभावश्यकस्तथापीहशास्त्रेसंज्ञापरिभाषादिवल्लक्ष्यसिद्ध्युपायतयाउभयाश्रयणेकिमपिबाधकंनास्तीत्यवधेयम्॥
वस्तुतस्तु॥भट्टोक्तद्वितीयपक्षीमध्येविकल्पेनेतितृतीयःपक्षोत्रप्रक्रियादर्शायांस्थितः॥विकल्पश्चलक्ष्यानुरोधाद्यवस्थितोनतुवैच्छिकइत्यन्यदे
तत्॥समुच्चयपक्षंचतुर्थमाश्रित्यापिकचित्कस्यचिद्विवक्षाअपरस्यत्वविवक्षेतिगृहीत्वाप्रक्रियानिर्वाहःसुकरइतिदिक्॥यदिहिव्यक्तिरे
वेत्येतत्सार्वत्रिकमभिमतंस्यात्तर्हिजात्याख्यायामितिसूत्रंनारभेत॥यदिचजातिरेवेतितर्हिसरूपसूत्रेनारभेतेतिभाष्यं॥ननुयस्मिन्नि
एकएवाम्रइत्यत्रापिलक्षणयाजातिपरत्वेइहआम्राःसंतीतिप्रयोगंसाधयितुंजात्याख्यायामितिसूत्रमस्तु॥तथाजातिपक्षेपिनानार्थो
नुरोधात्सरूपसूत्रमस्तु॥वक्ष्यतिहिवार्त्तिककृत्॥व्यर्थेषुचमुक्तसंशयमिति॥सत्यं॥लक्ष्यानुरोधएवंपक्षद्वयाश्रयेशरणं॥अतएवो॰

दादृत्तसूत्रयोर्भाष्यकृताप्रत्याख्यास्यमानत्वेप्यदोषः॥इदानींवार्तिककारःशास्त्रस्यनियमविधिरूपतयासार्थक्यमाह॥सिद्धेशब्दार्थसंबंध
लोकतोर्थप्रयुक्तेशब्दप्रयोगेशास्त्रेणधर्मनियमोयथालौकिकवैदिकेषु॥लोकादेवहिप्रथमव्युत्पत्तिः॥अव्युत्पन्नंप्रतिव्याकरणादीनामप्रवृत्तेः
अर्थवदधातुरित्यादिहिव्याकरणंशक्तिग्रहोपजीवकं॥तथाचसमर्थसूत्रेपिवार्त्तिकं॥अर्थानादेशनादिति॥अनेकमन्यपदार्थेइत्यादिकंहि
लोकसिद्धमर्थमनूद्यसाधुत्वान्वाख्यानपरं॥ततश्चलोकादेवशब्देअर्थेतयोःसंबंधेचसिद्धे अर्थबोधनायशब्दप्रयोगेपिप्रसक्तेगवाद्यर्थव
प्रयोक्तव्यानवुगाख्यादयइतिनियमार्थंशास्त्रं॥नियमफलंतुधर्मः॥तत्रस्मार्त्तोदृष्टांतः॥ग्राड्भ्युखोन्नानिभुंजीतेत्यादिर्लौकिकशब्देनोक्तः
॥व्रीहीनवहंतीत्यादिश्चवैदिकशब्देनोक्तः॥धर्मनियमइतिचषष्ठीतत्पुरुषः॥अश्वघासादिवत्॥ननुचतुर्थीतत्पुरुषः॥प्रकृतिविकृति
भावविरहात्॥ननुयदिप्रयुक्तानामिदमन्वाख्यानंतर्हिकिमर्थमप्रयुक्ताअपिऊषतेरचक्रपेचेत्यादयोव्युत्पाद्यंतइतिचेन्न॥आर्षज्ञानंवि
न्नअप्रयुक्तानायादुरवधारणत्वात्॥महान्हिप्रयोगविषयः॥तथाचभाष्यं॥सप्तद्वीपावसुमतीत्रयोलोकाश्चत्वारोवेदाःसांगाःसरहस्या
बहुधाभिन्नाःएकशतमध्वर्युशाखाःसहस्रवर्त्मासामवेदःएकविंशतिधावाबृच्यंनवधाथर्वणोवेदःवाकोवाक्यमितिह्यसःपुराणंवै
द्यकमित्येतावान्प्रयोगस्यविषयइति॥बह्वृचानामाम्नायोवाबृच्यं॥छंदोगौक्थिकयाज्ञिकबह्वृचनटाञ्ज्य इतिञ्यप्रत्ययः॥चरणाद्धर्मा
म्नायेरित्युक्त्वाद्याम्नाये॥अथर्वणाप्रोक्तोवेदोअथर्वाउपचारात्त्रयोगइत्येके॥वसंतादिषुअथर्वन्शब्दाथर्वणइत्युभयोःपाठसामर्थ्यात्तो
क्तप्रत्ययस्यवैकल्पिकोलुगितिवुतत्वं॥अतएवभाष्येवस्यते॥तेनप्रोक्तमितिप्रकृत्यऋषिभ्योलुग्वक्तव्यः॥वसिष्ठोनुवाकः॥ततोवक्त
व्यमथर्वणोवेति॥तमधीतेआथर्वणिकःवसंतादित्वाठक्॥दंडिनउपज्ञादिसूत्रेनिष्पतनादिलोपाभावः॥आथर्वणिकस्याम्नायःआथ

र्वणः आथर्वणिकस्येकलोपश्चेति आर्वणिकादण्तत्सन्नियोगेनकलोपश्च ॥प्रकृतमनुसरामः॥एतावंतंप्रयोगविषयंपर्यालोचयितुम शक्नैरप्यस्मदादिभिर्लक्षणानुगतानांप्रयोगोस्तीत्यनुमेयं॥ अस्तिचत्त्वयोदात्ततानामपिवेदेप्रयोगः ॥सुप्तास्थेरेवतीरेवदूष॥यन्मेनरः श्रुत्यंब्रह्मचक्र यत्रानश्वकाजरसंतनूनामिति॥ननुयदिलक्षणेनानादितासिद्धिस्तर्हिवर्चंत्यादीनामपिस्यादितिचेत् न॥नहिवचिरंति परःप्रयुज्यतइत्यभियुक्तानामविगीतव्यवहारेणसामान्यशास्त्रस्यसंकोचात्॥ अभ्युपगतोहिविशेषविषयिण्यापतितस्यकर्मानधि कारस्मृत्याअग्निहोत्रादिश्रुतीनांसंकोचः विशेषविषयेणशिष्टाचारेणसामान्यस्मृतेःसंकोचश्च ॥तदुक्तंआनर्थक्यप्रतिहतानांविपरीतं बलाबलमिति ॥यत्रतुअप्रयोगः संदिग्धःशास्त्रानुगमश्चतत्रनिष्प्रत्यूहमनुमानं ॥तदुक्तं॥यद्यालक्षणमप्रयुक्तेइति॥अप्रयुक्तेअनि श्चितप्रयोगेइत्यर्थः॥निश्चितप्रयोगेतुलक्षणंनप्रवर्त्ततएवेतिनिष्कर्षः॥नचैवब्राह्मणोब्रवणादितिकल्पसूत्रप्रयोगरूपेणापिविशेष विषयंकाचारेणबुद्धोवचिरित्यादीनांसंकोचापत्तिः॥त्रिशंकायाज्ययाजनेनापिस्मृतिसंकोचापत्तेस्तुल्यत्वात्॥तत्रधर्मबुध्यानुष्ठानं नास्तीतिचेत्॥इहापिसाधुत्वबुध्याप्रयोगोनास्तीतितुल्यम्॥ यर्वाणस्तर्वाणइतिवदभियुक्तानामपिअसाधुप्रयोगस्यक्वतोर्बहिरुपपत्तेश्च॥अतएवेतिहासपुराणादिष्वपशब्दाअपिसंतीतिहरदत्तः॥नदीसंज्ञासूत्रेभाष्येपिस्पष्टमेतत्॥ केचित्तुआर्षग्रंथेष्वपिछंदसिविहितस्यव्यत्ययस्यप्रवृत्त्यासाधुतांसमर्थयंते॥नचगौणमुख्यन्यायेनमुख्येछंदस्येवतत्प्रवृत्तिः॥स्वरितत्वप्रतिज्ञयातद्धाधात्॥वक्ष्यति हिस्वरितेनाधिकारइतिसूत्रेविशेषायाधिकंकार्यमिति॥गौणमुख्यन्यायोहिस्वरितत्वप्रतिज्ञास्थलेनप्रवर्त्ततेइत्यर्थः॥उपपादयि ष्यतेचेदं॥अतएवार्षत्वात्साधुनेतितत्रतत्रोह्योषः संगच्छतइतिदिक्॥ यद्यपिअप्राप्तांशपूरणफलकोनियमविधिः॥इतरव्यावृत्तिफ

लकस्तु नित्यप्राप्तिविषयकःपरिसंख्याविधिरिति पूर्वोत्तरमीमांसयोर्व्यवहारस्तथापीहशास्त्रेपरिसंख्यापिनियमशब्देनव्यवह्रियत॥तत्र
पंचपंचनखा भक्ष्या इत्यस्यनियमोदाहरणतयाउपन्यासोनविरुद्धः॥नचासौमीमांसकरीत्यापिनियमोभवत्विति वाच्यं॥पंचातिरिक्त
भक्षणेप्रायश्चित्तविधेरसंगतत्वापत्तेः॥पंचानामभक्षणेप्रायश्चित्तापत्तौ गृहेपिनिवसन्विप्रोमुनिर्मांसविवर्जनादित्यादिस्मृतिव्या
कोपाच्च॥अतएवत्रिदोषापिपरिसंख्यैवतत्राश्रितेतिदिक्॥अत्रेदमवधेयं॥नियमातिक्रमेरूतेअपूर्वंपरंनभवति॥दृष्टस्त्वर्थावबो
धोभवत्येव॥अवहननातिक्रमेपिवैतुष्यवत्दिगंतराभिमुखभोजनेतृप्तिवच्च॥नचापभ्रंशानामवाचकतयाकथमर्थावबोधकतेति
वाच्यम्॥शक्तिभ्रमवतांबाधकाभावात्॥विशेषदृष्टिर्नस्कृद्विधाः॥तत्तद्वाचकसंस्कृतविशेषज्ञानवंतस्तद्विकलाश्च॥तत्राद्यानां
साधुस्मरणद्वाराअर्थबोधः॥द्वितीयानांतुबोध्यार्थसंबद्धार्थीनरवाचकस्यस्मृतौसत्यांतनोलक्षणयाबोधः॥सर्वनामस्मृतेर्वा॥नदर्थ
ज्ञापकत्वेनरूपेणसाधुस्मृतेर्वा॥

॥अर्थाध्याहारपक्षाश्रयणाद्वेतियथायथंबोध्यम्॥अपरेत्वाहुः
अपभ्रंशाअपिवाचकाएव॥तथाहि॥अस्मात्पदादयमर्थोबोद्धव्यइतिईश्वरेच्छाशक्तिरितिमतेभगवदिच्छायाःसन्मात्रविषयकत्वाद
पभ्रंशैस्तुबोधजननस्यशक्तिभ्रमदशायांतेनाप्यभ्युपगमादुर्वारशक्तिः॥पदार्थांतरंतदितिमतेपिकल्पकंसाध्वसाध्वोस्तुल्यमेव॥
असाधुस्मारणद्वारासाधुर्बोधकइतिवैपरीत्यस्यापत्तेश्च॥स्वीकृतंहिपरेणतिबादिस्मारितानांलाक्षीनामसाधूनामपिबोधकत्वं॥न
नुसाधूनामल्पत्वात्तत्रैवलाघवाच्छक्तिःकल्प्यतइतिचेत्॥नवयमपूर्वंकिंचित्कल्पयामः॥किंतुयथाघटजननसामर्थ्यमेवदंडादेः
शक्तिःतथाघटबोधजननसामर्थ्यमेवघटादिपदानांशक्तिः॥साचकाचागत्वापरपर्यायाशक्तिभ्रमाद्बोधंवदंतात्वयाप्यभ्युपेतैव॥श

र्वेणः आर्थर्वणिकस्येकलोपश्चेति आर्वणिकादण्तत्सन्नियोगेनकलोपश्च ॥अहतमनुसरामः॥एतावंतंप्रयोगविषयंपर्यालोचयितुम
शक्यत्वात्तदिभिर्लक्षणानुगतानांप्रयोगोस्तीत्यनुमेयं॥अस्तिचत्वयोदात्तानामपिवेदेप्रयोगः॥सुसास्थेरेवतीरेवदूष॥यन्मेनरः
श्रुत्यंब्रह्मचक्र यत्रानश्वकाजरसंतनूनामिति॥ननुयदिलक्षणेनानादितासिद्धिस्तर्हिवर्चत्यादीनामपिस्यादितिचेत् न॥नहिवृद्धिरिति
परःप्रयुज्यतइत्यभियुक्तानामविगीतव्यवहारेणसामान्यशास्त्रस्यसंकोचात्॥अभ्युपगतोहिविशेषविषयिणापतितस्यकर्मानधि
कारस्मृत्याअग्निहोत्रादिश्रुतीनांसंकोचः विशेषविषयेणशिष्टाचारेणसामान्यस्मृतेः संकोचश्च॥तदुक्तंआनर्थक्यप्रतिहतानांविपरीतं
बलाबलमिति॥यत्रतुअप्रयोगः संदिग्धःशास्त्रानुगमश्चतत्रनिश्चित्यूहमनुमानं॥तदुक्तं॥यथालक्षणमप्रयुक्तेइति॥अप्रयुक्तेअनि
श्चितप्रयोगेदित्यर्थः॥निश्चितप्रयोगेतुलक्षणंनप्रवर्त्ततएवेतिनिष्कर्षः॥नचैवब्राह्मणोब्रवणादितिकल्पसूत्रप्रयोगरूपेणापिविशेष
विषयंकाचारेणबुवोवचिरित्यादीनांसंकोचापत्तिः॥त्रिशंकाद्यपाज्ययाजनेनापिस्मृतिसंकोचापत्तेस्तुल्यत्वात्॥तत्रधर्मबुध्यानुष्ठानं
नास्तीतिचेत्॥इहापिसाधुत्वबुध्याप्रयोगोनास्तीतितुल्यम्॥यर्वाणस्तर्वाणइतिवदभियुक्तानामपिअसाधुप्रयोगस्यक्रतोर्बहिरुपप
त्तेश्च॥अतएवेतिहासपुराणादिष्वपशब्दाअपिसंतीतिहरदत्तः॥नदीसंज्ञासूत्रेभाष्येपिस्पष्टमेतत्॥केचित्तुआर्षग्रंथेष्वपिछंदसिविहि
तस्यव्यत्ययस्यप्रवृत्त्यासाधुतांसमर्थयंते॥नचगौणमुख्यन्यायेनमुख्येछंदस्येवनत्वप्रवृत्तिः॥स्वरितत्वप्रतिज्ञयातद्धाधात्॥वस्यति
हिस्वरितेनाधिकारइतिसूत्रेविशेषायाधिकंकार्यमिति॥गौणमुख्यन्यायोहिस्वरितत्वप्रतिज्ञास्थलेनप्रवर्त्ततेइत्यर्थः॥उपपादयि
ष्यतेचेदं॥अतएवार्षत्वात्साधुनेतितत्रतत्रोह्योषःसंगच्छतइतिदिक्॥यद्यपिअप्राप्तांशपूरणफलकोनियमविधिः॥इतरव्यावृत्तिफ

लकस्तु नित्यशक्तिविषयकः परिसंख्याविधिरिति पूर्वोत्तरमीमांसयोर्व्यवहारस्तथापीहशास्त्रेपरिसंख्यापिनियमशब्देनव्यवह्रियते॥तेन
पंचपंचनखा भक्ष्या इत्यत्राप्यनियमोदाहरणतयाउपन्यासोनविरुद्धः॥नचासौमीमांसकरीत्यापिनियमोभवत्विति वाच्यं॥पंचातिरिक्त
भक्षणेप्रायश्चित्तविधेरसंगतत्वापत्तेः॥पंचानामभक्षणेप्रायश्चित्तापत्तौ गृहेपिनिवसन्विप्रोमुनिर्मांसविवर्जनादित्यादिस्मृतिव्या
कोपाच्च॥अतएवत्रिदोषापिपरिसंख्यैवतत्राश्रिनेतिदिक्॥अत्रेदमवधेयं॥नियमातिक्रमेकृतेअपूर्वंपरंनभवति॥दृष्टस्त्वर्थावबो
धोभवत्येव॥अवहननातिक्रमेपिवैतुष्यवत्दिगंतराभिमुखभोजनेतृप्तिवच्च॥नचापभ्रंशानामवाचकतयाकथमर्थावबोधकतेति
वाच्यम्॥शक्तिभ्रमवतांबाधकाभावात्॥विशेषदृष्टिनस्तुद्विविधाः॥तत्तद्वाचकसंस्कृतविशेषज्ञानवंतस्तद्विकलाश्च॥तत्राद्यानां
साधुस्मरणद्वाराअर्थबोधः॥द्वितीयानांतुबोध्यार्थसंबद्धार्थांतरवाचकस्यस्मृतौसत्यांतत्तोलक्षणयाबोधः॥सर्वनामस्मृतेर्वा॥तदर्थ
ज्ञापकत्वेनरूपेणसाधुस्मृतेर्वा॥ ॥अर्थाध्याहारपक्षाश्रयणादेतियथायथंबोध्यम्॥अपरेत्वाहुः
अपभ्रंशाअपिवाचकाएव॥तथाहि॥अस्मात्पदादयमर्थोबोद्धव्यइतिईश्वरेच्छाशक्तिरितिमतेभगवदिच्छाणःसन्मात्रविषयकत्वाद्
पभ्रंशैस्तुबोधजननस्यशक्तिभ्रमदशायांतेनाप्यभ्युपगमादुर्वाराशक्तिः॥पदार्थांतरंतदितिमतेपिकल्पकंसाध्वसाध्वोस्तुल्यमेव॥
असाधुस्मारणद्वारासाधुर्बोधकइतिवैपरीत्यस्यापत्तेश्च॥स्वीकृतंहिपरेणतिबादिस्मारितानांलक्षणानामसाधूनामपिबोधकत्वं॥न
नुसाधूनामल्पत्वात्तत्रैवलाघवाच्छक्तिःकल्प्यतइतिचेत्॥नवयमपूर्वंकिंचित्कल्पयामः॥किंतुयथाघटजननसामर्थ्यमेवदंडादेः
शक्तिःतथाघटबोधजननसामर्थ्यमेवघटादिपदानांशक्तिः॥साचकाणत्वापरपर्यायाशक्तिभ्रमाद्बोधंवदंतात्वयाप्यभ्युपेतैव॥श

क्तिग्रहस्यभ्रमत्वंपरंत्यज्यनांविषयाबाधादितिब्रूमः॥ननुवेवंगौणमुख्यविभागोछेदःसर्वेसर्वस्यवाचकाइतिपर्यवसानादितिचेत्॥ त्वत्पक्षेपीश्वरेच्छायागौणादावतिप्रसंगस्यतुल्यत्वात्॥सुरद्वारावेनपृच्छामीतिचेत्॥प्रचुरतरप्रयोगतद्विरहाभ्यांगौणमुख्यविभागइ तिगृह्यते॥ननुजनकत्वेनागृहीतादपितद्धिकारणात्कार्योदयःस्यादेवेतिचेत्॥पदार्थस्मृतिरापाद्यतेषांवाक्यार्थबोधोवा॥नाद्यः॥संबं धग्रहंविनातद्योगात्॥नांत्यः॥द्वाराभावात्॥पदार्थस्मरणंहिद्वारं॥एवंचमहदेवलाघवं॥साधुस्मारणकल्पनाक्लेशश्चनभवतीति॥ साधुत्वंतुजातिविशेषात्मकमित्युक्तमेव॥समानायामर्थावगतौशब्दैरापशब्दैश्चेतिभाष्यमप्येतत्पक्षपातीतिदिक्॥इतिअपशब्दा नांवाचकत्वावाचकत्वविचारः॥प्रयोगशब्दमुपाददानोवार्त्तिककारःप्रयोगाद्धर्मेनतुज्ञानमात्रादितिसूचयति॥पुनश्चैतत्॥एकःशब्दः सम्यग्ज्ञातःसुप्रयुक्तइत्यत्रज्ञानप्रयोगयोरुपादानस्याविशेषेपिप्रतिपत्त्यधिकरणन्यायेनयदैकस्मादपूर्वंतदेतरत्तदर्थमितिप्रयोगात्फ लंज्ञानंनतुतदंगमित्यभ्युपगमात्॥प्रयोगस्यफलप्रतिसंनिहितत्वाच्च॥ज्ञानस्यतुव्यवहितत्वात्॥ज्ञानस्यप्रयोगांगतायांदृष्टार्थता लाभाच्च॥उक्तंचभट्टैः॥सर्वत्रैवहिविज्ञानंसंस्कारत्वेनगम्यते॥परांगंचात्मविज्ञानादन्यत्रेत्यवधार्यतामिति॥अतएवतरतिब्रह्महत्यांयोश्वमेधेनयजतेयउचैनमेवंवेदित्यादिष्वपिज्ञानपूर्वकानुष्ठानात्फलमित्येवसिद्धांतः॥तदुक्तंवार्तिककृता॥नत्वल्पंवेदशब्देनेति॥वेदःशब्दोविधायकोयस्यार्थस्यअश्वमेधादेस्तेनेदंतुल्यमित्यर्थः॥तेनवैदिकशब्दानामपिपक्षकोटिप्रविष्टतयादृष्टांतासंग तिरितिनाशंकनीयं॥तेसुराइतिपूर्वोदात्तश्रुतिरपिअपशब्दप्रयोगात्स्वत्ववायंबोधयंतीसाधुप्रयोगाद्धर्मंगमयति॥वाजसनेयि नांब्राह्मणेतस्मादेषाव्याकृतावागुद्यतइतिश्रुतिरप्येवं॥भाष्येतुअभ्युपेत्यवादेनसाधुज्ञानात्फलमित्ययमपिपक्षःसमर्थितः॥न

चैवंअपशब्दज्ञानाद्धर्मोपिस्यादितिवाच्यं॥यावद्वचनंवाचनिकमित्यभ्युपगमात्॥नम्लेच्छितवाइत्यादिनाअसाधुप्रयोगस्यैवनिषेधा
च्च॥नचव्याकरणाध्ययनेप्रवृत्तस्यपरिनिष्ठितपचत्यादिबोधार्थंडुपचष्अभृतीनांप्रयोगोप्यावश्यकएवेतिवाच्यम्॥तदीयज्ञानमात्रेण
विवाहात्॥अतएवालौकिकंप्रक्रियावाक्यमूहमात्रस्यगोचरइतिनित्यसमासेष्वस्वपदविग्रहाभ्युपगमः॥अथव्युत्पादनार्थंनत्वयो
गआवश्यकइत्याग्रहस्तथापिनक्षतिः॥अनपभ्रष्टत्वेनतेषांप्रत्यवायाजनकत्वात्॥नत्येतेशक्तिवैकल्यादिप्रयुक्ताःयनगाव्यादिसाम्यं
भजेरन्॥अश्वसादित्वादसाधुतेत्याग्रहस्तथापिनक्षतिः॥शब्दस्वरूपपरत्वात्॥अनुकरणानांसर्वत्रसाधुताभ्युपगमात्॥नहिहेलयो
हेलयइतिक्तिनिपाठोपिप्रत्यवायजनकः॥शब्दस्वरूपमात्रपराएतेभिन्नाएवसोधवश्चेतितुतुल्यं॥अतएवस्वाहेद्रशत्रुर्वर्द्धस्वेतिक्र
तावाद्युत्तस्यपाठेपितत्प्रत्याय्यस्यार्थपरस्यऊहितस्यानाम्नानादमंत्रतयाजपादिपर्युदासेनमंत्रेविधीयमानाएकश्रुतिन्नप्रसक्ते
तिप्रागुक्तं॥अतएवसाधुत्वासाधुत्वयोरेकस्मिन्नसङ्गावोअभावश्चेतिविरुद्धस्यदुरुपपादतयाभर्थभेदाच्छब्दभेददितिदर्शनंप्रवृत्तम्।
नचप्रकृतिवदनुकरणमित्यतिदेशेनअपशब्दानुकरणस्यअसाधुताशंक्या॥असाधूनांशास्त्रीयप्रकृतित्वाभावात्॥असाधुत्वस्यशा
स्त्रीयकार्यं त्वाभावाच्च॥नत्यशास्त्रीयमप्यतिदिश्यतइतिन्यायकल्पतरुसूत्रेभाष्येस्फुटमेतत्॥डुपचष्अभृतिप्रयोगादपशब्दज्ञानाद्धाप्रत्य
वायोनास्तीतिप्रागुक्तमीत्यास्थितेपिअभ्युपेत्यापिप्रत्यवायंभाष्येकूपखानकन्यायउदाहृतः॥नथाहि॥कूपंखननप्रवृत्तोपिकर्दमेनलिप्य
तएवनस्यापिनतोलब्धेनजलेनतंमलंदूरीकरोतिफलांतरंचलभतेनत्थेहापिपरिनिष्ठितरूपज्ञानात्पूर्वोत्पन्नप्रत्यवायनिरासंफलांतरंचल
भतइति॥सोयंकूपखानकन्यायः॥कूपंखननीतिविग्रहेकर्मण्यणिप्राप्तेब्राह्मणसरूपन्यायेनण्वुल्॥नित्यसमासत्वाभावात्कूपस्यखानकइ

तिस्वपदविग्रहः॥नचशिल्पिनिष्वुनासरूपेणण्वुलोबाधः स्यादितिवाच्यम्॥इहखर्नेनकर्तृत्वमात्रस्यविवक्षयाशिल्पित्वस्याविवक्षित
त्वात्॥तस्मान्नसर्वयापिगाव्यादिप्रयोगेप्रत्यवायइतिस्थितं॥तत्रेदंभाष्येसिद्धांतितम्॥याज्ञेकर्मण्येवायं॥नमेच्छितवाइत्यस्यक्रतुप्रक
रणेपाठात्॥क्रतुप्रयोगाद्धिहिंक्रुअपशब्दंप्रयुंजानोनदुष्यति॥एवंहिश्रूयते॥यर्वाणस्तर्वाणोनामऋषयोबभूवुःप्रत्यक्षधर्माणःपरापरज्ञा
इति॥प्रत्यक्षधर्माणोयोगजधर्मबलेनसाक्षात्कृतधर्माः॥अत्रायंश्रुतेराशयः॥योगिनएतेविरक्तयतिशयाल्लौकिकेष्वर्थेष्वाग्रहविरहेणय
थातथास्माकंभवन्तितिविवक्षवोयद्वानस्तद्वानइतिवक्तव्येयर्वाणस्तर्वाणइत्यूचुः॥याज्ञेकर्मणिपुनःसाधूनेवप्रयुक्तवंतः तेनयर्वाणस्त
र्वाणइत्येवंरूपमेवसंज्ञांमुनयोलेभिरइति॥भट्टाश्चाहुः॥स्त्र्युपायमांसभक्षादिःपुरुषार्थेमपिश्रितः॥प्रतिषेधःक्रतोरंगमिष्टःप्रकरणाश्र
यादिति॥अपरेत्वाहुः॥क्रतोर्बहिःप्रयोगेपिपुरुषःप्रत्यवैतीति॥तेषामयमाशयः॥नानृतंवदेदित्यनारभ्याधीनःपुरुषार्थोपिनिषेधस्तावद
स्तीतिनिर्विवादं॥तत्रनिषेध्यमनृतंद्विधा॥शब्दानृतमर्थानृतंचेति॥शब्दस्यार्थस्यवाविपरीतप्रतिपत्तिहेतुभूतमुच्चारणमनृतवदनं॥य
वंचयथाअर्थंनृतंवदतःप्रत्यवायस्तथाशब्दानृतमपीतितुल्यं॥क्रतुमध्येपुनरपभाषणेपुरुषोपिप्रत्यवैतिक्रतुरपिविगुणइतिवचन
द्वयबलात्सिध्यतीतिदिक्॥यथाचप्रयोगेसाधूनांनियमस्तथासाधुत्वज्ञानेपिव्याकरणस्यनियमएवेत्यवधेयं॥व्याकृतावागुद्यतइति श्रु
तेः॥व्याकृताव्याकरणसंस्कृतेतिहितदर्थः॥व्याकरणशब्दश्चयोगरूढ्यालक्ष्यलक्षणसमुदायपरः सूत्रमात्रपरोवेतिपक्षद्वयमपि
भाष्येस्थितम्॥तत्राद्यपक्षेसूत्रमात्रमधीयानेवैयाकरणशब्दप्रयोगोभाक्तः समुदायवाचकाहिशब्दाः क्वचिदवयवेपिप्रयुज्यंते॥यथापू
र्वेपंचालाउत्तरेपंचालाइति॥द्वितीयपक्षेतुव्याकरणस्यसूत्रमितिप्रयोगोराहोःशिरइतिवन्नेयः॥अष्टाध्याय्याएकदेशः सूत्रमित्यवयवा

बयविभावेषष्ठीतिवास्तु॥अस्यवनस्यायंवृक्षइत्यादिवत्॥नचैवमपिसूत्रमात्राच्छब्दाप्रतिपत्तौनियमानुपपतिः॥पदच्छेदविग्रहयोज
नादिभिःसूत्रार्थस्येवाभिव्यंजनात्॥अतएवत्युत्सूत्रमुच्यमानमप्युपेक्ष्यते॥यत्रैवतुसूत्रस्यतात्पर्यलेशोप्यस्तितदेवतुगृह्यते॥तदुक्तं
॥सूत्रेष्वेवहितत्सर्वंयद्दृत्तौयच्चवार्त्तिकइति॥अतएववबहुलग्रहणादिकंसार्थकमितिदिक्॥ननुवेवंकिंवर्णोपदेशेन॥नहितद्बलेनकस्यचि
च्छब्दस्यसाधुत्वमवगम्यते॥नचकलध्वातादिदोषरहितवर्णस्वरूपप्रतिपत्तिरेवतत्फलमितिवाच्यम्॥लोकतएवाविप्लुतवर्णप्रतीतेः
रवश्यंवाच्यत्वात्॥अन्यथाप्लुतादिपाठस्यापीहकर्त्तव्यतापत्तेः॥तदुक्तं॥इष्टबुध्यर्थश्चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्यु
पदेशइति॥एकश्रुत्यासूत्रपाठादुदात्तादिस्वरत्रयस्यापिकर्त्तव्यःपाठइत्युक्तं॥त्रैस्वर्येणपाठेहिअन्यतमस्योच्चारणादेवसिद्धौहूयोरेव
कर्त्तव्यतांब्रूयात्॥अतएवचलोकेत्रैस्वर्यमेकश्रुत्यासहविकल्प्यतइतिज्ञाप्यते॥एतच्चविभाषाछंदसीत्यत्रस्फुटीकरिष्यामः॥ननुनिर्दे
शस्यजातिपरत्वात्सुनादिसंग्रहःसेत्स्यतीतिचेन्न॥संवृतकलप्रभृतीनामपिसंग्रहापत्तेः॥तदुक्तं॥आकृत्युपदेशात्सिद्धमितिचेत्सं
वृतादीनांप्रतिषेधदृष्टेः॥तत्रह्रस्वस्यअवर्णस्यसंवृतगुणकत्वेपितदितरेषामचांसंवृतत्वेदोषः॥आदिशब्दात्कलः॥सचस्वोचितस्थान
श्रुतः॥तथाश्वासभूपिष्टतयाह्रस्वोपिदीर्घवल्लक्ष्यमाणोध्मातः॥एवंदीर्घोपिह्रस्ववत्कालसंकोचेनोच्यमानोर्धकः॥एवंकरणादिभ्रंशाद
पिबहवोदोषाःशिक्षाप्राप्तिशारव्यादिषुप्रसिद्धाः॥तत्तद्दोषविशिष्टानामपिअत्वादिजात्याक्षींतत्त्वाज्ज्ञातिपरनिर्देशपक्षेतेष्वतिव्याप्ति
रितिस्थितम्॥नचगर्गादिविदादिपाठस्यतंत्रेणोभयार्थतयावर्णशुद्धिलाभः॥अपठितेषुप्राप्तिपदिकेषुतथाप्यगतेः॥स्यादेतत्॥सर्वो
अज्व्यक्तयोर्हलब्व्यक्तयश्चशास्त्रांतेशुद्धाःपठिष्यंते॥अअइत्तिवत्॥नचैवंगौरवं॥तद्बलेनसर्वेषामनुबंधानांप्रत्याख्यानात्॥इत्संज्ञा

लोपयोरपित्यागात्॥तथाहि॥शीङःधातोर्ङकारंपरित्यक्ष्यामः॥ईकारंचैकलंपठिष्यामः॥ङितआत्मनेपदंइत्यस्य स्थानेकलाद्यात्मनेपदमितिपठिष्यामः॥कलश्चप्रक्रियादशायामेव॥यद्याङकारः॥प्रयोगेतुशुद्धएव॥प्रत्यापत्तेःशास्त्रांतेकरणमपिशास्त्रीयमकलकार्यप्रत्यसिद्धनालाभाय॥एवंचप्रक्रियायांदोषस्यकलादेराश्रयणेपिपरिनिष्ठितेरूपेनकश्चिद्दोषः॥यथायथान्यासपक्षेपिअकारस्य विवृततायाप्रक्रियामात्रविषयानतुप्रयोगसमवायिनीतद्वदिहपक्षेकलादयोपीतिनकश्चिद्दोषः॥धर्मिकल्पनातद्वतिन्यायश्चेहबोध्यः॥ङकारादयोद्विधर्मिणएवत्वयापाठ्याः॥मयातुउभयपठनीयस्यईकारस्यकलत्वमात्रंकल्पमिति॥नन्वस्मिन्पक्षेस्वरितञितइत्यत्रकथंकार्यमितिचेत्॥धातातकर्त्रभिप्रायइति॥एवंआद्यंतौटकितावित्यत्रआद्यंतौकलधातावितिइडाद्यागमाश्चनिरनुबंधाःकलाःपाठ्याः॥आनुगादयोधातवः॥ङकुञ्इत्यस्यस्थानेकइतिहिदोषंपाठ्यं॥आदिरंत्येनेत्यत्रापिआदिकलौसहेत्युक्तंअउइत्यादिकाःसंज्ञाःकरिष्यंते॥कलेनेतितृतीयानिर्देशेसतितुअप्राधान्यात्सिद्धांतइवचरमवर्णस्यसंज्ञानस्यात्॥ङलोपइत्यादौअणइत्यपनीयअओरितिकरिष्यते॥स्वरसंधिस्त्वसंदेहायनकरिष्यते॥तस्मात्सर्वमनुबंधकार्यादिकंकलादिभिरेवसिध्यतीतिचेत् सत्यं।सिध्यत्येवं॥अपाणिनीयंतुभवतिइतिचेत् अत्रोच्यते॥इएसिद्ध्यर्थोवर्णोपदेशः॥एवंचाकृत्युपदेशादेवउदात्तादिसिद्धिमंगीकृत्यकलादिष्वतिप्रसंगइत्थंपरिहार्यः॥आगमाश्चविकाराश्चप्रत्ययाःसहधातुभिः॥उच्चार्यंतेततस्तेषुनेमेप्राप्ताःकलादयइति॥यत्तुअग्रहणेषुप्रातिपदिकेषुप्राप्ता एवेति॥तन्न॥त्वयापिप्रतिपदपाठस्यावश्याश्रयणीयत्वात्॥अन्यथाशश्इत्यत्रषष्ठइत्यपिस्यात्॥मंचकेमंजकइति॥पलाशेपलाषइति॥स्यादेतत्स्वरवर्णानुपूर्वीनिर्णायायदिप्रतिपदपाठस्तर्हिकलादिनिवृत्तिर

-पितत एवास्तु ॥ उणादिसूत्रात्तृषोदरादिसूत्राद्वासाधुत्वाभ्यनुज्ञानंविशेषावधारणंतुनिघंटादिनेतिचेत्कलादिनिरुक्तिरपिशिक्षादिग्रं
थेनास्तु ॥ सत्यं ॥ आनुषंगिकीकलादिनिरुक्तिः ॥ वर्णोपदेशस्यमुख्यंफलंतुप्रत्याहारनिष्पत्तिः ॥ प्रत्याहारशब्दस्तुअणादिसंज्ञापरः ॥
प्रत्याद्रियंतेवर्णाएष्विति व्युत्पत्तेः ॥ नचग्रहणकशास्त्रेणनिष्पादितासुअकारादिसंज्ञास्वतिप्रसक्तिः ॥ योगरूढ्यभ्युपगमात् ॥ तस्मादादि
रंत्येनेत्येतत्सूत्रसिद्धाः संज्ञाः प्रत्याहारशब्दवाच्यास्तन्निष्पत्तयेचवर्णोपदेशइतिस्थितम् ॥ ॥ इतिश्रीशब्दकौस्तुभेप्रथमस्याध्यायस्य
प्रथमेपादेप्रथममान्हिकंसमाप्तम् ॥ १ ॥ ॥ श्रीगणेशायनमः ॥ अइउण् ॥ संज्ञासूत्रमिदं ॥ आदिरंत्येनसहेतेत्यनेनसहैकवाक्यत्वा
त् ॥ अइउणित्येषामादिरकारः अंत्येनणकारादिनासहितःसन्आद्यंताभ्यामक्षिसानांमध्यगानांस्वस्यचसंज्ञेतिहिवाक्यार्थः ॥ अत्रअकारा
दीनांस्वरूपेणअनुकार्येणवासतोप्यर्थवत्त्वस्याविवक्षितत्वात्प्रातिपदिकत्वेनेतिगवित्यपमाहेत्यादाविवविभक्तेरनुत्पत्तिः सुपोसुलुगि
तिलुग्वा ॥ छंदोवत्सूत्राणीतिभाष्यकारैरप्यछंदोंगेषुव्याकरणसूत्रेष्वपिछांदसकार्योतिदेशात् ॥ यूस्त्याख्यावितिसूत्रेछंदःप्रदेशेषुगो
णमुख्यन्यायेनप्रवर्त्तनइत्यिवक्ष्यमाणत्वाद्वा ॥ स्यादेतत् ॥ स्वरसंधिनेहभाव्यम् ॥ तत्रअइत्यत्रविभक्तेःरुत्वयत्वलोपेषुइक्सइहेत्यादा
विवलोपासिध्यासंधिर्नेतिसमाधानेपिइकारस्यइकोसवर्णइतिऋकारस्यऋत्यकइतिप्रकृतिभावसंभवेपिएदेतोरयायावावावौदुवारौ ॥ यत्तुव
र्णोपदेशकालेअजादिसंज्ञानामनिष्पादत्तंसंधिर्नेति ॥ तच्चिंत्यं ॥ वर्णोपदेशेइत्संज्ञायांअच्प्रत्याहारेचनिष्पन्नेप्रवर्त्तमानानायणादीनां
सुध्युपास्यइत्यादौनटस्थइवउद्देश्यतावच्छेदकरूपाक्रांतेवर्णोपदेशादावपिप्रवृत्तेरावश्यकत्वात् ॥ अन्यथातुल्यास्यप्रयत्नमित्यादौ
सवर्णदीर्घोनस्यात् ॥ तथाअर्थवत्सूत्रांतर्गतानांप्रातिपदिकत्वंप्रत्ययःपरश्चेत्यादौसुप्रत्ययोत्पत्त्याप्रातिपदिकात्द्व्येकयोर्द्विवचनैकव

चनेवहुषुवहुवचनमित्यादौतत्तद्विभक्तिःसमजुषोरित्यत्रुःस्वरवसानयोरितिसूत्रेविसर्गश्चनस्यादितिसर्वोपधूवःस्यात्॥स्वाध्यायो
ध्येतव्यइत्यस्यनेहमानेत्यादिश्रुतेश्चस्वस्मिन्नपिकथाप्रवृत्तिस्तथादीर्घादिनामपीतिचेत्तुल्यंषणादावपि॥नन्वेवंग्रहणकशास्त्रम
पिअणोप्रकृत्यस्येत्यादौतटस्थइवस्वस्मिन्नपिप्रवर्त्तेत॥ततश्चदीर्घाणामनण्त्वेनसवर्णग्राहकत्वंनास्तीतिसिद्धांतोपिभज्येतेतिचे
न्नैवंस्यात्॥पदार्थसंसर्गोहिवाक्यार्थः॥तद्बोधश्चपदार्थबोधोत्तरभावीनथाचअण्शब्देनयेउपस्थितास्तेषांसवर्णग्राहकत्वंसू
त्रार्थः॥अण्शब्दश्चआदिरंत्येनेतिसूत्रेणअक्षरसमाम्नायपठितेषुसंकेतितइतितानेवात्रोपस्थापयति॥तथाचअष्टादशानामपि
अकारःसंज्ञेतिपर्यवसन्नेसूत्रांतरेष्वस्यचावित्यादिषुअकारोष्टादशानामुपस्थापकइत्युचितं॥ननुग्रहणकसूत्रेपि॥एतद्वाक्यार्थ-
बोधात्प्रागष्टादशस्वगृहीतशक्तिकत्वात्॥नहिमिचिवृद्धिरित्यादावदैचामुपस्थापकोपिवृद्धिशब्दोवृद्धिरादैजितिसंज्ञासूत्रेतानुप
स्थापयति॥किंतुस्वरूपमेव॥संज्ञासूत्रेचसामानाधिकरण्यात्तदैचावृद्धिशब्दवाच्यत्वावधारणेसूत्रांतरेषुसंज्ञिनामुपस्थितिर्निर्बाधेति
दिक्॥तस्मादङ्णित्यादौस्वरसंधिःप्राप्नोत्येवेतिचेत्॥सत्यं॥संहिताविरहान्नयणादयः॥अनित्याहिवाक्येसंहिता॥उक्तंच॥संहि-
तैकपदेनित्यानित्याधातूपसर्गयोः॥नित्यासमासेवाक्येतुसाविवक्षामपेक्षतइति॥समासस्यपृथग्ग्रहणंगोबलीवर्दन्यायेन॥एक
पदइत्यनेनैवतत्संग्रहसिद्धेः॥इयंचप्राचांपरिभाषाएकदेशानुमतिद्वारासंहिताधिकारेणैवज्ञापिता॥असंहितायांयणादिनिवृत्त्य
र्थाहिसंहिताधिकारः॥अतएव॥हेरोहिणित्वमस्त्रीलवतीषुधन्याएनंनिवारयपतिंसरिदुर्विनीतं॥जालांतरेणममवासगृहंप्रवि
ष्टःश्रोणीतटंस्पृशतिकिंकुलधर्मएषइत्यत्रधन्याएनमित्यस्यनासाधुता॥अतएवआलंकारिकैश्च्युतसंस्कृतित्वापेक्षयापृथगे

वविसंधितानामदोषांतरंगणितं॥तच्चेहास्तीत्यन्यदेतत्॥नन्वेवमप्यसंहितायांकालव्यवायादेवयणादेरप्राप्तौकिंसंहिताधिकारेणनिषेधेन॥
संहिताधिकारबहिर्भूतानांकालव्यवायेपिप्रवृत्तिंज्ञापयितुंतदारंभात्॥तेनअग्नाविष्णूइत्यग्नाविष्णूइत्यादावग्रहेप्यानङादयः॥अग्निमीळे
इत्यत्रपदविभागेपिनिघातः॥तेनेहासंज्ञामित्यादौनसादयश्चसिध्यंति॥नन्वेवंपुरःहितमित्यत्रहेहिशब्दस्यस्वरितत्वंबह्वृचैःपठ्यमानमसंगतंस्यात्॥
॥तथोपूर्वाचचीतिसंहिताधिकारआज्ञास्त्रसमासेरितिसिद्धेनान्॥स्वरितविधेश्चतदंतभूतत्वात्॥अतएवतैत्तिरीयावग्रहेहितशब्दं
मनुदात्तंपठंति॥अतएवचबह्वृचाअग्निमीळइत्यस्यपदविभागपाठेनिघातमेवकुर्वंतिंननुस्वरितमपीतिचेत्॥सत्यं॥प्रातिशाख्येय
विशेषविधानात्स्वरितमसिद्धिः॥उक्तंहि॥यथासंधीयमानानामेकीभवतांस्वरः॥उपदिष्टस्तथाविद्यादक्षराणामवग्रहइति॥तेनसं
अद्उणित्यादौसंहिताविरहान्नसंधिरितिस्थितम्॥केचित्तुचादिषुपाठान्निपातसंज्ञा॥निपातएकाजितिप्रगृह्यत्वं॥ततःप्रकृतिभावः
॥यद्यपि अनिपातानामपीहयग्रहणमिष्टंदध्यश्वोदाक्षिःसाक्षिरित्यादिसिद्ध्येतथापिनसर्वोव्यक्तयः साक्षान्निर्दिष्टव्याः॥आनंत्यात्॥किंतु
काचिद्व्यक्तिर्निर्दिश्यमानास्वसदृशीमितरांअपिगृह्णातीतिवक्ष्यते॥तत्रकिंनिपातव्यक्तिरेवनिर्दिश्यतांउततदितरेतिसंशयेआद्येकोर
दिरेवयुक्ता॥संहिताकार्यविरहेणनिर्दिश्यमानरूपस्यस्फुटप्रतीतिसिद्धेरित्याहुः॥कारप्रत्ययस्तुनभवति॥बहुलग्रहणात्॥सहिरोगा
रव्यायोण्वुल्बहुलमित्यत्रोपसंख्यानतः॥अन्येतुइकृत्तिपौधातुनिर्दृशइत्यतोनिर्दृशशब्दःकारप्रत्ययविधावनुवर्तते॥निर्देशश्चप्रतिप
दनं॥तेनप्रयोगविशेषनिष्ठानांवर्णानांप्रतिपादनेप्रत्ययः इहंतुआनुपूर्वीसंपादनमात्रेतात्पर्यंननुकविपुत्रइत्यादौदृष्टानामकारादीनांप्रति
पादनेअतःकारप्रत्ययाभावइत्याहुः॥अनुकार्यानुकारणयोरभेदविवक्षापक्षेतुअर्थवत्त्वस्याविवक्षितत्वेनवर्णावाचित्वाभावात्कारप्रत्य

याभावः॥ अत्रेदमवधेयं॥ अकारः संवृतः॥ विवृतकरणाः स्वराः तेभ्यः ए ओ विवृततरौ ताभ्यामै औ विवृततरौ ताभ्यामप्याकारः संवृतो कार इति शिक्षावाक्यात्॥ विवृतसंवृतादयः शब्दाः शुक्लादिवद्धर्मे धर्मिणि च प्रयुज्यन्ते तेन विवृतंकरणं प्रयत्नो येषां ते तथाभूताः स्वमइः कारादय इत्यर्थः॥ यत्तु छंदोगविशेषैरिवर्णोवर्णऋकाराणां संवृततामिच्छद्भिरुक्तं ह्रस्वः संवृता अन्यत्राभवसाम्र इति॥ तन्न तदीयशाखावा विशेषमात्रपरं नतु सार्वत्रिकं॥ यथासात्यमुग्रिराणायनीयानामेव सुजातेएश्वसूनृते अध्वर्यो ओद्रिभिः सुतमित्यादावेकमात्रएकारओ कारश्चनत्वनेकेषांलक्ष्यते॥ इकारादौवायथातथास्तु॥ अकारस्यसंवृतत्वंतुनिर्विवादमेव॥ तथाप्यसौप्रक्रियादशायांअकारेणदीर्घेण पुनेनचसहसावर्ण्यसिद्ध्यैविवृततरोस्मिन्सूत्रेनिर्दिश्यते॥ विवृततरत्वंचप्रयोगदशायांमाभूदित्येतदर्थंशास्त्रंनेअअइतिसूत्रेकृतं॥ तेनहिविवृततरमनूद्यसंवृतोविधीयते॥ नचानुवाद्यसमर्पकेण अकारेणदीर्घप्लुतयोरपिग्रहणकशास्त्रबलात्संग्रहःस्यादितिवाच्यं॥ अदेङ्गुणइतिपरनिर्देशस्यएकशेषेणह्रस्वषट्कनिर्देशस्यवासिद्धांमविष्यमाणत्वात्॥ वक्ष्यतिहिनत्रवार्तिककारः॥ सिद्धंतुतपरनिर्देशात्एकशेषनिर्देशाद्वास्वरानुनासिकभिन्नानांभगवतःपाणिनेःसिद्धमिति॥ शास्त्रांतेचविधीयमानंप्रत्यापत्तिवच्चनमेवज्ञापकंदृहविवृतउपदिश्यमानस्यार्थस्य॥ यत्तु अत्रत्यंवार्त्तिकं अकारस्यविवृतोपदेशआकारग्रहणार्थइति॥ तत्रविवृतशब्दोविवृततरत्वपरः॥ उदात्ततरशिक्षानुरोधात्॥ ननुशुक्लतरोपिशुक्लोभवत्येवयथातथेहविवृततरस्याप्याकारस्यविवृतत्वानपायात्सावर्ण्ययथाश्रुतेपिसेत्यतीतिचेत्न॥ सवर्णसंज्ञायोतुल्यप्रयत्नत्वस्यविवृततरत्वाद्यवांतरधर्मपुरस्कारेणैववक्तव्यत्वात्॥ अन्यथा ओदौतोरपिसावर्ण्यापत्तौगांगइत्यत्रैवनावंनावग्लावंग्लावइत्यादावपिऔतोमशसोरित्यात्वंप्रवर्त्तेत॥ ईदूदेद्विवचनंप्रगृह्यसंज्ञाकरणंवावहैइत्यादावपिप्रवर्त्तेत॥

एङः पदांतादतीति पूर्वरूपं कस्मै अदात् विष्णो अस्तीत्यादावपि स्यात्॥ किंचैवंहकारादीनामीषद्विवृतत्वात्ककारादीनांविवृतत्वात्सावर्ण्यं
प्रसक्तेर्नाऽऽय्यलाविति सूत्रंनकर्त्तव्यमिति भाष्यसिद्धांतोव्याकुप्येत॥ एओङिति सूत्रद्वयेऽकारश्चकाररूपानुबंधद्वयकरणंचेदंलिंगं॥
अन्यथाहि अन्यतरेणैवसर्वत्रव्यवहरेत्किंबहुनाऽऽकारोकारावपिननिर्दिशेदाकारादीनामिवसावर्ण्येनसिद्धेरितिदिक्॥ तस्मादत्यभाष्यवा
र्तिकयोर्विवृतशब्दोविवृततरंलक्षयतीत्येवतत्त्वं॥ यद्वा॥ विवृतप्रतिज्ञानसामर्थ्याद्विवृततरेणसहसावर्ण्यंसेत्स्यतीत्यवधेयं॥ एवंचभा
ष्यादिग्रंथोयथाश्रुतएवास्तु॥ एतच्चन्यासकारहरदत्तयोर्ग्रंथमनुसृत्योक्तंतत्तिशिक्षावाक्योपष्टंभेनव्याख्यातं॥ परमार्थतस्तु॥ आका
रोविवृतइत्येवभाष्यवार्तिकस्वरसमिदंनतुविवृततरइति॥ व्याचपाणिनीयशिक्षा॥ स्वराणामूष्मणांचैवविवृतंकरणंस्मृतं॥ तेभ्यो
ऽपिविवृतोवर्णोनाभ्यामैचौतथैवचेति॥ प्रागुक्तंतुमतांत्वरंनतुपाणिनीयं॥ अतएवएओङ्सूत्रेभाष्यकैयटादौअकारस्यविवृतत्वाद्वि
वृततराभ्यांसंध्यक्षराभ्यांनसावर्ण्यमित्युक्तं॥ एवंचवृत्तिग्रंथस्यापियथाश्रुतस्यसौष्ठवेन्यासकारहरदत्ताभ्यांकृतंभंस्कव्याख्या
नमनादेयं॥ अथवानाऽऽय्यलाविति पठतः सूत्रकृतोमतेविवृततरस्यापिविवृतत्वमात्रेणसावर्ण्यमस्तु॥ चत्वारआभ्यंतराःप्रयत्नाः स
वर्णसंज्ञायामाश्रीयंतेनद्विवृतिग्रंथस्वरसात्॥ नचैवमेङिचोरतिप्रसंगः॥ वर्णसमाम्नायेपृथङ्निर्देशसामर्थ्यात् अनुबंधद्वयसामर्थ्याद्वातत्र
सावर्ण्यंप्रत्येतिदिक्॥ ननुदंडाढक्मित्यादौदीर्घेणसहदीर्घएकादेशःसावर्ण्यस्यफलमित्यस्तुप्लुतेननुसावर्ण्येकिंफलमितिचेत्॥
दह आऽभिदत्तेतिगुरोरनृतइतिप्लुतेरुक्तेतेनसहपूर्वस्यदीर्घएकादेशःफलमितिगृहाण॥ नचदीर्घेकर्त्तव्येप्लुतस्यासिद्धत्वंशंक्यं॥ प्लुतप्र
गृह्या अचीतिज्ञापकेनसिद्धेःप्लुतःस्वरसंधिष्वितिवक्ष्यमाणत्वात्॥ स्यादेतत्॥ आसारसमाम्नायिकस्य अकारस्यकृत्रेपिविवृतत्वेधातुप्राति

पदिकप्रत्ययनिपातस्यस्यसंबुद्धेतत्वंनस्यात्॥ अक्षरसमाम्नायिकेनभिन्नप्रयत्नानाममीषामग्रहणात्॥ ननश्चेशामग्रहणमिति दीर्घोअलोंत्यपरिभाषयाअंत्यस्येवस्यान्नत्वकारस्य॥ अचश्चेतिपरिभाषायाबाधादनुपस्थितेः॥ तथाहदित्यत्रप्रातिपदिकस्यांतउदात्तोध्व त्येतन्नस्यात्॥ नायकइत्यत्रप्रत्ययाक्षरस्यानच्त्वादायादेशोनस्यात्॥ अवनमतीत्यत्रनिपाताआद्युदात्ताउपसर्गाश्चाभिवर्जमित्यार द्युदात्तत्वंनस्यात्॥ किंच॥ अस्यचाविति दौअकारस्यविवृतत्वेनानण्त्वादसौतियाहकत्वेशुक्लीभवतीत्यादावेवेत्वंस्यान्नतुमालीभवती त्यादौ॥ नचाक्षरसमाम्नायिकस्यविवृतत्वप्रतिज्ञासामर्थ्यान्नत्सदृशेषुधात्वादिस्थेष्वपितत्कार्यप्रवृत्तिरितिवाच्यं॥ स्वट्टाढकमित्यादौदी र्घसंपादनेनविवृतत्वप्रतिज्ञायाःसाफल्येसतिसामर्थ्यविरहात्॥ तथाहि॥ अकःसवर्णइत्यत्रआदिरंत्येनेतिवचनादनयोरवर्णकारक योरनुकरणमितिनिर्णीतंतेनप्रत्याहारगतेनविवृतेनाकोऽणसावर्ण्याद्दीर्घप्लुतयोर्ग्रहणेस्वट्टाढकमित्यादिसिध्यति॥ अस्तितुविवृतत्वे अस्यचावित्यादिष्विवप्रत्याहारेष्वपिसंवृतस्यह्रस्वस्यैवकार्यंस्यान्नतुदीर्घप्लुतयोरितिफलभेदस्यस्पष्टत्वाद्विवृतत्वप्रतिज्ञायाःसा मर्थ्यं॥ अथोच्येत॥ प्रत्याहारस्याक्षरसमाम्नायिकस्यैवविवृतत्वंज्ञाप्यनदृतिनब्रूमः॥ किंतुसामान्यापेक्षज्ञापकंदृहशास्त्रेयावानकारः ससर्वोपिप्रक्रियायांविवृतोबोद्धव्यइति॥ एवमपिप्रत्युच्चारणंवर्णानांभेदेनअस्यचावित्यादावुच्चारितस्यानण्त्वेनसवर्णग्राहकतानस्या तत्किंत्वकःसवर्णइत्यादौप्रत्याहारएवसवर्णग्राहकस्यात्॥ एवमिकारादयोपीकोयणचीत्यादावेवग्राहकाःस्युर्नतुएरनेकाचोयस्ये तिचेत्यादौ॥ ननुएकएवअकारःतत्कस्यानण्त्वमाशंक्यते॥ नैवमुदात्तानुदात्तत्वादिविरुद्धधर्मानुपपत्तिः॥ तेषांव्यंजकध्वनिधर्मत्वा त्॥ अनुबंधव्यवस्थापिलोकवद्भविष्यति॥ लोकेह्यहंडोभवद्दृहजटिलोभवेत्यादिक्रमेणएकस्यानेकधर्मोपदेशेपितत्तद्देशभेदेन

धर्मीव्यवनिष्ठनेतथेहापिकर्मण्यणित्यत्रैवणित्वं चरेष्टइत्यत्रटित्वंगपोष्टकिटित्वकित्त्वे-असांप्रतिकइत्यादौतुनैकमप्यनुबंधकार्यमिति
व्यवस्था अतएवप्राग्दीव्यतोण्शिवादिभ्योणित्यादौपुनःपुनर्णित्करणंसार्थकं॥कथंतर्हि घटेननरतीतिघटिकः॥तरतीत्यधिकारेगोद्यचष्ठ
न्निितिठन्॥कथंचधनस्यनिमित्तंसंयोगउत्पातोवाधन्यः॥तस्यनिमित्तंसंयोगोत्पातावित्यधिकारेगोद्यचोसंख्यापरिमाणाश्वादेर्यत्इतिचेत्
॥आवृत्तिकृताह्यज्यपदेशाद्भविष्यति॥नचबाहुकइत्यादौमुख्यद्यचिचरितार्थत्वाद्गौणेकार्यासंभवइतिवाच्यं॥अश्वादिप्रतिषेधेनेहगो
णस्यापिमुख्यसमकक्षत्वाज्ज्ञापनात्॥अतएवकिरिणेत्यादौसावेकाचइतिविभक्तेरुदात्तत्वेनभवति॥आवृत्तिकृतेनह्यज्यपदेशेनस्वा
श्रयस्यएकाज्यपदेशस्यनिवर्त्तितत्वात्॥नहित्रिपुत्रोहिपुत्रव्यपदेशंलभते॥तस्मादुक्करीत्याबाधकाभावाल्लाघवरूपसाधकबलाच्चाक
व्यक्तिरेकैवेतिसर्वंसुस्थमितिचेन्न॥उदात्तत्वादिविरुद्धधर्माध्यासेनव्यक्तेरेकस्यबाधात्॥ध्वनिधर्माएवेतइत्युक्तमितिचेत्तर्हिकित्त्व
मत्वादिकमपितस्यैवास्त्विति-अकारेकारादीनामप्येकत्वप्रसंगः॥तदेतदुच्यते॥अखंडंपदंवाक्यंवावाचकमिति॥किंबहुनामास्त्रैवर्ण्यं
ग्योवर्णः व्यंजकत्वाभिमतैर्ध्वनिभिरेवसर्वेनिर्वाहात्॥उक्तंचहरिणा॥अनेकव्यक्त्यभिव्यंग्याजातिःस्फोटइतिस्मृता॥कैश्चिद्व्यक्तयएवा
स्याध्वनित्वेनप्रकल्पिताइति॥तस्माद्यदिध्वनिभिरेवनिर्वाहस्तर्हिजातिस्फोटश्चनोचेत्कस्यचिदुदात्तानुदात्तादीनामपिभेदएवेतिन्या
यतः-परिनिष्ठितेसतिएवंध्वनिशतान्भेदानुदात्तस्वरितादिकान्॥वर्णाअनुपतंत्स्युरर्थाद्गतिहेतवइतिमीमांसकमतमर्द्दजरतीत्यत्वा
दुपेक्ष्यमिति-स्थितम्॥एवंचअनंतावर्णइतिनैयायिकाद्यभ्युपगतरीत्यापद्यर्थेतिपरोनिर्देशस्तर्हिअस्यच्वावित्यत्रापितथेवास्त्विति
किंग्रहणकशास्त्रेण॥तदुक्तं॥सवर्णेग्रहणमपरिभाष्यमाकृतिग्रहणादिति॥तपरस्तूच्चैतुजातिनिर्देशश्चुक्लस्येवेतिप्रसंगस्यभंगाय॥ते

दादीनामइत्यादौएकमात्रव्यक्तिरपिजातिविशेषणतयाविवक्ष्यते॥विधेयविशेषणत्वात्॥पञ्चैकत्ववत्॥अस्यचाविित्यादौतुअनुवाद्यविशेषणत्वान्नव्यक्तिर्विवक्षिता॥ग्रहेकत्ववत्॥किंतुअण्ग्रहणंकुर्वतःसूत्रकृतोऽन्यएवपक्षोऽभिप्रेतः॥एकाअवर्णव्यक्तिरितिपक्षस्तुदूषितएवअष्टादशअवर्णव्यक्तयइतिपक्षेतुअइउणितियदिजातिपरोनिर्देशस्तर्हिपुनरण्ग्रहणंवक्तव्यं॥व्यक्तिनिर्देशेतूक्तरीत्याअस्यचाविित्यादौसवर्णग्रहणानुपपत्तिरितिमहत्संकटं॥तस्मादिहसूत्रकारस्याशयोदुर्वचइतिचेत्॥उच्यते॥त्रिष्वपिपक्षेषुअस्त्येवसूत्रस्योपपत्तिः॥तथाहि॥सएवायंअकारइतिप्रत्यभिज्ञाबलादेकारएकएवेतिपक्षेधर्मरूपावस्थायास्त्वयैवोपपादनाद्यथाकेअण्कार्येनभवतियथाचअप्रत्ययादिविधिस्थानेनदीर्घादिप्रवृत्तिःतथाअस्यचाविितिविधिरपिमालीभवतीत्यादौनप्रवर्तेतेतिग्रहणकशास्त्रंक्रियते॥तच्चसावर्ण्याधीनमितिह्रस्वस्यविवृतस्यप्रतिज्ञायते॥ननुआक्षरसमाम्नायिकस्यैवत्रैस्वर्यस्यापिव्यवतिष्ठतेतिसार्वत्रिकीप्रतिज्ञा॥एवमपिअस्यचाविित्यादौअनण्त्वादेवग्राहकत्वंनस्यादितिचेत्॥विवृतेह्रस्वत्वादेरविशेषेणतस्याप्यण्त्वात्॥नहिमुण्डत्वजटिलत्वादिवद्देशभेदेनानुपात्ताःस्वरूपमात्रानुवादेनविहिताअपिश्यामोत्सैर्घश्वनुर्वाडुरित्सादयोव्यवतिष्ठंते॥उदात्तानुदात्तस्वरितानुनासिकत्वगुणास्तुशब्देनानुपात्तानभेदकाइतिरहिसूत्रेवक्ष्यते॥अनंताएवव्यक्तयइतिपक्षेअष्टादशअवर्णव्यक्तयइतिपक्षेचयद्यपिह्रस्वदीर्घप्लुतसाधारणीएकाजातिःकंठादिजन्यतावच्छेदिकानज्जन्यध्वंसप्रतियोगितावच्छेदिकावास्त्येवतथापितद्व्याप्यह्रस्वमात्रवृत्तिरपिजातिरस्ति॥तथाच॥अइउण्सूत्रेव्याप्यजातिपरोनिर्देशःतेनतज्ज्ञानेतेएकत्रकृत्तंविवृतत्वंसर्वेष्वपिसिध्यति॥अतएवसर्वेषिह्रस्वाअणोभवंत्येवेतिअस्यचाविित्यादौनकश्चिद्दोषः॥अवर्णेत्यादिष्वपित्थेवगतिः॥अन्यथा अवर्णस्यनामीतिस्थितेमिचःपूर्वपरयोस्तकारयोर्मध्येअन्यतरस्यैवझलत्वंस्यान्नतूभयोः अक्षरसमाम्नायेउभयोरपागतं॥ततश्च

लोऽझलीति नप्रवर्त्तेतसूत्रस्यावकाशस्तुअभित्यादित्यादिःस्यात्॥एवंचदीर्घेणमनण्त्वेनसवर्णग्राहकत्वंनास्तीत्यपिसिद्धांतःसंगच्छते॥अथव्यापकजातिपरमेवनिर्देशंस्वीकृत्यअण्ग्रहणंत्यज्यनामितिचेन्॥एवमपिउपसर्गादृतीत्यादौऋवर्णग्रहणायग्रहणकशास्त्रस्यावश्यकत्वात्॥नचऋऌवर्णयोरिनिसावर्ण्यविधानसामर्थ्यात्तद्ग्रहः॥अकःसवर्णइत्यादौचारितार्थ्यात्॥किंच॥अस्यचावित्यादेर्व्यापकजातिनिर्देशःस्यादादीनामइत्यादौतुव्याप्यजातिनिर्देशइत्यस्यनियामकाभावेसंकरोपिस्यात्॥नचानुवाद्यविशेषणंविधेयविशेषणंचग्रहेकत्वपक्षेकत्वहिवक्ष्यिनमविवक्षितंचेन्मीमांसकमर्यादावैयाकरणैःस्वीकर्त्तुंशक्या॥उरेपिवाननाम्यानन्वानम्येत्यत्रउपेत्यविवक्षितंनञ्प्रभृतितुविवक्षितमितिस्वीकारात्॥आर्द्धधातुकस्येड्वलादेरित्यादावनुवाद्यविशेषणस्यापिबहुशोविवक्षणाच्च॥नस्माद्व्याख्यानतोविशेषप्रतिपत्तिर्नियमेपरिभाषेवसिद्धांतेशरणं॥व्याख्यानंतुलस्यानुरोधीतियत्रव्यर्थतेतत्रतत्राश्रीयते॥तथापिनैतद्बलेनग्रहणकशास्त्रस्यप्रत्याख्यानंनमस्कारमावहते॥ग्रहणकशास्त्रबलेनहिअप्रत्ययोअविधीयमानःसवर्णग्राहकइतिस्फुटतरंश्रीयते॥उल्लंघिताचेयंमीमांसकमर्यादाधर्मशास्त्रेपिबहुशःश्रेयांसंनप्रबोधयेदित्यादिषु॥एकःपूर्वपरयोरितिसूत्रेएकग्रहणमपीहज्ञापकं॥अन्यथाआहुणदित्येकत्वस्यपक्षेकत्वबहित्वसंभवात्किंतेनेतिदिक्॥अथवाअर्थवत्त्वस्याविवक्षायामपिइहोच्चारितोऽकारादिःसुसदृशीभूयव्यक्तीःसादृश्यस्यसंबंधेनोपस्थापयतीत्याअनुपस्थितानांशब्दबोधेअन्वयप्रतियोगितानुपपत्तिः॥अर्थाध्याहारवादेवाक्याभावात्॥अतिप्रसंगभंगस्तुनात्रयंग्राहकबलेन॥अन्वयानन्वयापिलक्षणाध्याहारादेरतिप्रसंगस्यतदवस्थत्वात्॥स्मृहेरीप्सितइत्यनुशासनेबलात्त्वेभ्यइत्यादौपदाध्याहारःकुतइतिचेन्त्वत्रापेक्षर्मणिक्रियार्थोपपदस्यचकर्मणिस्थानिनइत्यनुशासनादर्थाध्याहारस्यापिस्थलविशेषेकृतत्वात्॥अन्यथागवित्ययमाहे

त्यादावगतेश्चेतिवक्ष्यते॥ऋलृक्॥ननुविधिवाक्येषुऋकारोग्रहणकशास्त्रबलेनऋकारादीनष्टादशयथागृह्यन्तितथालृवर्णानपिद्वादशएंहीत्यादितत्किंपृथग्लृकारोपदेशेन॥नचभिन्नस्थाननयासावर्ण्यविरहादग्रहणमित्तिवाच्यं॥ऋकारलृकारयोःसवर्णविधिरितिवार्त्तिकबलेनवाच्यत्वात्॥अन्यथाइहोपदिष्टेपिलृकारेप्रत्याहारीयतीत्यादेरुपसर्गोहतिधातोरित्यस्यअप्रवृत्तिप्रसंगात्॥ननुकृपिस्थस्यलृकारस्येदमनुकरणं॥तस्यचस्वरकार्येष्वसिद्धत्वादकारएवेयमितिउपसर्गोहतीत्यादिसेत्स्यतीतिचेन्न॥कृपोरोलइतिविहितस्यासिद्धत्वेपितदनुकरणस्यास्यअसिद्धत्वविरहात्॥स्यादेतत्॥प्रकृतिवदनुकरणमितिअतिदेशादयमप्यसिद्धएव॥सत्यंतिदेशोवश्यात्रयणीयः॥हिःपचंस्त्वित्यत्रेतिनेत्तिरीयवाक्येयत्तुपिपचेत्तित्यादुदात्तंपठ्यतेतथापिभाष्योदात्तेशरवांतरीयेपचेनुशब्दस्येतिदुःतिङुद्विनिघातोयथास्यात्॥नत्वेतन्निङंतं॥तिङंतपदार्थकत्वात्॥स्वाद्युत्पत्तिस्त्विहविवक्षाभेदेनवैकल्पिकीत्यर्थवत्सूत्रेवक्ष्यते॥अग्नीइत्यादेस्त्यादौप्रगृह्यत्वमप्यतिदेशादेव॥अतिदेशेज्ञापकंतुयत्तदेतेभ्यःपरिमाणइतिसौत्रनिर्देशः॥नह्यत्रातिदेशंविनात्सदाद्यत्वंलभ्यते॥अभिव्यक्तपदार्थायेइतिन्यायेनलोकप्रसिद्धार्थपरतायामेवतत्प्रवृत्तेः॥नथाचप्रयुज्यते॥यत्तदोर्नित्यसंबंधइति॥नन्वनेनैवातिदेशोनभत्वस्यावश्यकत्वादुदात्तप्रयोगोनुपपन्नएवेतिचेत्न॥उदात्तज्ञापकसूत्रएवत्सदादीनि सर्वैरित्येकशेषस्याकरणेनएवत्तदोःसुलोपइत्यादिनिर्देशैश्चातिदेशस्यानित्यताज्ञापनात्॥अथवाप्रावृट्शरत्कालदिवांजइतिसूत्रेअपोयोनियन्मनुष्येष्वितिवार्तिकेनेवंपरिभाषाअस्याअनित्यताचेत्युभयमपिज्ञाप्यते॥तथाहि॥कारीर्यामप्सुमंतावाज्यभागाविति श्रुतं॥अप्सुमेसोमःअप्स्वग्नेसधिष्टवेतिहितत्रमंत्रौ॥नत्वाप्सुशब्दादनुकरणभूतान्मनुपिअस्यवामीयमित्यादिविभक्तेरनुकरणस्यविभक्तित्वाभावादेवलुकोप्रसंगादलुग्वि

धानमुक्तपरिभाषांज्ञापयति॥मवुवुत्यत्तेश्चप्रथमांतनांविनादुर्लभत्वात्प्रातिपदिकताप्रावश्यकीसाचप्रत्ययांतत्वेसतिदुर्लभेतिप्रातिपदिकसंज्ञांअतिदेशप्रवृत्तिविरहाभ्यनुज्ञानादनित्यतापिसिद्धा॥एतेनयुष्मदस्मत्प्रत्ययगोचरयोरित्यादिप्रयोगाव्याख्याताः॥प्रकृतमनुसरामः॥ऌकारानुकरणस्याप्यतिदेशेनासिद्धत्वात्साल्कारीयतीत्यादावुपसर्गादृतीत्यस्यप्रवृत्तिसिद्धौकिंसावर्ण्येनेतिचेन्न॥तथासतिरेफपरत्वप्राप्तावपिलकारपरत्वासिध्याप्रकृतेअनित्यत्वेनातिदेशप्रवृत्तेरेकत्वापिवाच्यत्वात्॥ननुरेफपरत्वेसिद्धेअतिदेशाद्रेफस्यलकारोभविष्यतीतिचेन्न॥एवमपिगम्लृसॄइत्यादिस्थस्यलकारस्यानुकरणेत्वदुक्तातिदेशादेरुक्तिसंभवाभावात्॥तस्मात्सवर्णत्वस्यावश्यकत्वेलकारोपदेशोव्यर्थएवेतिचेत्॥अत्रोच्यते॥ननावश्यंवार्त्तिकंदृष्ट्वासूत्रकृतःप्रवृत्तिः॥आरभ्यन्येपिवार्त्तिकेऋकारलकारयोःसवर्ण्यस्यानित्यतांज्ञापयितुंकर्त्तव्यएवलकारोपदेशः॥तेनकृप्तशिखेत्यत्रगुरोरनृतइतिप्रुतःसिध्यति॥अन्यथाअनृतइतिनिषेधःस्यात्॥ऋकारेणलकारस्यग्रहणात्॥कृप्यमानश्चलीकृप्यमानइत्यादौऋवर्णाऽस्येत्यौपसंख्यानिकस्यास्यप्रवृत्तिस्तुप्रुवादित्वेनापिसुवचा॥अन्यथाप्रकृप्यमानादौरुत्वचर्त्वतिणत्वस्यदुर्वारत्वात्॥इदंत्ववधेयंवार्त्तिकमनेनसवर्णेनग्रहणमपरिभाष्यमितिसिद्धांतादृकारेलकारसाधारणजातिविरहेणरूढिग्रहणासंभवाच्चसाल्कारीयतीत्यत्रकार्यनिर्वाहस्तदवस्थः॥सावर्ण्यविधिस्तुसवर्णदीर्घहोत्रेकारइत्यत्रइकोसवर्णइत्यस्यप्रवृत्तिनिबंधेचचरितार्थः॥नचऋत्यकइत्यस्यप्राप्तिः॥ग्रहणकशास्त्राभावादेव॥एवंचदीर्घसंधावर्थेलकारपाठेसावर्ण्यनित्यत्वमपिकथंज्ञाप्यमेदिति॥तस्मादृग्रहणंप्रत्याचक्षीणस्यतत्स्थानेऋग्रहणंकर्त्तव्यं॥अथत्वयमृग्रहणंचैनकार्यमित्याशयः कल्प्यः॥यद्यप्येवंपदलृभृतीनांलृदितांनाग्लेपीत्यादिकार्यंप्राप्नोति॥पृथगलुबंधकरणंलृदित्वप्रयुक्तस्य

अज्ञादेशस्यैवादित्वप्रवृत्त्याचरितार्थत्वादसंकरं ज्ञापयितुमसमर्थं तथापि साववर्ण्यस्यानित्यत्वमेवेदमुपसमाधेयं॥ षष्ठा॥ स्वरसंधिप्रकरणे ऌवर्णस्यऋवद्भावएववाच्यः॥ सावर्ण्येचनोपसंख्येयंपुनस्तत्प्रकरणेतरस्थेतिनतत्रातिदेशप्रवृत्तिः॥ उरणरपरइतिपरिभाषातु ऌकारैकालतयास्वरसंधिप्रकरणस्थेतिउपेत्यनेनऌवर्णग्रहणोपपत्तिः॥ अस्मिन्नपिपक्षेऌकारोपदेशोऽहकर्त्तव्यएव॥ कृ३तशिरवइत्यत्रप्लुतोयथास्यात्॥ कृसइतिचद्वित्वं॥ प्रकृसइतिचस्वरितः॥ अत्रह्यंतभीवितंप्रत्यर्थात्कर्मणिक्तः॥ अनगतिरनंतरइतिपूर्वपदप्रकृतिस्वरः॥ कर्मणियःक्तस्तदंतेउत्तरपदेतद्विधानात्॥ ततःशेषनिघातेकृतेउदात्तादनुदात्तस्यस्वरितः॥ नचात्रकृपोरोलइत्यस्यासिद्धत्वाशंकापि॥ पूर्वत्वात्॥ एरहिपूर्वंप्रत्यसिद्धेनतुपरंप्रतिपूर्वं॥ एवंचगम्लृप्रभृतीनांऌकारस्यइत्संज्ञाकरणायासेनसिध्यति॥ अन्यथातुपुरुकुदिद्युतादित्यादितइतिलकारेपरतःकृतेनयणादेशेनइत्संज्ञानुवादेनचसंज्ञापकेनकथंचित्साधनीयास्यात्॥ एवंदृदितोनुमित्यात्मनेपदानुवादोनॄन्नित्यकदित्यादिनिर्देशानांचसाम्यादिकारादयोपिननिर्दिश्येरन्॥ यथाश्रुतसूत्रणीत्यानुब्रूमः॥ ऋकारमुच्चारयितुंप्रवृत्ताकुमारीकरणापटवाद्यदाऌकारमुच्चारयतितदनुकरणस्यापिऋकार्यसिद्धिःफलम्॥ अनुकरणानामनुकार्येणार्थवतांसर्वत्रसाधुत्वाभ्युपगमात्॥ ननुवर्णस्यदीर्घानसंतीतिव्याहन्येत॥ अनुकरणस्यतत्रापिमुख्यत्वादितिचेन्न॥ न्यायप्राप्तस्यापिवचनेनबाधात्॥ दृदेचस्याप्यभावाल्कल्पनसंज्ञादिष्वितिवार्त्तिकालभ्यते॥ तथाहि॥ ऌकारोपदेशोयदिच्छाशक्तिजानुकरणप्लुत्याद्यर्थइतिपूर्ववार्त्तिकेनऌकारोपदेशस्यप्रयोजनत्रयमुक्तं। दद्युतकायदेहीतियदिच्छाशब्दः॥ कुमारीऌजुइत्यादेतिअशक्तिजानुकरणं॥ प्लुतहिर्वचनस्वरितास्रप्लुत्यादयः॥ एतदर्थंऌकारोपदेशइतिहृतस्वार्थः॥ तत्रप्रथमप्रयोजननिराकरणायेदंवार्त्तिकं॥ न्याय्यभावादिति॥ अस्यार्थः॥ ऋनिस्तावदृतोरीयङि

तिनिर्दिष्टः सौत्रोधातुः तस्मादौणादिकः कुन्॥तत्रत्येवंसूत्रितं॥कुन्शिल्पिसंज्ञयोरपूर्वस्यापीति॥शिल्पिन्यभिधेयेसंज्ञायांचसोपपदान्निरु
पपदाच्चधातोः कुन्स्यादित्यर्थः॥स्रजकः तक्षकइत्यादिशिल्पिनि॥चरकः भषकः कटंकनकमित्यादिसंज्ञायामुदाहरणं॥नथाचकृतक
शब्दःशास्त्रानुगतत्वान्न्याय्यः॥तत्संज्ञावात्सएवसंज्ञातथाचकृतंकुर्यान्नतद्धितमित्यादिगह्यस्मृतिरप्यनुकूलिनाभवतीति॥एवंवदता
शास्त्रानुगतदेशभाषायत्कूंचीमंचीत्यादिनामक्रियतेतदसाध्वितिस्फुटीकृतं॥आदिशब्दादनुकरणेपिशिष्टानुरोधंदर्शयतारूप
र्णास्यदीर्घानमंतीतिशास्त्रमर्यादामुल्लंघ्यक्रियमाणस्यदीर्घानुकरणस्याप्यसाधुतादर्शिता॥तस्माद्भिघुभादिभ्यःकूंचीमंच्यादीना
मिवगावीगोण्याद्यनुकरणेभ्योदीर्घलृवर्णानुकरणस्यापिन्यायतोनकिंचिद्वैलक्षण्यंकिंतुवाचनिकमितिस्थितम्॥मंत्रशास्त्रेतुमा
तृकान्यासादेर्दीर्घलृवर्णोयद्यपिस्वीकृतस्तथापिप्रातिपदिकत्वन्यायेनअन्यत्रासौनोपयुज्यतएवेत्यवधेयं॥एवंवचेत्यादीनामपिशिष्टै
रनंगीकृतानांन्यायसाम्यादसाधुतोक्ता॥नथाचाहुः॥नहिवचिरंतिपरःप्रयुज्यतइति॥एवंचन्याय्यत्वादिति वार्तिकेनपूर्ववार्तिकोक्तप्र
योजनत्रयमध्येप्रथमप्रयोजननिराकृतं॥लृतकस्त्वासाधुरेव॥इत्यत्रयीशब्दानांप्रवृत्तिर्नसंतियद्वच्छब्दइतिपक्षेणोक्तं॥पक्षांतरेरपि
हिपरिहाराभवंतीतिभाष्यकारः॥एतद्दूषणपरोलोचनयातुचतुष्टयीतिपक्षेलृतकंदपोपिटिघुभादिवत्साध्वसाधुवहिर्भूताःसाधवस्तव
त्तद्भिघुभादिविलक्षणाइतिलभ्यते॥अन्यथाहिपक्षांतरैरितिनब्रूयादिति॥नचग्रंथस्मृतिविरोधः॥तावतापिकृतंकुर्यान्नतद्धितमितिगृ
ह्यमुल्लंघ्यकृतस्याप्योपगवादेरिवशब्दसाधुनाभ्युपगमेबाधकाभावात्॥पुरुषस्तुसाधूनपिप्रयुंक्तानोदेवब्राह्मणादिनिंदकवद्धर्मभ्रं
शोल्लंघनात्वत्यवैतीत्यन्यदेतत्॥यत्तुद्वितीयप्रयोजननिराकरणार्थंवार्तिकम्॥अनुकरणंशिष्टाशिष्टप्रतिषिद्धेषुइति॥तस्मायमर्थः

॥शिष्टस्यसाधोरनुकरणंसाध्वेव॥ अशिष्टंचतद्प्रतिषिद्धंचसाध्वसाधुवहिर्भूतंटिघुभादितस्यानुकरणमपिनाहगेवअर्थादसाधोरनु
करणमप्यसाध्वेवेति॥ इदंतुभाष्येदूषितमेव॥हेलयोहेलयइत्यादीनांशिष्टपरिगृहीतानामसाधुतायांबीजाभावात्॥नह्यपशब्दवाचक
त्वमात्रेणनथात्वं॥अपशब्दइत्यस्याप्यसाधुतापत्तेः॥नचप्रकृतिवदनुकरणमित्यनेनअसाधुतासिद्धेः॥ अशास्त्रीयस्यातिदेशायो
गादितिदिक्॥तस्माद्यातिकरुतान्दूषितमपिद्वितीयप्रयोजनंभाष्यरीत्यास्थेयं॥यदपितृतीयप्रयोजननिराकरणपरंवार्त्तिकं॥एकदेश
विकृतस्यानन्यत्वात्तु त्यादयइति॥तस्यायमर्थः॥नुड्विधिलादेशविनामेषुप्रतिविधानमितिवक्ष्यमाणत्वादकारैकदेशस्यरेफस्यलत्वे
कृतेएकदेशविकृतन्यायेनारेफवत्ता॥ न्यायेति॥लोकेपिहिछिन्नपुच्छस्यपुच्छवत्त्वप्रयुक्तकार्यंनापत्येव॥नचहोतृकारादेर्दीर्घस्याप्यरत्वइतिप्लुतप्रतिषेधापत्तिः॥ह्रस्वस्य
रवनोनेतिन्यासात्॥किंत्वेवंसतिएकस्यरुकारस्यप्रत्याख्याना यसूत्रभंगाश्रयणेनविपरीतमेवगौरवमितिनदे तदाहभाष्यकारः॥सेयंमहतो
वंशस्तंबालम्बद्वानुरुष्यनइति॥लङ्गापक्षिविशेषःफलविशेषोवा॥लटलौल्येइतिधातोरशूङ्वषिलटिकणिखटिविशिभ्यःक्नित्यौणादिकःक
न्॥नेङ्शिरुतीनीड भावः॥लङ्गाकरंजभेदेस्यात्फलेऽवद्येखगांतरेइतिविश्वः॥ननुरुपारोलइतिसूत्रंअअइत्यस्मात्पूर्वमस्तु॥एवंचल
त्वस्यासिद्धत्वादेवप्लुत्यादयः सेत्स्यतीतिचेन्न॥एवंहिसतिग्रोयङीत्यस्याप्युत्कर्षःस्यान्तनश्चलत्वस्यासिद्धत्वानिजेगिल्यनइत्यत्रहलि
चेतिदीर्घःस्यात्॥ननुबहुचप्रनिशारव्येऋकारलकारावथषष्ठोष्माजिह्वामूलीयाइतिऋऌवर्णयोःस्थानसाम्योक्तेस्तद्ग्रीत्याग्रहणकथं
स्त्रेणेवनिर्वोहाङ्कारोपदेशोमास्त्विनिचेन्न॥उक्तरीत्याऋऌवर्णयोःसावर्ण्योपसंख्यानेपरंप्रत्याख्यायतांलकारोपदेशस्तूक्तरीत्याकृप्तशि

२ उक्तउक्तरितिचेन्नप्लि॥ प्लाप्लि योगविभागेनव्यवस्थितविभाषाश्रयणेनतदप्रवृत्तेः। अगतिकगत्याश्रयणंतुसर्वेषांसममितिचेन्न। ३

खेप्लुतसिद्धेसावर्ण्यानित्यतांज्ञापयितुंकर्त्तव्यएवेतिदिक्॥एओङ्॥ऐऔच्॥यद्यपिछंदोगानांमध्येसात्यमुग्रिराणायनीयाअर्द्धमेकारंअर्द्धमोकारंचअधीयतेप्लुतेतेएश्वसूनृतेअध्वर्योओ३द्रिभिःप्लुतमितिअतःपदस्थस्याव्यपरस्यनदीयश्रुतिशाख्येअर्द्धमेकारमोकारंचविदध्यतितथापिश्रुतिशाख्यसमाख्याबलादेवसर्वशाखासाधारणेअस्मिन्शास्त्रेनस्यनग्रहणं॥ज्ञापकाच्च॥यदिहि अकारादिभिरष्टादशानामिवएङादिभिरपिएकमात्राणांग्रहणंसंमतंस्यात्तर्हीहलाघवार्थमेकमात्रावेवएङाद्युपदिशेत्॥अकारादिवत्॥नचैवमदेङ्गुणइत्यत्रतपरत्वान्मात्रिकगोरेवगुणसंज्ञास्यादितिवाच्यम्॥तत्रएओइतिस्वरूपेणैवदीर्घयोर्निर्देशेअनणत्वेनसवर्णग्रहणोपपत्तेः।एवमप्यर्द्धमात्रालाघवात्॥तवहिवर्णोपदेशेएओइतिदीर्घयोर्मात्राचतुष्टयं॥गुणसंज्ञायांतुएङितिसार्द्धद्वयं॥सकलनयासार्धषण्मात्राःममतुवर्णोपदेशेमात्राद्वये॥गुणसंज्ञायांतुअत्रनस्त्रइतिमिलिताःषडेवमात्राः॥तस्मादिहमात्रानिर्देशसामर्थ्यादप्येकमात्रयोरनभिमतत्वंनिर्णीयते॥नचैवंएचइग्घ्रस्वादेशइतिवर्थेस्यात्॥तद्धिस्थानेंतरतमपरिभाषयाह्रस्वतोरर्द्धैकारार्द्धौकारयोर्निरत्यर्थंक्रियतइतिचेन्न॥वैकल्पिकप्राप्तिभ्रमोअकारस्यव्याहृत्तयेनदारभात्॥एवंहिपूर्वोभागोअकारसदृशःउत्तरस्तुइवर्णोवर्णसदृशःतत्रउभयांतरतमस्येह्रस्वस्याभावात्सर्वार्यंणअकारःस्यात्॥इकारोकारौचस्यातांनस्यान्नाकदाप्यवर्णोभूदितिसूत्रारंभः॥वस्तुतस्तुप्रत्याख्यास्यतेसूत्रे॥तथाचतत्रवार्तिककारोवक्ष्यति॥सिद्धमेऽःसस्थानत्वात्॥ऐचोम्बोत्तरभूयस्त्वादिति॥अस्यार्थः॥शब्दपरविप्रतिषेधेनएङुत्तरभागंतत्रऔइवर्णावेवेतिसिद्धं॥यद्वा॥एकारमुद्वहन्तालव्यःऔकारस्तुमुद्वहन्ओष्ठ्यइतिमतेसिद्धमित्यर्थः॥तथाचबह्वृचानांप्रातिशाख्यं॥तालव्यावेकारश्चवर्गाविकारैकारौयकारःशकारइति॥शेषओष्ठ्योपपाद्यइहिच॥पूर्वोक्तेभ्यःशेषोवर्णराशिरोष्ठाभ्यामुपपादयितव्यः॥उवर्णःपवर्गःओऔउपध्मानीयश्च

॥शिष्टस्यसाधोरनुकरणंसाध्वेव॥ अशिष्टंचतदप्रतिषिद्धंचसाध्वसाधुवहिर्भूतंदिघुभादितस्यानुकरणमपिनाहगेवअर्थादसाधोरनु
करणमप्यसाध्वेवेति॥ इदंतुभाष्येदूषितमेव॥हेलयोहेलयइत्यादीनांशिष्टपरिगृहीतानामसाधुनांबीजाभावात्॥नह्यपशब्दवाचक
त्वमात्रेणतथात्वं॥अपशब्दइत्यस्याप्यसाधुनापत्तेः॥नचप्रकृतिवदनुकरणमित्यनेनअसाधुनाऽतिदेशः॥अशास्त्रीयस्यातिदेशायो
गादितिदिक्॥तस्माद्वार्तिककृतादूषितमपिद्वितीयप्रयोजनंभाष्यरीत्यास्थितं॥यदपितृतीयप्रयोजननिराकरणपरंवार्त्तिकं॥एकदेश
विकृतस्यानन्यत्वात्तु त्यादयइति॥तस्यायमर्थः॥नुड्विधिलादेशविनाशेषुप्रतिविधानमितिवक्ष्यमाणत्वात्कारैकदेशस्यरेफस्यलत्वे
कृतेएकदेशविकृतन्यायेनाच्कार्यसिद्धिरिति॥नचैवमकृतइतिप्रतिषेधापत्तिः॥अरवतइतिन्यासात्॥नह्येकदेशविकृतन्यायेनरेफवत्ताः
प्याप्नोति॥लोकेपिहिछिन्नपुच्छस्यपुच्छवत्त्वप्रयुक्तकार्यंनाप्त्येव॥नचहोतृकारादेर्हीर्घस्याप्यरवतइतिप्लुतप्रतिषेधापत्तिः॥ह्रस्वस्य
रवंनोनेतिन्यासात्॥किंत्वेवंसतिएकस्यलकारस्यप्रत्याख्याना यसूत्रभंगाश्रयणेविपरीतमेवगौरवमितितदे तदाहभाष्यकारः॥सेयंमहतो
वंशस्तंबाल्लङ्घनेरुष्यतइति॥लङ्घापक्षिविशेषःफलविशेषोवा॥लटलौल्येइतिधातोरशूङ्व्याप्तिलटिकणिखटि विशिभ्यः क्नित्यौणादिकः क्न
न्॥नेङ्शिरुतीनीड भावः॥लङ्घकरंजभेदेस्यात्फलेऽवद्येखगांतरेइतिविश्वः॥ननुरुपारोलइतिसूत्रंअअइत्यस्मात्पूर्वमस्तु॥एवंचल
त्वस्यासिद्धत्वादेवपुत्यादयः सेत्स्यंतीतिचेन्न॥एवंहिसतियोयङीत्यस्यापुत्कर्षःस्यान्नतश्चलत्वस्यासिद्धत्वानिजेगिल्यनइत्यत्रहलि
चेतिदीर्घःस्यात्॥ननुवद्रुचप्रतिशास्व्येऋकारलकारावथषष्ठोष्माजिह्वामूलीयाइतिऋऌवर्णयोःस्थानसाम्योक्तेस्तद्रीत्याग्रहणकशा
स्त्रेणेवनिर्वाहाद्लृकारोपदेशोमास्त्विनिचेन्न॥उक्तरीत्याऋऌवर्णयोःसावर्ण्योपसंख्यानेपरंप्रत्याख्यायतेलृकारोपदेशस्तूक्तरीत्याकृप्तशि

राम २३

३ नचानतइतिनिषेधापत्तिः। प्राचामिति योगविभागेनव्यवस्थितविभाषाश्रयणेनतदप्रवृत्तेः। अगतिकगत्याश्रयणंतुसर्वेषांसममितिचेन्न। ३

रेवप्लुतसिद्ध्येसावर्ण्यानित्यतांज्ञापयितुंकर्त्तव्यएवेतिदिक्॥एओङ्॥ऐऔच्॥यद्यपिछंदोगानांमध्येसात्यमुग्रिराणायनीयाअर्द्धमेकारंअर्द्धमोकारंचअधीयतेप्लुजातेएश्वसूनृतेअध्वर्योओ३द्रिभिःप्लुतमितिअतःपादस्थस्याव्यपरस्यनदीयप्रातिशाख्येअर्द्धमेकारमोकारंचविदध्यतितथापिप्रातिशाख्यसमाम्नायबलादेवसर्वशाखासाधारणेअस्मिन्शास्त्रेनस्यनग्रहणं॥ज्ञापकाच्च॥यदिहिअकारादिभिरष्टादशानामिवएङादिभिरपिएकमात्राणांग्रहणंसमंनस्यात्तर्हीहलाघवार्थमेकमात्रावेवएङादयुपदिशेत्॥अकारादिवत्॥नचैवमदेङ्गुणइत्यत्रतपरत्वान्मात्रिकगोरेवगुणसंज्ञास्यादितिवाच्यम्॥तत्रएओइतिस्वरूपेणैवदीर्घयोर्निर्देशेअनणत्वेनसवर्णग्रहणोपपत्तेः।एवमप्यर्द्धमात्रालाघवात्॥तवहिवर्णोपदेशेएओइतिदीर्घयोर्मात्राचतुष्टयं॥गुणसंज्ञायांतुएङितिसार्द्धद्वयं॥सकलनयासार्धषण्मात्राःमम्तुवर्णोपदेशेमात्राद्वयं॥गुणसंज्ञायांतुअर्नस्त्रइतिमिलिताःषडेवमात्राः॥तस्मादिहमात्रानिर्देशसामर्थ्यादप्येकमात्रयोरभिमतत्वंनिर्णीयते॥नन्वेवंएचइघ्रम्वादेशइतिव्यर्थंस्यात्॥तद्धिस्थानेंतरतमपरिभाषयाह्रस्वतोरैकारादौकारयोर्निरत्यर्थंक्रियतइतिचेन्न॥वैकल्पिकप्राप्तिभ्रमेणअकारस्यव्यावृत्तयेनदारंभात्॥एवंहिपूर्वोभागोअकारसदृशःउत्तरस्तुइवर्णोवर्णसदृशःतत्रउभयांतरतमस्यैकस्वस्याभावात्पर्यायेणअकारःस्यात्॥इकारोकारौचस्यातांतस्मान्नाकदाप्यवर्णोभूदितिसूत्रारंभः॥वक्ष्यतस्तत्प्रत्याख्यास्यतेसूत्रे॥तथाचतत्रवार्तिककारोवक्ष्यति॥सिद्ध्येदेङःसस्थानत्वात्॥ऐचोम्वोन्नरभूयस्त्वादिति॥अस्यार्थः॥शब्दपरिभाषयैवनएङउत्तरभागेतत्रौइउवर्णावेवेतिसिद्धं॥यद्वा॥एकारस्यह्रस्तालव्यःओकारस्तुष्ठौष्ठ्यइतिमतेसिद्ध्यतीत्यर्थः॥तथाचबह्वचानींप्रातिशाख्यं॥तालव्यावेकारश्चवर्गविकारेकारौयकारःशकारइति॥शेषओष्ठ्योपपाद्यइतिच॥पूर्वोक्तेभ्यः शेषोवर्णराशिरोष्ठाभ्यामुपपादयितव्यः॥उवर्णःपवर्गःओ३औउपध्मानीयश्च

ओष्ठ्य इतिसूत्रार्थः॥ इदंचप्रातिशाख्यवृत्तिरूपांव्याख्यानं॥ तङ्ग्राह्येतुशेष ओष्ठ्योपवाद्येतिपाठः॥ तत्रअपवाद्येत्यस्यउत्तरसूत्रेवक्ष्यमा
णान्विहायेत्यर्थः॥ न्यायसिद्धस्यैवबाध्यबाधकभावस्यस्फुटीकरणार्थंचेदं॥ तदेवंशब्दपरविप्रतिषेधान्मतभेदेनस्थानसाम्याद्गोसिद्धमि
तिसमाधानद्वयंसङ्गच्छतेसुफलितं॥ एतच्चयद्यप्येस्वपितुल्यंतथापितत्रसमाधानांतरमप्यस्तीत्याह ॥ ऐचोश्चेति॥ चकारोभिन्नक्रमः॥ हेतो
रनंतरंबोध्यः॥ अर्द्धमात्राअवर्णस्य॥ अध्यर्द्धमात्राद्वर्णोवर्णयोरितिपक्षेमल्लयामादिवद्व्यसाव्यपदेशादपिइकारोभविष्यतइत्यर्थः॥
समप्रविभागपक्षोप्यस्तीत्यनेनैवस्यते॥ तत्रनुपूर्वोक्तसमाधानद्वयमेवशरणं॥ तत्रापिशब्देपरविप्रतिषेधपरंप्रथमव्याख्यानंयद्यपिविव
रणेस्थितं॥ तथापितद्भ्युपगमेअग्रनिपत्तिर्वोभयोरित्यादिविप्रतिषेधेपरमितिसूत्रेवार्त्तिकेभाष्यंचविरुध्येत॥ नहिगोस्त्रियौरितिसूत्रे
णगोशब्देविधीयमाणेह्रस्वोन्यत्रचरितार्थः॥ येनाप्रतिपत्तिःस्यात्॥ ननुप्रतिलक्ष्यंलक्षणभेदेविकल्पेप्राप्तेपरमेवेतिनियमोस्तितिचेन्न
॥ एवंहिसतिअचःपरस्मिन्नितिसूत्रेनित्यःपरयणादेशःपरस्त्रासौव्यवस्थया॥ युगपत्संभवोनास्तिबहिरंगेणसिध्यतीत्यादिभाष्यसंद
र्भोविरुध्येत॥ तेह्रूलेनहिलक्षणवाक्ययोःपूर्वापरीभावएवविप्रतिषेधसूत्रस्यविषयोऽन्यस्तुअंतरंगबलवदित्यस्येतिलभ्यते॥ इदंच
तत्रैवस्फुटीकरिष्यामः॥ द्वितीयव्याख्यानमपिअर्द्धैकारादिवत्प्रातिशाख्योक्तस्यप्रायेणानादराद्दुर्बलं॥ अथवाद्वोगाभिमतस्यापिचतु
र्मात्रस्यतत्परकरणव्यावर्त्तनोक्तेस्तहृदिहाप्यभ्युपगमस्तर्हिऋलृक्सूत्रोक्तरीत्याऋकारलृकारयोःसवर्णविधिरितिवार्त्तिकमपिप्रत्या
ख्यातुंशक्यं॥ अथशिक्षानरानुसारेणवार्त्तिकारंभस्तर्हिएचइगितिसूत्रारंभोपितथैवास्तितिदिक्॥ तस्मादेचइगितिसूत्रबलेनार्द्धैका राम २४
रार्द्धौकारौनलभ्येतेइतिस्थितं॥ ननुप्रातिशाख्योक्तावपिताविहगृह्येतेचेत्तदाकिमनिष्टमापद्यतेयेनतयोरग्रहणंयत्नतःप्रतिपाद्यसी

त्निचेत्॥न॥एचोह्रस्वविधौअंतरतमत्वेननयोरेवप्रसंगात्॥एचइग्घितिसूत्रंतुप्रत्याख्यातमेव॥
॥एतदर्थमेवसूत्राभ्युपगमेनुगौरवमेवदोषः॥स्यादेतत्॥एन्ओनङ्इत्यादिक्रमेणतपरानेवनिर्देस्यामः॥तथाचऊकालसूत्रेअचूश्च्ये
नतपराणामेवोपस्थितौसत्यांतत्कालग्रहणादर्धएकारओकारोवाह्रस्वसंज्ञांनलभतेतेनह्रस्वविधिविधेयोप्यसौनेति॥मैवं॥त्रिमात्रा
णामप्यनच्त्वापत्तेः॥ततश्चगोत्रातइत्यत्रअनचिचेत्यचःपरस्यविधीयमानंहित्वंनकारस्यनस्यात्॥प्रत्यङ्नैःतिकायनउदङ्नैःपगवेति
ङसुङसनस्यात्॥प्लुतसंज्ञाविरहात्प्लुतविधिर्नप्रवर्त्तेत॥नचओमभ्याद्गानइत्यादिविधिसामर्थ्यात्तत्सिद्धिः॥उवर्णविधानेनचरितार्थत्वा
पत्तेरितिचेत्॥तदेतदाहवार्त्तिककारः॥संध्यक्षरेषुतपरोपदेशश्चेत्तपरोच्चारणं॥प्लुत्यादिष्वज्विधिः॥प्लुतसंज्ञाच॥अतपरएचइग्घ्रस्वा
देशेएकादेशेदीर्घग्रहणमिति॥अस्यार्थः॥श्लिष्यमाणवर्णद्वयसदृशावयवत्वात्संधीयमानमक्षरंसंध्यक्षरमित्यन्वर्थापूर्वाचार्यसिद्धा
एचांसंज्ञा॥तत्रतपरेदृश्यतेनेनेतिकरणव्युत्पत्त्याप्रयोजनमुच्यते॥तथाचएचांतपरत्वोच्चारणेफलंप्राप्तिचेन्नहितपरोच्चारणंतावत्कर्त्त
व्यं॥प्लुतत्वेसत्यपिअज्विधिःहित्वडःमुडादिर्नसिध्यति॥तत्रप्लुतस्यैवडःमुडादिः॥तस्मात्परस्यहित्वमितिसूचयितुं आदिशब्दः॥प्लुते
तदुत्तरवर्णेषुचइष्टकार्यंनसिध्यतीत्यर्थः॥अभ्युपेत्यवादोयं॥वस्तुतस्त्वनच्त्वात्प्लुतसंज्ञैवनसिध्यति॥तस्माद्दृष्टस्तपरनिर्देशइ
त्तिवार्त्तिकेनैवेदंसिद्धं॥यत्तुन्यासपाठेत्वाह॥अतपरइति॥सूत्रंकर्त्तव्यंस्यादईकारादिनिवृत्तयेइत्यर्थः॥तत्तुतस्त्वउभाभ्यामपिसूत्रं
कर्त्तव्यं॥उभाभ्यामपिवानकर्त्तव्यमितिसमनंतरमेवोपपादितं॥तस्मान्नायंदोषउद्भावनार्हः॥पक्षेहूयेसाधारण्यात्॥स्यादेतत्॥
तपरत्वाभावपक्षेगंगोदकंरमेशइत्यत्रैत्रिमात्रचतुर्मात्राणांस्थानेत्रिमात्रचतुर्मात्राएवादेशाःस्युः॥ओतोगार्ग्यस्य॥नचाकःसवर्णइ

तिसूत्रेदीर्घइतियोगंविभज्यएकःपूर्वपरस्योरित्यधिकारेयोविहितःसदीर्घोभवतीतिव्याख्यानात्नत्रिमात्राद्यादेशइतिवाच्यं॥पशुंविद्धंपचंतीत्यत्रदोषप्रसंगात्॥ननुअमीत्येवसूत्रमस्तु॥प्रथमयोरितिसूत्रात्पूर्वसवर्णोनुवर्त्तते॥एकःपूर्वपरयोरितिच॥एवंसिद्धेपूर्वग्रहणंपश्चाज्ज्ञापकंयदेकःपूर्वःसएवयथास्यात्॥दीर्घोमाभूदिति॥तेनपशुमितितावत्सिद्धं॥संप्रसारणाच्चेत्यत्रापिसएवपूर्वशब्दोनुवर्त्तते॥हलइतिसूत्रारंभसामर्थ्याद्धासंप्रसारणाच्चेत्यनेनदीर्घोनविधीयते॥तेनविद्धमित्यपिसिद्धं॥अतोगुणइत्यत्रापिपरइत्येवसिद्धेरूपग्रहणसामर्थ्याद्यादृशःपरस्तादृशएवादेशोनतुतद्विलक्षणः॥तेनपचंतीत्यपिसिद्धं॥तस्माद्योगविभागेणैकादेशोदीर्घोभवतीतिपक्षोनिर्दोषएवेतिचेन्न॥एवंसतिकृष्णद्धिस्तवत्कारइत्याद्यसिद्धिप्रसंगात्॥इहहिदीर्घवचनादकारेणअनंतर्यादेदोतोन॥तस्माद्दीर्घइतियोगविभागोदुष्परिहरः॥तेनगंगोदकंरमेशइत्यत्रत्रिमात्रचतुर्मात्रप्रसक्तिर्दुर्वारेवेति॥नचप्लुतग्रहणंविषयेस्मृतइतिवाच्यं॥प्लुताप्लुतप्रसंगेसत्येवतदितिवक्ष्यमाणत्वात्॥ननुतथापिचतुर्मात्रःकथमापद्यतेतस्यलोकवेदयोरप्रसिद्धेरितिचेन्न॥छान्दोग्येप्रसिद्धेरित्याहुः॥वस्तुतस्तुलोकेप्यस्तिप्रसिद्धिः॥तथाचप्लुतावैचद्दुतावितिसूत्रेभाष्यकारोवक्ष्यति॥इष्यतएवचतुर्मात्रःप्लुतइति॥अत्रोच्यते॥गुणसंज्ञायांवृद्धिसंज्ञायांचतत्परनिर्देशान्नोक्तदोषः॥तदेतदुक्तंवार्त्तिककृता॥एकादेशेदीर्घग्रहणंइति॥तस्यैवसंज्ञित्वादितिभावः॥नत्वेतद्वार्त्तिकेदीर्घग्रहणांतरकर्त्तव्यतापरंनापियोगविभागपरं॥उक्तपुक्तेः॥स्यादेतत्॥संज्ञासूत्रेअदानोःतपरकरणेपिएङैचोःकथंतत्कालताहंकृता॥सहिवहोरोदितिसूत्रेवर्णग्रहणेनतात्परइतिपंचमीसमासस्यापिज्ञापितत्वादितिचेन्॥एवमपितात्पराभ्यामेङैच्भ्यांह्रस्वदीर्घाणामेवोपस्थितिः उपस्थितैस्तुदीर्घैःस्वसवर्णानामशेषाणांग्रहणंदुर्वारमेव॥नहितेपितात्पराः॥अनुच्चारितत्वात्॥ग्राहकत्वंपरमनु

च्चारिनानामपिप्रत्याहारैरुपस्थितानामस्त्येव॥दीर्घोज्झमिचेतिज्ञापकात्॥ल्वादिभ्यःघादीनामित्यादिनिर्देशाच्च॥तेनचमूषित्यादिषुष
त्वादिकंसिध्यतीतिवस्यते॥तस्मात्तात्परस्तत्कालस्येतितुउच्चारितेष्वेवस्यादितिचेत्सत्यं॥ङःमोह्रस्वादितिसूत्रेङःमुडितिप्रत्याहारेरु
तंटित्वंसंज्ञायांव्यर्थंसत्सामर्थ्यात्संज्ञिषुङादिषुउपकरोतीतियथास्वीकृतंतथेहापितात्परत्वंसंज्ञायामनुपयुज्यमानेतदुपस्थाप्येषुसंज्ञिषु
तत्कालावधारणंसामर्थ्यात्करोतीतिनकश्चिद्दोषः॥यद्वा॥अणुदित्सूत्रेअशब्दसंज्ञेत्यनुवर्त्तते॥शब्दस्यसंज्ञायांविधेयायांमणसवर्णान्नगृ
ह्णातीतिऊकालोज्झित्यत्रभाष्येस्फुटं॥उपपादयिष्यामश्चैतंतत्रैव॥अतोगुणवृद्धिसंज्ञाविधावपिनसवर्णग्रहणं॥तपरकरणंतुस्पष्टार्थं॥
ईदूदेदितिवत्॥अन्यथाहिकिमैचावेवेहनिर्दिश्यतेकिंवाआकारोपीत्यादिसंदेहःस्यात्॥तत्रचमालादीनांचेत्यादिज्ञापकानुसरणक्लेशःस्यादि
तिदिक्॥युक्तस्तरभ्याश्रमेवपक्षः॥आद्यपक्षेहिवृद्धिसंज्ञायांआइतिदीर्घस्यानणत्वेनसवर्णाग्राहकत्वात्तपरकरणमैजर्थमितिस्थितेऽङःमुटी
वःसामर्थ्यमस्तुगुणसंज्ञायांतुतपरकरणस्योभयार्थतायुपगमात्पूर्ववत्रचरितार्थस्यकसामर्थ्यंयेनसंज्ञिनोरेदोतोरुपकुर्यादितिनत्रसवर्ण्म-
ग्रहणंस्यादेव॥अस्मिन्नपिपक्षेएकदेशेदीर्घग्रहणमितिवार्त्तिकंदीर्घस्यैवसंज्ञित्वादितिपूर्ववदेवव्याख्येयं॥स्यादेतत्॥प्रथमपक्षेतादृशेपर-
स्यतत्कालग्राहकत्वाद्दोषपूर्यन्तःस्तवइत्यादावेवस्यान्नतुलवःपवइत्यादावपीतिचेत्॥अत्रभाष्यं॥नायंतत्कारःकिंतर्हिअसंदेहार्थः
सूत्रस्यअयंवाक्यकारोपमिति॥नन्वेतज्ज्ञाप्यंतितिप्रत्ययग्रहणमित्येतद्वार्त्तिकप्रत्याख्यानपरैरेणतित्वरितेतिसूत्रस्थभाष्येणसहविरुध्य
ते॥तथाहि॥नत्रतितिप्रत्ययग्रहणंकर्त्तव्यंइहमाभूत्दिवउत्द्युभिरक्तुभिःइतिपूर्वपक्षयित्वादित्वमाशङ्क्यसमाहितं॥ततोभाष्यमान
स्याप्युकारस्यादसोमेरोदित्यत्रेवसवर्णग्राहकतास्यादित्याशङ्क्यतपरसूत्रेदकारस्यापिचत्वभूतस्यनिर्देशादूपरोपित्रत्कालग्राहकइति

परिहृतं॥ एवंचउकृदित्यादावपिदपरत्वमेव॥ अन्यथास्वरितप्रसंगात्॥ अयमेवचदपरनिर्देशोभाष्यमानस्याप्युकारस्यसवर्णग्राहकतांज्ञाप
यतीतिस्थितम्॥ इहतुऋदोरितिरकार निर्देशाल्लुवः पवइत्यादौदीर्घपीष्टंसाध्यते॥ अत्रप्रोचुः॥ थकारस्थानिकोधकारस्थानिकोवार्तकारो
त्रभाष्यस्थोविवक्षितः अतोनपूर्वोत्तरविरोधइति॥ ऋजवस्तुवार्त्तिकमतेस्थित्वेदंभाष्यम्॥ अतोनविरोधइत्याहुः॥ वस्तुतस्तुतपरस्त
त्कालस्येत्यत्रकारोननिर्दिश्यतेप्रयोजनाभावात्॥ दिवउत्इत्यादौनुतपरत्वादेवेष्टसिद्धिः॥ ननुवंतित्स्वरितमित्यस्य प्रसंगइतिचेत्र
॥ प्रत्ययाप्रत्ययथोःप्रत्ययस्यग्रहणमितिपरिभाषयातत्समाधानात्॥ यत्तुतित्स्वरितमितिसूत्रेहरदत्तेनोक्तं॥ तस्यास्तुपरिभाषायाभाष्य
वार्त्तिकयोरिह॥ अदर्शनादयंयत्नोमहानस्माभिरादृतइति॥ तत्रेदंवक्तव्यम्॥ थकारस्थानिकोधकारस्थानिकोवादकारइत्यवंरूपंयत्नंगौर
वे ओदः सूत्रेस्थित्वापूर्वाचार्यैरेवोक्तंइति॥ अत्रत्यैकेयत्नंथएवस्फुटं॥ ननुतएवास्माभिरादृतइतिब्रूमोनतून्नीतइतीतिचेत्॥ सत्यमादृतः
॥ तथापिपरिभाषायाअदर्शनादित्यसिद्धेहेतुः अंगस्येतिसूत्रेप्रत्याख्यानायभाष्यकैठरवेणेवएतत्परिभाषापन्यासात्॥ निरुतंदुरुतमि
त्यादिसिद्ध्यैसूत्रंकर्त्तव्यमितिस्थित्यैव्यर्थंपरिभाषेत्याशयइतिचेत्॥ तथापिथकारधकारस्थानिकोदकाइत्यर्थइतिव्याख्यानंकृशोनिष्फल
तयामूलस्वरसविरुद्धतयाचादरणानर्हएव॥ दिवउदित्यादौनित्स्वरितमित्यस्यशास्त्रेरेवविरहेणदकारश्लेषादेर्निर्बीजत्वात्॥ तथाहि॥ उदि
त्येषाउकारस्यसंज्ञा॥ नयाप्रत्यायितउकारस्तुविधीयते॥ तथाचसंज्ञायास्तित्वेपिसंज्ञिनःकिमायातं॥ वस्तुतस्तुसंज्ञापिनोतानतुतित्॥ त
परइतिहिसूत्रितं ननुतिदिति॥ यदिहिसंज्ञावत्संज्ञ पितांतएवतर्हिअतोभिस्ऐस् भवद्भिरित्यादावेवस्यान्नतुरप्सैरित्यादौ॥ तपरस्तत्कालस्येति
सूत्रंचव्यर्थमेवस्यात्स्वरूपंशब्दस्येत्यनेनैवगतार्थत्वात्॥ नचडः मुडादाविवसंज्ञायांकृत्तंलिंगंसंज्ञिनिलब्धुंशक्यं॥ नहदिहसामर्थ्यविर

हात्॥एवंचनित्त्वमित्यत्रभाष्यवार्तिकग्रंथःसर्वोप्यभ्युपेत्यवादएव॥स्याच्चोरिच्चेतिसूत्रेइच्चकस्यतकारेत्वमित्यादिग्रंथोप्येवमेव
तस्मान्नायंतकारःकिन्तर्हिदकारइतिदृष्ट्वेत्यभाष्यग्रन्थोयथाश्रुतएवसाधुरितिसत्पदयैराकलनीयं॥अयमेवचग्रन्थोभ्युपेत्यवादस्तूत्त
मुत्तरग्रंथानांगमयति॥एतेनऔत्इटोत्इत्यादिष्वपिविधेयस्यतपरत्वाभावोव्याख्यातः॥तित्त्वंतुदूरापास्तमितिदिक्॥इहआकारादयो
वर्णाःसांशाःइष्यंते॥यदाहुतस्यादितउदात्तमर्द्धह्रस्वंपूर्वस्यार्द्धस्यादुत्तरस्येदुतावितिवार्त्तिककारोप्याह॥ऐचोश्वोत्तरभूयस्त्वादिति॥त
त्रसंतिकेचिद्दृशाःस्वतंत्रवर्णांतरस्यसदृशाःयथा॥आकारादिष्वकारस्यसदृशौभागौ॥एसुपूर्वभागोअकारस्यउत्तरइवर्णोवर्णयोःऋकारे
उभयतोज्भक्तेरर्द्धमात्रा॥मध्येरेफस्यसदृशोर्द्धमात्राभागःऌकारेप्युभयतोज्भक्तिःमध्येस्वतंत्रऌकारसदृशोभागः तत्रस्वतंत्रतत्तद्वर्ण
ग्रहणेनविधीयमानंकार्यंतत्तत्सदृशेष्वंशेषुनप्रवर्त्तते॥तत्सदृशाहितेनतुतएवनरसिंहवज्जात्यंतराक्रांतत्वात्॥गोनौग्रहणंचात्रज्ञापकं
॥यदिहभागाअपिस्वतंत्रवर्णप्रयुक्तंकार्यंप्रवर्त्तयेयुस्तर्हिगोद्यचोसंख्यापरिमाणाश्वादेर्यदितिनौद्यच्त्वंचिनिचसूत्रद्वयेह्रस्वग्रहणंव्यर्थ
तार्थत्वाच्चोश्चब्दंनोशब्दंचनोपादत्त॥तेनाग्नेइंद्रवायोउदकमित्यत्रसवर्णदीर्घेन॥नचैचोयवायावइत्यनेनैतस्यबाधोस्तिनिवाच्यं॥अर्थादे
योहियेनप्राप्तिन्यायेनमध्येपवादन्यायेनवायणएववाधकतयाअग्नआयाहीत्यादौचरितार्थाः आग्नेइंद्रमित्यादौपरेष्वंशेषुदीर्घेणबाध्येरन्॥
अंतरंगोपिदीर्घः अवयवमापेक्षत्वात्॥तथाअग्नइतीतिएङःपदांतादित्येतन्न॥आलूपप्रभावेपत्रतुङ्ग.....रित्यत्रऐस्न॥यातेत्वादा
वनोलोपेन॥वाचातरतिवाचोनिमित्तमित्यत्रह्यज्लक्षणोढन्धतोनेतिदिक्॥नुड्विधिलादेशविषयेनुप्रतिविधेयं॥तथाहि द्विहलग्रहणं
मपनीयतस्मान्नुडेत्येवसूत्रंकर्त्तव्यं॥नचैवमानृधतुरित्यत्रेवआदृतुरित्यादावपिनुड्प्रसंगः अभ्यासेत्यस्यनियमार्थत्वात्॥नियमश्चासा

मान्यापेक्षः॥अकारोपधस्य यदि भवति अश्नोतेरेव ननु भट त्यादेरिति॥यदि तु अश्नाति मात्रे निवर्त्त्यं स्यात्तर्हि नाश्नतीत्येव रूपात्रोलट्यत्र स्वतं त्रस्य साधारणी जातिरनुवाद्ये विधेये चाविवक्षिता॥एकदेशस्य च पृथङ् निष्कर्षायोगात्तद्वारा अकारस्येव लकारादेशः फलति॥स्वतंत्रस्य कर्तृवृत्तिर्ल्लकारार्थो निर्देशः किंतु अंशांशिसाधारण्यात्रेवेत्यत्र ज्ञापकं तु लुटि च कूपतासिच कूपः ऋदुपधाच्चाकृपिवृतीति निर्देशात्॥यद्वा॥कृपउः रःलः इति च्छेदः कृपइति लुप्तषष्ठीकं पदं॥तच्च तेत्रेणा वृत्त्यावायोज्यं॥कृपेर्यो रेफस्तस्येलः कृपेऋकारस्यावयवो योरेफः रेफसदृशइति यावत्॥तस्य च लकार इति तेन च लीकृप्यत इत्यादि सिद्धं॥ईदृशपदविभागप्रदर्शनपरभाष्यादेव कृपेरितिसूत्रपाठस्यप्रमादिकत्वं निर्णीयते॥तदेवं तु द्विर्विधिलादेशयोः समाहितं॥विनामोनतिः तल्लक्षणं चोक्तं प्रातिशाख्ये॥नतिर्दैर्घ्यमूर्ध्न्य भाव इति प्रकृतेतु नस्यणत्वेन तिः तत्रेदं प्रतिविधानं॥छंदस्युदवग्रहादित्यत्र योगविभागः कार्यः ऋतः ऋतः परस्य नस्यणः स्यात्॥गृणातिर्गृणोतीत्यादि॥ततः छंदस्युदवग्रहात्॥ऋतृत्सेवेति पितृणां सुमत्इत्यादि॥ननु एवमपि तपरकरणात्पितृणामित्यादौ णत्वं न स्यादिति चेत्॥एवं नर्हि लत्वविधौ विवेहापिरषाभ्यामिति रेफतत्सदृशभागस्य साधारणी जातिर्निर्दिश्यते सुभ्रादिषु नृम्नेति शब्दपाठात्तज्ज्ञापकात्॥नच परयाजभक्त्याभ्यवधानं व्यवायेपीति विभज्य सामान्येन व्यवायेपि णत्वविधानात्॥नचैवं कृतेनेत्यादावति प्रसंगः॥अट्कुप्वाङुम्भिरिति नियमात्॥आस्रसमान्त्रायिकैस्तत्र त्यापितैर्वा व्यवाये यदि भवति तर्ह्येतैरेवेति नियमसूत्रस्यार्थः॥यद्वा तन्नेति शब्दपाठेन होतृपोतृप्रशास्तृणामित्यादिनिर्देशे नच ऋवर्णान्नस्यणत्वमेव ज्ञाप्यते लाघवात्॥एवंहि व्यवाये पि इति योगविभागोपि न कर्त्तव्यो भवतीति॥भाष्येतु वर्णैकदेशांवर्ण ग्रहणेन गृह्यंते इति हिनीयोपि पक्षः समर्थितः॥सतु बहुप्रतिविधयत्वेन गौरवभयान्नेहप्रपञ्च्यते॥ननु यदि वर्णैकदेशावर्णग्रहणेन नगृ

ल्यंतेनहिंकुक्कुटःपिप्पलीपिन्नइत्यादौसंयोगसंज्ञानस्यात्॥अखंडस्यमात्राकालस्यकृप्तत्वइत्यस्यैकहल्ग्रहणेना
ग्रहणात्॥ननुवरंहस्यानुपदेशात्कथंहल्त्वंइतिचेत्माभूत्तर्हितदपि॥अवयवानांहल्त्वेतुकृतःसंघ्यतासंवत्सरः यैल्लोकंइत्यादौतुएकव
र्णानामपिहल्त्वंभविष्यति॥अणसूपदिष्टैर्ग्रहणात्॥तदवयवयोस्तुहल्त्वंनस्यादेव॥ततश्चसंयोगसंज्ञाविरहेततः पूर्वस्यगुरुत्वाभावेयु
तोनस्यादिति॥अत्राहुः॥व्यंजनमर्धमात्रंएव॥आम्रूच्चारणात्तुतुल्यरूपयोर्ह्योरेकत्वभ्रमः॥इदंचशिष्टसमाचारात् प्रक्रियादर्शनाच्चअवश्यं
स्वीकार्यं॥परमार्थदर्शनंतुपदेनवर्णाविद्यंतेवर्णेष्ववयवानच॥वाक्यात्पदानामत्यंतंप्रविवेकोनकश्चनेतिवाक्यपदीयोक्तरीत्यास्फोटं
सिद्धांतयतांकौंस्यपूर्वपक्षस्यावसरः॥हयवरट्॥हकारोयंहिरुपदिश्यते॥यदितुपरत्रैवोपदिश्येत॥अडशहशइणग्रहणेषुनगृह्येत
॥ततश्चअर्द्धेणेत्यत्राड्व्यवायेपीतिणत्वंनस्यात्॥महान्हिइतिस्थितेमहांहिइतिनस्यात्॥अत्रहिदीर्घादटिसमानपादइतिरुः॥अतो
हिनित्यमित्यनुनासिकः॥भोभगोअघोअपूर्वस्येतियत्वं॥हलिसर्वेषामितियलोपः॥तत्राप्यशीत्यनुवर्त्ततइतिवस्यते॥ब्राह्मणेहितंब्रह्म
त्रहशिचेत्यत्रनस्यात्॥तथालिलिहिढे लिलिहिध्वेइत्यत्रविभाषेटइतिमूर्द्धन्यविकल्पोनस्यात्॥तत्रहिइणःषीध्वमितिसूत्रादिणइत्येस
नुवर्त्ततेतदेवंअशिहशिइणिचेत्रिचतुर्षुग्रहणंप्रथमोपदेशस्यफलमितिस्थितं॥यदितुपरत्रनोपदिश्येत॥वलरलह्यूशलग्रहणेषुनगृ
ह्येत॥तत्रभ्रक्दिहिस्पिहिइत्यत्ररुदादिभ्यःसार्वधातुकइतिवलादित्वप्रयुक्तइण्नस्यात्॥णिहप्रीतौ॥स्निहित्वास्नेहित्वासिस्निहि
षतिमिस्नेहिषतिइत्यत्रलोव्युपधादितिकित्वंनस्यात्॥अदग्धांअदाग्धमित्यत्रघत्वस्यासिद्धत्वात्कोदग्धलःपरःसिजिति॥ह्यलोह्यल
तिनप्रवर्त्तेत॥अघुक्षत्अलिक्षदित्यत्रशलइगुपधादनिटइतिक्सोनस्यात्॥तस्मात्स्त्याहारणेचतुष्टयेप्रथमोपदेशस्यचतुष्टयेचेहि

तीयोप—देशस्यफलमस्तीतिस्थितम्॥स्यादेतत्॥रेफस्ययरूकार्याणिप्राप्नुवंति॥तद्यथामद्रह्रदेभद्रह्रदइत्यत्रअंचःपरांङ्कारात्परस्यह्रस्य
इतिविधीयमानंह्रित्वंनह्यस्तीत्याद्योयकारस्येवप्राप्नोति॥नचरोरीतिलोपःमुकरःलोपंप्रतिह्रित्वस्यासिद्धत्वाल्लोपयमामितिलोपस्तुवैकल्पिक
इतिवक्ष्यमाणत्वात्पक्षेरेफहूयंश्रूयेत नचव्यंजनपरैकस्यानेकस्यवाउच्चारणेविशेषोनास्तीति असिद्धत्ववत्तूक्तेभाष्यकृताक्तवक्ष्यमाणत्वा
न्नायंदोषइतिवाच्यं॥सूक्ष्मत्वाद्दुर्ज्ञेयोविशेषइतितदर्थात्॥ननुसर्वथाविशेषविरहोभिप्रेतः॥शरोचिहलोयमामित्यत्रशास्त्रवैयर्थ्यप
त्तेः॥तथाचेत्मुखइत्यादौयरोनुनासिकेनुनासिकोवेतिपक्षेणकारःप्रवर्त्तेत॥स्थानसाम्यात्॥कुंडरेरेनेत्यादौवापदांतस्येतिपक्षेरेफ
प्रवर्त्तेतरेफोष्मणांस्वर्णानसंतीत्येतद्धिजातीयःसवर्णोनास्तीत्येवंपरं॥स्वस्यस्वयंसवर्णोभवत्येवतुल्यास्यप्रयत्नत्वात्॥रोरिलोपप
रूकनास्ति॥तंप्रतिपरःसवर्णस्यासिद्धत्वात्॥अथह्रित्वानुनासिकपरसवर्णनिवृत्तयेयवाभ्यांपूर्वत्रेफोनुरुष्येत॥हरयवडिति॥तर्हिर
लोव्युपधादिद्येनहूकारांतेष्वपिप्रवर्त्तेत॥ननस्त्रदेवित्वादिदेविषतीत्यत्रपक्षेगुणोनिषिध्येत॥ननुअव्युपधादितिछित्वाअवकारांता
द्युपधादितिव्याख्यास्यतइतिचेत्॥एवमपिगौधेरःपचेरन्नित्यादौलोपोव्योरितिनप्रवर्त्तेत।रेफस्यवस्त्यनेनभावात्॥रलीतिवक्ष्यतीति
चेत्॥हूयगतौहूय्यादित्यादौयकारेतिप्रसंगः ननुयथाऋतएवसूत्रेवलीतिसरेफंपदंछित्वारेफेवलिचेतिव्याख्यानान्नोक्तदोषइतिचेत्॥
एवमपिइकोरणचिसंयोगादेरनोधातोरण्वतः उदात्तरणोहलूपूर्वादिग्रणः संप्रसारणमित्यादिक्रमेणयण्ग्रहणानिसर्वाणिरेफेणग्राह्याणि
स्युः॥नैचैतावतापीष्टनिर्वाहः इकोरणित्यत्रसंख्यातानुदेशेनइकारस्यरेफः उकारस्ययकारः ऋकारस्यवकारः इतिबहूपलूवप्रसंगात्॥न
नुयथाश्रुतेपियथासंख्येननिर्वाहोदुरुपपादः।तथाहि॥विधीयमानतयायवलाःसवर्णान्नगृह्णंतीतिचत्वारस्तावद्यणः गुणानामभेद

कतयानुनासिक संग्रहेपिपृथगणनाविरहात्॥ इकस्तुसवर्णग्रहणात्षट्षष्टिः॥ नचषट्षष्टेरुपस्थापकानांइकृशब्दवाच्यानाविकारादीनांचतुष्टमस्त्येवेतिवाच्यं॥ तृतीयचतुर्थाभ्यामृकारलृकाराभ्यांप्रत्येकंतस्याश्चत्वारिंशतउपस्थितौसत्याम्लृकारेरेफादेशस्यऋकारेचलकारादेशस्यदुर्वारत्वात्॥ तस्मात्स्थानेंतरतमइत्यनेनैवप्रकृतेर्निर्वाहः॥ यथासंख्यसूत्रंतुनंदिग्रहिपचादिषूपयोस्यतइत्येवनिष्कर्षः॥ तथाचइकोरणितिन्यासेपिते नैवनिर्वाहोस्तितिचेन्न॥ वैषम्यात्॥ यथाश्रुतेह्यविरोधात्परिभाषाद्वयमपिइकोयणित्यत्रप्रवर्त्तते॥ इकोयथासंख्यमंतरतमोयणस्यादितिरणितिन्यासेतुपरिभाषयोर्विरोधात्॥ परस्त्वयथासंख्यमेवप्रवर्त्तेत॥ तस्मादनुचितोरेफस्यस्तस्थानादप्रकर्षः यथाश्रुतेनुहित्वादिदोषत्रयंदुर्वारमिति॥ अत्रोच्यते॥ रेफस्याविशेषतः श्रुतेनहित्वंप्रतिनिमित्तत्वेनसामान्यतः श्रुतंकार्यित्वंवाध्यनेन॥ यथाब्राह्मणाभोज्यंतांमाठरकौंडिन्योपरिवेविशामितिविशेषतः श्रुतेनपरिवेषणेनमाठरकौंडिन्ययोः सामान्यतःप्राप्तंभोजनंबाध्यतेनहूत॥ यद्यपीहलक्ष्यव्यक्तिभेदेनोभयंसंभवतिनथापिसत्यपिसंभवेसामान्यतःप्राप्तंविशेषप्राप्तेनबाध्यतइत्युक्तत्वान्नदोषः॥ एवंचाचोरहाभ्यामितिसूत्रेयरइतिरेफग्रिन्नपरमेवेतिस्थितेअनचिचेत्यत्रापिनथैव॥ अर्थाधिकाराश्रयणात्॥ तेनइर्यनुर्भवइत्यत्रापिरेफस्यनहित्वं॥ नन्वेवंदध्युदकादौयणनस्यात्॥ विशेषतःश्रुतेनस्थानित्वेनइकोनिमित्तत्वस्यबाधइतिचेन्न॥ तत्रलस्यानुरोधेनव्यक्तिपक्षाश्रयणात्व्यक्तिपक्षेहिप्रतिलक्ष्यमसंकल्पलक्षणंप्रवर्त्तते॥ यद्वा॥ प्रतिलक्ष्यंभिन्नानांसर्वेषांलक्षणानांतंत्रेणेच्चारणमिकोयणचीति॥ ततश्चैकमपिनार्थतोनिमित्तत्वप्रतिपादनाद्दोषः॥ नचैवंश्रीशइत्यत्रापियणप्रसंगः॥ व्यक्तिपक्षेरिप्रतिषेधेपरमेवेतिनियमबलेनतद्व्यक्तिविषयकशास्त्रस्यैवविरहकल्पनात्॥ एवंअपवादविषयेसुस्त्रियावित्यादौबोध्यम्॥ परिहृत्यापवादं

विषयंतनउत्सर्गेऽभिनिविशतइतिन्यायात्॥ जातिव्यक्तिपक्षेचलस्यानुरोधाद्यवस्थयाआश्रीयेतेइतिपस्पशायामेवोक्तं॥तस्मादिदमुच्च
रस्यपत्युत्तरपदाण्ण्यङ्त्यादिनिर्देशाश्चेहलिंगं॥भाष्येतुनेमौरहोकार्षिणोहिर्वचनस्यकिंतर्हिनिमिमावित्युक्तं॥तत्रहकारग्रहणंर
ङ्तार्थंतस्ययर्बहिर्भूतनयायथानहित्वेकार्यितानथायरंतर्भूतस्यापिरेफस्येति॥एवंअनुनासिकपरसवर्णविधावपिस्थानेंतरतमपरि
भाषासंस्कृतौस्थानप्रयत्नोभयोतरतमेएतन्मुरारिःत्वङ्करोषीत्यादौकचिल्लुब्धावकाशेअनंतरतमेप्रागुक्तेनप्रवर्तते॥नातिप्रसाश्रय
णादेवेतिसंक्षेपः॥अत्रवार्त्तिकं॥अयोगवाहानामट्प्रणत्वंशर्षुजशभावषत्वे॥अविशेषेणसंयोगोपधासंज्ञालोत्यविधिर्हिर्वचनस्यनिव
त्तिनिषेधाइतिभाष्यस्यार्थः॥अविद्यमानोयोगःप्रत्याहारेषुसंबंधोयेषांतेऽयोगाःअनुपदिष्टत्वादुपदिष्टैरगृहीतत्वाच्चप्रत्याहारैर्नसंभूना
दित्यर्थः॥वाहयंतिनिर्वाहयंतिप्रयोगमितिवाहाः॥अयोगाश्चेतिकर्मधारयः॥अनुपदिष्टत्वेउपदिष्टैरगृहीतत्वेचसतिश्रूयमाणादित्यर्थः॥न
चविसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारयमाइतिभाष्यंएतच्चऋतिकवालतिलत्वेतिविहितयोरीषत्स्पृष्टयोरप्युपलक्षणं॥तथाचतु
ल्यास्यसूत्रेभाष्यं॥तयोरचत्वंवक्ष्यामीति॥तत्फलंतुतत्रैवस्पष्टं॥तत्रयमानांलक्षणंअनुनासिकसंज्ञासूत्रेप्रपंचयिष्यामः॥एषामट्सू
पदेशःकर्त्तव्यःणत्वंफलं॥उरःकेणउरःपेणउरूकेणउरपेऽपेणअङ्व्यवायइतिणत्वंविसर्जनीयजिह्वामूलीयोपध्मानीयैर्व्यवायेपिसिध्य
ति॥नायमज्ञानार्थकः॥सोपदादावितिसत्वप्रसंगात्॥किंतुउरःकायतिउरःपातिइतिविग्रहः॥कैशब्दे॥पारक्षणे॥आभ्यामातोनुंप
सर्गकः॥कुप्वोःकःपौचेतिचकारात्प्रक्षिकोविसर्गः॥नचैवमपिगतिकारकोपपदानांप्राक्सुबुत्पत्तेःसमासाभ्युपगमात्सोपदादाविति
प्रवर्त्तनेतिवाच्यं॥तस्यदधिसेचौधनक्रीतेत्यादिसिध्यर्थमनित्यतायावस्यमाणत्वात्पाशकल्पेत्यादिपरिगणनाच्च॥प्रोंभणं॥अट्

कुप्वाङ्भ्यःसूत्रेनुम्ग्रहणंनकर्त्तव्यंभवति॥अभ्येदमवधेयं॥अट्सुक्रियमाणउपदेशोःकारानंतरमिकारात्प्राक्कर्त्तव्यः॥तेनइण्सुअनंतर्भावात्यत्रसुयशःसुइत्यादौइण्कोरित्यधिकृत्यविधीयमानमादेशप्रत्यययोरितिषत्वेनभवति॥असुचांतर्भावात्संस्कर्त्तव्यत्रानुस्वारादचःपरत्वमाश्रित्यसकारस्यहित्वंकैयटेनाष्टमेवक्ष्यमाणंसंगच्छते॥नचैवंहरिःकरोतीत्यादाविकोयण्चीतियण्प्रसंगः॥विसर्गस्यासिद्धत्वात्॥एवंहरिंपश्यतीत्यादावनुस्वारस्यासिद्धत्वंबोध्यम्॥शर्षुचोपदेशःकर्त्तव्यः॥जशभावस्तावत्सयोजनं॥तथाहि॥वार्त्तिकमस्तेउञ्छआर्जवइतिधातुरुपधानीयोपधःपठ्यते॥तत्रझलांजशझशीतिजशभावेभांतरतम्याद्गकारादेशः॥उञ्छिताउञ्छितुं॥शर्षूपदेशाद्विनातरीयकृत्वादेवझलत्वमप्यापाति॥भाष्यकारस्तुनैतन्मेने॥तथाहि॥उपधानीयोपधत्वपक्षेऽञ्जिजिषतीतिनसिध्यति॥अभ्यासेबकारमात्रश्रवणप्रसंगात्॥हलादिशेषेणजकारस्यनिवृत्तेः॥यदि—तुपूर्वत्रासिद्धंनहिर्वचनेइत्युक्तेःपूर्वकारस्यहित्वंतदास्यष्टएवबकारस्यशेषः॥अथउभौसाभ्यासस्येत्यनेनानित्यताज्ञापनाद्धिर्वचनेप्यसिद्धत्वमाश्रीयते॥ओंजिढदित्यत्रयथा॥तथाप्यभ्यासेउपधानीयश्रवणेत्वेअभ्यासेचर्चेतिजश्त्वेनबकारएवश्रूयेत॥इष्यतेत्वभ्यासेजकारइतिप्राचः॥वस्तुतस्तुहिनीयपक्षेउपधानीयमात्रमभ्यासेश्रूयेतेतेचोच्चारयितुमप्यशक्यं॥जश्त्वंतुदुर्लभं॥प्रलुनिचरंप्रलुनिचरदित्यष्टमेसिद्धंनयिष्यमाणत्वात्॥उपधानीयेतुस्थानिसत्वेनतान्न्याय्यंहित्वापत्याःभ्यासेइकारदौर्लभ्याच्च॥किंच॥अत्रपक्षेअस्मात्पूर्वंकृतेउपधानीयस्यजश्त्वेअभ्युञ्छःसमुञ्छइतिस्यात्॥इष्यतेत्वेभ्युञ्छसमुञ्छइति॥नन्वतएवकुप्वोरित्यधिकारेसोपदादाविति सूत्रेउपधानीयस्यचेतिवार्त्तिकेनकवर्गपरतउपधानीयस्यसकारोविधीयतेततोजश्त्वेन दत्वंविधीयतेइतिचेत्सत्यं॥उपधानीयस्यचइतिवार्त्तिकारंभएवतुगौरवार्हइतिभूमः॥वकारोपधोयंइतिवृत्तिकारमतेतुतिका

रस्यहित्वनिषेधःसमुद्र इत्यादौदकारादेशश्चेत्युभयमपिवचनेनैवसाधनीयंस्यात्॥ तस्माद्दकारोपधस्यवार्थेअभ्युद्रः समुद्र इतिसिद्धम्॥ कथंतर्हिउब्जिताउब्जितुमित्यादिसिध्यतीतिचेत्॥ शृणु॥ भुजन्युब्जौपाण्युपतापयोरित्यस्मिन्कुत्वाभावनिपातनार्थेसूत्रेबकारोलक्षणेनानुमीयते॥ उब्जेरकुत्वविषयेदकारस्यभकारविधायकंबकारविषयकंवचनमस्तीतितच्चानुमीयमानंवचनंभवद्भेरितिवा॥ अथउब्जेरितिवाउभयथापिस्तोश्चुनाश्चुरित्यस्यानंतरंकल्प्यते॥ उब्जेःस्तोर्दकारस्येतियोषत्॥ श्चुनायोगेभकारोबकारोवाभवतीतिसूत्रार्थः॥ उब्जेरितिकिं॥ तञ्जः॥ श्चुनेतिकिं॥ अभ्युद्रः समुद्रः॥ हहहिचजोःकुघिण्यतोरितिभत्वेकृतेश्चुनायोगोनास्तिस्तोः श्चुनेतिपदहणेपजीवनार्थेनोक्तस्यलक्षणएवकल्पनंयुक्तं॥ अन्यथाबहुतरकल्पनेगौरवंस्यात्॥ एवंउब्जिजिषतीत्यपिसिद्धं॥ नन्द्राइतिदकारस्यहित्वनिषेधात्॥ अंजेरित्वाड्डत्वबत्वे॥ पूर्वत्रासिद्धेनास्तिविप्रतिषेधोभावात्तस्येतिवक्ष्यमाणत्वात्॥ अन्तरंगत्वाड्डत्वंबत्वेइत्यपिन॥ असिद्धत्वादेव॥ नचपूर्वत्रासिद्धीयमहित्वेवचनेइत्यसिद्धत्वप्रतिषेधःशंक्यःहित्वेकर्त्तव्येसतिहिसनिषेधः॥ नतुहित्वविधेरपि॥ इहतुनन्द्राइतिसूत्रेणहित्वनिषेधेकर्त्तव्येनिबाधमेवासिद्धत्वमितिदिक्॥ अथवामास्तुवाक्यशेषानुमानंभुजन्युब्जाविति निपातनादेवबकारोलक्॥ नचैवमसिद्धत्वाविशेषाद्दकारस्यैवहित्वंस्यादितिवाच्यं॥ दकारोपधनिर्देशसामर्थ्याज्जिशब्दस्यहित्वेकृतेतदोदकारस्यबकारप्रवृत्तेः॥ नचास्मिन्पक्षेअभ्युद्रइत्यादावपिबकारप्रसंगः॥ उक्तविषयेएवबकारोनिपात्यतइत्यभ्युपगमात्॥ नन्वेवंकुत्वविषयेचरितार्थत्वात्कथंदकारोपदेशस्यसामर्थ्यमुक्तं॥ येनहित्वानंतरमेवबकारःप्रवर्त्तेतेतिचेत्॥ अनभिधानादतोघञादिमास्कनिपातनंचैवमविशेषेणास्क॥ अभ्यंद्रः समुद्रइत्येतन्नोब्जेरूपं॥ किंतुउपसर्गदूषपूर्वकादृमेरन्येष्वपिदृश्यतइतिडप्रत्ययः॥ व्युत्पत्तिमात्रंचेदं॥ रूढिशब्दत्वात्॥ समुद्रकः

संपुटकइत्यमरः॥तदेवमयोगवाहानांशर्वूपदेशस्यजश्त्वभवत्वंप्रयोजनंवार्त्तिकमते अस्ति॥भाष्यकारमतेतुनास्तीतिस्थितं॥तथाषत्वमपिप्र
योजनंसर्पिःषुषनुःषु॥नुम्विसर्जनीयशर्व्यवायेपीतिसूत्रेविसर्जनीयग्रहणंनकर्त्तव्यंभवति॥शर्व्यवायइत्येवसिद्धत्वात्॥नुम्ग्रहणंतू
भयथापिकर्त्तव्यमेवनुमूस्थानिकेनैवानुस्वारेणव्यवधानेयथास्यात्॥इहमाभूत्॥पुंस्सिति॥नुम्ग्रहणंहिस्वस्थानिकस्यानुस्वारस्यल
क्षकं॥अन्यथाभसंज्ञत्वात्॥नहिइण्कवर्गाभ्यासुत्तरःसकारोनुमाव्यवहितःषत्वविधौसंभवति॥अनुस्वारेषत्वस्यासिद्धत्वादित्याहुः
॥अस्तुवास्थानिवद्भावेननुमूत्वं॥नथापिस्वाश्रयस्यानुस्वारत्वस्यापिसत्वात्शर्त्वंनैवसिद्धेनियमार्थतायुक्ता॥नियमश्चसजातीयापेक्ष
इति अनुस्वारेणव्यवायेचेद्भवतिनहिनुमैवनत्वन्येनेतिफलितं॥वस्कनस्कअतिदेशंप्रतिअनुस्वारस्यासिद्धत्वादतिदेशएवदुर्लभःसु
हिंसुइत्यादौविधायकत्वसंभवेनियामकत्वानुपपत्तिश्च॥नथापिलक्ष्यानुरोधाल्लक्षणेत्येवप्राप्तं॥यथाङ्क्ष्वाङ्सूत्रे॥नत्रेन्नृनादीण
त्वंमाभूत्नोभणादौचस्यादित्येवमर्थंलक्षणेतिचेत्॥इहापिसुहिनसुपुंसित्यादौमाभूदितितुल्यं॥णत्वविधावनुस्वारमात्रेलक्षणाव
तेनुमूस्थानिकएवेत्यन्यदेतत्॥अस्मिंश्चपक्षेशर्वूपदेशेपिग्रलत्वम्विवहलत्वयर्त्तेअपिनोतरीयकत्वादेवसिद्धे॥तस्मलंवृत्तरवार्त्ति
कव्याख्यानावसरेनरमेनस्कृतीभविष्यति॥तथारवरत्वमपि॥तेनसोःकःपौचेतिसूत्रांतर्गतोविसर्गःसिद्धत्वंचसौत्रनिर्देशेनै
वोक्तवार्त्तिकस्यापीत्याप्यनइतिबोध्यम्॥अनेनसौत्रंविसर्जनीयग्रहणमेवापेक्ष्यशर्वूपदेशंप्रत्याचक्षाणायथाश्रुतमदूपदेशपरंव
र्त्तिग्रंथंव्याचक्षाणाःपरास्ताः॥अदूपदेशेनअलत्वअदर्लयोर्लोभेपिहलत्वयरत्वालाभात्॥तत्फलस्यचवक्ष्यमाणत्वात्॥नचाह
स्तेवचयकारोत्तरमुपदेशाद्लाभइतिवाच्यम्॥तथासतिपयःस्वित्यत्रापि विणःपरत्वेनषत्वापत्तेः॥अचत्वासिद्ध्यासमःसुटीत्यत्रत्य

वैयाकरणादिग्रंथविरोधापत्तेश्चेतिदिक्॥अविशेषेणेत्यादिवार्त्तिकस्यायमर्थः॥यंत्रयत्रप्रदेशेप्रयोजनंदृश्यतेतत्रतत्रोपदेशः कर्त्तव्यःप्रयोजनानितुसंयोगसंज्ञादीनिपंचेति॥तथाहि॥वार्त्तिकमतेउञ्चेरुपधानीयोपधतयाउपधानीयस्यहल्संज्ञांविनासंयोगसंज्ञान सिद्ध्यतिजश्त्वंत्वसिद्धंततश्चसंयोगेगुर्वितिगुरुसंज्ञायाअपिविरहात्उञ्चकइत्यत्रगुणोरन्तवद्भिपुतोनस्यात्॥तस्मात्लुतगुरुसंज्ञासंयोगसंज्ञाहल्संज्ञानांउत्तरोत्तरसापेक्षतयाप्लुतसिध्यर्थंहल्संज्ञाएषितव्या॥तेदत्तेत्यादिनोक्तंसंयोगसंज्ञाप्रयोजनमिति॥तत्रोपधासंज्ञाप्रयोजनं॥निष्कृतंदुष्कृतंइदुदुपधस्यचेतिषत्वंयथास्यात्॥भाष्यकारस्त्वाह॥इदुदुपधस्थानिकोयोविसर्गइतिव्याख्यानान्नेदंप्रयोजनं॥उपधाग्रहणप्रत्याख्यानाद्वा॥इदुद्भ्योपरस्यविसर्गस्येत्येवइष्टसिद्धेरिति॥अलोन्त्यदिधिभ्वप्रयोजनं॥वृक्षस्तरतिविसर्जनीयांतस्यकंपदस्यसइतिपक्षेअंत्यस्यसत्वंयथास्यात्॥पदस्ययोविसर्जनीयइतिव्याख्यानान्निर्दिश्यमानस्येतिदीर्घभाषयावासिद्धत्वादिदमपिनप्रयोजनं॥हिर्वचनंचप्रयोजनं॥उरःकःउरःपः अनचिचेतिअचउत्तरस्ययरोविधीयमानंहिर्त्वंसिद्धंभवति॥तथास्थानिवद्भावप्रतिषेधोपिप्रयोजनम्॥यथाउरःकेणेत्यादौ॥अङ्गावयवेतिणत्वंसिद्धंभवति॥एवंव्यूढोरस्केनेत्यादावपिप्राप्नोतिस्थानिवद्भावात्सकारस्यतत्रानास्विधाविति प्रतिषेधोऽल्त्वेसतिसिध्यति॥नचपूर्वत्रासिद्धेनस्थानिवदितिनिषेधोस्तिवाच्यं॥नपदांतसूत्रशेषभूतस्यनस्यभवःपरस्मिन्नित्येतद्विषयकत्वात्॥स्थानिवद्भावंप्रतित्रिपादीस्थस्यासिद्धतयान्यायसिद्धंनदितिपक्षेतुनेदंप्रयोजनं॥उरःकेणेतिणत्वं संस्कर्नेत्यत्र सकारस्यहित्वंचाधिकंप्रयोजनंबोध्यमितिदिक्॥यद्यपिसर्वमिदंअट्शरोरुपदेशेनसिद्ध्यत्येवतथापिवार्त्तिकाक्षररचनायाहेधापिसंभवइतिभावः॥णअत्राकारोनुनासिकःप्रतिज्ञातेः॥ननुहकारादिष्विवोच्चारणार्थः॥तेनोरण्रपरइत्यत्ररप्रत्याहारग्रहणेभवति॥प्रत्याहारग्रहणेज्ञाप

कस्तुञ्रकारलकारयोः सवर्णविधिरितिवार्तिकनिर्देशः ॥ननुअइउणित्यत्रानुबन्धोणकारः सएवेहानुवर्ध्यतेतेनाणग्रहणेष्विणग्रहणेषु
चपूर्वेणपरेण वेतिसंदेहः प्राप्नोति। तस्मादसंदेहायेह अनुबंधानरमेवकृतोनकृतमितिचेत्॥नाव्याख्यानतोविशेषप्रतिपत्तिर्नहिसंदे-
हादलक्षणमितिपरिभाषांज्ञापयितुमनुबन्धस्यैवपुनरनुबंधात्॥ञमङणनम्॥ञभञ्॥अत्रमकारानुबंधोभाष्येप्रत्याख्यातः॥सहिप्र
त्याहारत्रयेउपयुज्यते॥ अम् यम्ङमितितत्रत्रयेञकारेणैवनिर्वहति॥तथाहि॥पुमःखय्यम्परेइत्यत्र॥नचञ्मकारभकारपरःखयस्ति
॥येनातिप्रसंगःस्यात्॥तथाहलोयञ्ञोयञि लोपइत्येवपाठ्यं॥नचञ्मकारभकारौञ्मकारभकारपरौस्तःहलउत्तरयोस्तयोःसंभवेतुञ्मरो
मरिइतिलोपेनभाव्यमेव॥तथाङ्णोःकुक्टुगित्यत्रविङ्णुण्नित्यमितिपाठ्यं॥नचञ्मकारभकारौपक्षांतौस्तः ॥उञ्ज्योर्लभेश्चक्विपितौस्तएवैति
चेन्न॥ऊञ्ज्योर्दीपधतयासंयोगांतलोपेसतिउदितिरूपाभ्युपगमात्॥लभेस्तुजस्त्वविधानात्॥एवंत्वेवमपिआगमिनस्त्रयोङणनेभ्यःपरे
अचःआगमास्तूपंचेतिसंख्यानानुदेशोनस्यादितिचेत् न॥यथासंख्यमित्यत्रहिविध्यर्थंग्रहणंतेचलायांनिर्दिश्यमानगतसंख्यंग्राह्यं-
मांश्रीपतेः॥ ननुलस्यसंस्कारवेलायांप्रयोगगतं॥तस्मान्मास्तुमकारोनुबंधइतिस्थितं॥ घढधष्॥जबगडदश्॥खफछठथचटतव्॥क
पय्॥शषसर्॥हल्॥इतिमाहेश्वराणि अक्षरसमाम्नायसूत्राणि॥अत्रादेःसंग्रहः॥एकस्मान्ङणवटाह्यांषस्त्रिभ्यश्चकारमारभ्यु॥ते
चौचतुर्भ्यःपंचभ्यःशलौषड्भ्यइति॥अस्यार्थः॥ङणनमएकस्मात्तेयाताःस्युः॥तथाहि॥ङकारणकारदेवपरोग्राह्यःएवंपर
रूपमितियथा॥ननुर्षिड्विदादिभ्योङःस्यतिवक्तिरव्यातिभ्योङित्यकारणग्रहणमस्त्वितिचेन्न॥आदिरंत्येनेत्यत्राणुदित्सवर्णस्यचेत्यंतो
त्यत्ययइत्यनुवृत्तेः॥अतएवरोःसुपीतिनमत्याहारग्रहणं॥सुपिचेत्यत्रतुअत्रत्ययइतिप्रतिषेधोनास्ति॥यञादाविति विशेषणात्॥उ

नत्रत्र च बहुवचनेऽझलीति विशेषणात् ॥ सुप्तिङंतंपदमित्यत्र तिङ्साहचर्यात् शासेरिदङ्हलोरित्यत्र तु अङ्ग्रहणसामर्थ्यादपि प्रत्याहारग्रहणं न भवति ॥ अङ्गादीहलादौ चेति हि व्याख्याने अङ्ग्रहणं हलोरिति व्यर्थमेव स्यात् ॥ हि विधौ एव हि कृतः प्रत्ययाः अङ्गादयो हलादयश्च ॥ व्यतिशासेरित्यत्र तु क्ङिति त्वमेव नास्ति ॥ अटामहैकादेशस्य सवर्णनिवर्त्तनेन अज्झादित्वाच्च ॥ ऋदशोडीत्यपि न प्रत्याहारः ॥ ऋकारांते षु ऋदृत्यृतामिति गुणविधानात् ज्ञापकात् ॥ सनि च इडभ्यासेति न प्रत्याहारः ॥ इकोझलिति कित्त्वविधानात् ॥ अज्झनगमां सनीति दीर्घविधानाच्च इडंतानां सनि गम्यादेशे हि सति उदात्तसूत्रद्वयं निर्विषयं स्यात् ॥ परिमाणाख्यायां सर्वेभ्यः इडभ्यासेत्यपि न प्रत्याहारः ॥ वेयर्थ्यप्रसंगात् ॥ तथाहि ॥ इकारांतेभ्यश्च भाव्यं ॥ उकारांतेभ्यऋदोरवित्यण् ॥ ऌकारांतानामंत्येवनएजंतानां अपि अनैमित्तिके न आत्वेन प्रत्ययोत्पत्तेः प्रागेव भाव्यं अतः प्रत्ययोत्पत्तिवेलायामेजंतानां संशेव ॥ ऋदंतानां सिवशिष्यंते ॥ नत्रउरित्येव लाघवाद्वा यात् ॥ वस्तुतस्तु सामान्यलक्षणेनैव ऋदंतेषु घञः सिद्धत्वात् सूत्रमेवेदं न कुर्यात् ॥ अथोच्येत इडभ्यासेत्यारंभसामर्थ्यादिवर्णो वर्णेष्वेव अजभ्यांसहवैकल्पिकोघञ् समाविशतीति ॥ तदपि न ॥ एवं हि सति अजेपार्विधावेव वी ग्रहणं कुर्यात् ॥ क्रीङ्जीनांणाविति न प्रत्याहारः ॥ क्रीज्योः पृथग्ग्रहणं वैयर्थ्योपत्तेः ॥ न चेकारांतानां मध्येएतयोरेवेति नियमार्थमिति वाच्यं ॥ एवं हि इक इत्येव ब्रूयात् ॥ एङंतानां सामान्यलक्षणेनैव आत्वस्य सिद्धत्वात् ॥ इङ्धार्योरित्यपि न प्रत्याहारः ॥ धारिणा साहचर्यात् ॥ तस्मात्सिद्धं डकारः एकस्मादेवेति ॥ तथा त्रकारोप्येकस्मादेव ॥ अतो दीर्घो यञीति ॥ तथा अइउणित्येषणकारोप्येकस्मादेव ॥ अणिनियथा ॥ अथेणः कीध्वमित्यादौ विण् प्रत्याहारोप्यनेनैव कृतो नेति चेन्न ॥ अचिश्नुधातुभ्रुवांय्वोरित्यत्र इकारोकारयोः स्वरूपेणनिर्देशात् ॥ अन्यथा हि संहितायां मात्रला

घवात्पदद्वेदेप्यर्द्धमात्रालाघवादिणइत्येवब्रूयात्॥व्याख्यानाच्चपूर्वेणनतुपरेणग्रहीष्यते॥व्याख्यानंचसिद्धांतेपिशरणं॥घोरित्यपि
हिनिर्देशेकिंह्रस्वयोर्ग्रहणमुतदीर्घयोरुतयकारवकारयोरितिसंदेहःस्यादेव॥एवंचएचइग्ग्रस्वादेशइतिसूत्रेइणइत्येवप्रतिपत्तिलाघ
वार्थंवक्तव्येइग्ग्रहणमपीहलिंग॥इणग्रहेहितत्रयथासंख्यप्राप्तिरेवनेतिनतत्परिहाराययतितव्यमितिदिक्॥एवंकारोप्यकस्मादेव्र।
नश्छव्यप्रशानिति॥एचेत्यवायावइतिसूत्रेअवइतिनप्रत्याहारः आयादिसाहचर्यात्॥एवंटकारोप्येकस्मात्॥अट्कुप्वाङ्नुमिति॥ह्याभ्या
षः॥एकान्वोदशोभ्रष्ट्रषन्तस्यस्थोरितियथा॥ककारस्त्रिभ्यः॥अकःसवर्णे॥इकोयण्॥इमुसुन्नांनात्कइतियथा॥लणित्यत्रत्योणकारोपि
त्रिभ्यः॥अणुदित्सवर्णस्येत्येकएवाण्॥इणःषीध्वमित्यादयःसर्वेइणःइकोयणित्यादौयणश्चात्रयण्तावत्पूर्वेणनसंभवत्येव॥इण्तुस
भवन्नपिज्ञापकात्यक्तः।अणस्तूभाभ्यांग्रहणेस्थितेकपूर्वेणकवापरेणेतिविवक्षायांग्रहणंशास्त्रेपरेणैवअन्यत्रतुपूर्वेणैवेतिसिद्धा
न्तः॥उक्तंहिव्याख्यानतोविशेषप्रतिपत्तिरिति॥नहिपरेश्चघांकयोरित्यादौव्याख्यानादन्यन्नियामकमस्ति॥किंच॥अण्ग्रहणंनित्यव
त्संच।उरण्रपरः अणुदित्सवर्णस्य॥ढ्लोपेपूर्वस्यदीर्घोणःकेणः अण्पिप्रगृह्यस्येति॥तत्रउरण्रपरइतिनापूर्वेण॥ऋत्रइद्धातोरितिधा
तुग्रहणात्ज्ञापकात्॥तहिमातॄणामित्यादिव्यावृत्त्यर्थंक्रियते॥परेणग्रहणेनामीतिदीर्घस्यापिरपरत्वापत्त्योर्व्यावर्त्यप्रसिद्धिः॥ननु
चिकीर्षतीत्यत्राज्झनगमामितिदीर्घेरपरत्वेचसतिउपधायाश्चेतीत्वंदुर्वारमेव॥नहन्मातॄणामित्यत्रापिप्रसंगेनह्यन्तैकतयाउत्तरार्थंधातु
ग्रहणंभविष्यतीतिचेत्॥न॥एवंहिसत्युत्तरत्रैवकुर्यात्॥इहकरणंज्ञापकमेव॥नथाचवक्ष्यति॥नुद्राच्यउत्तरार्थंतुह्रहकिंचित्रपोइतीह
॥किंच॥अण्ग्रहणसामर्थ्यादपिपूर्वेणैवायं॥यदिहिपरेणस्यात् उरञितित्यञ्ग्रहणमेवकुर्यात्॥कृतिःकृतंप्रकृतंनृःपाहिमातॄणामित्या

दौआद्युदात्तानुदात्तस्वरितानुनासिकदीर्घाणांरपरतायाःपरेणाण्ग्रहेणापादयितव्यायास्तावतापिलाभात्॥कर्त्तोकारकइत्यादौगुणवृद्धि
प्रसंगेऽचामवर्णस्यचाविशेषाद्परत्वस्यविकल्पेनप्रसंगइत्यपिअज्ग्रहणेनसिध्यत्येवास्यादेनत्॥कर्त्रर्थमित्यत्रइकोयणिरपरत्वेरे
फहूयश्रवणार्थमण्ग्रहणंस्यात्॥नह्येतदज्ग्रहणेनसिध्यतिअहलेयमामितिलोपस्तुवैकल्पिकः॥अयोहोन्यभास्यामित्यतोन्यतर
स्यांग्रहणानुवृत्तेः॥अत्रचज्ञापकंग्रहणकशास्त्रेणग्रहणं।तर्हिसंप्यत्येवसरः यल्लोकमित्यादौपरसवर्णस्यानुनासिकस्ययग्रह
णेन ग्रहणादनचिचेतिहित्वेकृतेपक्षेयवलानांनित्यकस्यश्रवणार्थंक्रियतेहलोयमामित्यस्यनित्यत्वेतुव्यर्थमेवतत्स्यात्॥यद्यपिगुणाना
मभेदकत्वेनैवसानुनासिकयवलानांहित्वसिद्धेर्ग्रहणकशास्त्रेअज्ग्रहणमेवोचितंनत्वण्ग्रहणंतथापिगुणाभेदकाइत्यपिज्ञाप
यितुमण्ग्रहणंभेदकाभेदकपक्षयोश्चजातिव्यक्तिपक्षयोरिवलस्यानुरोधाद्व्यवस्था॥अत्रैवचतसर्यादयुदात्तनिपाननमित्यादि
संगच्छते॥अतएवचाष्टनआविभक्तावित्यादाविदमस्त्यदाद्यत्वेचानुनासिकोनेतिवक्ष्यामः॥यत्तुविकल्पानुवृत्तेर्ज्ञापकान्नानु
र्णनं॥अनुवर्त्ततेविभाषाग्रोचियङ्रयत्ययंहित्वंनित्येहितस्यलोपेनिषेधार्थोनकश्चित्स्यादिति॥तत्तुभाष्येदूषितं॥तथाहि॥लोप
स्यनित्यत्वेअचोरहाभ्यामितिहित्वेनारंभसामर्थ्यात्तद्बाधः॥द्विविधाएवहियरःयमोझरश्चेति॥तत्रहलोयमामितिझरोझरीतिच
लोपेकृतेहित्वंवृथास्यात्॥किंतर्हितयोर्योगयोरुदाहरणमितिचेत्॥यत्रांतरेणहित्वंव्यञ्जनत्रयंलभ्यते॥यथाआदित्योदेवतास्यं
आदित्यःप्रत्यंअवत्तमिति॥एवंस्थितेचनुर्ष्वित्यत्रापियदिहित्वंस्यात्तर्हिलोपोनस्यादेव॥तत्रश्चसार्थकः शरोचीतिनिषेधःकथंवि
भाषानुवृत्तिंज्ञापयेदित्यास्तांतावत्॥सर्वथापिविकल्पानुवृत्तेःस्थितत्वात्पाक्षिकरेफहूयश्रवणार्थेअण्ग्रहणमस्त्विति॥अत्रोच्यते

॥कर्त्रर्थमित्यादौसत्यपिरपरत्वेरफहूयम्रवणंदुर्लभम्॥रोरीतिलोपात्॥नचतत्रपदान्तस्येतिव्याख्यातुयुक्तंजगृधेर्लङ्अजघ्नाःपा
स्यङ्ईर्लङ्अपास्याःइत्यादेरसिद्धिप्रसंगात्॥नचाणग्रहणसामर्थ्यात्तद्बाधःपूर्वेणापिग्रहणेअबाधेनैवोपपत्तेरितिदिक्॥तस्माज्ज्ञातु
ग्रहणसामेर्थ्यादणग्रहणसामर्थ्योद्वाउरणरपरइतिपूर्वेणग्रहणमितिस्थितं॥वस्तुतस्तुधातुग्रहणमेवज्ञापकं॥अणग्रहणस्यलोकु
तिरित्यादौलपरताफलमित्यपिशक्यत्वात्॥अणुदित्सवर्णस्यचाप्रत्ययइतितुपरेणैव॥उर्ऋदितिलिंगात्॥तत्रहिकृतसंज्ञब्देनइत्य
स्माच्चुरादिण्यन्तान्लुङिन्चङि.अचीकृतदित्यत्रऋकारस्यदीर्घस्यापिस्थानेह्रस्वएवयथास्यादित्येवमर्थंतत्परकरणंकृतग्रहणकशास्त्रेपू
र्वेणग्रहणेतुदीर्घस्यऋकारस्यनस्थानित्वंनवादेशत्वंप्रसक्तमितिव्यर्थंतत्परत्वंस्यात्॥ननुसत्यपिपरेणग्रहणेउर्ऋदित्यत्रतत्परत्वैवै
व॥भाव्यमानेनसवर्णग्रहणाप्रसक्तेरितिचेन्न॥वक्ष्यतिहितत्ररुत्तिकारः॥नचायंभाव्यमानेपि किन्तुआदेशान्तरनिवृत्त्यर्थंस्वरूपेणा
भ्यनुज्ञायतइति॥कृतेतुतपरत्वेतद्बलादेवदीर्घस्थानेभाव्यमानतापिलभ्यतइत्यन्यदेतत्॥तस्माद्ग्रहणकशास्त्रेणपरेणनिष्ठितम्॥
तत्फलंतूरणरपरइत्यत्रउरित्यनेनऋकारस्यग्रहणाद्तइह्रस्वतोरुदोष्ठ्यपूर्वस्येत्यादेरपरत्वसिद्धिः॥ढ्रलोपेपूर्वस्यदीर्घोणइत्यत्रापिह्र
स्वग्रहणमसंभवादेवानुविशेषाभावादर्थमेवाणग्रहणंस्यात्॥तनऋकारेत्येवसिद्धमित्यणग्रहणसामर्थ्यात्परेण॥ननुहूयमने
अस्मात्तृस्विऊदित्वादिड्भावेगुणेढत्वधत्वष्टुत्वढलोपेषुकृतेषुरेफस्यदीर्घस्थानसाम्याद्ऋकारेढलोपस्यासिद्धत्वाद्उपधायाश्चेतीत्वपूर्व
वद्गुणवेर्ढेतियथास्यादितिपरेणग्रहणंस्यात्॥एवंतर्हितनीयेतिनिर्देशाल्लिंगात्पूर्वेणैव॥परेणहिग्रहणेहलइत्यत्राप्यस्यैवाणग्रहणस्यानुवृत्ते
स्त्रिःसंप्रसारणेकृतेदीर्घःस्यात्॥तथाहढादिषुरह्रशब्दस्यपाठोपिज्ञापकोबोध्यः॥हूउयमनेअस्मान्निष्ठायांढत्वधत्वष्टुत्वढलोपेषुकृतेषुरे

ढइतिरूपम्॥दंत्योष्म्यादिश्चायं॥उद्गृहरस्तःसहमूलमिंद्रेतिदर्शनात्॥मूलमंस्यावहीतिसूत्रेहरदत्तादिग्रंथेस्पष्टमेवतत्॥तुरुष्टौस्तन्हात्तूत्तर
त्वेनपठ्यमानयोःतद्दूस्तंहूहिंसायामितिधात्वोरपिनिष्ठायांतढःस्तढइतिरूपंबोध्यम्॥दृढःस्थूलबलयोरितितुइडभावेनकारहकार
योर्लोपोनिष्ठातकारस्यढत्वंचनिपात्यतेननुअसिद्धकांडस्थढत्वादेरिहप्रवृत्तिरितिवक्ष्यते॥येनपरिदृढ्यपरिद्रढीकर्त्तेत्यादौलघुत्व
मपुक्तोणेरयादेशःष्ण्यङ्भावश्चसिध्यतीतिदिक्॥तेनदृलोपसूत्रेपरेणाण्ग्रहणपक्षेपिदृढत्वढस्तद्देष्वेवातिप्रसंगोनतुदृढेपीतिविवे
कः॥केणदृत्यत्रपरेणाण्ग्रहणेगोकानोकागीष्काउपानत्काचतुष्कमितिधत्वविसर्जनीयपोरसिद्धत्वाद्धस्वप्रसंगः तथापीहदृस्वश्रुत्योपस्थि
तस्यचदृत्यस्यअबाधायपूर्वेणभविष्यति॥अबाधेनोपपत्तौहिबाधोनन्याय्यः॥अग्नेःप्रगृह्यस्येत्यत्रपरेणसतिकर्त्तेअग्ने॥वायवैकपेपा
पौ॥मालामाचष्टाणोमाल्॥वृक्षवयतेरप्रत्ययःवृक्षव्॥अत्रापिप्राप्नोति॥रेफवर्जिताअंतस्थाःसानुनासिकानिरनुनासिकभेदेनहिधेत्युक्त
त्वात्॥तेनस्मादिहअग्रंगृह्यस्येतिपर्युदासादचएवानुनासिकोबोध्यः॥नचाण्ग्रहणसामर्थ्यान्नञिवयुक्तन्यायस्यबाधः॥तस्यपूर्वे
णाप्युपपन्नत्वात्॥अत्रलुण्सूत्रेस्थित्वावृक्षव्शब्दमित्यंकैयटोव्युत्पादयत्॥वृक्षंरश्नातीतिकिपिरुनेवृक्षरश्नमाचष्टइतिणिचिटिलो
पेचकृतेवृक्षवयतेर्विचिवृक्षव्इति भवति॥किपितुकौलुसंनस्यानिवत्॥क्वौविधिप्रतिनस्यानिवदित्युभयथापिस्यानिवद्भावनिषेधात्संप्र
सारणप्रसंगोलोपोव्योर्वलीतिलोपंबाधित्वातदपवादस्यऊठःप्रसंगश्च॥विचितुस्यानिवद्भावाद्धलोनिमित्तोवलोपोनभवति॥ननुएवमपि
वृक्षव्करोतीत्यत्रहलिसर्वेषामितिप्राप्नोति॥नचस्यानिवद्भावःपूर्वत्रासिद्धेतन्निषेधादितिचेन्न॥भोभगोअघोअपूर्वस्यायोगवाहानामादिशि
हलिलोपेहियानादिति॥नचविच्प्रत्ययेपिणिचःप्राग्भावितंकिपमेवाश्रित्यऊठ्प्रसंजनीयः॥अंतर्भूतकिपाश्रयतयाअन्तरंगेकर्त्तव्येबहि

भूतनिजपेक्षतयाबहिरंगस्यटिलोपस्यासिद्धत्वात्॥इदंतिहवक्तव्यं॥क्विप्पक्षेप्येकदेशविकृतस्यानन्यत्वेनत्रश्वतिग्रहणेनग्रहणाद्व
श्वेतिषत्वंदुर्वारं॥नचणिलोपस्यस्थानिवत्वं॥पदान्तविधौनेतिनिषेधात्॥पूर्वत्रासिद्धेनेतिनिषेधाच्च॥तस्मान्नायंवृश्चतिरपितुवेतिवी
तिर्वाहसंवेतीतिवृस्रवीःवृस्रंवातीतिवृस्रवाःवृस्रव्यंवृस्रवांवाआचष्टेवृस्रव्विच्॥नतुक्विप्॥ऊठ्प्रसंगात्॥कौविधिंप्रतिस्थानिव
त्वनिषेधात्॥तथाचदेवयत्तेर्दयूतिसिद्धांतितं॥नचैवमपिलोपोव्योरित्यस्यप्रसंगः॥स्थानिवत्वात्॥नचपदान्तविधित्वम्॥पदान्त
श्वेत्विभीयतदस्त्यर्थात्॥लोपस्यचानवयवत्वात्॥विभावितंचेदंभोभगोइतिसूत्रेकैयटेनेतिदिक्॥यत्तुहलिसर्वेषामितिसूत्रेहरदत्तेनो
क्तं॥वृस्रव्कंरोतीत्येवंरूपःप्रयोगोनास्त्येव॥अनभिधानात्॥लण्सूत्रेनपदान्ताहलोणःसन्तीतिभाष्यकारोक्तेश्चानभिधाननिश्चीयत
इति॥तच्चिन्त्यम्॥लण्सूत्रभाष्येनपदान्ताःपरेणःसन्तीतिपाठात्॥अप्रगृह्यस्येतिपर्युदासाश्रयणेनाचामेवकार्यभाक्त्वादिनरेकार्य
भाजोनसंतीत्येवंपरतयाकैयटेनतद्विवरणाच्च॥ननुचायमस्तिकर्तृइत्युत्तरभाष्येदूषितत्वांच्च॥त्वदुदात्तपाठेउत्तरभाष्यस्योक्तिसंभ
वाच्च॥अतएवभोभगोइतिसूत्रेभाष्यकारवृत्तिकारादिभिःसर्वैरपिवृस्रव्इत्युदात्तम्॥स्वयमपीहतत्रैवोदात्तमितिपूर्वापर
ग्रन्थविरोधोभाष्यवृत्तिकैयटादिसकलमहाग्रंथविरोधोमूलयुक्तभाष्यश्चेतितिष्ठतुनावत्॥प्रकृतमनुसरामः॥मकारोपिन्त्रिभ्यो
ग्राह्यः॥पुमःखय्यम्परे॥हलोयमांयमिलोपः॥ङमोह्रस्वादचीति॥चकारश्चतुर्भ्यः॥कोवर्णात्॥इचएकाचोम्॥एचोयवायावइति
॥पूर्वौतुताभ्यामैच्॥यकारोपिचतुर्भ्यः॥अनुस्वारस्ययपि॥मयउञः॥झयोहोन्यतरस्यां॥पुमःखय्यीति॥रःपंचभ्यः॥योनुनासिके
॥झरिसवर्णे॥खरिच॥अभ्यासेचर्च॥वाशरि॥शकारःषड्भ्यः॥झोभगोअघोअपूर्वस्ययोशि॥हशिच॥नेड्वशिकृति॥झलांजशो

झषि। एकाचोवशोभष्॥ लकारोपिषड्भ्यः। अलोन्त्यस्य॥ हलिसर्वेषां॥ इङ्लादेः। रलोव्युपधात्॥ झलांजश्॥ शलइगुपधादिति॥ अयंचचतुर्दशसूत्रीस्थैर्हल्भिरिड्भिः संपन्नानांअष्टाध्याय्यांव्यवहृतानांप्रत्याहाराणांसंग्रहः॥ तेनसुप्तिङादेरप्रत्याहारस्यञमंताङइत्युणादिषुव्यवहृतस्यञमप्रत्याहारस्ययमिर्ञमन्तेष्वनिडेकइत्यत्रभूतिनाञ्चव्यवहृतस्यचचयोर्हीनीयाः शरिषोष्करसौदेरितिवार्तिककृताञ्चव्यवहृतस्यचयप्रत्याहारस्यचाधिक्येपिदोषः॥ संज्ञानियमश्चायमुत्तरत्रैकचत्वारिंशाद्विधेयव्यवहारादध्यवसीयतइतिबोध्यम्॥ अत्रश्लोकवार्त्तिकं॥ प्रत्याहारेऽनुबंधानांकथमग्रहणेषुन॥ आचारादप्रधानत्वाल्लोपश्चबलवत्तरः॥ प्रत्याहारोस्मरसमाम्नायःतत्रयेनुबंधाःतेषामग्रहणेष्वित्युपलक्षणं॥ अजादिप्रत्याहारग्रहणेषु॥ कथंनेति॥ यद्ग्रहणमिति शेषः॥ आदिरन्त्येनेतिसूत्रेणहिअकारस्यारभ्यचकारहकारवर्णानांभवन्तीअचसंज्ञामध्यस्थत्वाविशेषादिकारादीनामिवणकारककारङकाराणामपिस्यात्॥ ततश्चदधिणकारःदधिककारःदधिङकारइत्यादौयणस्यात्॥ एवंअङहणेचकारस्यापिग्रहणाट्टुचीनामित्यादावङव्यवायइतिणत्वंस्यात्॥ एवमिणग्रहणेनञकारग्रहणाङुचिभ्येत्यादौविभाषेटइतिढःस्यादितिपूर्वपक्षः पूर्वोक्तःस्यादिति शेषः॥ उत्तरमाह॥ आचारादिति॥ आचारोत्रसूत्रकृतोनिर्देशः॥ उणादयोबहुलम्॥ तृषिमृषिकृशेः॥ ङिसिङसोश्चेत्यादौयणोकृतत्वान्मध्यस्थानामप्यनुबंधानांसंज्ञित्वेनेतिज्ञाप्यतइत्यर्थः॥ समाधानांतरमाह॥ अप्रधानत्वादिति॥ अणित्यादिसंज्ञाःप्रणेतुंतद्रूपप्रतिपादनायानुबंधाउच्चार्यन्ते॥ ततश्चपरार्थमुपादीयमाननयातेषामप्राधान्यं॥ इतरेषांतुस्वार्थमुपादीयमानत्वात्प्राधान्यं॥ तेनतेषामेवसंज्ञानत्वनुबंधानां॥ प्रधानाप्रधानयोःप्रधानेकार्यसंप्रत्ययइतिन्यायात्॥ नन्वेवमकारस्याच्संज्ञानस्यात्॥ संज्ञाप्रतिपादनेचकारस्येवनस्याप्येगत्वाविशेषादितिचेन्न॥ स्वरूपमित्यनुवृत्त्या

आदेरपिसंज्ञित्वात्॥ स्वरूपेचादेरेवगृह्यतेनान्त्यस्य॥सर्वनाम्नांप्रधानपरामर्शकताया औत्सर्गिकत्वात्॥ इतेतितृतीयपाठेनोप्राधान्य
त्लाभात्॥तदेवंसंज्ञाप्रवृत्तिकालेनुबंधानांसंनिधानमभ्युपेत्यद्वेधासमाहितं॥वस्कनस्कनदेवनास्तीत्याह॥लोपश्चेति॥बलवानेवबल
वत्तरःस्वार्थेतरप्॥अल्याच्तरमितियथा॥हलन्त्यमितीत्संज्ञायांहिकृतायांणकारादीनामच्संज्ञाप्राप्नोति॥लोपश्च॥तत्रपरत्वान्नि
त्यत्वादंतरंगत्वाच्चलोपेकृतेसंज्ञाप्रवृत्तिकालेणकारादीनामसत्वादेवतेषामजादिसंज्ञानेति भावः॥यस्मिंस्तुप्रत्याहारेणोनुबंधोपेक्षित
स्तस्यवचनसामर्थ्यान्नत्यवृत्तेःप्राग्लोपाभावः॥लुप्तेपिवातस्मिन्भूतपूर्वेणतेनसहितआदिःसंज्ञाभविष्यति॥अंतःपतितांतुलुप्तानांन
संज्ञा॥श्रूयंमाणेष्विकारादिषुसावकाशत्वादिति॥ननुहल्प्रत्याहारेअकारस्यप्रवेशोदुर्वारः॥नहितत्रलोपोलभ्यते॥ततःप्रागच्संज्ञा
विरहेणोपदेशेजिर्तीत्संज्ञापाअप्रवृत्तेः॥एवंचाद्यसमाधानमपिदुरुपपादं॥उदात्तनस्याचारस्यलोपश्चबलवत्तरइत्यनेनैवगतार्थ
त्वादितिचेत् न॥सोस्यादिरितिनिर्देशेनप्रथमस्यगुणानांभेदकत्वेनचरमस्यचसंमाधानस्यसूपपादत्वादितिदिक्॥ ॥इतिश्रीशब्द
कौस्तुभेप्रथमस्याध्यायस्यप्रथमेपादेहितीयमाह्निकम्॥२॥ ॥ श्रीगणेशायनमः॥ वृद्धिरादैच्॥ आकारऐकारऔकारश्चवृद्धिसंज्ञः
स्यात्॥संज्ञाप्रदेशावृद्धिरेचीत्यादयःतदुदाहरणमेवास्याप्युदाहरणंबोध्यम्॥ इहाच्चेऐच्चेतिइतरेतरयोगेद्वंद्वः॥सुपांसुलुगितिसुलु
ग्वा॥ अथवासमाहारेद्वंद्वः॥ नचैवंहूंहूंवाच्चुदषहान्तादितिटच्स्यादितिवाच्यम्॥समासांतविधेरनित्यत्वात्॥ अत्रज्ञापकंतद्धित्रिभ्योष
मूर्ध्नइतिषविधानं॥तद्धिबहुव्रीहौसकृच्श्रुतेरितिषत्वेप्रकृतेपिक्रियते॥षत्वेश्रित्वसामर्थ्याज्ज्ञायमानमन्तोदात्तत्वंबहुव्रीहित्वप्रयु
क्तंपूर्वपदप्रकृतिस्वरंयथाबाधतेतथाहित्रिभ्योपादन्मूर्ध्नुबहुव्रीहाविति विधीयमानमंतोदात्तत्वविकल्पंमाबाधिष्टेत्येकदेश्यं॥नच्च

द्वित्रिभ्यामित्यस्यकचिल्लभ्यवकाशत्वेसत्येवसंगच्छतेनत्वन्यथा॥ अवंकाशश्चसमासांतानामनित्यतायांसत्यामेवलभ्यतेत्रिमूर्द्धभ
सप्तरश्मिंगृणीषइतियथा॥तस्मात्वप्रत्ययविधानंज्ञापकमितिस्थितम्॥ तथाहिद्वित्रिभ्यामितिसूत्रेबहुव्रीहिग्रहणमपीहज्ञापकं॥
अन्यथापादन्मूर्द्धेषइत्येवनिर्दिशेत्॥एवंहिसतिलुप्तसमासान्तपादत्रक्रमोपिनविरोत्स्यतेबहुव्रीहिमिच्चसमासांतोविरहादेव
वारयिष्यते॥ननुषष्ठीतत्पुरुषादिवारणायबहुव्रीहिग्रहणमस्त्वितिचेन्नहि॥ दूयोर्दंताइतिविगृह्यहिदंतःप्रश्येतिप्रयोगेपदन्निति
त्आदेशःसएवेहनिरनुबंधकत्वाद्दृश्येत॥नचपदन्नितिसूत्रेतदंतविधिर्लभ्यालक्ष्यमेतदितिवाच्यम्॥ष्णडःसंप्रसारणसूत्रस्थ
पूर्वपक्षन्यायेनसिद्धंत्ववयवानन्यत्वादित्याष्टमिकभाष्यवार्त्तिकन्यायेनचअवयवस्यकार्यलाभात्॥अन्यथाह्यस्तिशीर्ष्णीत्यादा
वगतेरितिवक्ष्यते॥तस्मात्कथंबहुव्रीहिग्रहणंज्ञापकमितिचेत्॥न॥पूर्वोत्तरसाहचर्यबलेनापिबहुव्रीह्यप्रविष्टस्यवारणसंभवात्॥द
तृइतिसानुबंधस्यापिपठत्वाच्च॥स्फिगपूतवीणांजोध्वकुक्षिसीरनामनामचेतिसूत्रेअपाचेत्यनुवृत्तापस्फिगमित्यादाव्यंतरं
दंतोदात्तविधायकेअध्वशब्दग्रहणमपीहलिंगं॥उपसर्गादध्वनइत्यत्रप्रत्ययस्यनित्यत्वेहिचित्वादेवसिद्धंस्यात्॥तथाप्रनेरंहसाद्
यस्तत्पुरुषेइतिसूत्रेअंहादिगणेराजन्शब्दस्यपाठोपीहलिंगम्॥ अन्यथाराजाहःसखिभ्यष्टजितिटच्चैवसिद्धेकिंतेन॥यत्तुक्र
कूपरव्यूःपथामित्यत्रटिलोपस्येवप्रकृतिवदनुकरणमित्यतिदेशेनअप्रत्ययस्यापिग्रहीतंतत्करणंज्ञापकमिति॥तन्न॥अतिदेशो
पमनित्यइतिऋलृकसूत्रेप्रपंचितत्वादितिदिक्॥ कृतमनयोःसाधुत्वमित्यादिभाष्यग्रंथाश्चास्मिन्पक्षेनुकूलाःअनयोःपदयोरि
तिस्वरसात्॥अथवाआदित्यसमस्तमेव॥पस्पशापांशब्दाप्रतिपत्तिरितिवार्त्तिकेभाष्यकारैरेवरहिःआत्रेजितिपदविभागप्रद

र्शनात्॥ अस्मिंश्चपक्षे अनयोः सूत्रखंडयोरितिनेयं॥ पक्षान्तराभिप्रायकमेववातत्॥ वृद्धिशब्दस्तंत्रेणावृत्यावायोजनीयः॥ हू
र्वचनेचिद्ग्यणः संप्रसारणमित्यादाविवउभयथाप्यदोषात्॥ आदितिपरकरणमैजर्थंतेनत्रिमात्रचतुर्मात्राणामैचांसंज्ञानभवती
त्यादिएओङ्ऐऔच्सूत्रयोःप्रपंचितं॥ नचैवंतकारस्योत्तरशेषनैवस्यादितिपदान्नताविरहाज्जस्त्वंनस्यादितिवाच्यम्॥ असंदेहा
र्थतयाआकारशेषत्वस्यापिसंभवात्॥ अस्तुवादैजितिपदं॥ ऋतइद्धातोरित्यादौदपरत्वमेवाश्रित्यतपरसूत्रेदकारोपिप्रश्लिष्यतइतिति
त्स्वरितमितिसूत्रेभाष्यकारैर्वक्ष्य माणत्वात्॥ दात्परस्यापितत्कालग्राहकत्वात्॥ वस्तुतस्तुदकारप्रश्लेषपक्षोभ्युच्चयमात्रं॥ दृहनु
तपरकरणंस्पष्टार्थमेवेत्यादिप्रागेवोक्तंनविस्मर्तव्यं॥ ननुचौः कुरितिकुत्वेचशब्देशाप्रीतिचतुष्टयीशब्दानांप्रवृत्तिरितिपक्षेःस्पसंज्ञा
शब्दतयालौकिकत्वेनानुशासनविषयत्वात्॥ त्रयीपक्षेजातिशब्दत्वसंभवात्॥ वैशेषिकपरिभाषयाद्रव्यत्वगुणत्वादिजातिस्वीकारेवैया
करणपरिभाषयापितत्स्वीकारस्यदुर्वारत्वात्॥ वस्तुतस्तुसिद्धांतेव्यक्तिविशेषोपहितसत्तायाएवजातित्वस्वीकारादिहापिसास्तु॥ व्य
क्तिविशेषाश्चस्वरूपसत्ताअतद्व्यावृत्तयोनुगतीकृतास्मत्तोपधायकाः॥ तदुक्तम्॥ तस्यांसर्वैशब्दाव्यवस्थिताइति॥ आद्यंतावृषवह्वारासमु
दायानुकरणंवाप्येचशब्दः अनुकरणशब्दाश्चजातिशब्दाएव॥ नत्रानुकार्यनिष्ठजातेःप्रवृत्तिनिमित्तत्वात्॥ नचाद्यपक्षेसूत्रवैयर्थ्यं॥ मदीय
शास्त्रेवृद्धिशब्देनादैचएवग्राह्याइतिनियमार्थंसूत्रारंभात्॥ तदुक्तम्॥ अनेकशक्तेः शब्दस्यशक्त्यवच्छेदेनसंज्ञिनिवेशोन्यत्वा
च्चसर्वसंज्ञानांलौकिकत्वादिति॥ अनेकस्मिन्ननेकावाशक्तिरस्येतिविग्रहः॥ अवच्छेदकभेदेपिलाघवाच्छक्तिरेकैवौपाधिकोभेदइतिपक्षा
दस्तुउपाधिर्भिन्नइत्यत्रपर्यवसन्नइतिमतेनआद्यःपक्षः॥ उपाधिस्थित्यधीनस्थितिकोजीवब्रह्मभेदवदुपधेयेपिभेदोस्तीतिमतंनहितौ

यःकल्पः॥नकोपधायाइतिपुम्वद्भावनिषेधस्तुनास्ति॥नहितवुग्रहणंकर्त्तव्यमितिवस्यमाणत्वात्॥अवच्छेदःसंकोचः॥सत्यप्यपि
शक्तेर्निरवयवत्वेनसंभवतितथापितदितरस्मिन्नात्यर्थंविरहएवशक्तिसंकोचोत्राभिमतः॥सर्वेसर्वार्थवाचकाइत्यभ्युपगमेपि
नात्यर्थंक्वचिदेवेत्यस्यनिर्विवादत्वात्॥शक्तिःपरंकारणतापरपर्यायासर्वत्रदुर्वारेत्युक्तं॥नचैवमन्यायश्चानेकार्थत्वमित्यस्यनिर्वि
षयता॥पौरुषेयसंकेतनिरपेक्षस्यप्रसिद्धेतरसम्बन्धस्यविनाप्रमाणंबहुषुनकल्पनमितितदर्थात्॥गौणमुख्यविभागोपिप्रसिद्ध्यप्रसि
द्धिनिबंधनएव॥गाव्यादीनामसाधुतापिसंकेतविरहेसत्येव॥अतएवप्रसिद्धेपिपक्षेगोण्यादीनांगोण्यांसाधुत्वमस्त्येवेत्यन्यत्रविस्तरः
॥उक्तंच॥व्यवहारायनियमःसंज्ञायाःसंज्ञिनिक्वचित्॥नित्यएवतुसंबंधोऽग्न्यादिष्वगवादिवत्॥वृद्ध्यादीनांचशास्त्रेस्मिन्शक्त्यव
च्छेदलक्षणःअकृत्रिमोभिसंबंधोविशेषणविशेष्यवदिति॥वस्तुतस्तुसाध्वसाधुबहिर्भावपक्षेप्येषामनुशासनविषयतास्त्येवेतिपस्प
शायांसाधुत्वनिर्वचनप्रसंगेनोपपादितं॥तस्मात्सर्वथापिकुत्वंप्राप्नोत्येवेतिचेत्॥सत्यम्॥अयंस्यादीनिछंदसीतिभत्वप्रवृत्त्याकुत्वो
पयोगिनीपदसंज्ञाप्रतिबध्यते॥जस्त्वविध्येकवाक्यतापन्नानुपदसंज्ञास्त्येव॥समुष्टभासत्रकृतागणेनेत्यत्रतुविपरीतं॥कुत्वेपदत्व
मस्तिजस्त्वेतुनेतिविषयभेदेनसंज्ञाद्वयमस्तीत्यंशेपरंदृष्टांततावोध्या॥तेनउपदेशेजनुनासिकइदित्यादौकुत्वाभावोजस्त्वंचसिद्ध्यति
॥छंदसिविहितस्यसूत्रेकथंप्रवृत्तिरित्याशंक्यछन्दोवत्सूत्राणीतिभाष्यम्॥इष्टिरियंभाष्यकृतः॥यद्वा॥छन्दःशब्दःस्मर्यते॥स्मरि
तेनाधिकारःअधिकंकार्यंगौणस्यापिग्रहणमित्यर्थः॥तेनछंदोगेष्वपिनत्तत्कार्यप्रवृत्तिर्बोध्या॥संज्ञाद्वयसमावेशस्तूभयसंज्ञान्य
पीतिवक्तव्यमितिवार्त्तिकवचनात्॥षष्ठीयुक्तइतिसूत्रेछन्दसिवेतिविभज्यएकासंज्ञेतिनियमस्यछंदसिविकल्पनाद्वा॥यद्वा॥अ

यस्मयादीनीत्यनेनोभयसंज्ञाप्रयुक्तकार्यभाजःसमुदायानिपात्यन्ते॥ ननुषकृताभसंज्ञैवविधीयते॥अतएवकार्यविशेषपुरस्का
रसंभवइतिबोध्यं॥तस्मात्कुत्वंनेतिस्थितम्॥कुशब्दस्यअणुदिदित्यनेनसंज्ञात्वेनविनियोगात्तत्रचप्रागुक्तरीत्यामतभेदसत्वाज्ञा
तिविशेषःप्रवृत्तिनिमित्तं॥व्यक्तिविशेषेपहितासत्तैववा॥शब्दस्वरूपंवा॥तस्यापिग्राह्यत्वंग्राहकत्वंचेतिपस्यशोक्तरीत्याव्यक्तिवि
शेषणतयाभानाभ्युपगमात्॥तथाचोक्तत्रितयान्यतममिहत्वप्रत्ययार्थः॥प्रकृतिजन्यबोधेप्रकारीभूतत्वंप्रयोगोपाधिमाश्रित्यतथाभू
तधर्मस्यतत्तदर्थतायावक्ष्यमाणत्वात्॥यद्वा॥प्रकृतिःस्वरूपपरा॥नतुप्रवृत्तिनिमित्तत्वेतुत्वतलादीनांशक्तिरेवेतिमतान्तरमपिवक्ष्यते
॥उभयथापीहत्वप्रत्ययेनस्वार्थाश्रयःककारोलक्ष्यते॥तेनकुत्वंनेत्यस्यककारादेशोनेतिपर्यवसितोर्थः॥आहचसामान्यान्यभिधा
येतेसत्तावातैर्विशेषितां॥संज्ञाशब्दस्वरूपंवाप्रत्ययैस्त्वतलादिभिरिति॥इत्थंपदविभागःपदसाधुत्वंचोक्तं॥वाक्यार्थस्तुसंज्ञासंज्ञि
भावः॥तथाहि॥समानविभक्तिकनामार्थयोरभेदान्वयस्यव्युत्पन्नतयाआकाराद्योर्वृद्धिंप्रत्यभेदेनसंसर्गेणविशेष्याः॥विरूपोपस्थिति
स्तुविशेषणीभूतंशब्दस्वरूपमादायबोध्या॥एतेनेन्द्रोमरुत्वान्मघवेत्यादिव्याख्यातं॥ननुतत्रापिमरुत्वदादिशब्दानांतत्तद्धर्म्यलक्षणेति
यात्यं॥उक्तरीत्यालक्षणाविनैवोपपत्तेः॥अतएवोड्विदधिकरणेविशिष्टविधिपक्षेमत्वर्थलक्षणाप्रसंगेनदूषयित्वानोमधेयत्वेसिद्धान्तितं॥
अन्यथानामधेयत्वेपिलक्षणायास्तुल्यतयाअधिकरणस्यासंभवदुक्तिकतापत्तेरितिदिक्॥स्यादेतत्॥किमर्थेयंमात्रस्यवृद्धिरुताहो
स्विद्वृद्धिशब्दमावर्त्यवृद्धिरितियेआदैच्तस्तेवृद्धिसंज्ञाइतिव्याख्यानाल्लुक्श्लुलुप्संज्ञावत्तद्भावितानामेवेति॥नाद्यः॥सर्वभासःसर्वका
त्स्न्यादौउत्तरपदवृद्धेसर्वचेतिसूत्रेणपूर्वपदस्योदात्तत्वप्रसंगात्॥इष्यतेतुसमासस्यस्वरेणोदात्तः॥नचसर्वस्यसुपीत्याद्युदात्तनाशस्य्याय्यमिति

शिष्टेनसमासस्त्वरेणबाधात्॥सर्वस्तोमइत्यादौतुबहुव्रीहौप्रकृत्यापूर्वपदमित्यनेनसमासांतोदात्तत्वेबाधितेसर्वस्यसुपीतिभवत्येवेहतु
र्मधारयत्वात्समासांतोदात्तत्वमेवबोध्यं॥किंच॥तावतीभार्यायस्येतिबहुव्रीहौतावद्ग्रामेनसिद्ध्येत्॥वृद्धिनिमित्तस्यचतद्धितस्येतिपुरस्
द्भावप्रतिषेधप्रसंगात्॥नहितीयःशालीयोमालीयइत्यादौवृद्धलक्षणस्यच्छप्रत्ययस्यासिद्धिप्रसंगात्॥किंचैवंआम्रमयंशालमयमित्या
दौनित्यंवृद्धशरादिभ्यइतिनित्योमयट्नस्यात्॥किंच॥आम्रगुप्तायनिश्शालगुप्तायनिःउदीचांवृद्धाद्गोत्रादितिवृद्धलक्षणःफिञ्नस्या
त्॥ननुप्राचामवृद्धात्फिन्बहुलमितिफिनाप्येतत्सिद्धं॥नह्यत्रफिञ्फिनोःस्वरेरूपेवाविशेषोस्ति॥ञ्नित्यादिर्नित्यमितिआद्युदात्तस्याभ
यत्राविशिष्टत्वात्॥नचाम्रगुप्तायनीभार्यइत्यत्रवृद्धिनिमित्तस्यचतद्धितस्यारक्तविकारइतिपुंवद्भावप्रतिषेधसिद्ध्येफिञ्येवकर्त्तव्यइति
वाच्यम्॥जातेश्चेत्यनेनापिप्रतिषेधसिद्धेः॥नचाम्रगुप्तायनेष्ठात्राइतिवृद्धाच्छेविवक्षितेफक्फिञोरन्यतरस्यामितिलुग्विकल्पेनआम्र
गुप्तीयाआम्रगुप्तायनीयाइतिद्वैरूप्यमिष्टंतच्चफिञंविनानसिध्यतीतिवाच्यम्॥फक्फिञोरित्यत्रयूनीत्यनुवृत्यात्तदुदात्तंरूपंवृद्धस्यमिद्ध
न्तेप्यसंमतत्वात्॥अतस्वतन्त्रयून्येवोदात्तं॥यस्कस्यापत्यं॥शिवादिभ्योण्॥यास्कःतस्यापत्यंयुवाजणोद्यचइतिफिञ्यास्कायनिःतस्य
ष्ठात्रायास्कीयाःयास्कायनीयाइति॥तस्मात्फिनापिसिद्धौकिमर्थंफिञेष्यतइतिचेत्॥उच्यते॥उक्थादीत्यारूपसिद्धावपिप्राचामुदीचांवाच्चा
र्यांणांतत्स्वमतप्रच्युतिरेवतावद्दोषःसिद्धांतेहिउदीचामाम्रगुप्तायनिरिष्टःप्राचांत्वनिष्टःउक्थादीत्यानुदुदीचांनसिद्ध्येत्॥प्राचांनुसिध्येदितिस्य
ष्टएवोभयोरपिस्वमतप्रच्यवः॥तथाचऋतोभारद्वाजस्येतिसूत्रेजहत्स्वार्थेत्यादौगुणेरपरत्वेचऋतेःनजैतत्वाद्रुचस्तास्वदित्यस्याप्राप्तौनियमा
नुपपत्तेऋतोभारद्वाजस्येतीदंविधायकंस्यात्तत्रापिचिथशोकिथेत्यादाविष्णस्यादितिदूषणेप्राप्तेअचस्तास्वत्थल्यनिटोनित्यंभारद्वाजस्य॥

उपदेशेत्वतः भारद्वाजस्येत्येव॥ततः ऋनः भारद्वाजस्येतिनिवृत्तं॥एवंचसकललक्ष्यप्रसिद्धिरितिसूत्रभंगेनसमाधायभाष्यकारोव
क्ष्यति॥सिध्यत्येवं॥अयंतुभारद्वाजः स्वस्मान्मतात्च्याविनोभवतीति॥अतएवअचस्तास्यदित्यत्रउपदेशेत्इत्येतदुपदेशग्रह'
णमपकृष्यसिद्धांतणिष्यतीतिदिक्॥किंच॥फिनिसति आम्रगुप्तायनेरपत्यंकुत्सितमित्यर्थेसौवीरगोत्रे॥फेस्छचेतिछठ्ठकोनस्मा
तां॥तत्रफिञेवगृह्यतेननुफिन्॥इञादित्यधिकारादितिस्थितं॥ततश्चाम्रगुप्तायनीयः आम्रगुप्तायनिकइतिनस्यात्॥नचयमुं द
श्चमुख्यमाचक्ष्वर्ष्यायणिफिञ्रःस्मृताइतिवृद्धौत्रयाणामेवपरिगणनादन्येभ्यस्छठकोनभवतएवेतिवाच्यं॥भाष्यकृतापरिगणनस्या
नाश्रयणात्॥अन्यथाअत्रैवसूत्रेसौवीरेष्वितिकिंतैकायनिरिति प्रत्युदाहरणंनसंगच्छेत॥तैकायनिशब्दस्यतत्रापठात्॥अतएव
यूनिलुगित्यत्रोदाहृतं॥तिकस्यापत्यंतिकादिभ्यःफिञ्तैकायनिः तस्यापत्यंयुवा॥फेस्छच॥तैकायनीयः तस्यछात्राः युवप्रत्य
यस्यलुकिकृतेवृद्धाछः तैकायनीयाइति॥नहिसतिपरिगणनेतैकायनेस्छः संभवतिनंवातस्लोपः अतएवयूनिलुक्सूत्रेस्थित्वाप
रिगणनमर्वाचीनमितिहरदत्तादयोप्याहुः॥अपिच॥फिञिसति आम्रगुप्तायनेरपत्यंयुवा॥प्राग्दीव्यतोण्॥नस्यण्यस्त्रियार्षञिनो
यूनिलुगणिञोरितिलुकिआम्रगुप्तायनिरित्येवंरूपंपितरिपुत्रेचेष्यते॥फिनितुसतितन्नस्यात्॥ञितःपरत्वाभावात्॥नैषाब्राह्मणगो
त्रमात्रायुवप्रत्ययस्योपसर्ज्यानमितितत्सिद्धिः ब्राह्मणगोत्रेतदप्रवृत्तेः किंच। तद्भावितग्रहणपक्षेमालादीनांचेत्यनारंभणीयंस्यात्
॥प्रस्थेवृद्धमकर्म्यादीनामित्यनेनैवपूर्वपदायुदात्तस्यसिद्धेः॥अपिच॥वृद्धिश्चेतंत्रारत्याद्याश्रयणाद्गौरवं॥मृजेर्वृद्धिरादिविन्
प्रदेशेषुइतरेतराश्रयणपरिहारायसूत्रशाटकवद्भाविसंज्ञाविज्ञेयास्यादितिचापरंगौरवमिति॥अत्रोच्यते॥आदैच्मात्रस्यवृद्धिसंज्ञा

॥नचैवंसर्वभाग्यादवुक्तदोषःस्यादितिवाच्यम्॥उत्तरपदवृद्धौसर्वंचेत्यत्रहिउत्तरपदग्रहणंस्मर्यते॥स्मरितेनाधिकारोविज्ञायते॥तेनोत्तर
पदस्येत्यधिकृत्यायावृद्धिर्विहितासैवगृह्यते॥यथासर्वेपांचालःसुसर्वार्द्धाज्जनपदस्येतिवृद्धिःइदंचतज्ज्ञापितंग्रहणेप्यवश्यंवक्तव्यमेव॥अ
न्यथासर्वःकारकः सर्वकारकइत्यादावतिप्रसक्तेःएवंतावज्ज्ञापयेत्यदोषःतंत्रावृत्त्याद्याश्रयणेनवृद्धिशब्देनविहितायावृद्धेर्यदिनिमित्तंतत्रैक
पुम्वज्ज्ञापप्रतिषेधात्॥वृद्धिशब्देनचविधौकृत्स्नावृद्धिःप्रतीयतइत्याशयेनैवोक्तंभाष्ये।यज्ज्ञकृत्स्नायावृद्धेर्निमित्तमिति॥नचवैयाकरणभा
र्यतयासौवम्बभार्येतिप्रसंगःफलोपहितस्यैवनिमित्तत्वेनविवक्षितत्वात्॥ऐचौप्रतिफलोपधानमप्यस्तीतिचेन्न॥तयोर्वृद्धिशब्देनावि
धानात्॥केचित्तुयावद्वृद्धिजननयोग्यत्वेसतिकिंचित्फलोपहितस्तद्वितोनिमित्तशब्देनोच्यते॥वैयाकरणेतुसैचंप्रतितद्धितोनभंनिमित्तं
निषेधसंनियोगशिष्टतामात्रेणातिप्रसंगभंगात्।तेनवैयाकरणभार्येनातिप्रसंगः॥परिषंदोण्यःपारिषद्याभार्यइत्यादौतुआकारमात्रोपहि
तत्वेपिस्वरूपयोग्यतासकलवृद्धिंप्रत्यस्तीत्याहुः॥तस्मात्आवृत्तौगौरवापत्तेःशालीयादेरसिद्धिनः॥मालादीनांचेतिलिंगाद्यातिन्या
यात्तथैवच।भाविसंज्ञात्वविज्ञानेगौरवाच्चेहनिश्चितं॥आदैज्मात्रस्याविशेषाद्वृद्धिसंज्ञाविधीयते॥अनर्थकंसाध्वनुशासनंप्रयोग
नियमार्थंआदेशार्थंमागमार्थंविशेषणविशेष्यभावार्थंचेदंसूत्रमितिषट्पक्षीतुभाष्यएवनिराकृतत्वादसंभवदुक्तिकत्वाच्चनेहत
न्यते॥संज्ञासंज्ञिभावेसत्यपिकासंज्ञाकःसंज्ञीत्यत्रतात्पर्यग्राहकास्तुबहवोन्यायाः॥तथाहि॥यच्छब्दयोगःप्राथम्यमित्याद्युद्दे
श्यलक्षणं॥तच्छब्दएवकारश्चास्यादुपायलक्षणमित्यभियुक्तोक्तेस्तथैवानुभवाच्चप्राथम्यंतावत्संज्ञित्वेलिंगंतच्चादेर्गुणइत्यादौस्पष्टमे
व॥वृद्धिसंज्ञासूत्रेतुमंगलार्थंवृद्धिशब्दस्यादौप्रयोगेपिवक्ष्यमाणेन्यायांतरेणादेर्नसंज्ञित्वेनिर्णीतेसति आदैज्वृद्धिरित्याकारकपदानुपू

र्वीज्ञानानंतरमेवषाक्यार्थबोधाभ्युपगमात्तज्जनकीभूतानुपूर्वीज्ञानेआदेशमेवप्राथम्यान्नव्यभिचारः॥पदानुपूर्वीज्ञानमेववाक्यसन्निज्ञान
मित्युच्यते॥इदंचशाब्दबोधेहेतुरितियैर्नेष्यतेतेषामासन्नानासंभवकथोच्छेदःस्यात्॥पदसमूहालंबनेसकलपदानांपदार्थस्मरणेचस
कलपदार्थानांविषयत्वाविशेषात्॥आवृत्तिश्चसंज्ञात्वेलिंगम्॥व्यवहारार्थमेवसंज्ञाकरणात्॥भेदाभेदाभ्यामपिसंज्ञित्वसंज्ञात्वेक्वचि
न्निर्णीयेते॥बहूनांहिएकासंज्ञोचिता॥लाघवात्॥नत्वेकस्यबह्व्यःसंज्ञाःगौरवात्॥न्यूनाधिकव्यक्तिकास्तुबह्व्यःसंज्ञाःदृष्यन्तएव॥
तत्तत्प्रयुक्तकार्यवैलक्षण्यात्॥कृल्लृत्यप्रत्ययसंज्ञावत्॥तद्धितत्राजप्रत्ययसंज्ञावच्च॥लघ्वक्षरत्वमपिटिघुभादेःसंज्ञालिंगंयथायथं
बोध्यम्॥दृढंतुआवृत्त्याऽभेदेनचवृद्धिशब्दःसंज्ञेतिस्थितेतद्बलेनश्रुतानुपूर्वीभंगादादेशंप्राथम्यमपियोजनीयं॥यद्वा॥स्वेच्छयासंज्ञा
क्रियंतेतिपक्षंविहायव्यवहारायनियमइतिपक्षेयोज्यम्॥आद्येपिकार्यकालपक्षाश्रयणेनवासमाधेयमितिदिक्॥एतेन॥आर्द्धधातुकं
शेषःकृदतिङ्॥अपृक्तएकाल्प्रत्ययः॥स्वरूपंशब्दस्यअणुदित्॥तपरःआदिरन्त्येन॥येनविधिस्तदन्तस्येत्यादावपिव्यभिचारउद्धृतःतत्रा
पिविपरीतानुपूर्वीकल्पनात्॥कल्पकस्यचप्रागेवोक्तत्वात्॥पक्षान्तरेरपिसमाधानाच्च।अतएवस्थानिवत्सूत्रेवत्करणंकिमित्याशंक्यस्था
नीआदेशस्यसंज्ञामाविज्ञापीतिभाष्यमप्युपपन्नं॥यत्तुअपृक्तएकालितिपरिभाषानतुसंज्ञेत्युक्तम्॥तद्ध्यादावपिसुवत्सं॥अपृक्त
संज्ञायांहलग्रहणंस्वादिलोपेहलोग्रहणार्थमितिवार्त्तिकस्यतज्ज्ञाप्यस्यचप्रतिकूलंच॥तस्मादुक्तैवगतिःसमीचीनेतिदिक्॥अनुमृजेर्द्वि
र्द्विरित्यादावन्योन्याश्रयःसंज्ञाहिविधिर्विहितानांचसंज्ञेति॥नचमालादौसंज्ञाप्रवृत्तिसंभवेत्तीहुभाविसंज्ञाविज्ञानंसंभवति॥तस्माद्
द्विशब्दएवादेशःस्यात्अन्यत्रवृद्धिसंज्ञाप्रवृत्तावपिमालादिशब्दान्तर्गतस्याकारस्यततउत्कृष्यहविधातुमशक्यत्वादिति॥अत्राहुः॥

मार्ष्टि इत्यादौ सिद्धस्यैवाकारस्य मृज्युपदेशात् साधुत्वेऽप्रसक्ते साधुत्वं मृजेर्वृद्धिरित्यादिना बोध्यते नत्वपूर्व आकारो भाव्यते॥ येऽप्यन्योन्याश्रयः स्यात्॥ उक्तं च वार्तिककृता॥ सतोवृद्ध्यादिषु निमित्तभावात्तदाश्रयइतरेतराश्रयत्वादप्रसिद्धिः सिद्धे तु नित्यशब्दत्वादिति॥ अथल्लक्षणैकचक्षुष्कः कश्चिद्व्याकरणबलेनैव मार्ष्टीत्यादिप्रयोगेषु व्युत्पित्सेत तथापि नक्षत्रनिःश्रेणीमालादौ आकारेश्रुतेः आत्वसामान्यलक्षणेप्राप्त्यासत्या मार्ष्टीत्यादिप्रयोगसमवायिनां सर्वेषामाकाराणां वृद्धिशब्दवाच्यताग्रहात्॥ सामान्यलक्षणानभ्युपगमपक्षे तु आत्वजातौ शक्तिग्रहात्॥ शक्यानुभवपदार्थस्मरणवाक्यार्थबोधानां समानप्रकारकत्वेनैवातिप्रसंगभंगाभ्युपगमाच्च॥ अन्यथागेहे घटोस्तीतिवाक्यादपूर्वव्यक्तिर्न गृह्येतेतिदिक्॥ अतएवनवेतिविभाषेति सूत्रेभाष्यकारोवक्ष्यति साधुत्वस्यविधेयत्वेविभाषाग्रहणेत्यादिज्ञातस्यैवषिकल्पापत्तिः ——— तस्मात्संप्रसारणाद्येवविकल्प्यतइति॥ एवैवलडादिविधौगतिः नचैवंसाध्वनुशासनत्वभंगः॥ साधुत्वविशिष्टस्यैवसर्वत्रलक्षणयाविधानमितिकृन्मेजन्तसूत्रेविवरणकारादिभिरुक्तत्वात्॥ केवलविधानेपिगदिहपरिनिष्ठितंतत्साधिनिश्चुना र्थापत्तिंप्रकल्प्यवाक्यात्साधुत्वसिद्धेश्च॥ इहचप्रत्येकंवाक्यपरिसमाप्तिः॥ मालादीनांचेत्यादिलिंगात्॥ ब्राह्मणाभोज्यंतामित्यादौतथादर्शनाच्च॥ यद्यपिगर्गाः शतंदंड्यन्तामित्यादौसमुदायेपिवाक्यपरिसमाप्तिर्दृश्यते॥ गुणकर्मभूतानामपादानस्थानापन्नानांगर्गाणामनुरोधेनईप्सितकर्मत्वायाप्रधानभूतस्यशतस्यावृत्त्ययोगात्॥ तथापीहशास्त्रेयत्नंविनासमुदायेशास्त्रंनसमाप्यते॥ अतएवउभेभ्यस्तंसहेतिसहग्रहणंवार्तिककृद्दूष्यति॥ भाष्यकारस्तूभेग्रहणमेवैतदर्थमितिवक्ष्यति॥ अन्यथाएकाचोहेइत्यनुवृत्त्यासिद्धेः किमुभेग्रहणेन॥ संयोगसंज्ञायांसमाससंज्ञायांच महासंज्ञाकरणमन्वर्थनिवृत्तानार्थमितियत्नः अतएवसहसुपेतिसहग्रहणंयोगविभागे

नतिङंतादिसमासविधानार्थमिति स्थापयिष्यते॥ इहतपरकरणंऐजर्थंईदूदेदिति वदुच्चारणार्थमसंदेहार्थंचेतिप्रपंचितमे ओङ्ऐऔजिति सूत्रयोः॥ यत्तिहोक्तंवार्त्तिककृता॥ आकारस्यतपरकरणंसवर्णार्थमिति॥ तन्नुभेदकागुणास्तत्परसूत्रंचाननिर्विध्यर्थमित्यभिप्रेत्ये॥ भाष्येतु अभेदकागुणाइतिस्थितं॥ गुणाउदात्तानुदात्तस्वरितानुनासिकाः नांतरीयकतयोच्चार्यमाणाअपियत्नंविनाननिर्वर्त्स्यन्तेइत्यर्थः॥ अनुदात्तः अडुदात्तइत्यादावुदात्तग्रहणंचेहज्ञापकं॥ अन्यथाह्युदात्तमेवोच्चारयेत्॥ ननुयद्यभेदकागुणास्तर्हियदूस्यतिभाष्यकारः हंत्यादेशस्यवधेः स्थानिवद्भावादनुदात्तत्वादिट्प्रतिषेधेप्राप्तेतद्वारणायवध्यादेशेउदात्तनिपाननंकरिष्यते॥ तथाचएकश्रुत्युपदेशेतिसूत्रेएकाज्ग्रहणंनकर्त्तव्यमिति॥ तदेतद्विरुध्येत॥ अनिर्वर्त्स्यप्रसंगात्॥ अथोच्येत॥ तत्रापिस्थानेंतरतमइतिवचनादादेशस्यैकस्वरःप्राप्तस्तस्मिन्नुच्चारयितव्येउदात्तोच्चारणंयत्नेननिर्वर्त्स्यार्थंज्ञापयतइति॥ एवमपियद्दूस्यतिषष्ठे॥ चनसर्थंयुदात्तनिपातनंकरिष्यतेसनिपातनस्वरश्रुतेः शासीत्यस्यबाधकोभविष्यतितद्विरुध्येत॥ चनुरशब्दोत्यव्युत्पत्तिपक्षेत्रःसंज्ञायाइतिफिट्सूत्रेणाद्युदात्तः चनेरुरितिव्युत्पादनेपिनित्स्वरेणाद्युदात्तएव॥ तत्स्थानिकस्यचनसृशब्दस्यापिस्थानिस्वरेणाद्युदात्तस्योच्चारणोपपत्तौचनुरः शासीत्येतद्बाधकत्वायोगात्॥ अपिच॥ अस्थ्यादीनामप्यायुदात्तत्वादेनादेशस्यानङोपिस्थान्यनुरूपेणोदात्तएवोच्चारणीयेउदात्तोच्चारणंविवक्षार्थंभविष्यतीत्युदात्तग्रहणंनिष्फलमेवमत्युनक्षिषमाणंतद्यत्नाधिक्येप्यविवक्षांज्ञापयेत्॥ यदप्येकश्रुत्यासूत्रपाठकश्चिदुदात्तोच्चारणंविवक्षार्थमितितदपिचिन्त्यम्॥ एवंसतिअनङोप्युदात्तोच्चारणेनैवसिद्धौ उदात्तग्रहणवैयर्थ्यापत्तेः॥ उक्तज्ञापनासंभवाच्च॥ तथाहि॥ किंज्ञाप्यं॥ स्वशब्देनानुपात्तोगुणोनविवस्यतइति॥ आहोस्विदस्तियत्नविशेषेनविवस्यतइति आद्येनिपातनस्वरोनविवस्येत॥ अंत्येतूदात्तोच्चारणएवविवक्षाहेतौयत्नविशेषेस्थि

तेकयंज्ञापकोत्यानं॥ मूलशैथिल्यात्॥ नस्मादुणानामभेदकत्वप्रतिपादकमात्रस्यंभाष्यंउत्तरग्रंथविरुद्धमेवेतिचेत्॥उच्यते॥विभाषाछन्दसी
तिवैकल्पिकमेकमुत्सर्गीकृत्यपक्षांतरेरपिपरिहाराभवंतीतिन्यायेनतत्रतत्राद्युदात्तनिपातनंकरिष्यतइत्युक्तं॥इहतुवैस्वर्येणसूत्राणां
पाठमाश्रित्यस्वरूपेणोपात्तस्यगुणस्य नान्तरीयकत्वेनाविवक्षितत्वसंभवादुदात्तग्रहणंज्ञापकमित्युक्तम्॥अतोनविरोधः॥यद्वा॥अणु
दित्सवर्णस्येत्यत्राजग्रहणेनैवसिद्धेगुणभिन्नानांयवलानांसंग्रहायक्रियमाणमण्ग्रहणंगुणानांभेदकतामपिज्ञापयति॥भेदकाभेदक
त्वपक्षयोश्चजातिव्यक्तिपक्षयोरिवलस्यानुरोधाद्यवस्थेत्युक्तंहलन्त्यसूत्रे॥तेनभेदकत्वपक्षाश्रयणेनाद्युदात्तनिपातनंकरिष्यतइत्यादिभा
ष्यंबोध्यम्॥अतएवचइदमस्त्यदाद्यत्वेअष्टनआविभक्तावित्यादौचानुनासिकेनप्रवर्त्तते॥ननुअण्ग्रहणंहलोयमामिति[illegible]न्यतरस्यां
ग्रहणानुवृत्तिज्ञापनार्थमित्युक्तमितिचेत्॥न॥उभयज्ञापकत्वेप्यविरोधात्॥नह्येकेनैकमेवज्ञाप्यमितिनियमःयावताद्विनानुपपत्तिस्तस्य
सर्वस्यज्ञाप्यत्वात्॥अतएवआत्वविकल्पःकृतात्स्यषट्संज्ञाचेत्युभयमपिअष्टनोदीर्घादितिदीर्घग्रहणेनज्ञाप्यतेइत्यपिन्यस्यते॥अतएवचसं
हितायामित्यपिकारेणसंहितायामनित्यत्वंकालव्यवायेप्यानङादिप्रवृत्तिश्चेत्युभयंज्ञाप्यतइतिदिक्॥एवंचाकारश्चन्तरकरणंसवर्णार्थं
मितिदृढत्वंवार्तिकमपिभेदकत्वपक्षेणसाध्वेव॥भाष्येतुपक्षान्तराभिप्रायेणऐजर्थत्वमुक्तं॥तदपियद्योद्देशपक्षेबोध्यम्॥आदेचांसंज्ञा
विधावनुवाद्यत्वेनसवर्णग्राहकत्वप्रसक्तेः कार्यकालपक्षेतुविधिवाक्येनैववृद्धिसंज्ञाविशिष्टनामादेचांभाव्यमानतयासवर्णग्रहणंनप्र
त्येत्येव॥यथाचज्योतिष्टोमराजसूयादिशब्दानांयागविधावेवसामानाधिकरण्यान्नामधेयत्वावगतिर्नतुवाक्यान्तरेणतथास्मिन्पक्षे
रज्ज्वादीनामपि॥वृद्धिरादैजितिसूत्रंनुदृक्कोगुणवृद्धीइतिवत्संज्ञोपस्थापकं॥उपस्थाप्यस्यसंज्ञिनापरंसंज्ञासूत्रंव्यवहारः आ-

द्यपक्षेतुयन्नदुःखेनेत्यादौस्वर्गशब्दार्थावगमवदिहैववृद्ध्यादिशब्दार्थावगमइतिविशेषःतदयंनिर्गलितःसूत्रार्थःरूनानामरूनानांचा
देचांप्रत्येकंवृद्धिसंज्ञास्यात्॥आश्वलायनःऐनिकायनःअश्वलेनिकृशब्दाभ्यांनडादित्वात्फकिआदिवृद्धिःउपगोरपत्यमौपगवः॥अदे
ङ्गुणः॥अदेङ्गांगुणसंज्ञास्यात्॥नपरकरणमिहसर्वार्थम्॥नेननरतीत्यत्रअकारएवनतुकदाचिदाकारःनचप्रमाणतआन्तर्यतोनिय
मसिद्धिःरपरत्वेकृतेएकस्याध्यर्द्धमात्रत्वात्परस्यार्द्धनृतीयमात्रत्वात्॥पचन्तिचेतास्तोता॥इकोगुणवृद्धी॥यत्रब्रूयाद्गुणोभवतिवृ
द्धिर्भवतीतितत्रइकइतिषष्ठ्यन्तमुपस्थितंबोध्यम्॥चेतास्तोता॥अहार्षीदित्यादिइकइत्युक्तेनेह॥यातागलायति॥उभितेति॥तथाच
वार्त्तिकम्॥इग्ग्रहणमात्संध्यक्षरव्यंजननिवृत्त्यर्थमिति॥ननुनैतानिसन्तिप्रयोजनानि॥ज्ञापकेनअनिकांल्यात्तसिद्धेः तथाहि॥अ
कारस्यपचतीत्यादौशंपन्निपंचाश्रित्ययथाक्रमंपुगंतेनिसार्वधातुकार्द्धधातुकयोरितिचसूत्रेणसत्यपिगुणेरूपेविशेषोनास्ति॥अचिकी
र्षीदित्यादौतुअतोलोपेनवृद्धिर्बाध्यते॥ण्यल्लोपावितिपूर्वविप्रतिषेधस्यवक्ष्यमाणत्वात्॥सूत्रारंभपक्षेपित्त्वेवचिकीर्षेइत्यादौगतिः
अचोञ्णितीत्यत्रनिर्दिष्टस्थानिकत्वेनेकपरिभाषायाअप्रवृत्तेःअयासीदित्यादौतुसिचिवृद्धौसत्यामपिनक्षतिः॥वस्कतस्तोसामगिड्भ्यां
परत्वाद्बाध्यते॥येनन्नप्राप्तिन्यायेनापवादत्वाद्बाध्यतइतितुनिष्कर्षः नचयासावातेत्यादावातोगुणप्रसंगः गापोष्टगितिटित्कः किन्त्वेन
आकारस्यगुणोनभवतीतिज्ञापितत्वात्॥तर्हिसामगइत्यादावाल्लोपार्थंक्रियते॥यदितुआकारस्यगुणःस्यात्तर्हिहूयोरकास्थोःपररूपे
णसामगइत्यादिरूपसिद्धौकिंकित्वेन॥नचेहचिकीर्षकइत्यादाविवपरत्वादंगत्वाच्च अतोलोपएवोदाहर्त्तुमुचितोननुपररूपमिति॥वा
च्यम्॥नावतापिज्ञापकत्वेबाधकाभावात्॥वस्तुतस्तुनेहलोपेनभवितव्यम्॥तत्रह्यनुदात्तोपदेशेत्यतोनुवर्त्तेनोपदेशग्रहणेनार्द्धधातुक

स्यविशेषणाद्दृधातुकोपदेशेयदकारांतंनस्यातोलोपोविधीयते॥ अन्यथागतोगतवानित्यादावतिप्रसंगात्॥ मघासिद्धवत्सूत्रेणनिर्वाहः तस्यभाष्यकृताप्रत्याख्यास्यमानत्वात्॥ किंचअयपयगतौआभ्यांक्विपिअत्पदितिरूपंमाधवादिभिरुदाहृतंतदपियथाश्रुतेनसिध्येत्॥ तस्मादुपदेशानुवृत्तिरेवशरणं॥ कथंतर्हिधिनुतःकृणुतःइत्यादावतोलोपइतिचेत्॥ सनियोगशिष्टतयाउप्रत्ययोपदेशवेलायामेवअकारस्यापिवुञ्यारोहादिभिःकेचित्॥ अन्येतुधिन्विकृण्व्योरचेतिसौत्रकमानुरोधात्प्रथममकारादेशःतदनंतरंचशब्दाकृष्टउप्रत्ययइतिनोक्तदोषइत्याहुः॥ नन्वेवंसामगापेत्यादावेकादेशस्यपूर्वान्तत्वेनग्रहणादातोधातोरित्यालोपःस्यादितिचेत्॥ अत्रकेयटःअकारमाश्रित्यकृतोपशब्दःसन्निपातपरिभाषयालोपंनप्रवर्तयति॥ दीर्घत्वंतुकृष्टायेतिनिपाननाङ्गवतीतिएओङ्सूत्रेस्थित्वासमाहितमाह॥ तस्यायमाशयः॥ यादेशेहिह्रस्वत्वविशिष्टमत्वंप्रयोजकं॥ तद्धिधावतइत्यनुवृत्तेः तत्रयद्यपिदीर्घेणह्रस्वत्वांशोनिवर्त्तितस्तथापिअत्वमात्रमादेश्योनुवर्त्तते॥ तदपिचेल्लोपेननिवर्त्त्येततर्हिपरिभाषाविरोधःदीर्घांशेपरिभाषाबाध्यते॥ नचैवंसामगापेतिवृद्धौतद्बाधोस्तितिवाच्यम्॥ तद्बाधेप्युपपत्तेःप्रकृतसूत्रेएओङ्सूत्रेचगापोष्टकःकित्त्वस्यानन्यार्थतांवदन्भाष्यकारश्चात्रप्रमाणं॥ एतेनशुभंयाशब्दस्यनपुंसकेह्रस्वत्वेङेर्यादेशेदीर्घेचसतिआतोधातोरित्यालोपेचशुभंयइत्यादिमाधवोदाहृतंभाष्यविरोधाच्चिन्त्यं॥ अतएवनपुंसकेश्रीपंस्त्वानवदितिग्रंथंश्रीपयतिरूपपरतयायथाश्रुतमेवसमंजसंभङ्क्तामाधवानुरोधेनग्रायेणस्त्वानवदितिव्याचक्षाणाअपिप्रत्युक्ताः॥ तथाग्लायतीत्यादौसंध्यक्षराणामप्युपदेशसामर्थ्यादुणोनभविष्यति॥ इतरथाहिएकारमेवोपदिशेत्॥ मात्रालाघवविरहेपिप्रक्रियालाघवसत्त्वात्॥ नचैवमाद्यादेशोपिनस्यादितिवाच्यम्॥ यंविधिंप्रत्युपदेशोनर्थकःसविधिर्वाध्यतेयस्यतुविधेर्निमित्तमेवनासौवाध्यतइतिन्यायात्॥

गुणंप्रतिहिऐकारोपदेशोनर्थकः ग्लेदित्यस्यापिसुपठत्वात्॥आगादेशस्यतुनिमित्तमेव॥नचग्लायदित्येवपठ्यतामितिवाच्यम्॥तथासति हिग्लायतेदितिरूपंनस्यात्॥यकारद्वयश्रवणप्रसंगात्॥जग्लावित्याद्यसिद्ध्यापत्तेश्च॥यत्तुएकाजजंतत्वाभावादिट्प्रसंयेनग्लातेत्यादिनस्यादिति॥तन्न॥अनुदात्तोपदेशेष्वेषांसुपठत्वात्॥नचैवमग्लासिशमित्याद्यसिद्धिःअनादेतत्वेनसगिटोरसंभवादितिवाच्यम्॥लोपोव्योरितियलोपेकृतेसगिटोःसुलभत्वात्॥सन्निपातपरिभाषात्वनित्येतिकृतिनुग्रहणेनज्ञापयिष्यते॥तेनवल्संनिपातेनकृत्तोयलोपोवल्संनिपातविघातकमपीदंप्रवर्त्तयिष्यतेव॥अनित्यताश्रयणेनैवहिदासिःगोदःदित्यादौअसातोर्लोपःअन्यथाङ्कृकप्रत्ययौप्रतितयोरुपजीव्यत्वाल्लोपोनस्यात्॥अस्तुवासंनिपातपरिभाषाश्रयणाद्ग्लासिशमित्यादिनसिध्येदित्यपियान्तोपदेशेषांतेरं॥सर्वेषामपिसंध्यक्षराणामुपदेशसामर्थ्यादुणोन॥आपादयस्तुभवंत्येवेतिसिद्धंस्यादेतत्॥आदेचइत्यात्वेसतिहिबाध्यतां॥नह्येजुपदेशआत्वस्यनिमित्तं॥ग्लेदित्युपदेशेपितस्यसुकरत्वात्शितिगुणेन अशित्यात्वेनऐचोपहारेप्राप्तेऐजुपदेशसामर्थ्यंनगुणात्वयोर्मध्येकतरद्बाध्यंकतरन्नेत्यत्रविनिगमनाविरहेणोभयबाधप्रौव्यात्॥नचैवमात्वविधेःकोवकाशइतिवाच्यं॥धेट्पाशोतनूकरणेदित्यादेरवकाशस्यस्पष्टत्वात्॥नन्वेवमादेङ्ङ्इत्येवब्रूयात्तथाचएज्ग्रहणंनिरवकाशमेवेतिचेत्॥न॥उत्तरार्थत्वात्॥मीनातिमिनोत्यत्रहिएचइत्यनुवृत्त्याआकारांतानामेजंताःप्रकृतयःएजंतानामपीकारांताइतिघुसंज्ञासूत्रेवार्तिककारःस्फुटीकरिष्यति॥अत्राहुःअन्यतरबाधेनैवसंभवेउभयबाधकल्पनंतावदन्याय्यं॥तत्रयद्यणुरपिविशेषोनावधार्यतर्हिविनिगमनाविरहात्स्यादेवोभयबाधः अस्तिचेहविनिगमकं॥नध्यारब्येतिसूत्रेध्यायतेःकृतात्वस्यनिर्देशेनआत्वाबाधज्ञापनात्॥किंच॥एज्ग्रहणसामर्थ्यादप्यात्वंभवति॥यत्तूक्तंमुन्न

र्थमेतदिति॥ नञ्॥ मीनातीति सूत्रेणहिनण्वः स्थाने आत्वंविधीयतेकिंत्वेजन्निमित्तेप्रत्ययेविवक्षितेउपदेशावस्थायामेवान्त्यमाश्रित्य आत्वंविधीयते॥ अन्यथादायइत्यादौभावेघञंवाधित्वाणत्वंस्यात्॥ ईषद्दुदानःस्वदानैःइत्यादौयुच्चनस्यात्॥ अवक्षायन्नितिप्रयोद्यधेनिणोनस्यात्॥ स्पष्टीकरिष्यतेचेदंषष्ठएवभाष्यकृता॥ एवंचणङ्निमित्तेप्रत्ययेइत्युच्यमानेपिदापयतिमापयतीत्यादिसिध्यत्येवणिचोगुणंप्रत्यपिस्वरूपयोग्यत्वात्॥ वृद्ध्यागुणबाधेपियोग्यतानपायात्॥ नचेहफलोपधानंविवक्षितं॥ आत्वस्येज्निषयेप्रागेवप्रवृत्तेरभ्युपगमात्॥ अन्यथाघञ्युच्णप्रत्ययानस्युरितिसमनंतरमेवोक्तं॥ तस्मादात्वंभवत्येव॥ गुणस्तूकारो पदेशसामर्थ्याद्ध्यनदितिस्थिते॥ व्यंजनानांगुणःस्यादितिपरमवशिष्यते॥ ततश्चईहितेत्यत्रहकारस्यकंठ्यत्वादकारःस्यात्॥ उदितीत्यत्रभकारस्यओष्ठ्यत्वादोकारःततश्चयेताउनवितेतिस्यात्॥ ईकारस्ययणिकृतेअकारस्यदर्शनसहायकृणः॥ नत्वल्लोपः॥ आर्द्धधातुकोपदेशेयद्कारान्तंतस्यलोपइतिव्याख्यातत्वात्॥ उंभेभ्यानुस्वारपरसवर्णयोर्गुणेकर्त्तव्येऽसिद्धत्वादितिनैषदोषः॥ सप्तम्याजनेर्डइत्यत्रडप्रत्ययस्यडित्करणंज्ञापकं॥ नव्यंजनस्यगुणोभवतीति॥ पदिहिस्यान्नहिनकारस्यार्द्धमात्रिकस्यमात्रिकेअकारेगुणेकृतेत्रयाणामकाराणामतोगुणइतिपररूपेचसिद्धंरूपमुपसरजोमंदुरजइति॥ तत्किंटिलोपार्थेनडित्करणेन॥ स्त्रीगवीषुपुंगवानांगर्भाधानायप्रथममुपसरणमुपसरः॥ व्रजनेसर्त्तेरितिअप्रत्ययोघञोपवादः॥ व्रजनःस्यादुपसरइतिसंकीर्णवर्गेअमरः॥ व्रजायतेस्मिन्व्रजनःपशूनांगर्भग्रहणकालइतिक्षीरस्वामी॥ उपसरेजातउपसरजः मंदुरायांजातोमंदुरजः ङ्याप्पोःसंज्ञाछंदसोर्बहुलमितिह्रस्वः॥ वाजिशालातुमन्दुराइत्यमरः॥ नचडकारःश्रवणार्थोस्तिनिवाच्यम्॥ प्रावृट्शरत्कालदिवांजइतिलुप्तटिलोपनिर्देशलिंगात्॥ ननुनेदंलिंगंजैसयेइत्यस्यकप्रत्य

यांनस्यजइतिनिर्देशोपपत्तेः॥कथंतर्हिकर्मण्युपपदेविहितआतःकःमावृषिजइत्यादौस्यादितिचेत्॥हिपःपादपःइत्यादिसिद्धयेसुपि
स्थःइत्यत्रसुपीतियोगविभागाभ्युपगमात्॥सत्यं॥डकारस्यश्रवणार्थत्वेइत्संज्ञाशास्त्रंबाध्येत॥नचप्रयोजनाभावःदिलोपार्थत्वान्न
चगुणेनान्त्यस्यासिद्धिःनद्भावस्यापिज्ञाप्यत्वात्॥निषादस्थपत्यधिकरणन्यायेनफलमुखगौरवस्यादोषात्वात्॥डकारस्यश्रवणार्थता
भ्युपगमेसिद्धंतुनित्यशब्दत्वात्किमर्थंशास्त्रमितिचेन्निवर्त्तकत्वात्सिद्धमितिवृद्धिसूत्रस्थवार्तिकविरोधाच्च॥नन्वसतिडित्वेरूपेनसि
ध्यति॥नकारस्यानेगुणस्यापिसानुनासिकस्यप्रसंगात्॥नचनिरनुनासिकेनप्रत्ययाकारेणसहपररूपाच्छुङ्होभविष्यतीतिवाच्यं॥पर
रूपविधानेपिगुणानामभेदकतयापर्यायेणसानुनासिकप्रसक्तेर्दुर्वारत्वादिति॥मैवम्॥एडिःपरइतीयतासिद्धेरूपग्रहणंदधिकाद्यर्थात्तु
णविधेस्तदुपपत्तेः तस्यत्वेनदेवफलं॥यादृशंपररूपंनिरनुनासिकत्वाद्युपेतंतादृगेवयथास्यादिति॥तस्माज्जनेर्डवचनंज्ञापकंनव्यंजनस्य
गुणोभवतीति॥एवंचदृग्ग्रहणमात्संध्यक्षरव्यंजनविवृत्यर्थमितिवार्त्तिकमसंगतमितिप्राप्तेभगवान्भाष्यकारइत्थंसिद्धान्तमाहउक्त
रीत्याज्ञापकेनैवात्संध्यक्षराणांनिरासेपिव्यंजननिवृत्यर्थंसूत्रंकर्त्तव्यमेव॥यत्तूक्तंजनेर्डवचनंज्ञापकमिति॥तन्नगमेरपिङ्यंङोवक्त
व्यःगमेश्चगुणेक्रियमाणेअंतर्यतओकारःस्यात्॥ततश्चनगोअगःअभ्युद्गःसमुद्गःइत्याद्दिनसिध्येत्॥ततश्चतत्रचरितार्थेडित्वंकर्त्तव्यं
जनस्यगुणाभावंज्ञापयेदिति॥ननुजनेर्डइत्येषडप्रत्ययोगमेर्नविधीयतेकिंतु गमश्चअंतात्येताध्वदूरपारेतिप्रकरणेपठितेनात्रापिद
ृश्यतइतिवार्तिकेनडप्रत्ययान्तरमेव॥तथाचकथंभाष्यकृतोक्तंगमेरप्यंङइति॥सत्यम्॥सप्तम्यांजनेर्डइतिप्रकरणेतावदन्येष्वपिदृ
श्यतेइतिसूत्रेणङोविधीयतइतिनिर्विवादं॥तत्रचान्येष्वपुपपदेषुजनेर्डोदृश्यतेइत्यक्षरार्थः॥तेनाजोहिजोनुजइत्यादिसिद्धं॥एवम

पिधात्वंतरङ्गविधायकाभावेपरिनः स्वातापरिस्वेत्यादिनसिद्धेदित्याशंक्यतत्रवार्त्तिकरुतोक्तं॥ अन्येभ्योपिदृश्यतइति॥ अयंचसौत्रेदृ
ग्रहणसूचितएवार्थोवार्त्तिकेनविवृतोनत्वपूर्वेःसंग्रहीतः॥तथाचतत्रवृत्तिकारआह।अपिशब्दःसर्वोपाधिव्यभिचारार्थः॥तेनधात्वंत
रादपिभवतिपरिनः स्वातापरिस्वेति॥दृशिग्रहणात्कारकांतरेकालान्तरेचेत्यादितत्रैवस्पष्टं॥एवंस्थितेसौत्रेणैवानेनपरिस्वेत्यादेरिवनगो
गद्इत्यादेरपिसिद्धौअंतात्यंतेतिप्रकरणेअन्यत्रापिदृश्यतइतिवार्त्तिकंनकर्त्तव्यमेवक्रियमाणंवाएतत्सूत्रसिद्ध्यर्थंविवरणापरतयानेय
मित्याशयेनभगवतोक्तम्॥ गमेरपित्त्वयंडोवक्तव्यइति॥ नन्वेवमपिडित्त्वंव्यर्थमेव॥ गमेर्विचैवसिद्धेगमेर्डोरितिडोप्रत्ययविधानेनमक
ारस्यगुणओकारोनभवतीतिज्ञापितत्वात्॥ नस्माङ्डुप्रत्ययस्यडित्त्वंपूर्वोक्तरीत्याज्ञापकमेव॥ किंच॥ डोप्रत्ययविधानंव्यंजनस्यगु
णइतिज्ञापयति॥अन्यथाविचैवसिद्धौकिंतेनेतिचेत्॥ न॥ विचिहिंसतिगुणःक्रियमाणः॥सानुनासिकओकारःस्यादितिनिरनुनासिकस्मि
न्डोप्रत्ययविधानादितिदिक्॥ अत्रवदंति॥ तनोतेर्डउःसन्वच्चेतिडित्करणान्नव्यंजनस्यगुणोभविष्यति॥ यन्नुणस्त्रातिदेशोयंकार्यातिदे
शोवाआद्येऊर्णुनविषतीत्यत्रेवहिर्वचनेचीतिस्थानिवद्भावेनतत अउइतिस्थितेसन्यतइतीकारःसानुनासिकःस्यात्॥ हितीयेतुअ
भ्यासकार्यदुर्लभमिति॥ तन्न॥ आद्येगुणानांभेदकत्वादिमौडमेडइतिवदुपपत्तेः॥हितीयेपिबभ्रुर्नहुरित्याद्यर्थेधात्वधिकारीयहित्वेअभ्या
ससंज्ञास्वीकारात्॥ अतएवलिटिधातोरितिसूत्रेधातुग्रहणंनिष्ठतुतावत्सान्यासिकमितिभाष्यं॥ आदेचइतिसूत्रेधातुग्रहणानुवृत्तेः
रणानतोभाष्येप्रदर्शितत्वेपिष्यङ्विधिभाष्येननुवृत्तेरेवसिद्धांतिततयाभाष्याशयस्त्वित्थमेववर्णनीयत्वादितिदिक्॥ किंच॥ यथास्थाने
न्तरतमपरेभाषासंस्कृतावनुनासिकपरसवर्णविधीस्थानप्रयत्नाभ्यामन्तरतमंएतन्मुरारिस्त्वङ्करोषीत्यादिकंविषयंलब्ध्वाचरिता

यौ च नुर्मुखः कुंडरथेनेत्यादौ नप्रवर्त्तनेऽपि हयवरट्सूत्रेसिद्धांतितं॥ तथेहापि सार्वधातुकजुसिगुणसिचिरद्ध्यादयः नेता अविभयुः अ
नैषीदित्यादौ च चरितार्थाः उभिता अनेनिजुरभैत्सीदित्यादिषु नभविष्यंति॥ नचैवं नेता अनैषीदित्यादावेवस्थानगुणप्रमाणैस्त्रिभिरान्तर्य
लाभाच्चेता अचैषीदित्यादौ प्रमाणान्तर्यविरहेणगुणवृद्धीनस्यातामितिवाच्यम्॥ सृघस्यदःक्मरच्इति क्मरचःकित्करणेनप्रमाणतआ
न्तर्यस्याविवक्षायाज्ञापनात्॥ नचैवमपि ईहितादीशितेत्यत्रकंम्यतालव्ययोर्विहितयोश्चहकारशकारयोस्तादृशावेवअदेतौस्यातामि
तिवाच्यम्॥ श्नस्त्रलाविति सूत्रस्यप्रत्याख्यानावसरेऽस्मणामीषद्विवृततायाःसिद्धान्तयिष्यमाणत्वात्॥ नहीवंविवृतकरणाःस्वरा
स्ताभ्यामेऔविवृतनरावित्यादिशिक्षानुरोधाच्चेतानेनेत्यादावपिगुणप्रवृत्तिःस्याद्विवृतविवृततरत्वकृतवैलक्षण्यसत्वादितिवा
च्यम्॥ तथासतिविधेर्निषेधेनिषेधस्यजयःकरणमित्यादिनिर्देशैःक्रुसन्क्मरच्भृञांकित्वेनचइकारादिषुगुणप्रवृत्त्यनुमानाच्च॥ आत्संध्यक्षरव्यंजनेषुनुगुणाद्यप्रवृत्तिरेवोचिता॥ तथाचनिदेशाःयातिवातिद्रातिप्सातिध्यायतेःसंप्रसारणंचेच्छतिचिनोतिदेग्धिषुचेत्यादि॥ अथक्रोःकित्वेनापिगुणवृद्धिविधावंतरतमपरिभाषानुपस्थितिरेवज्ञाप्यतामितिचेन्न॥ सत्यामपीक्रुपरिभाषायामीकारस्याकारादिनिरुन्नयेअंतरतमपरिभाषायाआवश्यकत्वादिति॥ तदेवम्॥ डओर्डित्वादनान्तर्यान्निर्देशाच्चनिराकृतं॥ व्यंजनंभाष्यएवैचआकारश्चनिराकृतः॥ तस्माद्यर्थसूत्रमिदमथयद्युत्तरार्थताविभज्ययोगंकिमितिपरिभाषात्वमिष्यते॥ अनोच्यते॥ क्ङिति चेतिसूत्रेचकारस्यङितिशब्दपर्यायतामाश्रित्यङ्कङितियेगुणवृद्धीनयोर्निषेधइतितावद्वक्तव्यते॥ अन्यथालेगेवायनेइत्यत्रओर्गुणोपिनिषिध्येत॥ औपगवादिस्तुतस्यावकाशः तथापौरोहित्यमित्यत्रादिवृद्धिश्चनस्यात्॥ एवंस्थितेयदीयंपरिभाषाप्र

स्थानिव्यायतेनदाकथंचिन्नत्रतत्रगुणवृद्धिविधौइकामेवस्थानित्वपर्यवसानेपिइकइतिपदानुच्चारणेनेग्लक्षणत्वविरहान्निषेधोप्रव
र्त्तेत॥ ततश्चकृतःकृतवान्कुरुतःछिन्नेछिन्नवानित्यादिन सिध्येत्॥निषेधसूत्रेचनिर्विषयंस्यात्॥परिभाषापरित्यागपक्षेइग्लक्ष
णयोर्गुणवृद्ध्योरप्रसिद्धत्वात्॥ तदेतत्सुटीकृतंभाष्यकृता॥ उत्तरार्थमेवनर्हिसिज्ग्रहणमिति॥तस्यत्वयमाशयः॥यद्यृषिसि
चिवृद्धिरितिविधौवक्ष्यमाणरीत्यापरिशेषादिकामेवस्थानित्वंलभ्यते॥तथापीग्लक्षणत्वेविनानिषेधोनप्रवर्त्तेत॥तस्मादुत्तरार्थनिषे
धप्रवृत्त्यर्थंवृद्धिग्रहणमितिएवंचवदन्तान्यायसाम्याद्गुणग्रहणस्याप्येतदेवप्रयोजनंसूचितं॥कथंपुनर्गुणवृद्धिविधौसर्वत्रपरिभाष
व्यतिरेकेणइकःस्थानित्वपर्यवसानंयेननिषेधार्थतावर्ण्यतइतिचेत्॥शृणु॥सार्वधातुकार्द्धधातुकयोर्ज्ञसिचेतिगुणौतावदुत्त्य
परिभाषयाअंगात्येअत्रिप्राप्तौमाभूदुक्तज्ञापकादिभिरात्संध्यक्षरव्यंजनेभ्योव्यावर्त्तिताविस्वेवविश्राम्यतः॥मिदिपुगंतलघूपधादिगुणे
पुनस्थानीनिर्दिष्टएव॥तथाहि॥मिदेर्गुणः इत्यत्रमिदइर्मिदिः तस्यमिदेरित्यर्थः पुकिअंतःपुगंतःलघ्वीउपधाःलघूपधापुगंतश्चलघू
पधाचेत्तिसमाहारद्वंद्वात्षष्ठी॥नचैववापयतीत्यादावतिप्रसंगःसंनिपातलक्षणपरिभाषयाआदंतलक्षणस्यैकोगुणाप्रवर्त्तकत्वात्
॥ऋच्छत्यृतामित्यत्रापिहयोर्ऋतोर्दीर्घस्यचेतित्रयाणांग्रहणंनिर्देशःतद्यथा॥आचक्रृतश्चकृतः ऋच्छतेराक्रृच्छत्यासचक्रृतश्चते
षामितिषष्ठीतत्पुरुषद्वंद्वोभयगर्भोद्वंद्वः ऋच्छत्याचआचक्रृतश्चेतित्रिपदद्वंद्वोवा॥तेनऋच्छत्रकारस्यस्थानित्वंलभ्यते॥वस्कृतस्कृत्व
नुर्णामिहग्रहणंबोध्यः तेनारिवान्सर्वभूणान्याकृषीत्यादावर्त्तेः कृसौगुणःसिद्धःपुनर्विधानसामर्थ्यात्॥अन्यथाकृसोःकित्करणसा
मर्थ्यान्नित्यत्वेवगुणोनिषिध्येत॥एतच्चकृसुश्चेतिसूत्रेस्फुटीकरिष्यामः॥तथाऋदशोङीत्यत्रापिउरदिगुणइतियोगोविभज्य

ते॥ ततः दृशः उरित्यादयनुवर्त्तते॥ स्थूलदूरेतिसूत्रेपियोगविभागः कर्त्तव्यः स्थूलदूरयुवह्स्वानांयणादिपरमित्येकोयोगः क्षिप्रक्षुद्रयोः पूर्वस्यचगुणः इतियोगांतरं॥ तत्रस्थवीयानित्यादौओर्गुणेनसिद्धम्॥ आभीयस्यामिद्धत्वस्थभसोरल्लोपइतिनपरकरणेनानित्यनाज्ञापनात्॥ भाष्यकृतापत्यारव्यानाच्च॥ यणआदिर्यणादिः ततःपरमितिसमासः तथाचक्षिप्रक्षुद्रयोर्यणआदीपकारदकारौततःपरस्यरशब्दस्यलोपः ताभ्यामेवचपूर्वस्यइकारस्यउकारस्यचगुणइत्यर्थः॥ तदित्यंगुणाः सर्वेइकिविश्रोताःमृजेर्वृद्धावपिअनङ्इत्यपकृष्यते॥ मृजेर्वृद्धिरचिन्नोङ्णिनिभचइत्येव॥ नचैवंअमार्दइत्यत्रअटोपिवृद्धिः स्यादितिवाच्यम्॥ लादेशेषुकृते षढोतिषस्यापरत्वाद्धौसत्यांभट्॥ तत्रकृतेपुनर्वृद्धिर्नभवति॥ सकृत्प्रवृत्याचरितार्थत्वात्॥ यदातुअसिद्धवत्सूत्रप्रत्याख्यानापल्लुडितिद्विलकोदकनिर्देशमाश्रित्यउपदेशेआर्द्धधातुकइत्येनयोरन्यतरद्वत्तुवर्त्यवालावस्थापामेवाट्क्रियते॥ एवंनेकाचइतिविभज्यइणोयणित्यनुवर्त्यअनेकाचश्चेनहिइणश्चेतिनियममाश्रित्यअड्धो यातामित्यादौयण्वार्यते॥ तदालावस्थायांयद्यपिवृद्धिर्नभवति॥ लकाराणांडित्त्वेनसृष्टइत्यास्क्तिनिषेधात्॥ ततश्चान्तरंगत्वाद्डागमएवतथापिअंत्याभावेत्यसदेशस्येतिपरिभाषामाश्रित्यअटोवृद्धिर्निवर्तनीया॥ परिभाषयैवाख्यानपक्षेतुअंगक्षिप्तेनप्रत्ययेनाव्यवधानन्यायाच्चसिद्धमार्दइत्यादिरूपं॥ सिचिवृद्धावपिविधेयायांनास्तीकपरिभाषायाउपयोगः व्यावर्त्यभावात्॥ नचाचिकीर्षीदित्यकारोव्यावर्त्यः ण्यल्लोपाविषड्गुणवृद्धीर्घेभ्यःपूर्वेविप्रतिषिद्धमितिवचनाद्ल्लोपेनैवसिद्धत्वात्॥ अन्यथाचिकीर्षकइतिनस्याच्चिकीर्षायकइति ——————— वप्रसज्येन॥ आकारस्यतुनास्तिविशेषः सगिड्भ्योवाधस्येत्युक्तं॥ एजंतमपिनसंभवतिआत्वविधानात्॥ रैनौग्लौशब्दानामाचारक्विबंतानांसत्यांसत्यांवाद्धौनकश्चिद्विशेषः॥ गैरुल्दा

स्किपि अगसीदित्यत्रापिनातिप्रसंगः॥ऋतदृङ्नातोरित्यतोनुवृत्तेनधातुग्रहणेनसिजाद्यन्तस्यधातोर्विशेषणेसतिधातुरेवयोधातुर्नतुक्रियेति
त्यादिपदिकमितिव्याख्यानादितिकैयटादयः॥नन्वेवंकवेःअकवायीत्॥विधोःअविधावीत्पितुःअपितारीत्॥अंतरंगमपिगुणंसिचिवृद्धि
र्बाधतेइतिवदन्माधवोविरुध्येतेनसत्यम्॥यद्यविरोधःसंपादनीयइत्याग्रहस्तर्हीत्यंवर्णनीयं॥धातोरितिवर्तमानेइत्यप्यनुवर्त्ततेतत्रवाक्य
शेषेनसंबध्यमानंनियमार्थंसम्पद्यते॥ओदन्तस्यधातोरेवेहवृद्धिस्तर्हिधातोरेवधातोर्नतुनामंधातोरिति॥यद्वा॥नेटीत्यत्रनेतियोगंविभज्य
मंडूकप्लुत्यासंबंधानुवृत्त्यावागोतइत्यनुवर्त्त्यओकारान्तस्यवृद्धिर्निषिध्यतेअथवाबहुलंछन्दसीत्यतोबहुलमित्यनुवर्त्तसिचिवृद्धिर्ना
मधोनाविगंतस्यभवतिननुओदन्तस्येतिकथंचित्समाधेयं॥व्यंजनेषु अन्तरतमपरिभाषाबलेनैवानुनासिकपरसवर्ण्योरेवातिप्रसंग
उद्धृतएव॥अभ्युपेत्यानुब्रूमः॥नाप्राप्तायांसिचिवृद्धावारभ्यमाणाहलंतलक्षणावृद्धिर्बाधिकाभविष्यति॥नेटीतिनिषेधस्तुहलंतस्यया
वतीवृद्धिःप्राप्तासिचिवृद्धिरितिवाहलंतस्येतिवातस्याःसर्वस्याःननुसूत्रेविशेषग्रापितत्वेआग्रहःतेनाकोषीत्सीषीदित्यादौहिविधा
पिवृद्धिर्विधिध्यंतइतिसुस्थं॥तस्मान्निषेधसिध्यर्थमिग्लक्षणतोसंपादयितुंसूत्रमितिस्थितम्॥स्यादेतत्॥क्रुवःक्रुवान्क्रुन्क्रुन्
वानित्यादौनिषेधसिद्धेगुणग्रहणमस्तु॥वृद्धिग्रहणंतुव्यर्थं॥नचमृशोमृशवानित्यादौनिषेधसिद्धिस्तत्फलं॥योगविभागेनसिद्धत्वा
त्॥तथाहि॥मृजेर्वृद्धिरित्यस्यानंतरमजादौकृतिवत्येवंरूपंवचनमवश्यंकर्त्तव्यम्॥मृजंतिमार्जंतीत्यादिसिध्यर्थं॥एवंस्थितेअजा
दौकृतीतियोगोविभज्यते॥नियमार्थंचेदं॥कृतिचेड्वतिअजादौएवेतिनेनमृशोमृशवानित्यादिसिद्धं॥ततोजादावपिविकल्पेनेत्ये
तदर्थंवेतिद्विनीयोयोगइति॥तस्माद्वृद्धिग्रहणस्यफलंदुरुपपादमिति॥अत्राहुः॥णूस्तुतौधूविधूननेकुटादिषूपन्यस्यते॥ताभ्यांलुडि

अनुवीदधुवीदितीष्यतेतत्रसिच्विवृद्धेः क्ङितीतिनिषेधायेग्लक्षणोसंपाद्यितुमिहवृद्धियहणमिति॥ननुविहान्तर्भूतसिज्मात्रापेक्षत्वा
दंतरंगेउवडिःकृतेहलंतत्वान्नेतीतिनिषेधः सिद्धइतिचेत्॥न॥सिच्यन्तरंगंनास्तीतिसिद्धांतादुवङःप्रागेववृद्धिप्रसंगात्॥स्यादेतत्
॥अंतरंगंवलीयइतिनावदचःपरस्मिन्निितिसूत्रेस्थापयिष्यते॥तदविशेषात्सिच्यप्यस्तु॥नैवंमचैषीदहैषीदित्यादौगुणःस्या
दितिवाच्यम्॥तस्यैववृद्धिसंभवेनेष्टापत्तेः नहीदानींविधाविग्रहणमस्ति॥येनएकारस्यवृद्धिर्नलभ्येत॥नचैवमप्यस्तोषीदित्या
दावंतरंगत्वाद्गुणेकृते ओतानेतिव्यारव्यानपक्षेवृद्ध्यसंभवःबहुलयहणादनिगंतानांनेतिपक्षेतुअचैषीदित्यादावपिदोषएवेतिवा
च्यम्॥ओतोधातोरेधातोर्नतुनामधातोरितितृतीयपक्षाश्रयणेनसर्वसमाधानात्॥अकार्षीदित्यादौहलंतलक्षणावृद्धिरस्तु॥अं
नारीदित्यादौतुअंतरंगत्वाद्गुणेहलंतलक्षणायांवृद्धौनेतीतिप्रतिषिद्धायामतोहलादेरितिविकल्पेबाधित्वा अतोल्लोपस्येति नि
त्यावृद्धिः॥ अलावीदित्यादावपिअंतरंगत्वाद्गुणावादेशयोःकृतयोरतोल्लोपस्येत्यत्रलोपोव्योरितिलोपेनवकारस्यापिव्यारव्यानां
न्नित्यावृद्धिर्भविष्यति॥माभवानवीत्॥अमवीदित्यत्रापितर्हिनित्यावृद्धिःस्यादितिचेन्नाणिश्चिग्रहणमपनीयतत्स्थानेभविष्यन्तः प्र
त्ययेपेणवृद्धिनिषेधात्॥नत्यस्मिन्पक्षेणिश्चिग्रहणमुपयुज्यते॥औनयीदश्चयीदित्यत्रान्तरंगत्वाद्गुणायादेशयोःकृतयोर्यन्नानांनेत्ये
वंनिषेधसिद्धेः॥नन्वेवमवेरिवमवेरपिनित्यंनिषेधएवस्यात्॥इष्यतेतुविकल्पःनैषदोषः।अतोल्लोपस्येत्यत्रवकारप्रश्लेषेणेयान्नि
त्यावृद्धिःप्राप्तासैवेहअविमव्योर्नित्यनेनमवेर्निषिध्यतेनतुअतोहलादेरित्येषापि॥मध्येपवादाःपूर्वान्विधीन्बाधंतेनोत्तरानिति
न्यायात्॥नचैवंजागर्त्तेरपितथाप्रसंगःतत्रबाध्यसामान्यचिन्तामाश्रित्यस्वविषयेप्राप्तंसर्वंबाध्यतेइतिस्त्रीकाराात्॥यहा॥अथवा

दृनिषिद्धेउत्सर्गोनप्रवर्त्ततइतिजागर्त्तीवाश्रयणीयंभवतीतुप्रवर्त्ततइतिबाध्यसामान्यविशेषचिंतनयोःबाधकेनिषिद्धेबाध्यस्यप्रवृत्त्यप्र
वृत्योश्चलस्यानुरोधेनव्यवस्थायाअनुपदमेववक्ष्यमाणत्वात्॥ नचैवमगवीदित्यत्रापिनित्यावृद्धिःस्याद्गकारश्लेषादितिवाच्यम्
॥सिचिवृद्धेरिवास्याअपिधातुग्रहणेनवारणात्॥ नस्मात्सिच्यन्तरंगाश्रयणेनैवअनुवीदधुवीदित्यादेःसिद्धौकिंतिचेतिप्रतिषेधस्या-
नपेक्षणाद्वृद्धिग्रहणंव्यर्थमेवेति॥ अत्रोच्यते॥ वकारश्लेषेसतिशवतिर्गतिकर्माकंवोजेषुविकारएवैनमार्यीभाषंतइतिपस्पशायां
भाष्यकारैरभ्युपगतस्यशवृधातोरपिनित्यवृद्धिप्रसंगः नस्यापिप्रतिषेधेवाकथंणिश्विभ्यांनिमानं॥ गौरवप्रसंगात्॥किंच॥ नवयं
व्यसनितयासिच्यंनंगं नास्तीतिब्रूमः॥किन्तुन्यायबलाद्ज्ञापकबलात्फलानुरोधाच्च॥ तथाहि॥येननाप्राप्तिन्यायेनाप्राप्तेरद्ध्यावाध्य
ते॥सत्यपिसंभवेबाधनंभवतीत्यभ्युपगमात्॥अन्यथातेनैणदधिनबाध्येत॥अमकजादिभिश्चशप्प्रत्ययकप्रत्ययाद्योनबाध्येरन्
॥देशभेदेनउभयसंभवात्॥नचमध्येपवादन्यायेनोवङेववृद्ध्याबाध्येननतुगुणोपीतिवाच्यम्॥बाध्यस्यभेदेनविवक्षायांद्येतदेवं
स्यात्॥बाध्यस्यसामान्यचिंतायांतुविषयेप्राप्तंस्वानपवादभूतंसर्वंबाध्यतेयथाअचिरद्युत्येतेनगुणदीर्घोत्वानि॥अन्यथातत्रापिमध्येप
वादन्यायेनरेफोदीर्घोत्वेएवबाध्येननतुगुणं॥तस्यपरत्वात्॥बाध्यस्यचकचिद्भेदेनचिंताकचित्तुसामान्यरूपेत्युभयमपिलक्ष्यानु
रोधात्तत्रतत्राश्रीयते॥णिश्विग्रहणंचात्रलिंगम्॥अन्यथातरंगेत्वादुणायादेशयोःकृतयोर्यीतानांनेतिनिषेधादेवानदीदम्बणीदित्यादेर्सि
द्धौकिंणिश्विग्रहणेन॥ज्ञापकान्तरमप्युक्तंभाष्ये॥यच्चकरोत्यकारग्रहणंलघोरितिरुतेपीति॥अस्यायमाशयः॥अतोहलादेरितिसूत्रेअदग्र
हणस्यननावत्संध्यक्षरादिसंव्यावर्त्य॥लघुग्रहणेनैवतद्व्युदासात्॥इदुदृतःपरमवशिष्यंतेअचेतीत्अकोषीन्अनर्तीदिति॥तेप्यत

रंगेणगुणेनापस्टृताश्चेत्तर्हिव्यर्थमद्ग्रहणंस्यात्॥ नचाकुटीदपुटीदित्यादावुक्तरव्युदासायतदितिवाच्यम्॥तत्रापिअंतरंगेणगुणेनवृद्धि
बाधेसतिगुणेङित्वान्निषिद्धेपिवृद्धेरप्रवृत्तेःनहिदेवदत्तस्यहंतरिहतेदेवदत्तस्यपुनरुन्मज्जनंभवतीतिन्यायात्।अतएवनांतःपादमितिसूत्रेभूवचनंनिषे
धेसतिअयादयोपिनप्रवर्त्तेतेनेतेनसुजातेअश्वसूनृतेइत्यादिचसिध्यतीतिस्वीकृतंभाष्येनचैवमपवादाभावेपुनरुत्सर्गस्यस्थितिरितिनिर्वि
षयंस्यात्वृक्षाबिल्वादीनादिचीतिपूर्वसवर्णे—निषिद्धेवृद्धिश्चनप्रवर्त्तेतेतिवाच्यम्॥भियोध्यौनदेनौसदित्यादिलिंगेनअपवादेनिर
षिद्धेउत्सर्गेपिनप्रवर्त्तनइत्यस्यासार्वत्रिकत्वाभ्युपगमात्॥तदेतत्तत्रतत्रोच्यते॥नोत्सहतेप्रतिषिद्धासतीबाधितुमिति॥तथाच॥पक्ष
भेदाश्रयेणातोहलादेरिनिअङ्ग्रहणमपिज्ञापकमितिस्थितम्॥फलमप्यस्ति॥यदिहिसिच्यन्तरंगंस्यात्तर्हिचिनीप्रभृतिभ्योयङ्लुगंते
भ्यःचिरिणोतिजिरिणोनिभ्योचलुङिसिचिअचेचायीदनेनायीदचिरायीदजिरायीदितिस्यात्॥गुणापादेशयोःकृतयोर्यान्तानांनेतिप्र
तिषेधप्रसंगात्॥यदितुबाध्यविशेषचिंतायांमध्येपवादन्यायमाश्रित्यउवङेचबाध्यतेनतुगुणइत्याश्रीयतेतदाप्येतन्नसिध्येदेव॥तस्मा
त्सिचिसर्वमप्यंतरंगंनास्त्येवेतिसिद्धांतंसाधयितुबाध्यसामान्यचिंतैवाश्रयणीया॥एतदर्थमेवहिभाष्येज्ञापकेपन्यासःकृतः॥अन्यथा
न्यायेनैवसिद्धेन्तरंगस्यापिबाधेकिंज्ञापकवर्णनेन॥एवंस्थितेन्यनुवीत्न्यंधुवीदित्यत्रहितिचेतिनिषेधएवाश्रयणीयस्तत्रापेक्षलक्षण
त्वसिद्ध्येवृद्ध्यग्रहणमपीहकर्त्तव्यमेवेतिस्थिते॥एवंचसत्यसंभवादपिरड्यासिच्यन्तरंगंसर्वंबाध्यते॥यदिहिस्यात्तर्हिकापिसिचो
गंतमंगंनलभ्येतैवेत्यवधेयं॥तथाचङ्ग्रलक्षणत्वस्यनिषेधप्रवृत्त्यर्थमावश्यकत्वेस्थितेतत्रतत्रआत्सिध्यक्षरव्यंजनादिन्यायेनिरपीक्ष्य
रि भाषयैवसिध्यतीतिज्ञापकवर्णनादिक्लेशोपिनाश्रयणीयःनचैवंद्यौःपंथाःइमंइत्यादावपीकूपदीपस्थितिवशादिदमेवौत्वमाव्य

मत्वंचस्यादिनिवाच्यम्॥ [illegible]वृद्धिशब्दयोरनुवृत्तौपुनर्गुणवृद्धिग्रहणसामर्थ्यादिशब्दव्याप्तावेवाश्रीयते॥गुणवृद्धीयेगुणवृद्धी नतु
शब्दान्तरेणविहितेइतिभनुइन्नाभ्यांविशेषणाद्वा॥ननुचस्येतिसूत्रेइस्वादिग्रहणानुवृत्यासंज्ञाविधानंपदोपस्थितिरितिस्थास्यतितत्रा
मध्यादिवऔत्सर्गिकमप्यृभुक्षामास्त्यदादीनामइत्यत्रेकपदोपस्थानेनभविष्यति॥यदिहस्यात्तर्त्वचेत्यत्रसंज्ञाविधानेनियतात्राश्रयणं
व्यर्थंस्यादितिचेत्॥न॥दिवउदित्यादिषुअगुणवृद्धिसंज्ञकेषुचपरिभाषानिवर्त्तनेनचरितार्थत्वात्॥अथनआविभक्तावित्यादावि को
संभवेनतत्रचरितार्थत्वाच्च॥तस्मात्द्यौःपंथाःइममित्यादिसिद्धयेदहापिसंज्ञाविधानेनियमंसंपादयितुंपुनर्गुणवृद्धिग्रहणमितिन्या
यः॥ननुपंथाइत्यनुदाहरणं॥इतोदिनिसिद्धे आहिधिसामर्थ्यादेवेकपदस्यानुपस्थितेरितिचेन्न॥ऋभुक्षिन ऋकारोकारार्थंआहिधि
संभवात्॥नचेकःसोभ्यानंनर्थविवक्षणाद्येननाव्यवधानाश्रयणाच्चैवमितिवाच्यं॥तथापिसंबुद्ध्यर्थनयासामर्थ्यापेक्षयात्॥नचै
वमितआदित्येवब्रूयादितिवाच्यम्॥ऋभुक्षणमिंद्रमित्यस्यासिद्ध्यापत्तेः आहिधौहिषापूर्वस्येतिनसिद्धिरितिदिक्॥यत्तुभाष्येस
इमंइत्युदात्तंनतत्रसइमंमंत्रमपश्यदितिब्राह्मणवाक्यैकदेशानुकरणमात्रं॥उदाहरणंतुइममित्येवंनतुसइत्यपि॥तच्छब्देइकोर
संभवेनइकइतिनियमस्यापवृत्तेरित्याहुः॥वस्कतंतस्कसइत्युदाहरणंसाध्वेवत्यदादीनामइतिहिविधिवाक्यं॥तत्रचेकइत्यस्योपस्थि
तौहीदमोरेवाल्वंस्यान्नत्वन्येषां॥गणेननिर्देशस्तुसंज्ञोपसर्जनव्यावृत्त्यर्थमुत्तरार्थंचस्यात्॥ तदोःससाविति सत्वंहित्यदादीनामेव
तदोर्विधीयते॥अत्रेदमवधेयम्॥शब्दव्याप्तिराश्रयणानुरोधेनापिगुणवृद्धिग्रहणंमास्तु॥इकस्तोइत्येतावतैवसिद्धे॥वस्कतंतस्क
तावित्यपिव्यर्थं॥इकइत्येवसूत्र्यतां॥संपूर्णंपूर्वसूत्रद्वयमनुवर्त्त्यवृद्धिरिति आदैचोयत्रविधीयेतेगुणइतिच अदेङैतत्र इकइत्यु

पनिष्ठतेइतिव्याख्यानात्॥ ननुएवंगुणवृद्ध्यधिकारेपुनर्गुणवृद्ध्यग्रहणसामर्थ्यादित्युत्तरग्रंथासंगतिःनस्यथाश्रुताभिप्रायकत्वा
न्ग्रहणपदस्यानुवृत्तिपरतयासंपूर्णसूत्रद्वयानुवृत्तिसामर्थ्यपरत्वाद्वेतिदिक्॥ व्याख्यानेलिंगंइतीदंतीद्वहणम्॥ अन्यथानत्रापीकूपदो
पस्थितौउक्तरीत्यायेननाव्यवधानन्यायादकारोकारव्यावृत्तौचसत्यांकिंतेनेतिनदेनदिग्ग्रहणंकिमर्थमितिभाष्येणइग्ग्रहणमात्संध्य
क्षरेत्यादिवार्तिकेनचसूच्यते॥ अन्यथाहिसूत्रंकिमर्थमित्याद्येवब्रूयात्॥ यत्तूक्तंनरार्थंगुणवृद्धिग्रहणंकर्त्तव्यमेवेत्याशयेनेग्ग्रहणमिं
त्युक्तमितिभाष्याभिप्रायवर्णनं॥तन्न॥ पूर्वसूत्रानुवृत्त्यैवसिद्धावुत्तरार्थत्वस्यापिदुरुपपादत्वात्॥ समुदायापेक्षायामंडूकप्लुतेःसंबंधानु
वृत्तेर्वातत्रापिशाच्यत्वात्॥ इग्ग्रहणस्याप्युत्तरार्थतयातदंशेपिशंकानुत्थानाच्च॥ इकइतियोगः किमर्थंविभज्यतइतिपस्भाष्यबीजमितिचेंन
तर्हिगुणवृद्ध्यंशेपिनस्याविशिष्टतयासूत्रं किमर्थमित्येवब्रूयादितिदिक्॥ यत्तुप्रधानाप्रयवद्वारासमुदायापेक्षेयमितितदपिनातीव
शब्दस्वरसानुगुणंनस्यादुक्तएवाशयःसाधुः। एवंचेकइतियोगविभागएवपूर्वपक्षसिद्धांताभ्यांसमर्थ्यतइतीहपर्यवसितोर्थः॥तर्ह्यो
नेत्रएकेनयोगविभागेनसकलेइसिद्धौमृजेर्वृद्धिरचःउरङिःगुणइत्यादिबहुतरयोगविभागाश्रयणेनान्यथासिद्धिवर्णनेनादर्त्तव्यमि
तिस्थितं॥ इयंचपरिभाषाअलोंत्यपरिभाषायाःशेषोवाशेषिभूतावातयासहसमुच्चितावैकल्पिकीवानदपवादोवापूर्वविप्रतिषेधान्न
ह्यधिकावापदोपस्थापिकावेतिसप्तपक्षाःसंभाव्यंतेयद्यपितथाप्याद्यानांषण्णादुष्टत्वात्सप्तमएवविद्वांसितः॥तथाहि॥सार्वधातुकार्द्ध
धातुकयोरित्यत्रस्वस्वनिमित्तवशात्परिभाषाद्वयंसन्निहितं॥ तत्रांगस्येतिषष्ठीयदिपूर्वमेवोत्पन्नीताअंगांत्यस्यगुणइतिपश्चादिकां
अन्त्योविशेष्यतेनदेकपरिभाषाशेषभूत्वा॥ यदितुपूर्वमिकाअंगस्यविशेषणान्नदंतविधिः इग्गुणस्यांगस्येतिततःसचभवन्नलोन्त्यस्येति

नस्तृतीयः पक्षः तदिदं पक्षद्वयमपि षष्ठीतत्पुरुषबहुव्रीहिंचाश्रित्यतच्छेषपक्षइतिभाष्येव्यवहृतं॥इहपक्षद्वयेपिपिदेर्गुणइत्यासेशे
षः योहिमिदेरन्त्यः नासावित्कृपश्चेत्कृन्नासावन्त्यः तथाचावश्यमपरिभाषायांत्यकृव्यायांसत्यांविनिगमकाभावाद्यत्यागेसर्वादेशो
गुणः स्यात्॥तदुक्तंवार्त्तिककृता॥इहिगुणावलोंत्यस्येतिचेन्मिदिमृजिभुगंतलघूपधह्रस्वदृशिक्षिप्रश्रुद्रुविग्रहणं॥सर्वादेशप्रसंगे
स्त्रानिगंतस्येति॥चकारोहेत्वर्थः ततश्चसर्वादेशप्रसंगोहीतिफलितं॥अथमिदः इमिदिर्नेस्यमिदस्त्यादिपूर्वोक्तरीत्याकथंचिदिहस
र्वत्रैकएवस्थानित्वंलभ्येनतथापिभिन्नमित्यादावनिग्लक्षणत्वाद्गुणनिषेधोनस्यात्॥अथक्रोःकित्त्वात्ज्ञापकादनिग्लक्षणत्वेपिनिषे
धःनहिलेगवायनःपौरोहित्यमित्यादावतिप्रसंगः अथलक्ष्यानुरोधाल्लघूपधगुणमात्रविषयकंज्ञापकंतर्हिपदोपस्थितिसापेक्षएवलक्ष्य
सिद्धयेसमाश्रीयतां॥एवंहिज्ञापकाश्रयणक्लेशोपिनभवतिकित्त्वेनापिपदोपस्थितिरेवज्ञाप्यतां॥एवंहिज्ञापकमूलकंवाक्यांतरंन
कल्प्यमितिलाघवं॥अस्तुतर्हितृतीयः पक्षः मिदेरन्त्यस्यइकश्चहूयोरपिगुणइति॥मैवम्॥स्थानेयोगावयवसंबंधरूपस्यार्थद्वयस्य
पुमपदुच्चारितषष्ठ्यादुर्लभत्वात्॥स्थानेयोगंचविनालोन्त्यविध्यलाभात्॥स्थानषष्ठीहितदुपस्थितौलिंगमितिवक्ष्यते॥इकइत्य
नेनसहावयवषष्ठींविनान्वयायोगात्॥आवृत्तौगौरवप्रमाणाभावाच्च॥एतेनमिदेरन्त्यस्यवाइकोवेतिचतुर्थपक्षोपिप्रत्युक्तः विकल्पस्या
ष्टसेषयस्तत्त्वाच्च॥अस्तुतर्हिनदपवादइतिपंचमः पक्षः तथाहिगुणविधावंगस्येतिनस्थानषष्ठी॥किंतुइगपेक्षयावयवषष्ठी॥ततश्च
लिंगाभावादलोन्त्यपरिभाषायाअनुपस्थितिः अयमेवचवाधपदार्थः यदीकृपरिभाषानभवेत्तर्हिस्थानषष्ठीत्वेनन्मूलकालोंत्यंपरिभा
षोपस्थितिश्चेत्सात्सत्यांत्रिकृपरिभाषायांतदुभयंनेत्येतावतैवापवादत्वव्यवहारः॥नहिवस्तुतोवचनेनप्रापितस्यबाधःसंभवति॥

शास्त्राप्रामाण्यप्रसंगात्॥ अतएवशास्त्रनात्यंसंकोचोबाधइत्याहुः एतेनहूंहूंहापवादएकशेषइत्यपिव्याख्यातम्॥ नत्यनुत्पन्नायां
विभक्तौहूंहूस्यप्रसंगः किन्तुयद्येकशेषोनभवेन्नहिप्रत्येकंविभक्तिर्हूंहूश्चस्यात्सनित्वैकशेषतन्नेत्येवतत्वं॥ अस्मिंश्चपक्षेजुसिगुणो
अनुहवुरित्यत्रेवानेनिजुः पर्यवेविषुरित्यादावपिस्यात्॥ सार्वधातुकार्द्धधातुकयोर्गुणः भवतीत्यादाविवईहितेत्यत्रापिस्यात्तथाच
वार्त्तिकम्॥ इङ्मात्रस्येतिचेज्जुसिसार्वधातुकार्थधातुकह्रस्वाद्योर्गुणेष्वनंत्यप्रतिषेधइति॥ अत्रह्रस्वादीनिह्रस्वस्यगुणः जुसिच
॥ऋतोङिसर्वनामस्थानयोः घेर्ङितीतिगुणचतुष्टयंगृह्यते॥ ततश्चहेअग्ने॥ अग्नयः कर्त्तरि॥ अग्नये॥ वाभ्रव्यइत्यत्रयथाओगुणंतं
गुणपंचकंभवति॥ एवंहेअग्निचित्॥ अग्निचितःसंति॥ सुरुति॥ अग्निचिते॥ सौश्रुतइत्यत्रापिस्यादितिवार्त्तिकार्थः यद्यपीहनिर्दिष्टस्यनि
कत्वात्यरिभाषादुर्लभंअग्निचिच्छब्दस्यघिसंज्ञाभावाच्चघेर्ङितीत्येतन्नप्रातीतिकयापिवार्त्तिकस्योक्तिसंभवमित्यंवर्णयन्ति॥ ह्रस्वस्य
गुणोजसिचेतिसूत्रयोस्तावद्ह्रस्वोनेग्विशेष्यते॥ दीर्घेन्यायस्तिश्चफलं॥ अथानियमेनियमकारिणीपरिभाषाकथमिहोपतिष्ठतां॥ नहिह्रस्व
स्यांस्यस्यानित्वेनिमित्तसंगोस्ति॥ अकारस्यत्यकारएवगुणोभविष्यतीतिचेन्न॥ ह्रस्वान्तस्यांगस्यइकोगुणइतिसूत्रा
र्थःस्यात्॥ ततश्चहेइन्द्रहेउपगोइत्यादावनंत्यस्यापिस्यात्॥ अग्निचिदित्यादिकंतुविशेषशब्दव्यवच्छेद्यंस्यात्॥ तथाचह्रस्वस्येकइत्य न
योर्नपरस्परंविशेषणविशेष्यभावः किंत्वनयोरेकमंगस्यविशेषणमपरमंगस्यविशेष्यमितियद्वा॥ ह्रस्वस्येत्येतदंगस्यविशेषणंसा
भूत्इतिअंगस्येत्यस्यस्थानषष्ठीत्वंवाधित्वा अनंत्यस्यापिगुणंसंपादयितुंइकूपरिभाषोपतिष्ठते॥ एवंकृतओगित्वेऽपिअनं
त्यस्यगुणविधानार्थंपरिभाषास्यादेव॥ घिसंज्ञातुवर्णयोरेवनतुतदंतस्येतिपक्षंगृहीत्वाघेर्ङितीत्यस्यअग्निचिदित्यादावतिप्रसं

गोयोज्यः। नन्वस्मिन्पक्षेऽतआरित्याभ्यांघेः किंचिद्वैलक्षण्यमस्तीतिदिक्॥ नन्वस्मिन्पक्षेपुगंतेतिसूत्रस्थनियमार्थत्वादहितेत्यादेर्नदोषइतिचेन्न।यदि हिसार्वधातुकार्द्धातुकयोर्लघूपधस्येवेतिनियमस्तर्हिह्रस्वाद्योर्गुणेदोषस्तेदवस्थः यदितुलघूपधस्यसार्वधातुकार्द्धातुकयोरेवेतिनियमस्तथापीहित्वे त्यादौदोषएव।अथात्रत्याहिविधोपिनियमः नर्हिअनेनिजुरित्यत्रदोषः नह्येतन्नियमद्वयेनापिवारयितुंशक्यं॥लघूपधत्वान्सार्वधातुकपरत्वाच्च॥हेनुद्दे बुद्धयःपिचवेहितःपिचव्यःउगवादिभ्योयत्॥बुद्धयेवृद्धयइत्यादावनुपधाभूतेष्वतिप्रसंगस्तुदुर्वारएवेतितावद्वार्त्तिकत्रयं॥वस्तुतस्तुअंगाधिसिसेनप्रत्यये नभूयमाणेनचक्नुसादिनाद्कोविशेषणात्सकलदोषनिरासेसति नदपवादपक्षोपिसमर्थयितुंशक्यतएव।अंगमेवप्रत्ययेनविशेष्यतइतिगृहीत्वापरंभाष्यवार्त्तिक ग्रंथप्रवृत्तिरित्यवधेयं॥अस्तुतर्हिपूर्वविप्रतिषेधइतिक्रोष्टीयसंमतः षष्ठःपक्षइतिचेन्न॥इक्परिभाषायानिरवकाशत्वात्॥नहिपरस्परपरि हारेणावकाशलाभेऽसतिविप्रतिषेधः॥नस्माद्यदिसत्यपिसंभवेबाधनंभवतीत्याश्रीयतेतर्हियेननात्रास्तिन्यायादपवादत्वमस्त्येव॥य दितुअसंभवेबाध्यबाधकभावः अस्तिचेहसंभवोयदुभयंस्यादित्याश्रीयतेतर्हितच्छेषादिष्वन्यनमपर्यवसानंननुक्रोष्टीयमतस्याव काशइतिस्थितं॥नस्मात्पदोपस्थापनमितिसप्तमःपक्षःसिद्धान्तसंमतः।तथाहि॥इकइतिषष्ठ्यन्तानुकरणं॥ननुसंज्ञिपरं॥स्वरूपमि तिवचनात्॥नचाशब्दसंज्ञेतिनिषेधःषष्ठ्यन्तस्यासंज्ञात्वात्॥तदयमर्थः यत्रब्रूयादुणोभवतिवृद्धिर्भवतीतितत्रेकइतिषष्ठ्यन्तमुपति ष्ठतेइति॥तस्यचपदैकवाक्यतयान्वयोन्तरंगः अलोन्त्यपरिभाषातुविधिवाक्येष्ववांतरवाक्यार्थंबुध्वानदेकवाक्यतयासंबध्यत इतिनदन्वयोबहिरंगः।ननस्त्रजुसिचेत्यादौइकोगस्येतिसंभवतिसामानाधिकरण्येवैयधिकरण्यस्यान्याय्यत्वादिकाअंगेविशेषिते स्थानषष्ठीनविहितेतिभवत्येवालोन्त्यपरिभाषोपस्थितिः।मिदेर्गुणइत्यादौतुसामानाधिकरण्यान्वयस्यासंभवान्मिदेरिकइतिवैय

धिकरण्येनान्वयेसतिस्थानषष्ठीविरहादलोन्त्यपरिभाषानोपतिष्ठते॥नचभिदेरंगस्येत्यनयोरवयवषष्ठीत्वेपिङ्कृतिस्थानषष्ठ्यस्त्येवेति
निवाच्यम्॥नत्वेषाअलोन्त्यपरिभाषोपस्थितावुपयुज्यते॥अल्समुदायात्मकस्थानिनःपरभूतायाएवषष्ठ्यास्तदुपस्थापकत्वात्॥ङ्
कश्चालस्रूपत्वात्॥नथाऽलोन्त्यपरिभाषाद्क्यपरिभाषानंतरोपस्थितिका॥नतुतयासहयुगपदुपतिष्ठते॥येनाविशेषादुभयोर्निवृत्तिः
स्यादितिसकलेष्टसिद्धिः॥तच्छेषतदपवादपक्षयोरपिदूषणमुद्भावंनुशक्यमित्युक्तमेव॥तदिहसप्तपक्षीमध्येपक्षत्रयंदुष्टमेव॥पक्षचतुष्ट
यंतुसाधुनिरस्थितम्॥नन्वेतत्सूत्रमंगस्येत्यादिवदधिकारार्थमेवकिंनस्या—दितिचेन्न॥एवंहिसतिङ्कोगुणवृद्धीनतिनञासंयुज्यैव
पठेत्॥सर्वस्येहपूर्वत्रासिद्धमित्यादिवत्॥नत्युत्तरसूत्रोपस्थितिकत्वाविशेषेकिंचित्संयुज्यकिंचित्तुविभज्यपठितुमुचितं॥वैरूप्येहे
त्वभावात्॥प्रत्ययःपरश्चेत्यादौतुपाराय्यौविशेषेप्यसंयुज्यनिर्देशोविधेयभेदान्नविरुध्यते॥नापीदंविधिसूत्रं॥पुनर्गुणवृद्धिग्रहणा
सामर्थ्यात्॥नत्वत्याख्यानपक्षेपिविशिष्टानुवृत्तिसामर्थ्यादितिदिक्॥ ॥इतिश्रीशब्दकौस्तुभेप्रथमस्याध्यायस्यप्रथमेपादेतृतीय
मार्न्हिकम्॥ ॥ श्रीगणेशायनमः॥ ॥नधातुलोपआर्धधातुके॥धात्वंशलोपनिमित्तेआर्धधातुकेपरेतन्निमित्तिकेगुणवृद्धी
ङ्कोनस्तःश्लोलुवःपोपुवःमरीमृजःश्लोलूपादिभ्योयङंतेभ्यःपचाद्यचिरुनेपडोचिचेतिपुङ्किलुङ्भिन्नभूतमचमेवाश्रित्यप्राप्ते
गुणवृद्धीनिषिध्येते॥यद्यपिकृत्तस्यधातोरपिकचिल्लोपोस्ति॥तद्यथादुरीणोलोपश्च॥दुःशब्दोपपदेइणोधातोरकृत्यर्थोभवति
धातोश्चलोपःदुःखेनैत्यतेप्राप्यतेदूरमिति॥तथाप्येवंविधेविषयेगुणवृद्धोःप्राप्तिविरहान्निषेधवैयर्थ्यं॥अतोत्रधातुशब्देननदेकदेशोलक्ष्यते॥धातुलो
पङ्निचयदिषष्ठीतत्पुरुषःस्यात्तेदाआर्धधातुकग्रहणंलोपविशेषणंवागुणवृद्धोर्विशेषणंवानंत्रादित्यादिभिरुभयविशेषणंवेतित्रयः

कल्पः॥ तत्राद्येपक्षे॥ आर्द्धधातुकनिमित्तेधातुलोपेसतियत्किंचिन्निमित्तेगुणवृद्धीनभवतइतिसूत्रार्थः स्यात्॥ ततश्चप्रपूर्वादिधेःक्क
प्रत्ययेतन्निमित्तकेनलोपेचसतिप्रेद्ध इत्यत्रप्राप्तुवन्नाद्गुणोपिनिषिध्येत॥ योहिद्वयोः षष्ठीनिर्दिष्टयोः स्थानेभवतिसलभतेसावन्यतरस्
तोव्यपदेशमितिद्विकस्थानिकत्वस्यापिसत्वात्॥ नचैवमपिइग्लक्षणत्वविरहान्ननिषेधः लैगवायनेओर्गुणस्येवेतिवाच्यं॥ नह्यस्मि
न्सूत्रेइकइत्यस्यस्वरूपपरतायांप्रमाणमस्तिउत्तरसूत्रेतुचकारइतिशब्दार्थकः प्रमाणमित्योदुः॥ अस्तुवार्थाधिकाराश्रयणबलेने
हापिइकइतिस्वरूपपरंतथापिभेद्यतइत्यादौगुणोनस्यादितितृतीयपक्षेवक्ष्यमाणोदोषआद्यपक्षेप्यस्त्येवेतिबोध्यं॥ ननुउपेद्धः प्रेद्ध इ
त्युदाहरणस्येहोक्तिःसंभवएवनास्ति॥ तथाहि॥ पूर्वधातुःसाधनेनयुज्यतइतिमतेइद्धमित्यत्रनलोपोन्तरंगः प्रथमोप्यनक्प्रत्ययापे
क्षस्त्वात्॥ पूर्वधातुउपसर्गेणेतिदर्शनेतुगुणोन्तरंगः उभयथापिगुणोभविष्यति॥ बहिरंगस्यगुणस्यासिद्धत्वान्निषेधायोगात्॥ बहिरंग
स्यनिषेधस्यासिद्धोगुणप्रवृत्तेर्निर्बाधत्वाच्च॥ सत्यम्॥ असिद्धंबहिरंगमन्तरंगेतिपरिभाषानेहप्रवर्त्ततेनाजानंतर्यंबहिष्टप्रक्लृप्तिरि
तिनिषेधात्॥ यत्रांतरंगेबहिरंगेवाचोरानन्तर्यमाश्रीयतेतत्रैषापरिभाषानेतिव्याख्यानादितिहरदत्तानुयायिनः॥ किंत्वस्मिन्पक्षेएत
एइतिसूत्रेपचावेदंपचामेदमित्यादौएतएत्वंकुतोनेत्याशंक्यबहिरंगत्वेनगुणस्यासिद्धत्वादितिहरदत्तेनवक्ष्यमाणंविरुध्यते॥ तथाब
हिरंगस्यासिद्धनाबलेनप्रेद्धमित्यादिसिद्धिरितिप्रतिपादनपरमिहत्यभाष्यमपिविरुध्येत॥ तस्माद्यत्रोत्तरकालप्रवृत्तिकेअचआनन्तर्यं
तत्रबहिरंगपरिभाषानास्तीतिकैयटसंमतएवनाजानंतर्यइत्यस्यार्थः साधुःपचावेदमित्यादौहिपूर्वंगुणप्रवृत्तिः तत्रचाजानन्त
र्याश्रयणेपिगुणोत्तरप्रवृत्तिकेएतएइत्यत्रतदनाश्रयणाद्युक्तएवबहिरंगतयोद्धारः॥ उपेद्धः प्रेद्ध इत्यादौतुगुणंप्रापय्यनिषेधःका

र्यइतिउत्तरकालप्रवृत्तिकोनिषेधःतत्राजानंतर्याश्रयणाभावाद्बहिरंगपरिभाषयासिद्धमेवैतत्॥अतोत्रत्यंभाष्यमपिसंगच्छते॥ननु
षत्वतुकोरसिद्धइतिसूत्रेएषापरिभाषाज्ञापयिष्यते॥नन्वचकोसिचत्कोत्स्येत्यादौप्रथमप्रवृत्तिकेएङःपदांतादित्यस्मिन्नाजानंतर्येन
तूत्तरकालप्रवृत्तेषत्वेपीतिकथंकैयटमतंसमर्थनीयंतस्माद्यत्रांतरंगेबहिरंगेवाअचोरानंतर्यमितिहरदत्तोक्तरीतिरवशरणीकर्त्तव्येति
चेन्न॥कैयटमतेअचोरितिहित्वस्थानिवद्भावस्यासर्वसामंजस्यात्॥अस्तिहिउत्तरकालप्रवृत्तिकेषत्वेअचआनन्तर्याश्रयणं॥इणःपरस्य
सस्येत्युक्तेः॥एवंचप्रथमपक्षेभेद्इत्यादौदोषाभावेपिभेद्यतइत्याद्यसिद्धिरेवदूषणमितिदिक्॥द्वितीयपक्षेतुयत्किंचिन्निमित्तकेधातु
लोपेसतिआर्द्धधातुकनिमित्तेगुणवृद्धीनस्त इतिसूत्रार्थःस्यात्॥ततश्चक्रूपीशब्देइत्यस्माण्णिचिपुकियलोपेकृतेपुगंतलक्षणोगु
णोनिषिध्येत॥तथाचक्रोपयतीतिनसिध्येत्॥यदितुचेलेक्नोपेरितिनिर्देशाद्गुणस्तर्हीहापिभेद्यतइत्यस्यासिद्धिरेवदोषः॥तृतीयपक्षेतु
आर्द्धधातुकनिमित्तकेधातुलोपेसतिआर्द्धधातुकनिमित्तेगुणवृद्धी नस्त इतिसूत्रार्थःस्यात्॥नन्वतेत्रावृत्याद्याश्रयणप्रयुक्तंगौरवंतावत्स्य
ष्टमेव॥लोपेनसहगुणवृद्धोरेकनिमित्तकत्वंचनलभ्येत॥ततश्चभेद्यतइत्यत्रभिदेर्ण्यन्तात्कर्मणियकिभिद्इयइतिस्थितेनित्यत्वाण्णि
लोपेकृतेप्रत्ययलक्षणेननिचमाश्रित्यक्रियमाणोगुणोनिषिध्येत॥नचणिलोपांत्सागेवांतरंगत्वाद्गुणोस्त्वितिवाच्यम्॥विभज्यान्वाख्यानप
क्षेनदंसंभवात्॥उपजनिष्यमाणनिमित्तोप्यपवादउपसंजातनिमित्तमप्युत्सर्गेबाधतइतिन्यायाच्च॥अन्यथाद्धतीत्यादावंतरंगत्वा
त्स्नान्तइत्यन्तादेशःप्रवर्त्तेत॥नचस्लोहित्वेचकृतेअंतादेशस्यस्थानिवद्भावेनाद्भ्यस्तादित्यस्यप्रवृत्तिरस्त्विति वाच्यं॥अल्विधौ
स्थानिवद्भावासंभवात्॥किंच॥समर्थानांप्रथमाद्वेतिसूत्रेअकृतव्यूहाःपाणिनीयाःकृतमपिशास्त्रंनिवर्त्तनीयंनीतिज्ञापयितुंसमर्थी

ग्रहणमितिवस्यते॥ हेएतेपरिभाषेसमानफलेनथाचइहापिपूर्वंगुणोनक्रियेतकृतोपिवानिवर्त्तेतजग्मुषइत्यादाविडादिवत्॥तस्माद्धातो
र्लोपोयस्मिन्निति बहुव्रीहिरेवसाधुःएवंहिसतिलोपस्यगुणवृद्धीश्चैकनिमित्तकत्वंलभ्यतइति नकश्चित्पूर्वोक्तदोषःस्यादेतत्॥आर
भ्यमाणेप्यस्मिन्सूत्रेलोलुवइत्यादौगुणोदुर्वारःतथाहि॥इहसूत्रेनिषेध्यंकिमित्याकांक्षायांपूर्वत्रनिर्णीताद्गुणदोषस्थितिरेवसंभ
ध्येत॥धात्वंशलोपनिमित्ते आर्द्धधातुकेइकृपदंनोपतिष्ठते॥ततश्चवेभिदःमरीमृजोभिन्नोमृष्टइत्यादौव्यंजनस्यगुणवृद्धिप्राप्तिःपरमे
नस्यप्रघट्टकस्यफलंस्यात्॥लोलुवादौतुस्यादेवगुणः॥नचपरिभाषांप्रतिशेषिभूततयाऽसौतःप्रधानयोर्गुणवृद्धोरेवनिषेधोस्त्विति वा-
च्यम्॥शाब्देबोधेशाब्दप्राधान्यस्यैवान्वयनियामकतायाउचितत्वात्॥नहिराजेपुरुषमानयेत्यादावर्थतःप्रधानंभूतोपिराजाआन
यनेनान्वेति अपितुपुरुषएव॥प्रकृतेचशाब्दंप्राधान्यंवाक्यार्थभूतायाःपदोपस्थितेरेव॥कारकविशिष्टक्रियावाक्यार्थइतिसिद्धांतात्॥
आहचधसाकांक्षावपवंभेदेपशनाकांक्षशाब्दकं॥कर्मप्रधानंगुणवदेकार्थंवाक्यमुच्यतइति॥किंच॥सिद्धान्तेप्रसज्यप्रतिषेधेसर्वत्र
क्रियायैऽप्रसक्तेनञोन्वयः ननुनामार्थेन॥तदुक्तं॥प्रसज्यप्रतिषेधोयंक्रियायामहयत्रनञिति॥ अतएवपुरुषवचनयोरसंकरःअन्यथाहि
घटोनास्तित्वेनासिअहंनास्मीतिपुरुषव्यवस्थानस्यात्॥घटाभावस्त्वद्भावोमद्भावश्चास्तीतिवत्सर्वत्रप्रथमपुरुषापत्तेः नहिपूरमवे
त्वंनासित्वद्भावोस्तीत्यनयोरर्थैक्यंहिशेषः नञर्थेप्रतियोग्यंतपदोपस्थापितस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वे
नसंसर्गेणप्रकारताभ्युपगमेपिपुष्पत्वसामानाधिकरण्यविरहस्याविशिष्टत्वात्॥एवंवायौरूपाणामभावोस्तीतिवद्रूपाणिनसंतीत्य
त्रापिअस्तीत्येकवचनंस्यादित्यन्यत्रविस्तरः एवंकारकविभक्तेरपिक्रियायोगेसत्येवसाधुत्वंनत्वन्यथापीतिकारकेइतिसूत्रेवस्य

माणत्वाङ्गुलेघटीनास्तीत्यादौअधिकरणत्वंक्रियान्वय्येवनतुनञर्थान्वयि॥तथाचसकलकारकविशिष्टक्रियायांनञर्थान्वयः॥नञो
द्योनकतेतिनिष्कृष्टपक्षेतुक्रियापदस्यैवतद्विरहपरतेतिसिद्धांतः उभयथापीहगुणवृद्ध्योःप्रतिषेधोदुर्लभएवेति॥अत्राहुःक्रिययैवराह
विधेरिवनिषेधस्यान्वयःशाब्दइतिसत्यमेवकिंतुक्रियैवकेतिसंशयेत्वदुक्तरीत्यासन्निहितापीकृपदार्थस्थितिरिहनसंबध्यते॥तथाहि
सतिदीर्घीवेवीतामितिसूत्रस्यव्यर्थतापत्तेः॥नहितत्रैकूपरिभाषालोंत्यपरिभाषयोःफलेविशेषोस्ति॥एवंस्थितेअस्तिभवंतीपरोःप्रयु
ज्यमानेष्वस्तीतिप्रातिपदिकार्थसूत्रेवक्ष्यमाणरीत्याभवतइत्यस्योपस्थितस्यगुणवृद्धीइत्यादिभिरन्वितस्यनिषेधान्वयेसतिगुण
वृद्ध्योरभावेःफलितोभवतीत्येतावतागुणवृद्ध्योर्निषेधइत्युच्यते॥यथाआघ्राध्मेतिनञर्थतत्कक्रियांगुणविधिरितिसिद्धांतिनंतद्वन्निषेधेपिबोध्यम्॥न्यायसाम्यात्॥अतएवविधिनिषेधयोर्वाक्यार्थगोचरतेत्यभि
युक्ताःतस्माल्लोलुवःपोपुवोमरीमृजइत्युदाहरणंसिद्धंप्रत्युदाहरणंतूच्यते॥धातुलोपइतिकिं॥आईधातुकेविधिनिमित्ताभ्यांषोडशिग्र
हणाग्रहणयोरिवगुणवृद्ध्योर्विकल्पोमाभूत्॥आईधातुकइतिकिं॥नुर्वीशुर्वीदुर्वीधुर्वीहिंसायां॥मुर्छामोहसमुच्छ्रायेभ्योःएभ्योयङु
गितेभ्यस्तिबादौसार्वधातुकेपितिपरेतोतोर्तिमोमोर्तीत्यादौनिषेधोमाभूत्॥राल्लोपइतिच्छ्वोर्लोपस्यगुणस्यचएककनिमित्तकत्वात्त
॥इदंचराल्लोपेक्ङितीहणाननुवृत्तिपक्षमाश्रित्योक्तं॥तदनुवृत्तिपक्षेतुतोनोमीत्याद्युत्तमपुरुषैकवचनेउदाहरणंबोध्यम्॥अनुनासि
कादिप्रत्ययत्वेनतत्रराल्लोपप्रवृत्तेःननुतोनोतीत्यादिप्रागुक्तमप्युदाहरणमस्तु॥राल्लोपाप्रवृत्तावपिलोपोव्योरितिलोपादितिचेन्न॥तस्य
वर्णमात्रनिमित्तकतयागुणेनसहएककनिमित्तकत्वाभावात्॥नहितत्रप्रत्ययग्रहणंतदाक्षेपकंवाकिंचिदस्ति अतएवगौधेरादिषुम्र

त्ययपरस्मिन्निति यलोपइतिदिक् ॥ इकइतिकिं ॥ अभाजिरागः भंजेश्चिणि घञिचभावकरणयोरित्युपधालोपेकृतेवृद्धिर्यथास्यात् ॥ कथंनर्हिपापचकइत्यत्रवृद्धिप्रतिषेधइतिचेत् ॥ शृणु ॥ पापच्यतेर्णुलियस्यहलइत्यत्र अहर्षीदमज्यीदित्यादिवारणायययस्येतिसंघातग्रहणेप्यादेःपरस्येतिहल्मात्रलोपेकृतेऽतोलोपइतिपृथगलोपेतस्यस्थानिवद्भावेनपापचकादौनवृद्धिः नत्विहनधातुलोपइतिसूत्रस्यकश्चिदपिव्यापारः यङुगंताण्वुलिपापाचकइतिभवत्येववृद्धिर्नीनावेतिवत् ॥ एतेननंधातुलोपेत्यत्रदृक इत्यनुवृत्तेः पापाचकइतिवदनधातुसूत्रेवेभिदितामरीमृजितेत्युदाहरन्श्वकौमुदीकारःपर्यस्तः ॥ पृथगलोपस्यन्याय्यत्वेभाष्यादिसंमतत्वेचसतिवृद्धेरसंभवात् ॥ अतएववृत्तिकारादयोप्यत्रसूत्रेअचूप्रत्ययांतान्येवलोलुवादीन्युदाजहुः भिदिमृजोस्कयदियङुकेनेहितस्यानैमित्तिकत्वाद्गुणवृद्धीस्तएव ॥ वेभेदितामरीमार्जितेतियथा ॥ यदितुयस्यहलइत्यवर्णवलोपस्तद्धिस्थानिवद्भावादेवगुणाद्यप्रसंगइत्युभयथापिनैतत्सूत्रोत्सहरणंत्वमित्यवधेयं । भाष्यकारस्तुयस्येतिलोपइवअचिलुक्यपिपृथगलोपमाश्रित्यैतत्सूत्रंप्रत्याचख्यौ ॥ नचयेननाप्राप्तिन्यायेनअचियङोलुगतोलोपंबाधेनेतिवाच्यम् ॥ यस्यहलइत्यत्रयस्येतियोगंविभज्यअतोलोपइतिचानुवर्त्ययशब्दस्यातोलोपविधानेनलुग्बाधनात् ॥ अवशिष्टंव्यंजनमात्रंलुकोवकाशः ततश्चालोपस्यस्थानिवत्वादेववेभिदितामरीमृजितापापच्यतइत्यादिवल्लोलुवादयोपिसिध्यंतीतिकिंसूत्रेण ॥ नचैवंनोनावेत्यादावपिपृथगलोपापत्तिः चकारानुकृष्टबहुलग्रहणाज्ज्ञायमानेस्थानैमित्तिकस्यलुकोतरंगत्वात्पालकारोत्पत्तेः प्रागेवसमुदायेप्रवृत्तेः नन्वेवंचेक्रियःलोलुवःतोष्टवइत्यादावलोपस्यस्थानिवत्वाद्यथागुणोनएवमियङुवङावपिनस्यातामितिचेत् ॥ अचमाश्रित्यनभवतएव ॥ उक्तयुक्तेःकिंतुस्थानिवद्भावलब्धमकारमा-

श्चित्यभविष्यतः सहिषकारेलुप्तेप्रत्ययसंज्ञकःस्यादेतत्॥लोलुवादिष्वकारेलुप्तेपूलुगितिक्रमः तत्रयकारावस्थानकालेअकारेणप्रत्यय
स्तंनलब्धमेव॥लुप्तेपितस्मिन्नकारोनास्त्येव॥ततःप्रागेवलोपात्॥सोयमसन्कथंप्रत्ययतांलभेत॥तल्लोपस्थानिवद्भावेनप्रत्ययत्वमिति
चेत्॥स्थानिनिदृष्टंहिकार्यंनहृदंतिदेशेनलभ्यते॥ननुतत्रादृष्टमपि॥अत्राहुः॥तत्रसंभावितमात्रमतिदिश्यते॥यदिहिलोपस्यस्थानिभू
तोअकारइहलुप्तेपियकारेतिष्टेत्तर्हिप्रत्ययतांलभेतउवङादिकंचप्रवर्त्तयेदितिकथंनातिदेशः वरेनिषेधश्चेहलिंगै॥सहियातेर्यङंताद्ध
रचिअल्लोपयलोपयोः कृतयोःस्थानिवद्भावेनातोलोपइटिचेत्यालोपोमाभूदित्येतदर्थंक्रियते॥स्थानिनिदृष्टस्यैवातिदेशेतु किंतेन॥नहि
यायायइत्यस्यामवस्थायांआतोलोपस्य प्राप्तिः अनजादित्वादितिदिक्॥ननेवंचेस्सियस्तोष्टवइत्यत्रांतरंगानपीतिन्यायेनाकृतसवा कृ
त्सार्वधातुकयोरितिदीर्घयङोलुक्॥ततोल्लोपस्यस्थानिवद्भावेसत्यपिचेस्सिअअतोष्टुअंअइतिस्थान्यकारेणसहलघूपधगुणश्च
प्रत्ययपरंजानमितिलघूपधगुणःस्यादेव॥सत्यं॥अंतरंगाविय्डुवङौभविष्यतःयथाहवार्त्तिककारः॥शचडंतस्यांतरंगलक्षणत्वा
दिति॥तथाचरिपिगतौ॥धिधारणेइत्येषांतुदादित्वाच्छेरुतेरियतिपियतिधियतीतिभवति॥अशिश्रियत्॥प्रादुद्रुवत्सासुस्रुवदिति च
णिश्रीतिचडिःइयङुवङौभवतःनस्मात्पृथगल्लोपेनैवसकलनिर्वाहान्नधातुलोपइतिसूत्रंप्रारंभणीयं॥नचैवंमरीमृजइत्यत्रमृजेरजा
देःसंकमइतिपाक्षिकवृद्धिप्रसंगः हरदत्तादिमतेमुख्याजादावेवतत्प्रवृत्तेः निष्कर्षेतुयथोत्तरंमुनिप्रामाण्यादिष्टापत्तेः व्यवस्थितविभाषावा
ल्लअकृत्वदेति॥गुणोपधालोपयुतांनलोपाल्लोपयोरपि॥प्रसंगात्पृथगल्लोपोलुकिवक्तुंनशक्यते॥नथाहि॥सर्वत्रदीर्घान्तेषुह्रस्वांतेषुचइ
यङुवङोःकृतयोर्लघूपधलक्षणोगुणःप्राप्नोति॥नचेहस्थानिवद्भावः आदिष्टादचःपूर्वत्वात् किंच॥जंगमइत्यत्रगमहनेत्युपधालोपःस्या

त्॥ अथात्रानङीतिप्रतिषेधस्तर्हीदरीदृशइत्यत्रऋदृशोङीतिगुणः स्यात् अत्रिचदेयइत्यत्रदीङोयुडचीतियुट्स्यात् किंच॥ सनीस्त्रंसोर्दनीध्वंसः अत्रिदितामित्युपधालोपः स्यात्॥ अपिच॥ पायाः वावाः इत्यादिष्वाकारलोपः स्यात्॥ तस्मात्समुदायलुगेवऐङ्योलोलुवादिसिद्ध्येचसूत्रमारंभणीयमिति॥ अत्रोच्यते॥ लोलुवादिषुगुणस्तावन्नभवति॥ स्थानिह्यादेशस्यअनादिष्टादचःपूर्वत्वस्यसत्वेनस्थानिवद्भावात्॥ अतएवहिनपदांतेतिसूत्रेसवर्णग्रहणंकृतं॥ शिण्ठीत्यादौ अनुस्वारस्यस्थानिह्यादेशमनादिष्टादचःपूर्वत्वमाश्रित्यतस्यसवर्णेकर्त्तव्येभ्रमोरल्लोपस्यस्थानिवद्भावोमाभूदिति॥ नन्वनादिष्टादचःपूर्वत्वस्यशास्त्रीयकार्यत्वाभावात्कथमतिदेशइतिचेत्॥ अनादिष्टादचःपूर्वत्वापेक्षेअचःपरस्मिन्निति अतिदेशेकर्त्तव्येस्थानिवदादेश इत्यस्यप्रवृत्तिसंभवात्॥ सवर्णग्रहणंव्याख्यावसरेसर्वैरित्यमेवोपपादितत्वाच्च॥ ननुयोत्रादेशउवङादिनादिष्टादचःपूर्वतांस्थानिह्यादेशकथंचिल्लभतां नतुतस्येहकिंचित्कार्यंविधीयतेयेनाल्लोपःस्थानिवत्स्यात्॥ यस्यचकार्यंविधीयतेउकारस्यनासावादेशः येनस्थानिह्यादेशोपिपूर्वतांलभेत॥ सत्यम्॥ सर्वेसर्वपदादेशाइत्याश्रयणात्स्थान्यादेशिभावस्तावद्यथावनिविष्यतीति॥ अतएवसरुरित्यस्यनेस्तुरितिपर्यवसितार्थमाश्रित्यस्थानिवत्सूत्रेणेवसिद्ध्वादेकदेशविकृतस्योपसंख्यानेनाल्लोप्यमितिवक्ष्यते अतएवचस्थानिवदित्युक्तौसंबंधिशब्दत्वादेवादेशइत्यस्यलाभेसिद्धेपुनरादेशग्रहणं आनुमानिकस्यापादेशस्यपरिग्रहार्थमितिवक्ष्यते॥ एवंचइहापिलोलूइत्यस्यलोलुवइत्यादेशःसचानादिष्टादचःपूर्वःस्थानिवद्भावात्॥ तस्यचलोलोवइत्यादेशेकार्भेअलोपःस्थानिवदितियुक्तमेव॥ किंच॥ ज्ञाजनोर्जेतिरीङ्ऋतइतिचसूत्रेरीघोच्चारणेनअंगवृत्तेपुनर्वृत्तावधिर्निष्ठितस्येतिपरिभाषाज्ञापयिष्यते॥ तेनउवङादिकृतेगुणोनभविष्यति॥ दरीदृशइत्यत्रगुणोनभवति॥ प्रतिपदोक्तस्याङोग्रहणात्॥ अदर्शदितियथा॥ यङस्तु

अकारउपदेशवेलायांनप्रत्ययः किंतुतदवयवः यकारेलुप्तेतुनासोऽकारविशिष्टोनवाश्रूयते॥ किंतुतत्रैकगोचरत्वाल्लाक्षणिकवद्विलंबि
तोपस्थितिकः॥ननुवेवमनडौतिपर्युदासेप्यस्याग्रहणाज्जगमइत्यत्राल्लोपः स्यादितिचेन्न॥ अनडौतिपर्युदासेनाङ्समदृशेश्रूयमाणाज्जा
दौउपधाल्लोपविधानात्॥ अर्थवानेवाङ्गुणविधौकृत्यतइतितुनसम्यक्। विकरणानामनर्थकत्वात्॥ यत्तुदेद्यइत्यत्रयुट्स्यादितिअत्र
न्न॥ अनुबंधनिर्देशात्॥ नदुक्तम्। स्निपाशपानुबंधेननिर्दिश्यग्रहणेनच॥ यत्रैकाज्ग्रहणंचैवपंचैतानिनयङ्कीति॥ दीङो युडचीतिसूत्रे
दीङइत्यनुबंधनिर्देशोयङ्लुङ्लिङ्ङित्यर्थइतित्वयैवोक्तत्वाच्च॥ अत्रच ज्ञापकंएकाचउपदेशइतिसूत्रेयङ्लुङ्लिङ्ङन्तिमुद्दिश्यक्रियमाणमेका
ज्ग्रहणं॥ नहिलुप्तेपिनस्मिन्नुक्तपरिभाषांविनाबेभेदितेत्यादिसिध्यति॥ विभित्सतीत्यादिसिद्ध्यैतंत्रत्वाद्याश्रयणेनोपदेशग्रहणस्यउ
भयविशेषणतायाःसिद्धांतयिष्यमाणत्वात्॥ नचैवमपिस्निपाशपेत्याद्यंशांतरेकथंज्ञापकमितिवाच्यम्॥ एकदेशानुमतिन्यायेनापूर्व
चार्यपठितपरिभाषाज्ञापनस्यगतिकारकोपपदानामित्यादौबहुशोदृष्टत्वात्॥ नचैवमेकाचइतिविधीयमानंहित्वमपियङ्लुकिन
स्यादितिवाच्यम्॥ गुणोयङ्लुकोरितिज्ञापकेननत्वस्यैतेःयङ्लुकिबेभेदितेत्यादौडागमेतूदात्तपरिभाषैववशरणंहिःप्रयोगोहिव
चनंषाष्ठमितिवक्ष्यमाणतयोधात्वन्तरत्वस्यवक्तुमशक्यत्वात्बे भेदितेतियङंतेतुपृथगल्लोपोभ्युपगमान्नस्यचस्थानिवद्भावान्नेणि
षेधःपूर्वस्मादपिविधौस्थानिवद्भावस्यवक्ष्यमाणत्वात्॥ किंच॥ यस्येतिलोपस्यत्वयापंयवयलोपत्वंस्वीकृतं॥ तत्रयद्यपिदेद्यकइ
त्यत्रयुट्स्यादितिनापदनार्हं॥ हलःपरत्वाभावेनेहयलोपाप्रवृत्त्यादेदीयकइतिरूपाभ्युपगमात्॥ सनीस्वकइत्यादौनलोपोपिसवैसंम
तत्वादेवनापाद्यः यायायकोवावायकइत्यादावाल्लोपोप्यनापाद्यः यलोपविरहेणाजादिकुदार्द्धधातुकपरत्वाभावात्॥ ननुपि॥

गमेर्यङन्ताण्वुल्लिङंगमकइत्यत्रालोपस्यस्थानिवद्भावाद्ध्यभावइवोपधालोपःस्यात्॥अथात्रानङीतिप्रतिषेधस्तर्हिदरीदृशकइत्यत्र
ऋदृशोङीतिगुणःस्यात्॥अथयदीहांगवृत्तपरिभाषयासंज्ञापूर्वकोविधिरनित्यइतिवासमाधीयतेनर्हियङ्लुक्यपिसनीस्रंसइत्यत्र
नलोपोयायावावाइत्यालोपश्चनशंक्यःसमाधानस्यतुल्यत्वादितिदिकृ॰क्तिनिचेतिचेत्॥इकइतिशब्दमुच्चार्यविहितेगुणइङीगितेकितेङितिंच॰
निमित्ततयाश्रित्यथेप्राप्तुतस्तेनस्तःगित्जिष्णुःग्लाजिस्थश्चग्लुःनचायंकिंदेवास्त्विति॰वाच्यं॥स्थासुरित्यत्रघुमास्थेतीत्वप्रसंगात्॥नचै
वंभूष्णुरित्यत्रइट्प्रसंगःश्नुकःकितीत्यत्रापिचक्त्वेनगकारप्रश्लेषमाश्रित्यतन्निषेधात्॥नचैवंचर्त्वस्यासिद्धतयाविसर्जनीयोनस्याद्रोरु
त्वंचप्रवर्त्तेतेतिवाच्यं॥नमुनइत्यत्रनेतियोगविभागात्सौत्रत्वाद्वा॥तथाचग्लाजिस्थेतिसूत्रेश्लोकवार्त्तिकम्॥ग्लोर्गित्वान्नस्थईकारःक
ङितोरीत्वशासनात्॥गुणाभावस्त्रिषुस्मार्य्यःश्नुकोनिट्त्वंकगोरितोरिति॥जयादित्योप्येवं॥वामनस्तुग्लाजिस्थश्चेत्यत्रस्थाआदेशाका
रंप्रश्लिष्यक्त्वाप्रत्ययांतस्यनिष्ठतेराकारएवनतुईत्वमितिव्याख्यानादेवस्थास्नोःसिद्धौनकापिगकारप्रश्लेषःकार्यइत्याह॥नन्वेतन्न्यते
देशेच्छन्दस्युपसंख्यानमितिक्त्वोदेस्ग्वःपशवइत्यत्रानिदितामितिनलोपःस्यात्॥सत्यं॥छांदसत्वात्समाधेयःकित्॥चितंस्तुतं॥मृष्टं॥ङि
त्॥चितुतःसुतुतःमृष्टात्॥निमित्तसप्तम्याश्रयणंकिंव्यवहितेपियथास्यात्छिन्नंभिन्नं॥इकइतिकिं॥कामयते॥शब्दव्यापाराश्रयणंकिं
॥लेगवायनःओर्गुणोहिइकएवप्रवर्त्ततेननुतत्रैकपदोपस्थितिःओरितिनिर्दिष्टस्यानिकत्वात्॥तदुक्तं॥तद्धितकाम्योरिकप्रकरणादिति
॥ननुक्तिनीतिसप्तमीनिर्देशान्नस्मिन्नितिनिर्दिष्टपूर्वस्येतिपरिभाषोपतिष्ठेतनत्रनिःशब्दस्यनैरंतर्यपरत्वाद्विशेषो चारणक्रियत्वाद्व्यव
हितोच्चारितस्यनिषेधःस्यान्नतुछिन्नंभिन्नमित्यादेरपीतिचेत्॥भवेदेवंयदिक्तिनीत्येतन्निषेध्ययाक्रियासाक्षात्संबध्येत॥इहतु

णवृद्धिभ्यांसंबध्यते॥यस्यचभावेनेति सप्तमीक्रियांतराश्रवणादौत्सर्गिकसत्तासेपः ततश्चक्तिसतिप्राप्तेयेगुणवृद्धीतिसंबंधेकृतेसिद्धमा
ध्यसमभिव्याहारन्यायेनउपलक्षणीभूतसत्ताश्रयणस्यनिमित्तत्वमुत्सर्गतःफलति॥नत्विहविशिष्यनिमित्ततायांसप्तमीविधानमस्ति॥
नचात्रनिर्दिष्टपरिभाषासंभवति॥विध्यंगभूतानांपरिभाषाणांसाक्षाद्विधेयनिषेध्यक्रियान्वयिन्येवप्रवृत्तेः॥इदंतुक्रियान्वयिनोविशेषणम्अतु
क्रियायाः अतोत्रनपरिभाषाप्रवृत्तिः॥अन्यथावृद्धिर्यस्याचामादिरित्यत्रेकपरिभाषोपस्थानेशालीयादिनसिध्येत्॥नत्यत्रेकःस्थानेवृद्धिः अत
एवोदीचामतः स्थानइतिसूत्रेस्थानग्रहणंकृतं॥आतःस्थानेयोअकारइति अनूद्यमानस्यविशेषणेआतइत्यस्मिन्षष्ठीस्थानेयोगेतिपरि
भाषया अप्रवृत्तेः॥गुणानांचपरार्थत्वात्संबंधःसमत्वात्स्यादितिन्यायोप्यत्रानुसंधेयः॥ननुतर्त्यनेनैवन्यायेनकृतीत्येतत्प्रधानभूतक्रिय
यासंबध्यतांनतुतच्छेषभूताभ्यांगुणवृद्धिभ्यांप्रधानान्वयस्यसंभवतस्त्यागायोगादितिचेन्न॥यत्रहिगुणःकृतात्मसंस्कारः प्रधानोपका
रायमहतेप्रभवतितत्रात्मनोपिसंस्कारमनुभूयप्रधानेनसंबध्यते॥यथापानीयमेलादिसंस्कृतंपुरुषेण॥उक्तंच॥गुणःकृतात्मसंस्का
रःप्रधानप्रतिपद्यते॥प्रधानस्योपकारेहितथाभूयसिवर्त्ततइति॥इहगुणवृद्ध्योः क्रियाग्रहणेनविशेषितयोः प्रधानस्यमहानुपकारो भव
ति॥व्यवहितस्यापिप्रतिषेधसिद्धेः क्रोःकित्करणंचात्रज्ञापकं॥अन्यथाप्रधानेनैवान्वयेनिर्दिष्टपरिभाषायाश्चोपस्थितौसत्यांव्यवहि
नेनिषेधस्याप्रवृत्तौव्यर्थमेवक्रोःकित्त्वंस्यात्तस्माद्यथाव्याख्यानमेवसाधु॥ननुनयदीयंपरप्रसंगीनहिंशचडन्तेदोषः।लघूपधलक्षण
गुणप्राप्तेरितिचेन्न॥अंतरंगत्वादियङुवङुप्रवृत्तेः॥धारणे॥रिपिगतौ॥तुदादयः॥पियतिरियति॥पियतिणिश्रिद्रुस्रुभ्यः कर्त्तरिचङ्॥अ
श्रिश्रियत्॥अदुद्रुवत्॥असुस्रुवत्॥इहतिपमाश्रित्य प्राप्तोगुणोबहिरंगः शचडाश्रयावियङुवङावंतरंगौ॥तदुक्तं॥शचडंतस्यान

रंगलक्षणत्वादिति॥ मृजेरजादौसंक्रमेवृद्धिर्वैष्यतेइति काशिकायां। दृदंचक्रोगुणवृद्धीइतिसूत्रप्रसंगाद्वैयाकरणांतरमतत्वेनोक्तंभाष्ये॥ अ
स्यार्थः संक्रामतोपक्रामतोगुणवृद्धी अस्मादितिक्युत्सत्यागुणवृद्धिप्रतिषेधनिमित्तभूतःकित्त्वत्ययोत्रसंक्रमशब्देनोच्यते॥ योगरूढेः ते
नमरीमृजइत्यत्रधात्वंशलोपनिमित्ततयागुणवृद्धिप्रतिषेधहेतावप्यचअत्ययेनासौविकल्पःप्रवर्त्ततेइत्यवधेयम्॥ अतएवकित्त्वन्विवेतिवच
नंतत्रभाष्येकृतं॥ मृजेति॥ मार्जेति॥ अत्रहरदत्तः अचीत्युच्यमानेपियस्मिन्विधिस्तदादावल्ग्रहणइतिसिद्धे आदिग्रहणंमुख्याजादि
ग्रहार्थं॥तेनव्यपदेशिवद्भावेनाजादौयूयंममृज॥त्वयाममृजेइत्यादौनभवतीति॥ तच्चिन्त्यम्॥ मुख्याजादिपरिग्रहेप्रमाणाभावात्॥ नहि
भाष्ये आदिग्रहणंकृतं॥ येनत्वदुक्तार्थोलभ्येत॥किंतुकित्त्वन्विवेतिवचनंपठितं॥ यत्तुनैतःप्रागुक्तंभाष्ये॥ इहान्यैर्वैयाकरणामृजेरजादौ
संक्रमेविभाषावृद्धिमारभंतइति॥ तत्तुनदादिपरिभाषावललब्धवाक्यार्थानुवादमात्रंनतुपरकीयविधिवाक्यशरीरमितिपेनत्वदुक्तमर्थं
जापयेत्॥ अतएवात्रेयोमृजेतिभिदादिपाठात् अङ्गणपाठादेववृद्ध्यभावइत्याह॥ अतएवरक्षितेनापिधातुप्रदीपेतुंदपरिमृजस्तुदपरि
मार्जइत्यभयंदर्शितं॥ दुर्घटवृत्तौतुतुंदपरिमृजइत्यत्रव्यवस्थितविभाषयावृद्धिर्नेत्युक्तं॥ अतएवधातुवृत्तिषुयूयंममृजममार्जेतिरूपद्व
यमुदाहृतं॥ यत्तुमुख्याजादिग्रहणवादिनोपिमतेअत्रवृद्धिविकल्पोदुर्वारएव॥ तथाहि॥ मध्यमपुरुषबहुवचनस्याप्यस्यपरस्मैपदान्ता
न्मितिसूत्रेणविधीयमानोअकारादेशोअतोत्यस्यप्राप्नोति॥ नचैवंविधिवैयर्थ्यं॥णलादीनांयथासंख्यसंपादनेनचरितार्थत्वादित्याशेक्य
भाष्यएवंहेधाममाधास्यति॥ अकारहपात्मकोयमनेकाल्त्वात्सर्वादेशः॥ यद्वाधातोरित्यधिकारादादेःपरस्येति यकारमात्रस्याकारइति
तत्रपक्षद्वयेपिअतोगुणइतिपररूपस्यात्रःपरस्मिन्नितिस्थानिवद्भावात् मुख्याजादित्वमप्यस्त्येवेति केचिद्धरदत्तमिश्रमतेदूषणमुक्तं॥ तन्न॥ अयंत

चदित्यतिदेश इवस्थानिवद्भावेपिमुख्यत्वाभावस्यसुवचत्वादितिदिक्॥स्यादेतत्॥ अग्निनोदमार्ष्टइत्यादौस्थानिवद्भावेनतिपोडित्वात्कुतिचे
तिगुणवृद्धिनिषेधःस्यात्॥नचोत्सर्गविधित्वात्स्थानिवद्भावासंभवः अनुबंधकार्येष्वनल्विधाविति निषेधस्याप्रवृत्तेः अन्यथाअग्निनवं ब्रह्मजै
इत्यादावपित्वेनसार्वधातुकमपिदितिडित्वापत्तेः इहचज्ञापकंनल्यपीतिसूत्रं॥ अन्यथात्यपःकित्त्वाभावादेवईत्वाप्राप्तौकिंनन्निषेधेन
नसूत्रेण॥ यत्तुसेर्ह्यपिचेति अपिहचनंज्ञापकमिति॥तन्न॥भृणीहिविश्वतःप्रतीत्यादौस्थानेंतरतमपरिभाषयापित्वादनुदात्तस्यसिपः
स्थानेऽनुदात्तस्यैवहेःप्राप्तौउदात्तसंपादनेनचरितार्थत्वात्॥ अपित्वसामर्थ्याद्धितत्वांतरतमपरिभाषाबाध्यते॥प्रतिपत्तिलाघवार्थमुदा
त्तइतिवक्तव्येअपिहचनंज्ञापकमितिवास्तु॥न्यायसिद्धोप्ययमर्थः अनुबंधानामनेकांतत्वेनस्थानिकोटावप्रविष्टनयास्थान्यलाश्रय
विधिविषयकस्यानल्विधाविनिषेधस्याप्रवृत्तेः अनुबंधाएकांताइतिमतेनपिस्थानित्वप्रतीतेः आगेबांतरंगेणलोपेनतेषामपहारात्॥त
स्माल्लडाद्यादेशानांतिबादीनांस्थानिवद्भावेनडित्त्वंदुर्वारइति॥अत्राहुःयासुट्परस्मैपदेष्विति सूत्रेडिद्वचनंज्ञापकंल्लादेशानांस्थानि
वद्भावेनडित्त्वेनभवतीति॥तथाचवार्त्तिकेलकारस्यडित्वादादेशेषुस्थानिवद्भावप्रसंगइतिचेद्यासुटोडिद्वचनात्सिद्धमिति॥ननुस्तुया
दित्यादौअनिग्लक्षणवृद्धिप्रतिषेधार्थंक्ङितिचेत्यस्यप्रतिषेधार्थंचयासुटोडित्वमस्तु॥उतोवृद्धिलुकिहलीत्यत्रहिउत
इतिनिर्दिष्टस्थानिकृतयाइकःपरिभाषानोपतिष्ठते॥जुसिचेति तुस्कृतिचेत्यस्यापवादएव॥तथाचस्थानिवद्भावलब्धंडित्वंस्कृत्वाचि
नुयुरित्यत्रवृद्धिगुणौनिषेद्धुंनालं॥ पुनर्डित्वसामर्थ्याज्जुसादुभयनिषेधोभविष्यतितथाचवृद्धिगुणनिषेधचरितार्थंयासुटोडित्वंकथंल्लादे
शेषुलाश्रयडित्वस्यविरहेज्ञापयेदितिचेत्॥उच्यते॥उतऔदितिवक्तव्येवृद्धिग्रहणंसंज्ञापूर्वकोविधिरनित्योयथास्यादित्येवमर्थं॥तेनस्तु

यादित्यत्रनवृद्धिः तथाचिनुयुरित्यत्रनगुणः वक्तव्यश्चीत्यतोचीत्यनुवर्त्यभनादौजुसिगुणविधानात्॥ मिदेर्गुणोजुसिचेत्यत्रस्थि-
ष्यअच्चासावुसूचेतिकर्मधारयाश्रयणेनअजादावुसिगुणविधानाश्रयणेतुचक्रुर्जहुरित्यादावतिप्रसंगः गुणेतिलुप्तविभक्तिकंउजुसी
तिचछेदः उकारादौजुसीतिवार्थः जुसिगुणेयणसुट्प्रतिषेधइतिवार्त्तिकमप्युक्तरीत्यासिद्ध्यर्थकथनपरमितितावद्वार्तिककारस्यहृदयं॥भा
ष्यकारमतेतुसार्वधातुकमपिदितिसूत्रेअपिदितियोगंविभज्यडिदितिचानुवर्त्यआदृन्तिचाश्रित्यडिच्चपिन्नभवतीतिपिच्चडिन्नभवतीति
वाक्यार्थहृदयंवर्ण्यते॥ इदंचहलः स्नइतिसूत्रेभाष्येस्पष्टं॥तेनब्रूनादित्यत्रब्रुवईण्वक्तव्यइत्यनुवृत्तौ नङ्औपदेशिकङित्त्वेनांतरंगेणआतिदेशिकस्यबर
हिरंगस्यपित्वस्यबाधात्॥अतिदिष्टादुपदिष्टंबलीयइतिन्यायात्॥अचिनोदित्यादौतुऔपदेशिकनतिवार्द्धीनांपित्वेनलभ्यमातिदेशि
कंङित्त्वंबाध्यते॥ तेनगुणादिसिद्धिः अस्मिंश्चपक्षेणसुलोङित्त्ववचनंनज्ञापकंकिंतुमृज्यादित्यादावप्राप्तङित्त्वविधायकम्॥तेनचपित्व
स्यचिनोतीत्यादौसावकाशस्य बाधः अतःस्तुयादित्यादौपितिहलीतिविधीयमानावृद्धिर्नप्रवर्त्तते॥चिनुयुरितिनुप्राग्देवसमर्थनीयं॥
पूर्वेदार्ढ्यंवार्त्तिकमतेनुब्रूतादित्यत्रईट्प्राप्नोति॥आगमशासनमनित्यमितिनुकथंचित्समाधेयः वक्ष्यतस्तु हलश्चःशानझाविति शान
चः शित्करणेनङ्कचिदनुबंधकार्येष्यनल्विधाविति निषेधः प्रवर्त्ततइतिज्ञाप्यते॥तेनब्रूनादित्यादौनकश्चिद्दोषइति॥अतएवभाष्यमतेभवि
षीष्टेत्यत्रडित्त्वंनकरिष्यमाणेत्यत्रोगिल्लक्षणश्लक्षणश्चडीप्रेतिदिक्॥दीधीवेवीटाम्॥दीधीवेव्योरिटश्चगुणवृद्धीनस्तः आदीध्यक्ष
आधीध्यकः आवेव्यनं।आवेव्यकः अकौणिषं।अरणिषं॥कणिताम्बोरणिताश्वः इहअमंप्रतिसिजंतमेगंतिपोडादेशंप्रतिनुकणित् इतिनांतमेगं
तस्यअमंडादेशंचसार्वधातुकंनिमित्तीकृत्यलघूपधगुणः प्राप्तोनेननिषिध्यते॥वृद्धिस्तुइटोनसंभवत्येव॥लुडंततांस्कोरयिनुंश्चइत्यस्य

प्रयोगः नहि तज्जन्ते तन्नंतेषड्भिर्गुणप्राप्तिः प्रत्ययावयवत्वात्तस्य ॥ अथ दीङ् क्षये ॥ षीङ् अनादरे वेञ् तंतुसंताने ॥ वी गत्यादिषु ॥ एतेषामिह ग्रहणं कुतो नेति चेत् ॥ न अवयवप्रसिद्ध्यपेक्षयासमुदायप्रसिद्धेर्बलवत्त्वात् किंचचतुर्णां ग्रहणेऽभिप्रेते संदेहार्थं दीवेधी वीङ्ग इत्येवब्रूयात् ॥ इदं चात्र आगमावगृह्यते ननु दृग्गतावितिधातुः ननु धातुसाहचर्यात्ङानुरेवगृह्यतां ॥ मैवं ॥ साहचर्यस्य सर्वत्रानियामकत्वात् ॥ अन्यथा ङिस्त्रिश्चतुरिति कृत्वोर्थइतिसूत्रे कृत्वोर्थग्रहणं नकुर्यात् ॥ ङिस्त्रिरिति सुजंताभ्यांसाहचर्येणचतुरित्यस्यापिसुजंतस्यैवग्रहणसंभवात् ॥ अतएव आगमापेक्षया प्रकृतेरभ्यर्हितत्वाद्दीधीङः पूर्वनिपातः सूत्रेकृतः इदोपिधानुत्वेनप्रकृतित्वाविशेषेऽप्यल्त्वाच्चूतरत्वात्तस्यैवपूर्वनिपातः स्यात् ॥ अत्रेदमवधेयं ॥ दीध्यकोवेव्यकइतियदुदात्तनंतदीधीवेवीभ्यांसुङाभ्यामेवण्वुलिरूपंनतुण्यंताभ्यामपि ॥ यत्तुयीवर्णयोरितिसूत्रेहरदत्तेनोक्तं ॥ वर्णशब्दोवर्णविस्तारेइतिधातोः पचाद्यजंतःश्रूयमाणस्ववइवर्णेयथास्याल्लुतेमावूदित्येवमर्थः तेनण्यंताभ्यांण्वुलिणिलोपस्यपूर्वविधौस्थानिवत्त्वेपिश्रूयमाणत्वाभावाल्लोपाभावेपणिकृतेदीध्यकोवेव्यकइत्येवमुङेनसमानाकारंरूपंभवतीति ॥ तेदत्तन्यासोपिशास्त्रदितामित्येतस्मिन्सूत्रेभाष्यकारैरेवण्यंतस्यदीधकइतिरूपंसुङूस्यतुदीध्यकइतिव्युत्पादितत्वात्सिद्धान्तविरोधादुपेक्ष्यं ॥ तत्रहिवर्णग्रहणंलुप्तेपीवर्णेयथास्यादित्येवमर्थमित्याश्रीक्ष्यस्थानिवद्भावेनसिद्धेरन्तरंगत्वाण्णिलोपस्याग्यीवर्णयोरितिलोपसिद्ध्यर्थंवर्णग्रहणंप्रत्याख्यातम् ॥ ननुवर्णग्रहणंकुर्वतःसूत्रकारस्याशयं भाष्यकारोक्तादन्यमेवानुसृत्यब्रूमइतिचेत् ॥ सत्यम् ॥ तथापियथोत्तरंमुनीनांप्रामाण्याद्रूपासुङिस्तदवस्थेवेतिदिक् ॥ स्यादेतत् ॥ दीधीवेव्योर्ङित्वात्क्तिचेतिसूत्रेणैवनिषेधोस्तुकिमिहदीधीवेवीग्रहणेन ॥ मैवम् ॥ इग्लक्षणयोर्हिसनिषेधइत्युक्तं ॥ नचअचोञ्णिनीतिवृद्धिरिग्लक्षणा ॥ किंच ॥ कार्यिणोनिमित्तत्वेपूर्वं

णसिद्धिः संभवेदपि। नचकार्यीनिमित्ततयाश्रीयते॥ च्यवतेप्लवते इत्यादावपिगुणनिषेधापत्तेः अत्रचलिंगकुटादिमध्येकूङ्शब्देइत्यस्यपाठः स्थंडिलाच्छयितरीतिनिर्देशश्च। यत्तुप्रकृतसूत्रेदीधीवेव्योर्ग्रहणमेवैतत्परिभाषाज्ञापकमिति॥ तन्न॥ अनिग्लक्षणवृद्धिनिषेधेनचरितार्थत्वात्॥ भाष्यमतेपुनस्तत्सूत्रस्यप्रत्याख्यास्यमानतयाऽनुक्तपरिभाषायांकिंगान्तरस्यैवानुसर्त्तव्यत्वाच्च॥ स्यादेतत्॥ यदिकार्यीनिमित्तत्वेनाश्रीयते कथंतर्हिऊर्णुनविषतीत्यत्रहिर्वचनेचीति नुशब्दस्यहित्वं॥ इषइत्यस्य अजादित्वेपिहित्वंप्रतिकार्यिमध्येप्रविष्टतयानिमित्तत्वासंभवात्॥ सन्यङोरितिषष्ठीमाश्रित्यसन्नंतस्यहित्वविधानात् अन्यथेप्रतीषतीतिसनोहित्वंनस्यात्॥ यत्तुसन्यङोरितिसन्नम्याश्रयणेपिसन्यङोरकारोच्चारणसामर्थ्याद्धित्वंभविष्यतीति॥ तन्न। दित्सधित्सादिभ्योयङ्लुप्तिप्रतिबंधेनअचोयदितियत्प्रत्ययोत्पादनेनचाकारोच्चारणस्यचरितार्थत्वात्॥ अन्यथाअरिरिषतीत्याद्यसिद्धेश्च॥ यदिहितत्रापिस्यान्निवत्स्यात् इसोहिर्वचनेकृतेभरीषतीतिस्यात्॥ अत्रोच्यते॥ कार्यमनुभवन्नेवकार्यीनिमित्ततयानाश्रीयतइतिपरिभाषार्थः अरिरिषतीत्यत्रहि अजादेर्द्वितीयस्येतिरिसूशब्देहित्वप्रवृत्तिः तदनंतरंतश्चइसशब्दइतिनासौहित्वंप्रतिनिमित्तंकार्यभात्कात्॥ ऊर्णुनविषतीत्यत्रनुनवशब्दस्यहित्वंप्राप्तं॥ तत्रतर्हिनश्चइसशब्दइतिभवत्येवनिमित्ते॥ तद्भावभाविनामात्रेणहिनिमित्ततेति सन्यङोरितिसूत्रेभाष्यकारैरेवस्फुटीकृतत्वात्॥ तथाचीहिर्वचनेचीतिस्थानिवद्भावान्नुशब्दस्यहित्वमुचितमेव॥ यत्तुहिर्वचनेचीतिसूत्रेअचिकिंजेघ्रीयतेदेभ्रीयतेइतिघ्राभ्रांप्रत्युदाहरणं॥ तदापातततः घ्रीधृधृषांह्वरित्वप्रतिनिमित्तभूतस्ययङोहित्वंप्रत्यनिमित्तत्वात्॥ तस्मात्तत्रअचीत्यस्यअधिजगइत्येतद्वेवक्तव्यं॥ गाङ्लिटीतिधिल्लक्षकारकनिर्देशमाश्रित्यलावस्थायामेवगाङादेशविधानात्॥ अन्यग्रहणंतुज्ञापकंरूपस्थानिवद्भावस्येति तत्र

त्यवार्त्तिकमपि अधिजगइत्येवमादिषूदाहरणेकार्यातिदेशाश्रयणेअज्ग्रहणवैयर्थ्यस्यादित्येवयोज्यमितिदिक्॥यत्तुअसिद्धवत्सूत्रेवस्यतेअ
ग्रहणंसमानाश्रयप्रतिपत्त्यर्थमितितत्राश्रयत्वंस्थानितयानिमित्ततयावाकथंचिदाश्रयणमात्रेणनतुनिमित्ततयैवेत्याग्रहःतेनशाहाव्
तिशाभावोहेर्धित्वेकर्त्तव्येअसिद्धोभवति॥अन्यथाधित्वेहेः कार्यितयानिमित्तत्वाभावादसिद्धत्वंनस्यात्॥अतएवसमानाश्रयंमाभूत्प्रम
माभीयेअसिद्धमित्येवाहुर्नतुसमाननिमित्तमिति॥इदंचसूत्रं भाष्यवार्तिकयोःप्रत्याख्यातम्॥तथाहि॥दीधीवेव्येत्यान्द्योधातू॥ननुलोके
प्रयोगार्हौ॥छन्दसिचानयोर्गुणोदृश्यते॥होत्रायरत्नःरुपयन्नदीधेत्॥अदीधयुर्ह्यग्नयेवृतासइत्यादौ॥नचायंवाहुलकेनसमाधेयः
नथासतिनिषेधसूत्रानारंभस्यैवलाघवेनोचितत्वात्॥तथाइटोपिग्रहणंव्यर्थं॥आर्द्धधातुकस्येडित्यत्रहिनेडशिकृतीतिसूत्रादिड्ग्रहण
मनुवर्त्तते॥तच्चइटोविकाराभावार्थं॥इड्डेवनतुविकृतइतिव्याख्यानात्॥ननोलघूपधगुणाभावात्सिद्धंकृणितास्वरणितास्वइत्यादि॥न
चैवंपिपठीरित्यत्रदीर्घोनस्यादितिवाच्यं॥तस्यनियमंप्रत्यसिद्धत्वात्॥अपाठीदित्यत्रसवर्णदीर्घस्यकर्त्तव्यत्वात्॥सिज्लोपएकादेशेसिद्धो
वक्तव्यइतिज्ञापकात्॥यद्यंगाधिकारेक्रियमाणोनियमआंगमेवविकारंबाधतेनतुसंज्ञांतेनवौरितिअकःसवर्णइतिचदीर्घौभवत्येव॥ग्रही
नेत्यत्रतुग्रहेर्लिटीत्यारंभसामर्थ्यादीर्घोभवत्येव॥इदंत्ववशिष्यते॥पिपर्वीषिन्ब्राह्मणकुलानीत्यत्रसांतमहतःसंयोगस्येतिदीर्घत्वंनस्या
त्॥सिद्धत्वादंगत्वान्नेजांसीत्यादौचरितार्थत्वाच्चपिपठीरपाठीत्गृहीनेत्यादि पूर्वोदात्तेभ्योस्यवेलक्षण्यादितिअन्याहुः पिपठीं
षीतिप्रयोगोअसाधुरेवनत्यत्रनुमागमोलभ्यते॥अल्लोपस्यस्थानिवद्भावेनाझलंतत्वात्॥नचैवमजंतत्वप्रयुक्तोनुम्स्यादेवेतिवाच्यं॥
तस्यसकृद्गतौविप्रतिषेधेयद्बाधितंतद्बाधितमेवेतिन्यायादीर्घस्यतथाप्यप्रवृत्तेःसांतसंयोगाभावातत्वस्तुनस्त्वजंतत्वप्रयुक्तोनुमत्रनभवत्येव॥स्थानिवद्भावोस

भवात्॥अनादिशदचःपूर्वस्यविधौहिसः नचाजंतमनादिशदचःपूर्वं॥येनतस्यनुमिकर्त्तव्येअल्लोपः स्थानिवत्स्यात्॥ननुझलंतत्वप्र
युक्तोनुम्दुर्वारः नचतस्मिन्कर्त्तव्येस्थानिवद्भावः शंक्यः क्कौलुप्तनस्थानिवदितिनिषेधात्॥अन्यथासखीयतेः क्विपिसखीः सुनीयतेःसु
तीरित्यादिनस्यात्॥अल्लोपस्यस्थानिवद्भावेनयणादेशप्रसंगात्॥अत्रोच्यते॥क्किलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानमितिता व
द्ह्रस्वेकशरीरं।तत्रकीर्त्यशोयद्यपिहेधाव्याख्यास्यते॥क्कौलुप्तनस्थानिवदिति॥क्कौविधिंप्रतिनस्थानिवदितिच॥देवयतेःक्विपिदयूरित्यादे
रन्यतरव्याख्यानाश्रयणेनसिद्धावपिसखीयतेः सखीरित्यस्याद्यव्याख्यौसिद्धेः लवमाचस्राणोलौरित्यस्यहिनीयव्याख्यानं
विनाऽसिद्धेश्च॥तथापिक्कौविधिंप्रतीतिहिनीयव्याख्यानमेवसार्वत्रिकं॥क्कौलुप्तमितितुक्वचित्कं॥रव्यत्यादित्यत्रमपर्यंतस्येत्यत्रचभाष्यादा
श्रितंनतुसार्वत्रिकं॥ अत्रचइङ्ग्रहणप्रत्याख्यानपरमत्रत्यभाष्यमेवप्रमाणंकथमन्यथापिपठीषीत्यादौदीर्घस्येष्टसिद्धेरित्याचंतल्ला
भेइङ्ग्रहणंप्रत्याचक्षीत॥तस्मात्पिपठिषिब्राह्मणकुलानीत्येवरूपंभवतीति॥हलोनन्तराःसंयोगःअभिरव्येचहितावः हलः संयोगसंज्ञाः
स्युःसंज्ञाप्रदेशाःसंयोगांतस्यइत्येवमादयः इहअन्तरशब्देनछिद्रवाचिनाबहुव्रीहौनिछिद्रादित्यर्थलाभादवयवेसंज्ञामानभाव्यं॥आधे
यप्रधानेनांतरेत्यव्ययेनसहबहुव्रीहौतुआधेयनिषेधप्रतीतेरवग्रहेपिभाव्यमेवसंज्ञया॥नहितत्रान्तरामध्येकिंचिद्विद्यतेकिंतुमध्यमात्रंवर्त्त
ते॥मात्राह्रस्वस्तावदवग्रहांतरमितिशाकटायनशिक्षाव्यवहारेणतत्रमात्राकालावसानाभ्युपगमात्॥यत्तुप्रातिशाख्यांतरअर्द्धमात्रोवग्रहइतिन
तुसर्वत्रसंहितायांअर्द्धमात्राकालस्यसत्त्वात्ततोनिरिक्तोर्द्धमात्राकालोवग्रहेस्तीत्येवंपरंअतःप्रातिशाख्ययोरविरोधः तदिहकंतरंपे ॥ राम
क्षाग्रात्यइतिचेत्॥उभयथाऽपि इतिभाष्यकाराः नन्वप्सुइत्यादौसत्यांसंयोगसंज्ञायांसंयोगेगुरितिगुरुत्वाद्गुरोरनृतइतिपुनेनभा ५९

व्यं॥ नत्वन्यथेतिमह्यन्कलेत्यादिषु नत्कथंपक्षद्वयाभ्युपगमइतिचेत्॥न॥ अस्त्वित्यस्याधिकरणवृत्तेर्दूराद्भूतसंबंधाभावात्॥विचार्यमा
णानामित्यादौतुवाक्यस्यैरित्यनुवर्तते॥ननुगुरोरनडिति॥ नन्वप्सुभवोप्सव्यः दिगादिषुपाठाद्यत्॥अपोयोनियन्मनुषुचेतिसप्तम्याअ
लुक्ततनः संबुद्धौहे अप्सव्ये त्यत्रस्यादेवफलभेदइतिचेत्॥ अत्राहुः नैवंविधेविषये अवग्रहंपदकाराः कुर्वंतिइति॥अत्रचसंप्रदायएवश
रणमितिबोध्यम्॥युक्तंचैतत्॥गोभ्योगातुंगोभिर्मदायःचित्रइंद्राजाराजकाइदन्यके॥इत्यादौगोभ्योगोभिः राजकाइत्यादौनासत्यपिपद
त्वेअवग्रहाकरणात्॥ईषिवासमतिस्त्रिधइत्यादौईषिवासमितिविनापिपदसंज्ञांकृतेः पूर्वमिडागमांतेःवग्रहकरणंचैतेनसिमासन्न
॥उक्थशसः। रिरिषइत्यादौपदकालेसत्त्वह्रस्वत्वादयोपिव्याख्याताः॥यत्तुमानोमहान्तमितिमंत्रेवेदभाष्यकारैरुक्तं॥ह्रांदसःपदका
लीनोह्रस्वइतितदपिसंप्रदायमात्रपरतयाकथंचिन्नेयं। नक्षणेनपदकाराः इतिभाष्येपदविभागः पौरुषेयइतिकैयटादिभिरुक्तत्वात्तु इ
तिदिक्॥कथंतर्हितत्रतत्रावग्रहेविशेषइत्युच्यतइतिचेत्॥अवांतरपदत्वेसत्यवग्रहःक्रियतइत्युत्सर्गमभिप्रेत्येत्यदोषः॥अप्सुयोनि
र्वीअस्वइत्यादावपिसुशब्दात्पूर्वंनास्त्यवग्रहः अवांतरपदसंज्ञानेकत्वेउत्तरकालप्रवृत्तिकावग्रहइतिवैदिकसंप्रदायात्॥अतएवमयू
ररोमन्मित्यत्रभिसः पूर्वमवग्रहः नमउक्तिभिरित्यत्राप्येवं॥ इंद्रप्रणः पुरएतेवेत्यत्रवेवशब्दात्त्यागितिदिक्॥महासंज्ञाकरणमन्वर्थसं
ज्ञाविज्ञानार्थं॥ संयुज्यतेस्मिन्समुदायेवर्णा इति॥ तेनात्रसमुदायेवाक्यपरिसमाप्तिर्नतु गुणवृद्ध्यादिसंज्ञावत्त्यत्येकं॥तथाहिसतिनि र्या-
यादित्यादौयकारः संयोगइतिवान्यस्यसंयोगादेरित्येत्वंस्यात्॥ सिद्धांतेतुअचोरहाभ्यामितिहित्वेसत्यपिनस्यात्सिद्धतयानिर्यादित्यादा
वेत्वंनभवति॥किंचप्रत्येकंसंज्ञेतिपक्षेसंस्तुषीष्टेत्यत्रकृतश्चसंयोगादेरितीट्स्यात्॥संह्रियतइत्यत्रगुणोर्त्तिसंयोगाद्योरितिगुणःस्यात्

॥ हृषत्करोतीत्यत्रककारसन्निधौदकारस्यसंयोगत्वात्संयोगांतलोपःस्यात्॥ शक्नावस्तेत्यत्रश्नलितकारेपरतःस्कोरितिलोपःस्यात्॥ निर्पात
इत्यादौसंयोगादेरातोधातोर्यण्वतइतिनिष्ठानत्वंस्यात्॥ जातौचेदंबहुवचनं॥ हलइति॥ जात्याख्यायामेकस्मिन्निनिवचनात्॥ तेचह
योरपिसंयोगसंज्ञाभवति॥ अतःशिसेत्यादौगुरोश्चहलइत्यप्रत्ययःसिध्यति॥ यत्रनुबहवोहलःसंश्लिष्टास्तत्रहयोर्बहूनांवाविशेषेणसं
ज्ञा॥ नचएकाचोहिर्वचनन्यायेनसमुदायस्यैवस्यादितिवाच्यम्॥ वैषम्यात्॥ तथाहि॥ द्विर्वचनंसमुदायावयवैकाचोर्युगपत्कर्त्तुमशक्यं
॥ संज्ञातुशक्या॥ तथासमुदायेहिरुक्तेअवयवाअपिहिरुक्ताभवन्ति॥ रेफःप्रचलन्महावयवैःप्रचलतीतिन्यायात्॥ इहनुसमुदाये
प्रवृत्तयासंयोगसंज्ञयानावयवानांतत्कार्यसिद्धिः अतोअविशेषेणहयोर्बहूनांचसंज्ञेतिस्थितं॥ यदितुबहूनामेवस्यात्तर्हिसम्पर्यतइत्य
त्रगुणोर्न्नीतिगुणोनस्यात्॥ गोमान्करोतीत्यत्रसंयोगांतलोपोनस्यात्॥ निर्ग्लानइत्यादौनिष्ठानत्वंनस्यादितिदिक्॥ ननुयदिहयोरपिसं
ज्ञानर्हिइंद्रीयतेः सनिइन्दिद्रियिषतीतिनस्यात्॥ इहहिसंयोगोद्वौ नदौदरौच॥ तत्रनकारस्येवदकारस्यापिनेट्त्वादितिहित्वनिषेधःप्राप्नो
ति॥ नैषदोषः तत्रहिअजादेरित्यनुवर्त्तते॥ साचकर्म्मधारयात्संचमी॥ तेनआदेश्चःपरेनदराः संयोगादयोनहिसंयोगइतिसूत्रार्थः एवं
चपूर्वसूत्रेहितीयस्येतिनकर्त्तव्यमेवेतिवक्ष्यते॥ हलःकिंतितउभ्यांभत्रतनोतेर्डउःसन्वच्चेतिडउप्रत्ययःसन्वद्भावोदित्वेसन्यत इ
तीत्वच॥ व्यस्तोच्चारणसामर्थ्याद्गुणाभावःयदिहिअचोरपिअनंतरयोः संयोगसंज्ञास्यान्नर्हिहसंयोगांतस्येत्युकारलोपःस्यात्॥ अनंतस्य
इतिकिं॥ पनसम्॥ यदीहसकारमकारयोःसंयोगसंज्ञास्यान्नर्हिस्कोरितिसूत्रेणसकारलोपःस्यादितिदिक्॥ मुखनासिकावचनोनुनासिकः
॥ मुखसहितानासिकामुखनासिकातयोच्चार्य्यमाणोनुनासिकसंज्ञःस्यात्॥ संज्ञाप्रदेशाः आङोनुनासिकश्छंदसीत्यादयः अथ अं

अपोद्दणाना। गभीरआँउग्रपूर्वेइ।उच्चइतिवचनः कृत्यल्युटोबहुलमितिबाहुलकात्कर्मणिल्युट्॥ राजभोजनाःशालयइतिवदितिवृत्यनुसारिणः।भा
ष्यैकेयत्योस्तुउच्यतेनेनेनिवचनं। करणेल्युट्सामान्येनपुंसकं॥ शक्यंचक्षुत्उपहंतुमितिवत्॥ तेनतुल्यंक्रियाचेत्॥ संस्कृतेभक्षाइतिच्च। इदंचवि
शेषणानांच्चजातेरित्यत्रवक्ष्यमाणेनपदसंस्कारपक्षेगुणवचनानामित्यादिवाचनिकमित्यनेनसहयथानविरुध्यते तथातत्रैववक्ष्यामः। ततोमुखंन्म
सिकाक्चनंयस्येतिबहुव्रीहिः। मुखेतिकिम्। यमानुस्वाराणामेवमाभूदितिभाष्यं। तत्रवर्गेष्वादिनश्चतुर्णांपंचमेपरेतन्मध्येपूर्ववर्ण्यमानानुस्वारवर्णांतरंभवति
श्चारब्येष्वागमत्वेनविहितं। तत्यमसंज्ञं। यमश्चयमः यमौहिलोकेप्रायेणसमानाकारौभवतः यथापलिक्नीचखरत्रनुःअग्निःअघ्न्याइत्यत्रकस्मेपदसेभ्यः
परभागेनन्तत्सदृशोयमागमः॥ यत्तूक्तंविवरणे॥ वर्गपंचमयुक्ताः प्रथमाद्यायमाइति॥ तच्चिंत्यं॥ अयोगवाहत्वप्रतिपादकेनहयवरट्सूत्र
स्यभाष्येणसहविरोधात्॥ केवलनासिक्यत्वपरेणयमानुस्वाराणामेवेतिभाष्येणसहविरोधाच्च॥ अथेदंभाष्यंनकेवलनासिक्यत्वपरंकिंतु
आंड्त्यादीनांभागमात्रंनासिक्यंयमानुस्वाराणांतुमुख्यनासिक्यत्वेपिप्रासाद्वासिन्यायेननासिक्यत्वमप्यस्तिनतुतदीयभागमात्रं॥ तथे
त्येवंपरंतथापिआदिनश्चतुर्णांतरसंभवएव॥ किंचैवंनैवदोषोनैवप्रयोजनमित्युत्तरभाष्यग्रंथविरोधः यङ्लुगंतेत्यादौपरोनुनासिक
इत्यस्यप्रवृत्त्यापत्त्यात्तत्सदोषस्योद्भटत्वात् अतएवप्रातिशाख्ये॥ स्पर्शायमाननुनासिकाः स्वान्यरेष्वस्पर्शेष्वनुनासिकेष्वित्युपक्र
म्यप्रदीपवच्छाश्चित्यत्रयमेनिषेद्धुमारब्धे॥ नस्पर्शस्योष्मप्रकृतेःपरस्मादयमापत्तिमितिसूत्रेपरस्माच्छब्दःप्रयुक्तः यमःप्रकृत्यैवस
दृक्श्रुतिर्वायमेनमुख्यास्तिसमानकालेत्यादिसूत्रांतरेष्वपिस्पष्टमेवयमस्यवर्णांतरत्वं। तथानारदीयशिक्षायामपि अनंत्यश्चभवेत्पूर्वोत्यंतश्च
परतोयदि॥ तत्रमध्ययमस्तिष्टत्सवर्णःपूर्ववर्णयोरिति॥ सवर्णःसदृशः अत्रपूर्ववर्णयोरितिद्वित्वमविवक्षितं॥ यत्तइत्यादौजकारद्वयसत्वेपिन्म

या अत्र वसवोरंतदेवाइत्यादौ जकारद्वयाभावादिति नच्यारव्यातारः। तथा ऋक्तंत्रव्याकरणारव्यस्य छंदोग्यलक्षणस्य प्रणेता औदव्रजिरव्य
सूत्रयत्॥ अनंत्यान्त्यसंयोगे मध्ये यमः पूर्वस्य गुण इति॥ पूर्वस्य गुण इत्यस्य पूर्वे भक्त इत्यर्थः एतेनागमत्वं स्फुटीकरोति नथा संयोगश्चेत्खः
लास्व्यायोगौतमशिक्षायामपि॥ अथ चतुरस्राणामुदाहरणं संयमाय मा भूत्संयमास्तावद्यथाः ग्म्मिरिति हौगकारौ यमनकारौ यञ्ज्ञ्ञ्
ति ह्यौजकारौ यमञ्जकारावित्यादि॥ तथा तत्रैव ग्रंथारंभे। अयस्पिंडोदारुपिंडऊर्णापिंडश्चेति त्रेधा संयोगं विभज्य यमसहितयमस्पिंडमित्युक्का
अंतस्थयमसंयोगे विशेषो नोपलभ्यते॥ अशरीरं यमं प्राहुरंतस्थः पिंडनायकं इत्युक्तं अंतस्थोत्रवर्गपंचमः अशरीरमिति स्वरभक्त्यादिवच्चंज
कल्पिपिविशेषशून्यमित्यर्थः लक्षणवशेनैवतदीयस्थलविशेषनिश्चयसंभवाल्लिपिसंप्रदायप्रवर्तकाचार्यैः स्वरभक्तेरिवयं मकारोपि व्यंजकोभूता
लिपिर्नकल्पितेत्यर्थः रलयोरूष्मणि परे मध्ये स्वरभक्तिरिति हि प्रसिद्धं शिक्षादौ॥ यत्र तुनैवंविधेनलक्षणेनस्थलावधारणं कर्तुंशक्यते॥ तत्रांग
त्यालिप्यंतरंप्रवर्त्तितं॥ यथाविसर्गादौ॥ पाणिनीयशिक्षायामपि॥ त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः संभवतोमताः प्राकृतेसंस्कृतेवापि स्वयंप्रोक्ताः स्व
यंभुवा॥ स्वराविंशतिरेकश्च स्पर्शानां पंचविंशतिः। यादयश्चस्मृतास्त्वष्टौ चत्वारश्च यमाः स्मृताः अनुस्वारोविसर्गश्च क१ पौ चापिपराश्रयौ॥ दुःस्पृ
ष्टश्चेतिविज्ञेयाल्लृकारः प्लुतएवचेति॥ अत्रहियमानांपृथग्गणनात्स्पृष्टमेववर्णांतरत्वं॥ गणनात्वित्थं॥ अइउऋइतिचतुर्णांह्रस्वदीर्घप्लुतभेदा
त्त्रैविध्येद्वादशलृकारएकः एचांदीर्घप्लुतभेदाद्दष्टौ॥ इत्थंस्वराएकविंशतिः स्पर्शाः पंचविंशतिः यरलवशषसहेत्यष्टौ॥ यमाश्चत्वारः ग्रंथांतर्य
मादितीययमादिभेदेनविभजनात्॥ अतएवकुंखुंगुंघुंइतियमचतुष्टयंन्यासादावुदात्तं। कचटतपशुंखठथफाः खुरित्यादिपरिभाषया रामः
श्चित्यनन्तदुत्तरस्याशरीरस्यापि कथंचित्प्रदर्शनतात्पर्यकंचेदमितिध्येयं॥ अनुस्वारविसर्गौ क१ पाश्चत्वारः दुस्पृष्टश्चबहूचानांप्रसिद्धः ई ६१

लेवोल्लेखेति॥ इत्यत्रिषष्टिः। ऌकारस्यपुनःसंभवान्नेनसहचनुःषष्टिः तदेतदुक्तं॥ संभवतइति॥ हयवरट्सूत्रेक्षीरोदकारोप्याह॥ वर्गीत्येनंत्यात्स
रेतयोर्मध्यवर्त्तीनासिकास्थानोयंमद्वंनि॥ यत्तुकश्चिदाह॥ यमाआदेशाः नचतेषामानुनासिक्यपक्षेनद्वुज्ञस्तद्वंनीत्यादौयरोनुनासिकइ
त्यनुनासिकादेशापत्त्यानेवदोषोनैवप्रयोजनमितिभाष्यंविरुध्येतेतिवाच्यं॥ व्यवस्थितविभाषाश्रयणादिति॥ तन्नुच्छं॥ प्रागुक्तप्रातिशाख्यना
रदीयशिक्षादिसकलग्रंथविरोधेनआदेशपक्षस्यगर्भस्त्रावेणैवगतत्वात्॥ व्यवस्थितविभाषाकल्पनस्यनिर्मूलत्वाच्च॥ एतेनसुतरांयत्नेरषेन
ग्रामाण्यभ्रमेणअनुपसर्गादुज्ञइत्यादौचवर्गाभावेदृढीकृत्यश्रुत्वाभावंसाधयंत स्तदनुगामिनोपिपरास्ताः॥ नाप्येतन्नयत्नइत्यत्रजकारइ
यस्यस्फुटमेभिधानात्॥ तस्यैतस्यत्रयस्यास्थामज्ञांपर्वणाभितीत्यारण्यकप्रयोगइवसज्ञानीयसमभिव्याहारानास्पदंभेदइतिसुप्रसिद्धं
शास्त्रे॥ अतएवनव्यंजनपरस्यैकस्यानेकस्यवाविशेषोस्तीति भाष्यं॥ व्यंजनात्परस्यव्यंजनंपरंयस्येत्येवंभूतस्यचदुर्लक्षोभेदाभेदविभाग
इत्येवंपरतयातत्रतत्रैकयटेनव्याख्यातं॥ अतएवचबहुषुपुस्तकेषुनज्ञापयत्याचार्यइतिभाष्यग्रंथः॥ अनुपसर्गादितिसूत्रेपिकेषांचिन्नञ्श्रु
त्वपाठःसंमतएव॥ पाठांतरंतु अल्पाच्तरं आलुच्नदसहनेइतिवत्सोत्रत्वादसंहिन्यावासमाधेयमितिदिक्॥ नदेतत्सकलमभिधायप्रक्रि
यापरकशेखरेणोक्तं॥ तस्ज्ञानमित्यादौतुश्रुत्वंभवत्येव॥ यमश्चमुखनासिक्यः केवलनासिकास्थानोवेतिमतद्वयं॥ नासिक्यानासिका
स्थानाः मुखनासिक्यावेति तैत्तिरीयमातिशाख्यात्॥ अनुनासिकविषयेतुदूषणत्रयं॥ ऊष्मोवर्णोमुखेननासिकयावोच्चार्यतइत्येकं॥ पूर्वो
भागोमुखेन॥ परोनासिकयेतिद्वितीयंतद्वैपरीत्यान्नीयंद्वितीयतृतीययोर्भागमात्रस्यनासिक्यत्वेपितदुपरागाद्भागांतरमपितद्वदवभासते
॥ तथाचनासिकान्वयस्यभागमात्रविषयतयानासिकावचनग्रहणेनमुखनासिक्योवर्णोनगृह्यत॥ किंतुमतविशेषेकेवलनासिकास्थान

तथा यमादयस्त्रयवगृह्येरन्॥ ननश्चविधिप्रदेशे आङोनुनासिकइत्यादौ यमानुस्वारा एवविधीयेरन्॥ विङ्नोरनुनासिकस्यादित्यादौ त्वनुवादेऽप्रतिप
त्तिरेवस्यादित्युदाहृतभाष्याशयः॥ तस्माद्दृशेनदृष्टेमुखपदोपादानं सार्थकमितिस्थितं॥ अथमदर्शनेनुग्रासाद्वासिन्यायाश्रयणेनोभयवचनाना-च
पिसिद्धासंज्ञा॥ आन्तरतम्याच्चविधिप्रदेशेषु यमानुस्वाराणामप्रवृत्तिः तथाच मुखशब्दोपादानंनकर्त्तव्यमिति भाष्येस्थितम्॥ मुखवचनइत्येवोक्ते
तुकचटतपादीनामपिस्यात् ननश्चशक्तइत्यत्रकलोपःस्यात्॥ पक्कइत्यत्रवकारलोपःस्यात्॥ तन्नमित्यत्रयलोपःस्यात्॥ ओदनपगित्यादावनुनासि
कस्यक्विझलोरितिदीर्घःस्यात्॥ अनुपश्चान्नासिकाव्याप्रियते यस्मिन्नासिकायाः पश्चान्मुखंव्याप्रियते यस्मिन्निति वाऽन्वर्थसंज्ञेयं तेननासिका
व्यापारस्य भागविषयकत्वसूचनात्तासाद्वासिन्यायस्याविषयोयमिति ध्वनितं॥ एतच्चसूत्रंप्रत्याख्यातुंशक्यम्॥ प्रदेशवाक्ये ष्वेवप्रायु
क्तस्यनासिकामनुगतइत्यस्यवायोगस्याश्रयणेनसकलेष्टसिद्धिरितिदिक्॥ तुल्यास्यप्रयत्नंसवर्णम्॥ नास्वादिस्थानमाभ्यंतरप्रयत्नश्चेत्यु
भयं यस्यवर्णस्ययेनवर्णेनसहसमानंसतस्यसवर्णोबोध्यः संज्ञाप्रदेशाः अकःसवर्णेदीर्घइत्यादयः। यद्यपितुलयोसंमितंतुल्यमित्यवप्रत्यया र्थः
नौवयोधर्मविष मूलमूलसीतातुलाभ्यस्तार्थंतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु इतिसूत्रेणतुलाशब्दात्संमितेऽर्थेप्रत्ययोनोक्तः॥ तथा
प्यंसदृशमात्रेरूढःशब्दः। अस्यंतिउच्चारयंतिअनेनवर्णानित्यास्यंबाहुलकात्करणेण्यत्॥ यद्वा॥ आस्यंदतेअन्नंप्राप्यद्रवीभवतीत्यास्यम्।
अन्येष्वपीतिडप्रत्ययः अथवाअन्नेनद्रवीक्रियतइत्यास्यं अंतर्भावितण्यर्थात्कर्मणिडःपरितःखातापरिखेतिवत्॥ तत्रभवमांस्यं॥ जा
ल्वादिस्थानं॥ शरीरावयवाद्यत्॥ यस्येतिलोपेहलोयमामितियलोपः नचाल्लोपस्यस्थानिवद्भावःशंक्यःयलोपेकर्त्तव्येतन्निषेधात्॥

प्रकृष्टो यत्नः प्रयत्नः प्रकर्षश्चाभ्यंतरत्वं॥ प्रारंभेयत्नोवाप्रयत्नः आभ्यन्तरप्रयत्नाहिवर्णप्रारंभकालएव

व्याप्रियंते॥ तथाचतुल्यौस्थानप्रयत्नौयस्येति द्वंद्वगर्भोबहुव्रीहिः यद्वा॥ तुल्यः आस्येप्रयत्नोयेषामितिविग्रहे बहुव्रीहिः आस्येइतिविशेषणाद्वाह्यप्रयत्नव्युदासः आस्येइत्येकत्वंविवक्षितं॥ नहितांनास्यशब्दोपादानसामर्थ्यात्॥ तेनभिन्नस्थानानामर्थाद्व्युदासः यद्वा॥ तुल्यः आस्येतुल्यास्यः मयूरव्यंसकादित्वात्साधुः तुल्यास्यः प्रयत्नोयस्येतिविग्रहः यद्वा॥ आस्येप्रयत्नः आस्यप्रयत्नः सतुल्योयस्येतिविग्रहे कत्वविवक्षादिकंप्राग्वत्॥ तदेवंसमासचतुष्टयमपिभाष्येस्थितं॥ द्वंद्वगर्भोबहुव्रीहिःत्रिपदोवा॥ पूर्वभागेतत्पुरुषगर्भः उत्तरभागेवेति॥ तुल्यशब्दस्यसंबंधिशब्दत्वाच्चयेनसहतुल्यस्थानप्रयत्नंतेनसहसवर्णमितिलभ्यते॥ नहिमातापूज्येत्युक्तेस्वसुतमातृभार्यापूज्यंतेकिंतुपूज्यकस्यैवमातेतिदिक्॥ तुल्यस्थानमितिकिम्॥ तुल्यप्रयत्नानामपिकचटतपानांमाभूत्॥ तेनतस्तेत्यत्रझरोझरीतिपकारलोपोन्भवति॥ यत्नग्रहणंकिं॥ चकारशकारयोर्माभूत्॥ सनिहिसावर्ण्येवाकुम्ब्योततीत्यत्रशकारलोपःस्यात्॥ आभ्यंतरत्नविशेषणमप्येतदर्थमेव॥ अस्निहिम्वासाघोषविवाराल्पबाह्यप्रयत्नसाम्यंचशयोरपि॥ ननुअल्पप्राणत्वमहाप्राणत्वरूपोभेदोस्तीतिचेत्॥ किंततः नहिसर्वप्रयत्नसाम्यंविवक्षितुंशक्यं॥ अङ्किनङ्त्याद्यसिद्धिप्रसंगात्॥ कङोरपिबाह्यप्रयत्नभेदात्॥ सर्वप्रयत्नसाम्यंहिस्वस्यस्वेनैवयातिनतुपरेण॥ तथाचसवर्णसंज्ञाप्रणयनमपिव्यर्थंस्यात्॥ अणुदित्तुल्यास्यप्रयत्नस्येत्युक्तौसर्वसामंजस्यात्॥ झरोझरीत्युक्तेहलोयमांयमीत्यत्रैवयथासंख्यप्रवृत्त्यामाद्यत्यमित्यादौमकारस्यैवशिष्टत्वांदोडकारस्यापिलोपोनस्यादितिहिसिद्धांतेसवर्णग्रहणंकृतं॥ सचाभ्यांतरोपावत्यत्नसाम्यनिबंधनायांतदवस्थएवस्यात्॥ अथयावद्बाह्यसाम्यंयावदाभ्यंतरसाम्यंवाविवक्ष्येतसवर्णमपिमंथुलिदंस्थानमित्यत्र झरोझरीतिसूत्रेकरणस्थानप्रयत्नसाम्यस्याघोषविवारमहाप्राणत्वरूपबाह्यप्रयत्नसाम्यात्॥ अथस्थानप्रयत्न

विवेकः अकुहविसर्जनीयाः कण्ठ्याः इत्युपशास्त्रलक्ष्याः। ऋदुरषामूर्ध्न्याः। लृतुलसादंत्याः॥ उपूपध्मानीया ओष्ठ्याः। एऐ कण्ठतालव्यौ॥ ओ
औ कण्ठोष्ठ्यौ॥ वकारो दंतोष्ठ्यः॥ जिह्वामूलीयो जिह्वामूलस्थानः॥ अनुस्वारो नासिक्यः॥ यत्नो द्विधा॥ आभ्यंतरो बाह्यश्च॥ तत्राभ्यंतरश्चतु
र्धा॥ स्पृष्टता ईषत्स्पृष्टता विवृतता संवृतता चेति॥ तत्र स्पृष्टता स्पर्शानां॥ ईषत्स्पृष्टता अंतस्थानां॥ हस्वस्यावर्णस्य प्रयोगे संवृतता॥ शास्त्रीय
कार्यं तु विवृतता॥ प्रतिज्ञानदृष्टि अइउण्सूत्रे प्रतिपादितं॥ ऋतः संवृताइति तु प्रतिशास्त्र्योक्तत्वान्न सर्वसाधारणं॥ ऊष्मणां स्वराणां
च विवृतता॥ एषां च तुर्णामप्याभ्यंतरत्वं वर्णोत्पत्तिप्राग्भावित्वात्॥ तथाहि॥ नाभिमदेशात्प्रयत्नप्रेरितो मारुतः प्राणो नामोरूर्ध्वमाक्रामन्नुरः
प्रभृतीनि स्थानान्याहंति ततो वर्णस्य तदभिव्यञ्जकध्वनेर्वा उत्पत्तिः तत्रोत्पत्तेः प्राग्यदा जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं
तालुवादिसम्यक् स्पृशंति तदा स्पृष्टता॥ ईषद्यदा स्पृशंति तदा ईषत्स्पृष्टता॥ समीपावस्थानमात्रे संवृतता॥ दूरत्वे विवृतता॥ अतएव इत्यु
पशानां तालव्यत्वादिविशेषेपि तालुस्थानेन सहजिह्वाग्रादीनां च वर्गोच्चारणे कर्त्तव्ये सम्यक्स्पर्शः यकारे ईषत्स्पर्शः शकारे प्रयोगस्तद्
रेवस्थितिरित्याद्यनुभवसिद्धशिक्षाकारोक्तिं चानुसृत्य विवेचनीयं। भाष्यकारास्तु नाज्झलावित्यस्य प्रत्याहारान्यानावसरे ऊष्मणां स्वराणां ऊष्महि ह
तत्त्वं विवृतत्वं चेति वैलक्षण्यं वक्ष्यंति॥ तदप्यनुभवानुसार्येवेति सत्पदैराकलनीयं॥ बाह्याः प्रयत्नाः पुनरेकादशविधाः संवारनादघोषा
नादघोषाघोषाघोषाल्पप्राणमहाप्राणउदात्तानुदात्तस्वरितश्चेति॥ एते च वर्णोत्पत्तेः पश्चान्मुखप्रतिहतेन निरुत्तेप्राणाख्येवायौ उ
त्पद्यंते॥ अतएव बाह्या इत्युच्यंते॥ गलविलस्यसंकोचात्संवारः। तस्यैव विकासाद्विवारः॥ एतौ चेसंवृतविवृतत्वरूपाभ्यां आभ्यंतराभ्यां राम
भिन्नावेव॥ तयोः समीपदूरावस्थानात्मकत्वादित्यवधेयम्॥ तत्र वर्गाणां प्रथमद्वितीयाः शषसविसर्जनीयजिह्वामूलीयोपध्मानीया ६३

यमौचप्रथमद्वितीयौ।विवृतकंठाः श्वासानुप्रदानाअघोषावर्गयमानांप्रथमेअल्पप्राणाइतरेसर्वेमहाप्राणाः वर्गाणांतृतीयचतुर्थौअंतस्था
हकारानुस्वारौचैयमौचतृतीयचतुर्थौसंवृतकंठनादानुप्रदानाघोषवंतोवर्गाणांतृतीयाअंतस्थाश्चाल्पप्राणायथातृतीयास्तथापंचमा आ
नुनासिक्यमेषांप्रयोगगुणवृत्तिशिक्षासुस्थितं॥संग्रहश्च॥खयांयमाः खयः कः पौविसर्गः शरएवच॥एतेश्वासानुप्रदानाअघोषाश्चतृण्व
तेःकंठमन्येतुघोषाः स्युःसंवृतानादभागिनःअसुग्मावर्गयमगायणश्चाल्पासवः स्मृताः॥यद्यप्येतेवाह्याः सवर्णसंज्ञायामनुपकारास्त
थाप्यन्तरङ्गत्वपरीक्षायामुपयोस्यन्तइतीहआभ्यंतरत्वविशेषणव्यावर्त्तनयाव्युत्पादिताः॥ननुविहसूत्रेप्रयत्नग्रहणंव्यर्थंस्या॥तद्वि
तांतास्यशब्दबलादेवनाल्पादिस्थानस्यप्रयत्नस्यचलाभादितिचेन्न॥प्रत्येकव्यापारनिरासार्थमुभयोरुपादानात्॥तेनस्थानप्रयत्नोभ
यसाम्येसत्येवसंज्ञानत्वन्यतरसाम्येपि॥एवंस्थितेयत्फलितंतत्स्पष्टत्वार्थमुपन्यस्यते॥अष्टादशअक्षराणांपरस्परंसवर्णाः एवमिव
र्णोवर्णौ॥ऋकाराअष्टादश॥ऌवर्णास्तुद्वादशेतित्रिंशन्मिथःसवर्णाः ऌवर्णस्यदीर्घानसंतीत्युक्तत्वात्॥ऋऌवर्णयोर्मिथःसावर्ण्य
स्योपसंख्यानाच्च॥एचस्तुद्वादशद्वादशमिथःसवर्णाःननुएकारैकारौओकारौवामिथःसवर्णौ॥यथाचैनत्तथाअदुणित्यत्रैवप्रति पा
दितं॥अकारेणाप्येचांनसावर्ण्यं॥प्रयत्नभेदादितिद्वैवसूत्रेभाष्येस्पष्टं॥अतएवएदैतोरपिशकारेणनसावर्ण्यमितितेषांनाञ्चलावितिसू
त्रेउदाहरणत्वंनास्ति॥नचात्रस्थानभेदेननिर्वाहः एचामकारेणसहकंठस्थानसाम्यात्॥एदैतोःशकारेणसहतालुस्थानसाम्यात्॥नहि
यावत्स्थानंनतत्साम्यंविवक्षितं॥अमङणनानांस्वदग्र्यैःसहअसावर्ण्यापत्तेः यवलानांसानुनासिकनिरनुनासिकानामसावर्ण्यापत्तेश्च॥
नहिनिरनुनासिकानामपिनासिकास्थानम्॥येनसर्वसाम्यंस्यात्॥ननुतद्धितांतास्यशब्दबलान्नाल्पादिसाम्यमात्रंलभ्यते॥ओष्ठात्प्रभृति

शाकाकलकाद्धि आस्यं॥ काकलकंचग्रीवापाउन्नतप्रदेशः यंकंठमणिरित्याचक्षते॥तत्कथंनासिकास्थानभेदेनासवर्णत्वमापद्यतइतिचेत्
॥नासिकाहिनवाल्यावर्णोत्पत्तौनिमित्तं॥तत्रजिह्वाद्यादिव्यापारविरहान्किंतुअंतरास्येवितनंचर्मास्तिपणवस्यवचर्मवत्॥तत्संबद्धेरे
खाविशेषोनासिका॥सैववर्णोत्पत्तौनिमित्तमितिसिद्धंनात्॥तस्माच्चौष्ठादिभ्योविशेषात् वर्ग्योवर्ग्येणसवर्णः तुल्यास्यप्रयत्नत्वात्
॥रेफस्यरेफएवसवर्णःएवमूष्मणामपिऊष्माणएवसवर्णानत्वन्ये॥तुल्यास्यप्रयत्नत्वाभ्रूंवात् शषसहानांयथाक्रमंइकारऋकारऌका
राकाराः सूत्रकारमतेयद्यपितुल्यास्यप्रयत्नास्तथापिनसवर्णानाञ्झलावितिनिषेधात्॥भाष्यकारमतेतुप्रयत्नभेदएवेतिवक्ष्यते॥इहस्था
नभेदादप्राप्तांसवर्णसंज्ञांविधातुंवार्त्तिकमारभ्यते॥ऋकारऌकारयोःसवर्णविधिरिति॥होत्ऌकारः होत्कारः॥उभयांतरतमत्वंऌकारस्य त
रतमभ्यांदीर्घेनसंभवतीति परिशेषाद्ऋकारःस्यादेतत्॥अकःसवर्णेदीर्घइत्यत्रऋतिऋवावचनंऌतिऌवोवचनमितिवक्ष्यति॥तस्यायम
र्थः॥अकःसवर्णेऋतिपरेपूर्वपरयोःस्थानेवाऋ अयमादेशोभवति॥हिमात्रोयं॥मध्येह्रौरेफौ॥तपोरेकामात्रा॥अभितोऽभक्तेरपरा॥ईषत्स्पृष
स्त्रष्ट्यर्थः॥तत्रप्रयत्नभेदादकारेणाग्रहणादनचत्वाद्दीर्घसंज्ञायाअभावादप्राप्तोयंविधीयते॥ऌतिऌवेति॥अयमपिहिमात्रःईषत्स्पृष्ट
श्च॥मध्येह्रौलकारौतपोरेकामात्रा अभितोऽभक्तेरपरा॥पूर्ववदप्राप्तेविधीयते॥तत्रवावचनमितिवाशब्दोदीर्घसमुच्चयार्थोभविष्यति॥वा
स्याद्विकल्पोपमयोरेवार्थेपिसमुच्चयेइत्यभिधानात्॥तेनाप्राप्तएवदीर्घोभविष्यति॥तत्किंसवर्णसंज्ञया॥ननुऌतिल्वेत्यत्रसवर्णइ
त्यनुवर्त्तते नवाआद्येहोत्ऌकारइत्यत्रऋऌवर्णयोःसवर्णसंज्ञाविधानंविनानेष्टसिद्धिः अन्त्येदूकारोमधूकारइत्यादावतिप्रसंगः इ
त्यविचेत्॥न॥प्रथमवार्त्तिकेऋतीत्यपनीयऋनइतिपंचम्यन्तपाठेसर्वसामंजस्यात्॥सवर्णइतिचपूर्ववार्त्तिकेनुवर्त्तते॥तेनधात्रंशइत्या

दौनातिप्रसंगः द्वितीयवार्त्तिकेतुसवर्णइतिनिवृत्तं॥ ऋतइत्यनुवर्त्तते॥तस्मादकःसवर्णइत्यत्रअवश्यकर्त्तव्येनवचनहूयेनैवसकलनिर्वाहा
कारलृकारयोःसवर्णविधिप्रतीहत्यंवार्त्तिकंव्यर्थमिति॥मैवं॥इहत्ययेकंवार्त्तिकमाश्रित्यषाष्ठवचनहूयप्रत्याख्यानस्यैवन्याय्यत्वात्॥तथाहि
॥तद्वचनहूयंकुर्वतापिरेफहूयलकार हूयगर्भयोस्तद्विधेययोरचूत्वंतावदेष्टव्यं॥तन्निर्वाहार्थंवर्णसमाम्नायेतौपठनीयौ॥अन्यथाद्विविधा
नमात्रमनयोःस्यान्नत्वचूकार्यंप्लुतः तद्विधानेहिअचश्चेतिपरिभाषयाअचइत्युपतिष्ठते॥ननुईषत्स्पृष्टस्यानचत्वान्माभूत्प्लुतविधेस्तस्य
नुऋकारस्याच्त्वेनप्लुतःसिद्धएवेतिचेत्॥सत्यं॥विवृतःप्लुतःसिद्धःईषत्स्पृष्टौतुप्लुतौरेफहूयलकारहूयगर्भौनसिध्यतः अतएवेषत्संज्ञा
मात्रेणापिननिस्तारः ग्रहणकशास्त्रप्रवृत्तेस्तावन्मात्रेणानिर्वाहात् किंतुअणसुपाठसवकर्त्तव्यइत्युक्तं॥सतित्वणसुपाठेतुभ्यांत्रिमात्र
योरपियहणात्प्लुतसंज्ञायांसत्यांपक्षेइषत्स्पृष्टौप्लुतौभवतः एवंस्थितेषाष्ठंवचनहूयंमास्तु॥तद्विधेययोरपिह्रस्वदीर्घप्लुतयोअकः सवर्णइत्यने
नैवसिद्धेः॥ननुस्थानेन्तरतमपरिभाषयाविवृतस्यस्थानिनोविवृतावेवदीर्घौस्यातांनत्वीषत्स्पृष्टावितिचेत्॥न॥रेफहूययुक्तस्यस्थानिनोरे
फहूययुक्तएवादेशःसुसदृशइत्यपिहिसंभवतितथाचकिंरेफहूययुक्तत्वमादर्त्तव्यंकिंवाविवृतत्वमित्यत्रविनिगमकाभावेनपर्यायेणोभ
यप्रवृत्तौसिषाधयिषितस्यरूपहूयस्यनिर्वाहात्॥लकारेपिकदाचिदकारांतरतमोविवृतदीर्घः कदाचिद्लकारांतरतमोलकारहूयगर्भईषत्स्पृ
ष्टइतिसकलेष्टसिद्धेः तदेवंषाष्ठंवचनहूयंनकर्त्तव्यमितिस्थितम्॥ननुतदेवास्तुसंज्ञाविधानंनुमास्त्वितिचेत्॥न॥वचनहूयारंभेगौरव
स्यस्पष्टत्वात्॥किंच॥संज्ञाभावेऋत्यकःउपसर्गादृतिउरणरपरइत्यादिषुऋकारेणलकारग्रहणंनस्यात्॥नचैवंसिद्धांतेपिनवल्का
रइत्यादौरपरत्वप्रसंगःरप्रत्याहारपरत्वस्यवक्ष्यमाणतयालपरत्वसिद्धेः ऋदितास्लृदितांचधातूनामनुबंधकार्येषुसंकरस्तुनभवतिधातूपदेशेपृ

थगनुबंधकरणसामर्थ्यात्॥ विधिवाक्येष्वपिपृथगनुवादसामर्थ्यात्॥अन्यथाहिसर्वान्ऋदितएवस्युदितएववापठित्वाविधावपिनैवरूपेणा
नुवदेत्॥संभवत्येकरूप्येवैरू प्याश्रयणा योगात्॥ नाञ्झलौ॥अञ्झलौमित्यःसवर्णानस्तः अकारहकारयोरिकारशकारयोऋकारषकारयो
र्लृकारसकारयोश्चेनिस्थलचतुष्टयेपूर्वसूत्रेणप्राप्तंसावर्ण्यमनेननिषिध्यते॥तेनआनडुहंचर्मवैपाशोमत्स्यइत्यत्रयस्यैतिचेहकारशका
रयोर्लोपोनअन्यथाहियस्येत्यनेनदीर्घाणामिवहकारशकारयोरपिग्रहणंस्यात्॥तथादण्डह्यस्तः दधिशीतंकर्तृषट्कं इत्यादौसवर्णदीर्घःस्यात्
॥दधिसान्द्रमित्यादौयणादेशश्चस्यात्॥इहञ्झलोकस्यापिनसवर्णोस्तइतिवाक्यशेषेनग्राह्यःसंज्ञारंभवैषर्थ्यापत्तेःविहितप्रतिषिद्धत्वेनवि
कल्पेतुलाघवात् तुल्यास्यप्रयत्नंवेत्येवसूत्रयेन्॥नाप्यचाम्भिर्हलाहलृभिः सावर्ण्यंनिषिध्यते॥नाञ्झलावित्यत्रैवसूत्रेसवर्णदीर्घस्य ऽ
ञ्झयोहइतिपूर्वसवर्णादेशस्यचनिर्देशात्॥ननुञ्झलेवात्रनिर्दिष्टेनतुहल्॥तावत्तेवेष्टसिद्धेरितिचेत्तर्हिदीर्घनिर्देशएवज्ञापकोस्तु॥तेनहि
अचामञ्झिःसावर्ण्यमनिषिद्धमितिज्ञापितेपरिशेषाद्ञ्झलोर्मिथोनिषेधएवपर्यवस्यति॥ञ्झरोझरिसवर्णइतिज्ञापकाच्च॥यत्तुनाणश्छला
वित्येवकुतोनसूत्रितमिति॥ तन्न॥कर्तृषट्कंदधिसान्द्रमित्याद्यसिद्ध्यापत्तेः ऋलृकारयोरनण्त्वात्॥ग्रहणकसूत्रान्तरिक्तेपूर्वसूत्रेणिस्तु
क्त्वात्॥अस्तुवापरोणत्वाप्यजपेक्षयाव्यक्तिगौरवमेवस्यादितिअचग्रहणमपनीयाणग्रहणंक्रियतामितिशंकायागर्भस्त्रीनेत्रगत
त्वात्॥शलंशेतुव्यक्तिलाघवेसत्यपिवर्णोच्चारणेविशेषोनास्तीत्येवोत्तरं॥वस्कतस्कनाकुशल्वित्येवसूत्रपितुमुचितं॥स्यादेतत्॥शरा
शभिरपिसावर्ण्यंनिषिद्धेत॥तेहिइकारादिभिर्गृहीतत्वादचसंज्ञकाःहलूषूपदेशाद्वलश्च।नचास्मादेवनिषेधादिकारादयोनसवर्णाइ
तिवाच्यं॥एतद्वाक्यार्थबोधात्याकूपदार्थोपस्थितेरावश्यकतयातस्यामवस्थायामिकारादिभिःशरामुपस्थापनस्यदुर्वारत्वात्॥ततश्चप

रशताः रामष्यष्ठः यशस्सारमित्यादौ झरोझरीत्यस्यप्रवृत्तिर्नस्यात्॥ ततश्चैकैकत्रशब्दत्रयंम्रूयेत॥ इष्यतेतुहयं॥ तथाचपूर्वपक्षवार्त्तिकं
॥अज्झलोःप्रतिषेधेशकारप्रतिषेधोज्झलत्वादिति॥अत्रशकारग्रहणंशरामुपलक्षणंकिंच॥अवर्णस्याष्टादशधाभिन्नस्यपरस्परंसाव
र्ण्यंनस्यात्॥ततश्चदंडाग्रमित्यादौदीर्घोनस्यात्॥ तथाहि॥हकारेणग्रहणादकारोहल् अषुपठाच्चाच्॥नचास्मिन्नेवसूत्रेएतस्यप्रवृत्तिः येनअ
हृणकशास्त्रमसावर्ण्यान्नप्रवर्त्तेतेति॥ अत्रसिद्धान्तंवार्त्तिककारएवाह॥सिद्धमनच्त्वाद्ह्राक्यापरिसमाप्तेर्वेति॥ तत्रसूत्रप्रत्याख्यानेनोत्तरं
प्रथमवार्त्तिकेभिप्रेतं॥ तथाहि॥शिक्षावाक्येविवृतमूष्मणांइतियोगोविभज्यते॥ तत्रचईषदित्यनुवर्त्तते॥स्वराणांचेतिविवृतमित्यनुवर्त्त
ते॥ईषदितिनिवृत्तं॥ तथाचप्रयत्नभेदादूष्मस्वरयोःसावर्ण्यंप्राप्तौकिंसूत्रेण॥ तथाचशरामनच्त्वादेवसिद्धमित्यर्थः॥उपलक्षणंचैदमकार
स्याहल्त्वादित्यपिबोध्यम्॥सूत्रारंभमभ्युपेत्येदं॥वस्तुतस्तूक्तरीत्यासूत्रमेवनारंभणीयमित्यर्थः ईषदित्यस्याननुवृत्तिंसमानप्रयत्नतांच
स्वीकृत्यसूत्रारंभपक्षेप्याह॥ वाक्यापरिसमाप्तेर्वेति॥अयमाशयः इहपूर्ववर्णानामुपदेशः ततइत्संज्ञा॥ तत्रआदिरन्त्येनसहेतेतिप्रत्याहा
रसिद्धिः ततोनाज्झलावित्येतद्ह्राक्यार्थबोधः ततोपवादविषयेपरिहारेणसवर्णसंज्ञानिमित्तेसतिग्रहणकशास्त्रप्रवृत्तिः नत्वेतत्सूत्रंनिष्प्र
त्तिसमये॥अन्यथाएतत्सूत्रेणैवइकारशकारादीनांसावर्ण्यनिषेधादिकारेणशकारग्रहणेपीति अज्झलत्वादितिहेतोरसिद्धत्वादीयः पूर्व
पक्षोअसंभवदुक्तिकएवस्यात्॥अथपदार्थज्ञानस्यवाक्यार्थबोधहेतुतयासतह्राक्यस्यपदार्थबोधकालेएतह्राक्यार्थग्रहाभावादिहसूत्रे
इकारेणशकारग्रहःस्यादेवइतःपूर्वंसावर्ण्यनिषेधाग्रहादितिब्रूषेतर्हिइतःपूर्वंग्रहणकशास्त्रमेवननिष्पन्नमितिकथंनपर्यालोचयिः॥नन्वेवंतु
ल्यास्यप्रयत्नंनाज्झलावित्यादौअकःसवर्णेदीर्घइतिदीर्घोपिनप्रवर्त्तेतेतिचेन्न॥ सवर्णसंज्ञाद्युत्तरकालेप्रवर्त्तमानस्यदीर्घशास्त्रस्यदंडाढ

कादाविवेहाप्यप्रतिबन्धप्रवृत्तिकत्वात्॥उद्देश्यतावच्छेदकरूपाक्रान्तत्वाविशेषात्॥नचसवर्णदीर्घविधानात्प्रागेतत्सूत्रार्थबोधानुपपत्तिरि
तिवाच्यम्॥पदार्थोपस्थितिप्रभृतिसामग्रीसंपन्नोसत्यांसाधुत्वबोधकवाक्यार्थज्ञानविलंबेनशाब्दबोधेविलंबादर्शनात्॥अन्यथाव्याक
रणशास्त्रपरिशीलनविकलानांकापिशाब्दबोधोनस्यात्॥तथावैयाकरणानामपिव्याकरणसूत्रघटकशब्देषुव्याकरणादेवसाधुत्वबोधेत
दुत्तरकालेचवाक्यार्थावगतौआत्माश्रयान्योन्याश्रयचक्रकाणांदुर्वारत्वादितिदिक्॥साधुत्वज्ञानंतुनशाब्दबोधेहेतुःअस्तुवाअभियुक्तवाक्य
त्वेनसाधुत्वानुमितिःततःशाब्दबोधेजातेलस्यांतरेष्विवलसणवाक्यानर्गतेष्वपिलसणप्रवृत्तिरितिदिक्॥वस्तुतस्तुशरांपरस्परसावर्ण्य
निषेधेसत्यपिनस्यनिःपरःशतादिषुहिरूपद्वयंसिद्धान्तेपीष्यते॥शनात्परोणीतिविग्रहेकर्तृकरणेकृताबहुलमितिबहुलवचनाद्वासुंसुपेति
वासमासेलुतेपारस्करादित्वात्सुटिसकारस्यश्रुत्वं॥ननोनञ्चिचेतिहिर्वचनंननुशरोचीतिअनचीतिवाहित्वेनिषेधोस्कृदितिचेन्न॥तत्रना
ञ्झलावितिनिषेधादिकारेणशकारग्रहणात्ततोश्नरोश्नरीतिलोपविकल्पाद्दूशकारंत्रिशकारंवारूपमिति॥सावर्ण्यनिषेधेपिसिद्धान्त्यर्
वेदरूपद्वयं॥अनचिचेतिहित्वस्यापिवैकल्पिकत्वात्॥तत्रहित्वस्यवैकल्पिकत्वंयरोनुनासिकेनुनासिकोवेत्यनोवेत्यनुवृत्तेर्नास्त्येव॥
शाकल्पस्येतिपाक्षिकनिषेधाद्धालोपस्यवैकल्पिकत्वंतुश्नयोर्होन्यतरस्यामित्यतोन्यतरस्यांग्रहणानुवृत्तेरित्यवधेयं॥तस्मात्सावर्ण्यस
त्यसतिवापर श्शतादितिदिशकारकत्रिशकारकरूपयोरविशेषः परश्शताद्यास्तेषांपरासंख्याशतादिकात्इत्यमरःएवंरामाश्चेत्यश
स्सारमित्यादावपि॥अतएवभाष्ये अपरआहेत्युपक्रम्यवार्त्तिकद्वयमपिएकहेतुतयाव्याख्याय अस्तुवाग्रहणमिकारादिभिःशकारा
दीनामितिवाक्यशेषाध्याहारेणप्रतिज्ञाविकल्पार्थोवाशब्दइतिव्याख्यातं॥तत्रअपरआहेत्यपरितोषोद्भावनं॥तद्बीजंतुउक्तरीत्याशर्वसाव

र्ण्यनिषेधानिषेधयोःफलाविशेषेपिप्रागुक्तरीत्यादंडाग्रमित्यादिनसिद्धेत्॥ तदर्थंचसूत्रप्रत्याख्यानस्यवाक्यापरिसमाप्तिन्यायस्यवाआश्र
यणेआवश्यकेशरांशभिःसावर्ण्यभावाभ्युपगमोविर्मूलस्त्वेवेति॥स्यादेतत्॥अगृहीतसवर्णानामेवनाज्झलावितिनिषेधइतितावत्स्थितं
॥तथाचईकारादीनांप्राकारादिभिःसावर्ण्यनिषेधात्कुमारीशेतइत्यादौसवर्णदीर्घःस्यादित्याशंक्यअर्चीत्यनुवृत्त्यासमाहितं॥स्वस्थि
तेमालाकृइत्यादौषत्वंस्यात्॥हकारेणआकारग्रहणेसतिगौरीष्विदित्यादिवदिणःपरत्वानपायात्॥किंच॥विष्वपाभिरित्यत्रहोढइ
तिढत्वंस्यात्॥वागीशीरित्यत्रझयोहोन्यतरस्यामितिआकारस्यधकारःस्यात्॥गासीध्वमित्यत्रइणःषीध्वमितिमूर्द्धन्यादेशःस्या
त्॥दासीष्टेत्यादौदादेर्धातोर्घइतिघत्वंस्यात्॥रामआयातीत्यादौहशिवेत्युत्वंस्यात्॥देवाआयान्तीत्यादौहलिसर्वेषामितिनित्योयलोपः
स्यात्॥चारवापितेत्यादौयस्यहलइतियलोपःस्यात्पूर्वेनापितेत्यादौक्यस्यविभाषेतिलोपःस्यात्॥निचाय्येत्यादौहलोयमामितियलोप
श्चस्यादितिवहूपप्रसंगःअत्रोच्यते॥आकारस्यहकारोनसवर्णःततोप्याकारइतिअइउण्सूत्रोदात्तशिक्षारीत्याभिन्नप्रयत्नत्वा
त्॥सवर्णेणग्रहणमपरिभाष्यमानेतिग्रहणादितिवार्त्तिकमतेनुहकाराकारयोरेकस्यानाक्रान्तत्वादेवनातिप्रसंगःयद्वा॥आकार
सहितोचूआच्चसहलच्चआज्झलोइतिसूत्रेआकारश्लेषोव्याख्येयःतेनआकारस्यअचोच्चहल्भिःसहसावर्ण्यनिषिध्यते।आकारश्लेषेलिं
गंतुकालसमयवेलासुतुमुनित्यादिनिर्देशःअत्रपक्षेआश्वआश्वेतिहूहेनसवर्णदीर्घेणनाज्झलाविनिसूत्रेदीर्घात्परःप्लुतोपिनिर्दिष्टइतिव्याख्येय
तेनयियासोइत्यादौगुरोरनृतइत्यादौप्लुतादाकारात्परस्यसनःसस्यषत्वंनेत्यवधेयम्।भाष्यमतेतुऊष्मणामीषद्विवृततानाभ्युपगमेनसावर्ण्ये
नसन्धिरेवनास्तीतिसूत्रप्रत्याख्यानात्सकलमनाविलम्॥ ॥ इतिश्रीशब्दकौस्तुभेपथमस्याध्यायस्यप्रथमेपादेचतुर्थमान्हिकम्॥४॥

॥श्रीगणेशायनमः॥ ईदूदेद्विवचनंप्रगृह्यम्॥ ईदूदेद्विवचनंप्रगृह्यसंज्ञंस्यात्॥ हरीएतौविष्णूइमौगंगेअमू॥ नपरकरणमसंदेहार्थमि
तिवृत्तिकाराः अन्यथाहिएणादेशेकृतेह्रस्वस्यायंनिर्देशइत्यपिसंभाव्येत॥ अनश्चअकुर्वित्यत्रेत्यादावतिप्रसंगःस्यादितिभावः भाष्येतुव्यक्तिः
पदार्थौभेदकाश्चगुणाइतिपक्षमाश्रित्यगुणांतरयुक्तानांदीर्घाणांसंग्रहार्थंतपरकरणमित्युक्तं॥ इदंचइदितिप्रथमतकारस्यैवफलमिः
त्यवधेयं॥ तावतैवऊकारेपिसिद्धेः नात्परइतिपंचमीसमासपक्षस्यापिस्थितत्वात्॥ एकारस्यतुअणत्वादेवाणुदित्सूत्रेणसवर्णग्राहकः
तासिद्धेः ईदूतोःपरमनणत्वाद्गुणांतरयुक्तसंग्रहायप्रयुक्तोयत्नः तस्माद्भाष्यमनेनैभ्यदेतोस्तपरकरणमसंदेहार्थमेवगुणानामभेद
कत्वेतुईदित्यपिनयेत्यभिप्रेत्यएकरूप्यंवृत्तिरुद्भिरुक्तम् इहतपरइतिसूत्रेपंचमीसमासोमास्त्वित्यभिप्रेत्यऊदितितथाअतपरएवए
कारोनिर्दिष्टइत्यपिसुवचंस्यादेतत्॥ असंदेहायापिक्रियमाणंतपरत्वंप्लुतव्यावर्त्तयेदेव॥ घटायोन्मीलितचक्षुःपटंनहिनपश्यतीति
न्यायात्॥ अथायंदकारःऋदोरवितिवदितिचेत्॥ एवमपिएकारोगृह्यतांप्लुतं॥ अणत्वात्॥ नत्वीदूतौ॥ वाक्यपरिसमाप्तिन्यायेन
नणत्वात्॥ जातिपरोनिर्देशइतिचेत्॥ नहिह्रस्वेव्यतिप्रसक्तिः॥ दीर्घव्यक्तिरपिविशेषणीभूताविवक्षितेतिचेत्कथंतर्हिप्लुतसंग्रहः॥ न
चप्लुतव्यावृत्तिरिष्टेवेतिवाच्यम्॥ अग्नी३इतीत्यत्राप्लुतवदुपस्थितइतिसूत्रेणप्लुतत्वप्रयुक्तेप्रकृतिभावेनिषिद्धेपिप्रगृह्यत्वंप्लुतस्य
नस्येष्यमाणत्वात्॥ अप्लुतवदित्यस्यानुदेवदत्तेनोत्तरोचरितार्थत्वाद्वैयर्थ्यंनशंक्यं॥ तथाचषाष्ठेवार्त्तिकं॥ वह्वचनंप्लुतकार्यप्रतिषे
धार्थंप्लुतप्रतिषेधेहिप्रगृह्यप्लुतप्रतिषेधप्रसंगोन्येनविहितत्वादिति॥ अत्राहुभाष्यकारः॥ यथोद्देशंसंज्ञापरिभाषमित्याश्रयणात् प्रगृह्य
संज्ञांप्रतिप्लुतोसिद्धः तथाचहिमात्रत्वबुद्धेरप्रतिघातात्सिद्धासंज्ञाकार्यकालपक्षेपरंप्रगृह्यसंज्ञायाअप्यणोप्रगृह्यस्येत्येतद्देशात

यानांप्रतिप्लुतस्यसिद्धत्वेनानुनासिकः प्रवर्त्तेतैवेतिस्यादेवदोषः॥एतेनाग्नी३ इतीत्यादौप्रकृतिभावोपिव्याख्यातः॥प्लुतप्रगृह्याअचीति ज्ञापकात्स्वरसंधिषुप्लुतस्यसिद्धत्वेपिसंज्ञांप्रत्यसिद्धत्वान्नपायात्॥यथोद्देशपक्षएवेहाश्रीयतइत्युक्तत्वात्॥वस्तुतस्त्वनुनासिकप्रवृत्तिभयेनैवेहयथोद्देशपक्षाश्रयणं॥प्रकृतिभावस्तु कार्य्यकालपक्षेपिसूपपादः॥नचप्रगृह्याःप्रकृत्येत्यनेनैकवाक्यतापन्नासंज्ञांप्रतिप्लुतस्यसिद्धतयात्रिमात्रस्यसंज्ञादुरुपपादेतिवाच्यं॥प्लुतस्यसिद्धतायांवीजाभावात्॥यत्तूक्तंप्लुतःप्रकृत्येत्येतद्वज्ञापकमिति।तन्न।प्लुतशब्देनतत्स्थानिनलक्षणयासर्वसामंजस्यात्॥नचैवंलक्षणेवदोषइतिवाच्यम्॥श्रुतार्थापत्तिमूलकवाक्यांतरकल्पनापेक्षयालक्षणायाएवान्याय्यत्वात्॥अस्तुवाविशेषापेक्षंज्ञापकं॥सिद्धःप्लुतःप्लुतत्वप्रयुक्तेप्रकृतिभावइतिननुप्रगृह्यत्वप्रयुक्तेपि॥तस्मात्कार्य्यकालपक्षमाश्रित्यप्रकृतिभावस्यसमर्थयितुंशक्यत्वेपिअनुनासिकप्रवृत्तिवारणायैवेहयथोद्देशपक्षाश्रयणमितिस्थितम्॥अत्रहरदत्तः॥यद्यपिसंज्ञायामसिद्धःप्लुतस्तथाप्यनुनासिकपर्युदासेसिद्धएवतताश्रयस्यानेनसंज्ञाकृतादिमात्रस्यनसोनुनासिकविधौस्थानीकिंतुत्रिमात्रः॥नचस्थानिवद्भावात्तस्यापिप्रगृह्यत्वंअल्विधित्वात्॥किंचभवप्रयुक्तसिद्धप्लुतःस्वरसंधिष्वित्याश्रयणीयम्॥दंडआढकमितिप्लुतस्यदीर्घेणनिवृत्तिर्यथास्यात्॥अतएवसुश्लोकाऽ३इतिसुश्लोकेतिइत्यत्रगुणोभवेन्नप्लुतमेवनिवर्त्तयतिननुस्थानिनम्॥अन्यथात्याद्देशरूपेप्लुतःश्रूयेततदिहयथोद्देशेपिसंज्ञापरिभाषेकथमिवेष्टसिद्धिः॥कथंवाग्रंथेषुनपूर्वापरविरोधइतिविपश्चितःप्रष्टव्याइतिअत्राहुः॥यद्यपिह्रिमात्रस्त्रिमात्रेणापत्ततस्तथापिपूर्वत्रासिद्धमितिशास्त्रासिद्धत्वबोधनात्त्रिमात्रेपिह्रिमात्रएवायमितिबुध्याप्रगृह्यसंज्ञाक्रियते अतएवअग्नेत्यत्रमुत्वेकृतेतदुपजीवनेननाभावेचकृतेसुपिचेतिदीर्घोमुशब्देएवदशब्दोयमितिबुध्याप्राप्नोतितत्परिहा

रायनेत्रादत्याद्याश्रयणेननाभावेकर्त्तव्येऽनेचसतिमुभावोनासिद्ध इत्यष्टमेव्याख्यानम्॥ कृन्मेजन्तसूत्रेचसन्निपातपरिभाषयासमाहि
तम्॥ नत्विहहिमात्रेकृतांसंज्ञांस्थानिवद्भावेनत्रिमात्रेआनयामःयेनानेकविधाविधिनिषेधः शंक्येतनहिरजतभ्रमप्रयुक्ताप्रवृत्तिःशुक्तिं
गोचरयतीतियुक्तंएतावानेवपरंविशेषः रजतभ्रमोऽनाहार्य्यःप्रवर्त्तकः॥ इहतुशास्त्रप्रामाण्यादाहार्योऽपिपतित्तच्छास्त्रप्रवृत्तावप्रवृ
त्तौचनियामकइति॥ तदेतत्कैय्यटेनैवस्फुटीकृतम्॥ यदाहशास्त्रंसिद्धत्वाश्रयणाच्चपुनर्बुद्धावसत्यांप्रगृह्यत्वेविधीयमानेहिमात्र
त्वबुद्धिःप्रवर्त्तते नचाचक्ष्यतिअसिद्धवचनमुत्सर्गलक्षणभावार्थमादेशलक्षणप्रतिषेधार्थंचेति। यत्वनुकोरसिद्धइत्येतत्सूत्रस्थंवार्ति
कमिदं॥ उत्सृज्यतेनिवर्त्यतेआदेशेनेत्युत्सर्गःस्थानीसलक्षणंनिमित्तंयस्यकार्य्यस्यतुगादेस्तस्यप्रवृत्त्यर्थमित्यर्थः॥ तथाचैकरूप्यार्थं
सर्वत्रशास्त्रंसिद्धत्वमेवेतिभावः॥ एतेनयस्यानेनसंज्ञाकृतानसोनुनासिकविधौस्थानीतिप्रथमदूषणमुद्धृतम्॥ यदपिदंडाढकंसु
श्लोकेनीत्यादौआदेशःप्लुतः श्रूयेतेतितदपिन॥ उक्तरीत्यानत्राप्यादेशेनप्लुतस्यैवनिवृत्तेः॥ प्लुतोमयापठितइतिबुद्धिःपरंनस्यनास्ती
त्यन्यदेतत्॥ यत्तुषष्ठभाष्यकारोवक्ष्यतिसिद्धः प्लुतः स्वरसंधिष्वितिनत्तुइहोदनासिकपर्युदासानुरोधाद्यथोद्देशपक्षएवाश्रयणीयइति
स्थानेस्वरसंधिसामान्यापेक्षत्वापकाश्रयणेपिनदोषइत्याशयेननतुसामान्यापेक्षतायामेवकिंचिदाग्रहबीजमस्तीतिदिक्॥ ननूदाहर
णेषुईदादिकमेवहिवचनंनतुतदन्तमितिचेन्न अपदेशिवद्भावेनतदंतत्वात्॥ ननुईदेदन्तंहिवचनान्नमित्येवकथंनव्याख्यानम्॥ एवंहि
सतिव्यपदेशिवद्भावोनाश्रयणीयइतिचेन्न॥ कुमार्यौरमारंकुमार्य्यमारंवध्वोरमारंवध्वेमारमित्यत्रप्रत्ययलक्षणेनहिवचनांते अतिव्याप्तेः
॥संज्ञाविधौप्रत्ययग्रहणेतदंतग्रहणंनास्तीति सुप्तिङंतंपदमित्यत्रांतग्रहणेन ज्ञापितत्वाच्च॥ एतेनईदाद्यन्तंहिवचनंतदंतंप्रगृह्यंकुमा

र्व्यगारादौतुसकारांतंहिवचनंनन्वीसाद्यन्तमितिपरास्तम्॥संज्ञाविधौप्रत्ययग्रहणेनतदंताग्रहणात्॥यत्तुअस्मिन्पक्षेदूषणांतरमुक्तम्॥
अमुष्मैमुष्मैसमपद्येतांमुक्त्वास्तांवस्त्रेइत्यत्रशब्दांतरप्राप्त्याअनित्यंलुकंबाधित्वापरत्वाच्छीभावेकृतेनस्यलुकिप्रत्ययलक्षणेनमु
क्तीइत्यस्यप्रगृह्यत्वनास्यादितितन्न अंतरंगानपिविधीन्बहिरंगोपिलुग्बाधतइतिपरिभाषयाऔकारस्यैवलोपात्॥तस्यईदायंतत्वंवि
रहात्॥अस्तुतर्हिईदादिविशेष्यं नयाचहिवचनसंज्ञंईदादिप्रगृह्यमित्यर्थइतिचेन्नगंगेइत्यादेःसिद्धावपिदृश्यतेइत्याद्यसिद्धेः हिव
चनावयवोह्ययमेकारोननुहिवचनम्॥किंच॥प्रगृह्यमित्यस्यसन्निहितत्वाद्हिवचनमेवसंज्ञिनतीदादिविप्रकृष्टत्वात्॥तस्माद्यथाव्या
ख्यातमेवमनोरमम्॥अत्रवृत्तिकाराः ॥मणीवादीनांप्रतिषेधोवक्तव्यइतिपठित्वामणीवरोदसीवदंपतीवजंपतीवेत्युदाजहुः॥मुनि
त्रयानुक्तत्वादप्रमाणमिदमितिकैयटादयः॥एवंवदद्भिःसमानन्यायतयाअन्येषांमुनित्रयानुक्तानांवृत्तिरुन्मात्रोक्तानांतुरीयस्येष्टिः
शंसिदुहिगुहिभ्योबाकृतमेकेछंदसि। भाषायांच अंगगात्रकंठेभ्यस्त्विष्यते इत्यादीनामनादर्त्तव्यत्वोक्ता।मणीवोष्ट्रस्यरेवेतेइतिनुइ
वार्थकेननिर्वाह्यमित्याहुः॥न्यासकारस्तु संबुद्धौशाकल्यस्येतावितिशाकल्यग्रहणस्यैषांहावलोकितन्यायेनेहसंबंधाद्व्यवस्थितवि
भाषाश्रयणाच्चेदलभ्यतइत्याह। केचित्तुइवार्थेयंवशब्दःप्रयुक्तोभीमोभीमसेनइतिवत्॥कादंबरखंडितदलानिवपंकजानिइत्यादिवच्चे
त्याहुः॥वस्तुनस्तुवह्ययथातथैवैवंसाम्यइत्यमरग्रंथेववेतिपाठमाश्रित्यशात्रववपुर्यशइतिकालिदासप्रयोगस्यतद्व्याख्यातृभिरुदा
हरणात् संवैसत्यं॥पुक्तंह्यायमेवपाठः॥प्रातिपदिकप्रक्रमेनहिनस्यवतेरनुगुणत्वात्॥एतेनस्फुटोत्पलाभ्यामलिदंपतीवतहिलो
चनाभ्यांकुचकुड्मलशोभया॥निपत्यबिंदूत्दिकज्जलाविलोमणीवनीलोत्तरलौखिरेजतुः॥ इतिश्रीहर्षप्रयोगोपिगताथैः॥अदसोमात्

अस्मात्परावीदूतौप्रगृह्येास्तः॥ अमीईशाः॥ रामकृष्णावमूआसाते॥नचअमूइत्युदाहरणंपूर्वसूत्रेणगतार्थमितिवाच्यम्॥तस्मिन्कर्त्तव्येप्लुतस्यासिद्धत्वात्॥अदसोमादितिसूत्रंप्रतिनुनासिद्धत्वम्॥ आरंभसामर्थ्यात्॥ तथाचवार्त्तिकं॥ आश्रयात्सिद्धत्वंचयथारोरुत्वेइति॥पुंहिवचनमेवोदाहरणंस्त्रीनपुंसकयोर्हिर्वचनेनुप्लुतस्यासिद्धत्वेप्येकारांतत्वात्तूपूर्वेणैवसिद्धासंज्ञा॥ततश्चप्रकृतिभावोनुनासिकपर्युदासश्चसिद्धएवेत्यवधेयम्॥ यत्तुहरदत्तेनोक्तमणोप्रगृह्यस्येत्यत्रोपस्थितेनपूर्वसूत्रेणसंज्ञायांक्रियमाणायांप्लुतस्यसिद्धत्वात्लिंगत्रयेपिहिवचनेनुनासिकपर्युदासःपूर्वेणैवसिद्धःएतत्सूत्रारंभस्तुअहिवचनार्थः पुंसिहिवचनेप्रकृतिभावार्थश्चेति॥तच्चिंत्यम्॥प्लुतसंग्रहानुरोधेनपूर्वसूत्रेयथोद्देशपक्षस्यैवस्थापितत्वात्॥तस्मात्पुंसिहिवचनेनुनासिकपर्युदासोप्येतत्सूत्रस्यफलंनतुप्रकृतिभावमात्रमित्यवधेयम्॥अथापिकथंचिद्धरदत्तोक्तिस्समर्थयितव्येत्याग्रहस्तर्हिइत्थंसमर्थनीया॥पूर्वसूत्रेकार्यकालपक्षएवास्तु॥नचैवंप्लुतस्यानुनासिकपर्युदासोनस्यादितिवाच्यम्॥ ईईउ३न्॥ऊऊऋ३त्॥इतिदीर्घोत्तरभागेप्लुतस्यापिप्रश्लिष्टनिर्देशात्॥एकारस्तुअणित्वादेवप्लुतंग्रहीष्यति॥नचतादृष्प्लुतपरइतितत्संज्ञाग्रहणापत्तिः॥ऋदोरविति वदकारएवायमित्याशयात्॥युक्तंचैतत्॥यथोद्देशपक्षेप्लुतात्प्रागेवसंज्ञाप्रवृत्तौसत्यांननुप्लुतेरुनेतमेवहिमात्रत्वेनपश्यंत्याअपिसंज्ञायाःपुनःप्रवृत्तौबीजाभावात्॥नाभावस्तुभावात्प्रागप्रासस्ततोमुत्वनिमित्तकंनाभावमाश्रित्यमुभावेदशब्देयमितिबुद्ध्याप्लुवन्दीर्घःप्रतिविधीयतइतिउचितम्॥नत्वसौप्लुतात्प्राक्प्रगृह्यसंज्ञावत्तुभावात्प्रागेवप्रवृत्तोयेनपुनर्नप्रवर्त्तेत॥एतेनपूर्वसूत्रस्थहरदत्तग्रंथोप्युज्जीवितइतियावद्ग्रंथंसाधु॥भाष्यकैयटयोस्त्वयंभावःप्लुतात्प्राक्प्राप्तापिप्रगृह्यसंज्ञाफलाभावान्नक्रियतेनचप्लुतेनुनासिकप्रवृत्तिरेवफलमस्तितिवाच्यम्॥संज्ञायाअप्रवृत्तावपितल्लाभात्॥प्रपंचस्त्वप्रयुक्तपर्युदा॰

सस्यैवविधिस्पृष्टस्यतत्फलत्वोचित्याच्चेति॥सुश्लोकेतीत्यादावप्यंतरंगत्वान्मुतः॥अंतरंगंबलीयइतिन्यायात्॥प्रकृतमनुसरामः॥नन्वा
रभ्यमाणेप्यस्मिन्सूत्रेपूर्वसूत्रेणैककरूप्यार्थंयथोद्देशपक्षएवाश्रयणीयः॥तथाचरुत्वस्योत्वंप्रतीवप्रगृह्यसंज्ञांप्रत्येवमुत्वमीत्वयोःसिद्धं
त्वंस्यात्॥नत्वयादीन्प्रत्यपि॥ततश्चामीआसतेइत्यत्रअयादेशप्रसंगः॥अमूआसातेइत्यत्रउंस्यावादेशः॥अमीअत्रेत्येडःपरांतादतीत्ये
कादेशप्रसंगश्च॥नचसंज्ञांप्रत्येवसिद्धत्वेवचनानर्थक्यंस्यादितिवाच्यं॥अनुनासिकपर्युदासेनचरितार्थत्वात्॥अंत्योच्यतेयद्यनुनासिक
पर्य्युदासमात्रंप्रयोजनंस्यात्तर्हिसंज्ञासूत्रंनप्रणयेत॥अणोप्रगृह्यस्यानुनासिकः अदसोनेत्येवब्रूयात्असौअमुकेअमुकाभ्यामित्यादौनुम्मि
ङ्प्रभृन्तिपिनभवत्यनुनासिकः॥अनएत्वादनवसानत्वाच्च॥अतस्तत्रमाङ्हणमीदूङ्हणंवानकर्त्तव्यं॥नचैवंहेअमुकइत्यत्रापिनिषेधापत्तिः
त्यदादीनामंबोधनविभक्तिविरहस्यौत्सर्गिकत्वात्॥अतःसंज्ञारंभसामर्थ्यात्प्रकृतिभावार्थत्वमप्यस्यविज्ञायतेनहूलाच्च अपादिवि
रहोपिसिद्ध्यति॥प्रकृतिभावस्यापवादरूपतयाउपसंजाननिमित्तोप्युत्सर्गउपजनिष्यमाणनिमित्तेनाप्यपवादेनबाध्यतइतिपरिभाषावंता
राच्च॥यत्तुसंज्ञारंभसामर्थ्यादयादीनांसंज्ञांचप्रतिमुत्वमीत्वयोः सिद्धत्वज्ञापनादयादीन्ज्ञापित्वापरत्वान्मुत्वमीत्वेइतिनव्य॥अथाद्यभाव
स्यज्ञापनेलाघवात्॥अर्थापत्तेर्हिसाक्षादुपपादकविषयताऔत्सर्गिकी। किंच।मुत्वमीत्वयोरेकपदाश्रयत्वेनबलीयस्त्वम्॥अंतरंगंव
लीयइतिन्यायात्॥नत्वकृतंविप्रतिषेधोपन्यासः॥नाजानंतर्य्यइतिनिषेधस्तुअसिद्धंबहिरंगमित्यस्याएवनतूदात्तपरिभाषायाःयद्यप्य
सिद्धंबहिरंगमंतरंगेइत्यनयैवगतार्थत्वादंतरंगवल्लवदितिपृथक्परिभाषानकर्त्तव्येतिविप्रतिषेधेपरमितिभाष्यकृदुक्तस्यति॥तथापिअभ्यु
च्चयमात्रंतन्नसाफल्यादनिरपवादत्वाभ्यांफलेविशेषात्॥रसइहेत्यत्रहिसप्तम्येकवचनेनसहगुणोंतरंगः।सवर्णदीर्घस्तुबहिरंग॥नचेहा

सिङ्पपरिभाषयागुणोलभ्यते॥ नाजानंतर्य्यंवृतिनिषेधात् अतएवाचः परस्मिन्निति सूत्रेभाष्यकृद्वक्ष्यति॥ आरभ्यमाणेनित्येसौपरश्चासौ व्यवस्थया॥ युगपत्संभवोनास्तिबहिरंगेणसिद्ध्यतीतिएतच्चतत्रैवस्फुटीकरिष्यते॥ अतएवोक्तंवार्तिककृताशचङंतस्यांतरंगलक्षण त्वादिति॥ पितिअदुद्रुवदित्यादिचतत्रोक्षादृतंज्ञापकंचात्र ओमाङोश्चेत्याङ्ग्रहणं॥ तद्धिरवद्वाआऊढेत्यत्रपरमपिसवर्णदीर्घबाधि त्वाधातूपसर्गयोः कार्यंमंतरंगमित्यंतरंगत्वाद्गुणेकृतेवृद्धिप्राप्तौसत्यांपररूपंयथास्यादितिक्रियते॥ एतच्चसंप्रसारणाच्चेतिसूत्रेभाष्ये स्पष्टं। कथंतर्हिवार्तिककृतोक्तंविप्रतिषेधाद्धेतिसत्यं॥ अतएवापरिनोषाङ्ग्राह्यकारेण अथवेतिपक्षांतरमाश्रितमितिदिक्॥ मान्किंअमुं केत्र॥ नन्विहसूत्रेईदूतावेवानुवर्त्तिनौनत्वेकारः॥ सत्यं। सतिमाङ्ग्रहणेएकारोनानुवर्त्तते॥ अदसोमात्परस्यतस्यासंभवात्॥ अ न्यथात्वनुवर्त्तेत॥ एकदेशानुवृत्तिस्तुदुर्ज्ञाना॥ तस्मादेकारानानुवृत्तितात्पर्यग्राहकफलकंमाङ्ग्रहणमितिस्थितं॥ अत्रेदंचिंत्यम्॥ ईदूतौसप्तम्यर्थेप्रगृह्यौ अदसःएचहिवचनम्॥ इत्येवकृतोनसूत्रितं॥ एवंहिपूर्वसूत्रस्थमीदूङ्ग्रहणंप्रकृतसूत्रेमाङ्ग्रहणंचनक र्त्तव्यमितिमहल्लाघवं॥ एकदेशानुवृत्तिश्चनाश्रयणीयाभवतीति॥ शे॥ अयंप्रगृह्यःस्यात्॥ अस्मेइन्नाङ्ग्रहस्यती॥ चतुर्थीबहुवच नस्यस्थानेसुपासुलुगितिसूत्रेणशे आदेशः॥ शित्वात्सर्वादेशताशेषेलोपः॥ नयुष्मेवाजबंधवः॥ युष्माकित्यर्थः॥ अत्रपदपा ठकालेयुष्मेइत्युदाहरणंबोध्यंसंहितायांतुअचूपरत्वाभावेनसत्यसतिवाप्रगृह्यत्वेविशेषाभावात्॥ एवंत्वेरायः सुद्युम्नास्त्वे त्यस्मादित्यादीनामपिपदपाठकालेउदाहरणत्वंबोध्यम्॥ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवग्रहणम्॥ तेनेह न। काशेकुशेव शेहरिशेवभ्रुशे॥ हरिवभ्रुआभ्यांलोमादित्वाच्छप्रत्ययः॥ नतःसप्तम्येकवचनम्॥ निपातएकाजनाङ्॥ एकोऽनिपात आङ्भिन्नः प्र

गृत्यः स्यात् अनिषेधाधिक्षेपयोः॥अअवद्यं इविस्मये॥इइंद्रः उजुगुप्सासंतापान्वर्थाप्यर्थेषु॥उउमेशः॥एकाजितिकर्मधारयः वर्त्तिप
दार्थप्राधान्येनांतरंगत्वात्॥व्याहरनि मृगइत्यादिनिर्देशाच्च॥तेनेहनप्रेदंब्रह्मवृत्तनूर्यैष्वाविश॥प्रेङइत्यादि॥स्यादेतत्॥यद्ययंकर्म
धारयस्तर्हिएकग्रहणंव्यर्थं॥निपातोयोचइत्येनावनैवाभिमतसिद्धेः॥नचविपरीतविशेषणविशेष्यभावेनअजंतोयोनिपातस्तस्यार्थः
स्याद्विशेषणेनतदंतविधेरितिवाच्यं॥तथासतिव्यावर्त्यालाभेनविशेषणवैयर्थ्यापत्तेः॥नचहलंतेव्यावर्त्ये॥तस्यसंज्ञायांसत्यामपिबाध
कभावात्॥नचपुरोस्तीत्यादौहलंतस्यसंज्ञायांसत्यांप्रकृतिभावाद्रोरुत्वेनस्यादिनिवाच्यं॥प्रएत्यसंज्ञांप्रतिरुत्वस्यासिद्धतयादोषा
भावात्॥नचसांतस्यकृताप्रएत्यसंज्ञाएकदेशविकृतस्यानन्यतयारेफांतस्यापिस्यादेवेतिप्रकृतिभावप्रसंगस्तदवस्थएवेतिवाच्यं॥प्र
एत्यसंज्ञांप्रतीवप्रकृतिभावंप्रत्यपिरुत्वस्यासिद्धत्वात्तस्कारांतस्यतुनकिंचिदपिसिद्धंकांडस्थंप्रत्ययोनिप्रत्ययप्रकृतिभावेनव्यावर्त्यते॥त
स्मादत्रानिपातस्यविशेषणेअजग्रहणंव्यर्थमेवस्यादितिसुष्ठूक्तं॥ननुअजंतस्यैवयथास्याद्रुजमात्रस्यमाभूदित्येवमर्थंविशेषणंकिंन
स्यादितिचेन्न।व्यपदेशिवद्भावेननस्याप्यजंतत्वानपायात्॥विशेषणसामर्थ्याद्व्यपदेशिवद्भावोनप्रवर्त्ततइतिचेन्न॥तदंतविधिपरित्यागे
नापितत्सार्थक्यस्यसुवचत्वात्॥तथापिअन्यतरपरित्यागेआवश्यकेविनिगमकंकिमितिचेत् अनाङ्ग्रहणमेवेत्यवेहि॥तद्व्यपदेशिवद्भा
वमात्रबाधेव्यर्थंस्यात्॥तस्मादत्रोविशेषणत्वेपिअनाङ्ग्रहणाज्ज्ञापकात् तदंतविधिर्नअत्रोविशेष्यत्वेनतुनतदंतदंतविधिरिति॥उभयथा
प्येकग्रहणंव्यर्थमेवेतिस्थितम्॥ननुअचसमुदायनिवृत्त्यर्थमेकग्रहणमस्तु॥अइउअपेहीतिसमुदायस्यैवसंज्ञास्यान्नावयवानांएका
ज्हिर्वचनन्यायादितिचरमस्यैवप्रकृतिभावः स्यान्नतुपूर्वयोरिति॥मैवं॥अजित्येकत्वस्यविवक्षयैवसमुदायनिरासंभवात्॥अत्राहभा

ष्यकारः॥ अच्समुदायग्रहणशंकानिरासार्थमेकग्रहणंकुर्वन् ज्ञापयतिवर्णग्रहणेषुव्यक्तिसंख्यानविवक्ष्यतेकिंतुजातिरेवनिर्दिश्य
तइतितेनदंभेर्हलग्रहणस्यजातिवाचकत्वात्सिद्ध मितिवार्तिककृतावक्ष्यमाणंसूत्रेणैवज्ञापितंभवतिदंभेःसिद्धमित्यन्वयः अत्रहेतुर्हल
ग्रहणस्यजातिवाचकत्वादिति॥तेनदंभेःसनिकृतेसनीबंतेनिवकल्पादिडभावेदंभद्धेतिद्दीनोःकुनयोरत्रलोपोभ्यासस्येत्यभ्यासलो
पेहलंनाच्चेतिसनःकित्वान्नलोपेभष्भावेचकृतेधिष्वनीधीष्वनीतिरूपद्वयंसिद्ध्यतिहलग्रहणस्यव्यक्तिपरत्वेतुपोत्रेकःसमीपोहलभकारोनततः
पक्षन्।यस्माच्चपरःसन् भकारान्नासाविकःसमीपइतिकित्वंनस्यात्॥तथातूहूहिंसायांतुदादिःसन्॥उदित्वादिड्वेतिदंहिषतितित्क्षतीति
नस्यादितिदिक्।स्यादेतत्॥अइउअपेहीत्यत्रएकाज्द्विर्वचनन्यायेपन्यासोनयुक्तःसमुदायसंज्ञयावयवानामननुग्रहात्॥अतएवहि
निर्ग्लीयान्निर्ग्लेयादित्यादौबहूनांसन्निपातेद्वयोःसंज्ञास्वीकृता॥नापिनिपातसमुदायस्यनिपातग्रहणेनग्रहणंएकैकस्मिन्निपातेसंज्ञा
विधानसंभवात्॥सत्यं।एकाज्समुदायग्रहणशंकामात्रंतुस्यादेव॥तन्निरासायैवक्रियमाणमेकग्रहणंप्रागुक्तमर्थंज्ञापयति॥वस्तुत
स्त्वपृक्तसंज्ञायामेकग्रहणंमुक्तार्थज्ञापकमित्याश्रित्यप्रवृत्तसूत्रेएकग्रहणस्यपरित्यागएवन्यायात्॥निपातइतिकिम्॥चकारात्र॥
तथाअतनेर्डः॥अः॥हेअंआगच्छेत्यपिप्रत्युदाहरणम्॥आडुनाडोर्व्यवस्थामाह भाष्यकारः॥ईषदर्थेक्रियायोगेमर्यादाभिविधौ
चयः॥एतमातंडितंविद्याह्याक्यस्मरणयोरडितिदितिइहएतच्छब्देनपूर्वमनिर्दिष्टत्वादेतमित्यस्य एनादेशोनकृतइतिकश्चित्॥तन्न॥अ
न्वादेशश्चकथितानुकथनमात्रंनत्विदमेवकथितस्येदमानुकथनमितिभाष्यकृतावक्ष्यमाणत्वात्॥तस्माद्यत्किंचिद्धिधायवाक्यानरे
णान्यदुपदिश्यतेसोन्वादेशः इहतुईषदर्थादौयोवर्त्ततइतिनैवविधेयाकिंतुपरिचायकतामात्रेणोपात्ता अतोनैनादेशः॥एतेननक्तंभो

रूपत्वमेवतद्दिमंगा धेगृहंप्रापयेत्यपि व्याख्यातं॥ भीरुत्वस्यविधेयत्वाविवक्षणात्॥ मिङ्मात्रस्यैवहेतुत्वेनानुवादादितिदिक्॥ ईषदर्थेआउष्णं ओष्णं॥ आङीषदर्थईतिकुगतीतिसूत्रेवार्त्तिककृताङीत्युक्तत्वात्तत: क्रियायोगेआङ्तः ल्यप्प्रादिषुङित्त्वाठिनः॥ मर्यादाभिविधौचेतिसमाहारहूंहूंआगमशासनस्यानित्यत्वान्नुमभाव:॥ मर्यादयामर्हतेअभिविधावितिमध्यमपदलोपीवासमासः॥ मर्यादायां॥ आउदकान्तात्॥ ओदकांतात्॥ अभिविधौ आअहिछत्रात्॥ आहिछत्रात्॥ विनातेनेतिमर्यादासहतेनेत्यभिविधिः॥ आङ्मर्यादाभिविध्योरितिचङित्त्वनिर्दिष्टः॥ पूर्वप्रक्रांतस्यवाक्यार्थस्यान्यथात्वद्योतनायआकारःप्रयुज्यते॥ आएवंनु मन्यसेनैवंपूर्वमंस्थाः॥ संप्रत्येवंमन्यसइत्यर्थः॥ वाक्यारंभसूचनायआकारइत्यपरे॥ तथास्मृतेःसूचकआकारःप्रयुज्यते॥ ततःस्मृतोर्थोनिर्दिश्यते आएवंकिलतदिति॥ अत्रचवाक्यस्मरणयोरङित्वंदित्यत्रैवतात्पर्यं॥ अतोवाक्यस्मरणाभ्यामन्यत्रर्ईषदर्थाद्यभावेपिङित्त्वंबोध्यम्॥ तेनआमेन्यस्यरजसोयदभ्रंआंअपोवृणानेत्यत्रसम्यगर्थेरेरप्याकारस्यङित्त्वेनआङोनुनासिकश्छंदसीतिप्रवर्त्तनेइनिषष्ठेहरदत्तादयः॥ युक्तंचैतत्॥ ङिदङित्त्वोरन्यतरलक्षणमात्रेणार्थादुभयविवेकलाभेतत्रापिलाघवादङित्त्वलक्षणेतात्पर्य्यमाश्रित्यभागांतरस्यावयुत्पन्नुवादरूपत्वात्॥ ओत्॥ ओदंतोनिपातःप्रगृह्यसंज्ञःस्यात्॥ आहोइतिउताहोइति॥ निपातइतिकिं॥ देवोसिवषट्तेविष्णवासआवायवायाहि॥ विष्णोव॥ यत्तुगवित्ययमहेत्येतदेवनिपातग्रहणस्यव्यावर्त्यमिति॥ तन्न॥ प्रगृह्यसंज्ञायांसत्यामपिक्षत्यभावात्॥ नचैवंप्रकृतिभावापत्तिः॥ प्रकृतिभावविधौपदांताधिकारात्॥ नचायंपदांतोभवत्येवेतिभ्रमितव्यम्॥ अनुकार्यानुकरणयोरभेदविवक्षयार्थवत्त्वाभावेनाप्रातिपदिकत्वाद्विभक्तेरनुत्पत्तावेवैतद्रूपाभ्युपगमात्॥ अन्यथाविभक्तिश्रवणापत्तेः॥ नचैवमपदस्यप्रयोगासंगतिरितिवाच्यम्॥ अपदंनप्रयुंजीतेत्युह्योषस्य अपरिनिष्ठितंनप्रयुंजीतेत्येवंपरत्वात्॥ तस्यचसुप्तिङादिविषयकतत्तद्वि

ष्यकारः॥ अच्समुदायग्रहणशंकानिरासार्थमेकग्रहणंकुर्वन् ज्ञापयतिवर्णग्रहणेषुव्यक्तिसंख्यानविवक्ष्यतेकिंतुजातिरेवनिर्दिश्य
नट्तिनेनदंभेर्हल्ग्रहणस्यजातिवाचकत्वात्सिद्ध मितिवार्तिककृतावक्ष्यमाणंसूत्रेणैवज्ञापितंभवतिदंभेःसिद्धमित्यन्वयः अत्रहेतुर्हल्
ग्रहणस्यजातिवाचकत्वादिति॥तेनदंभेःसनिकृतेसनीबंतेनिविकल्पादिडभावेदंभद्भ्चेतिद्वीनोःकृतयोरत्रलोपोभ्यासस्येत्यभ्यासलो
पेहलंताच्चेतिसनःकित्वान्नलोपेभष्भावेचकृतेधिष्णतिधीष्णतीतिरूपद्वयंसिद्ध्यतिहल्ग्रहणस्यव्यक्तिपरत्वेतुयोत्रेकःसमीपोहल्भकारोनततः
परस्सन्।यस्माच्चपरःसन् भकारान्नासाविकःसमीपइतिकित्वेनस्यात्॥नथातेहूहिंसायांतुदादिःसन्॥उदित्वादिड्वातिंहिषतितित्सतीति
नस्यादितिदिकस्यादेतत्॥अइउअपेहीत्यत्रएकाज्द्विर्वचनन्यायेपन्यासोनयुक्तःसमुदायसंज्ञयावयवानामननुग्रहात्॥अतएवहि
निर्ग्लीयान्निर्ग्लेयादित्यादौबहूनांसन्निपातेद्वयोःसंज्ञास्वीकृता॥नापिनिपातसमुदायस्यनिपातग्रहणेनग्रहणंस्यैकैकस्मिन्निपातेसंज्ञा
विधानसंभवात्॥सत्यं।एकाज्समुदायग्रहणशंकामात्रंतुस्यादेव॥तन्निरासायैवक्रियमाणमेकग्रहणंप्रागुक्तमर्थंज्ञापयति॥वस्तुत
स्त्वपृक्तसंज्ञायामेकग्रहणंमुक्तार्थज्ञापकमित्याश्रित्यप्रवृत्तसूत्रेणैकग्रहणस्यपरित्यागएवन्यायात्॥निपातइतिकिम्॥चकारात्र॥
तथाअतनेर्डः॥अः॥हेअंआगच्छेत्यपिप्रत्युदाहरणम्॥आङ्नाङोर्व्यवस्थामाह भाष्यकारः॥ईषदर्थेक्रियायोगेमर्यादाभिविधौ
चयः॥एतमातंडितंविद्याह्वयस्मरणयोरडितिदिति॥इहएतच्छब्देनपूर्वमनिर्दिष्टत्वादेतमित्यस्य एनादेशोनकृतइतिकश्चित्॥तन्न॥अ
न्वादेशश्चकथितानुकथनमात्रंनत्विदमेवकथितस्येदमानुकथनमितिभाष्यकृतावक्ष्यमाणत्वात्॥तस्माद्यत्किंचिद्धि धायवाक्यंनरे
णान्यदुपदिश्यतेसोन्वादेशः इहतुईषदर्थादौयोवर्त्ततइतिनैवंविधेयाकिंतुपरिचायकतामात्रेणोपात्ता अतोनैनादेशः॥एतेननक्तंभी

रूपत्वमेवतदिमंराधेगृहंप्रापयेत्यपिव्याख्यातं॥ भीरुत्वस्यविधेयत्वाविवक्षणात्॥ सिङ्लस्पेवहेतुत्वेनानुवादादितिदिक्॥ ईषदर्थेआउष्णं ओष्णं॥ आडीषदर्थईतिकुगतीतिसूत्रेवार्त्तिककृताडिह्यवस्तुतः क्रियायोगेआङितः ल्यबादिषुडिःत्यठिनः॥ मर्यादाभिविधौचेतिसमाहा रहूंढूआगमशासनस्यानित्यत्वानुमभावः॥ मर्यादयासंहतेअभिविधावितिमध्यमपदलोपीवासमासः॥ मर्यादार्थां॥ आउदकान्तात्॥ अभिविधौ आअहिछत्रात्॥ आहिछत्रात्॥ विनातेनेतिमर्यादासंहतेनेत्यभिविधिः॥ आङ्मर्यादाभिविध्योरितिचडिःत्रिर्दिष्टः॥ पू र्वप्रक्रांतस्यवाक्यार्थस्यान्यथात्वद्योतनायआकारःप्रयुज्यते॥ आएवंनु मन्यसेनैवंपूर्वमसंस्थाः॥ संप्रत्येवमन्यसइत्यर्थः॥ वाक्यारंभ सूचनायआकारइत्यपरे॥ तथास्मृतेःसूचकआकारःप्रयुज्यते॥ ततःस्मृतोर्थोनिर्दिश्यते आएवंकिलतदिति॥ अत्रचवाक्यस्मरणयोरडिःदि त्यत्रैवतात्पर्यं॥ अतोवाक्यस्मरणाभ्यामन्यत्रईषदर्थोद्यभावेपिडिःलंबोध्यम्॥ तेनआमेन्यस्यरजसोयदभ्रंआंअपोवृणानेत्यत्रसम्यग्वृ त्तेरप्याकारस्यडिःत्वेनआङोनुनासिकश्छंदसीतिप्रवर्त्तनेइतिषष्ठेहरदत्तादयः॥ युक्तंचैतत्॥ डिदडिःदोरन्यतरलक्षणमात्रेणार्थादुभयविवेक लाभेतत्रापिलाघवादडिःलक्षणेतात्पर्यमाश्रित्यभागांतरस्यावयुत्पन्नवादरूपत्वात्॥ ओत्॥ ओदंतोनिपातःप्रगृह्यसंज्ञःस्यात्॥ आहोइतिउताहोइति॥निपातइतिकिं॥देवोसिवपट्तेविष्णवासआवायवायाहि॥विष्णोव॥यत्तुगवित्ययमहेत्येतदेवनिपातग्रहणस्यव्यावर्त्यमिति॥तन्न ।प्रगृह्यसंज्ञायांसत्यामपिप्लुत्यभावात्॥ नचैवंप्रकृतिभावापत्तिः॥ प्रकृतिभावविधौपदांताधिकारात्॥ नचायंपदांतोभवत्येवेतिभ्रमितव्यम्॥ अनुकार्यानुकरणयोरभेदविवक्षयार्थवत्त्वाभावेनाप्रातिपदिकत्वाद्विभक्तेरनुत्पत्तावेवैनद्रूपाभ्युपगमात्॥ अन्यथाविभक्तिश्रवणापत्तेः। नचै वमपदस्यप्रयोगासंगतिरितिवाच्यम्॥ अपदंनप्रयुंजीतेत्युह्योषस्यअपरिनिष्ठितंनप्रयुंजीतेत्येवंपरत्वात्॥ तस्यचसुप्तिङादिविषयकनत्तद्धि

धिशास्त्रमूलकत्वात्॥ इहतूक्तरीत्यासऊवृविभक्तेरप्यत्राप्त्यागेइतिस्वरूपस्यैवपरिनिष्ठितत्वात्॥ अतएवेहलोपःशाकल्यस्येत्यपिनप्रवर्त्तते॥
कथंतर्हिपूर्वसूत्रेशेर्थवद्ग्रहणादितिवार्त्तिकेएङः पदांतादितिपूर्वरूपंकृतमितिचेत्॥ तत्रानुकार्यानुकरणयोर्भेदंविवक्षितत्वाविभक्तिंकृत्वाच
र्णेषुअर्थवान्शेर्थवानितिसमासेनसुपोलुकंकृत्वाव्याख्यानात्॥ एतेनउत्तरसूत्रेसंबुद्धावितिकिंगवित्ययमाहेत्युदाहरंतोवृत्तिकाराअपि
प्रत्युक्ताः॥ तस्मादिहदेवोसीत्यादिकमेवप्रत्युदाहरणंबोध्यम्॥ नचएङःपदांतादित्यारंभसामर्थ्यादेवतत्सिद्धिः हरेवमच्छेत्यादौचरितार्थ
त्वात्॥ नचैङ्ग्रहणसामर्थ्यं॥ ङःसिङसोश्चेत्युत्तरार्थत्वात्॥ उत्तरसूत्रेतुसंबुद्धिग्रहणाभावेआहोइतीत्यादावपिपरत्वाद्विकल्पापत्तिः॥ पूर्व
सूत्रस्य अहोईशाइत्यादौउत्तरस्यतुविष्णोइतीत्यादौलब्धावकाशतयाविप्रतिषेधसंभवात्॥ नचेहओदंतस्यकार्यितयाउत्तरत्रंतुविशेष्य
सन्निधानेनतदंतविधिविरहात्ओकारमात्रस्यकार्यितयाभिन्नविषयित्वेकथंविप्रतिषेधइतिवाच्यं॥ त्रपूरणामित्यादौप्रकृतिप्रत्ययावयवयोर्नु
म्नुटोरिवेहापिफलविरोधेनविषयभेदेपिविप्रतिषेधसंभवात्॥ अर्थाधिकारपक्षेउत्तरसूत्रेप्योकारांतस्यसंज्ञित्वाच्च॥ तस्मात्सूत्रद्वयेपिग
वित्ययमाहेतिप्रत्युदाहरणंनेतिस्थितं॥ प्रकृतिभावेपदांतग्रहणंनसंबध्यतइत्याशयेनतुवृत्तिग्रंथोयोज्यः॥ अस्मिंश्चपक्षेमंडूकप्लुतिन्यायेने
कोसवर्णइत्यत्रपदांतग्रहणंसंबंधनीयमेव॥ अन्यथागौर्यौगौर्य्यइत्यादावतिप्रसक्तेरितिदिक्॥ स्यादेतत्॥ निपातसमुदायाएते॥ आहउआहो
उतआह उताहोइत्यादि॥ ततश्चादिवद्भावान्निपातएकाजित्यनेनैवसिद्धासंज्ञा॥ नचैवमाहोइतीत्यादिषु ऊँ इत्यस्यप्रसंगः निरनुबंधकस्यै
यमुकारः ननुउञ्इतिसमाधानात्॥ अतएवउञ इतिसूत्रेञ्कारोच्चारणमपिसार्थकं॥ अतएवचउञ्ऊँइत्यत्रभाष्यकृतोक्तं॥ ह्लादुका
रविमौ॥ एकोननुबंधकः॥ अपरःसानुबंधकइति॥ नचैवमपिआउओइत्यत्रआङ.नाद्योरेकादेशस्यानाङितिप्रतिषेधेप्राप्तेप्रतिप्रसवाये

दमितिवाच्यम्॥अनाङित्यस्यपर्य्युदासाश्रयणेनआङ्नाङोरेकादेशस्यादिवङ्गावाद्नाङ्·ग्रहणेनग्रहणात्॥प्रसज्यप्रतिषेधेहिअसमर्थसमा
सोनास्यभेदश्चस्यात्॥भाष्येतुप्रतिषिद्ध्यर्थमेतदित्युक्तिरभ्युच्चयमात्रम्॥कथमन्यथानुपदमेवअदोभवदित्यत्रातिप्रसंगमाशंक्यप्रतिपद्यो
क्तस्यैवओकारस्यग्रहणमितिसमाद्धीत॥तस्मादिदंसूत्रंविनापिसर्वंलस्यंनिर्व्यूढमेवेतिचेत्॥अत्रोच्यते॥आहोओदित्यादृङ्नि
पातसमुदायाः।किंत्वस्वडाएवएतच्चएतत्सूत्रबलात्प्रतिपदोक्तस्यओकारस्यग्रहणमितिभाष्यबलाच्चाध्यवसीयते॥तेनआम् आहो
देवदत्तेत्यत्रामएकांतरमामंत्रितमितिनिघातप्रतिषेधःसिद्धः॥ अतएवपदकारैरपिओषुवर्त्तमरुतइत्यादौओइत्याद्येकपद्येनैवपठ्यंत
तदेवंसूत्रकारभाष्यकारपदकाराणांसंवादएवेतिस्थितेनिपातसमुदायएवायमित्याश्रित्यैतत्सूत्रंप्रत्याचक्षाणाःपरास्ताः॥स्यादेत
त्अनदोदःसमभवद्दोभवदित्यत्रातिप्रसंगः।ञ्यंतस्यनिपातत्वात्॥ऊर्यादिच्विडाचश्चेतिगतिसंज्ञाविधानेपिप्राग्रीश्वरान्निपाना इ
त्यस्याधिकारात्॥ नचलक्षणप्रतिपदोक्तपरिभाषयालाक्षणिकओकारोव्यावर्त्यतइतिवाच्यंवर्णग्रहणेषूक्तपरिभाषायाअप्रवृत्तेः॥
अन्यथाएचोयवायावइत्यपिहरयेइत्यादौनप्रवर्त्तेत॥चक्रेचक्रिरेइत्यादौप्रतिपदोक्तेचास्तिार्थ्यात्॥वर्णप्राधान्येमास्कंपरिभाषाविशेषणत्वे
नस्यादेवेतिचेन्न॥ अविशेषणेप्यप्रवृत्तेःसूपपादत्वात्॥तथाचषष्ठेवक्ष्यामः॥अभ्युपेत्यापिब्रूमः॥अगौर्गौःसमभवद्गोभवदित्यादौगमे
र्डोइत्योकारस्यप्रतिपदोक्तनयाअतिप्रसंगः स्यादेव॥नन्विहगौणमुख्यन्यायेनसमाधानमस्तु॥तथाहि।संधीभवंतिब्राह्मणाः॥त्वङ्गव
तिदेवदत्तः॥मङ्गवसित्वं॥त्वङ्गवाम्यहं॥इत्यादौवचनपुरुषव्यवस्थानुरोधेनच्विप्रत्ययस्थलेसर्वत्रप्रकृतेरेवकर्त्तृत्वमितिसिद्धांतस्थितिः
॥तथाचप्रकृतौआरोपेणवर्त्तमानाद्विकृतिवाचकाच्चब्दाब्येरुत्पत्तौच्विप्रत्ययंप्रतिप्रकृतिभूतस्यवाहीकादिवृत्तेर्गौशब्दस्यगोणार्थतास्य

ष्टेव॥अतएवामहान्महान्भूनोमहद्भूतश्चंद्रमाइत्यादावान्महतइत्यात्वंनप्रवर्त्ततइतिचेन्न॥दृष्टांतदार्ष्टांतिकयोर्वैषम्यात्॥तथाहि॥वि
शिष्टरूपोपादानेगौणमुख्यन्यायः॥तेस्यार्थवद्ग्रहणेनानर्थकस्येत्येतत्परिभाषामूलकत्वात्॥अर्थोपस्थितेश्चरूपविशेषग्रहसापेक्ष
त्वात्॥तथाचआन्महतइतिविशिष्टरूपग्रहणेनविधीयमानमात्वंगौणेनभवतीतियुक्तं॥इहतुओदितिवर्णपुरस्कारेणविधीयमाना
प्रगृह्यसंज्ञाकथंगौणार्थवृत्तेर्नभवेत्॥निपातसंज्ञातुतस्यापिमुख्यैव॥अतएवसंज्ञाश्वश्वस्यापत्यंश्वाशुरिरित्यत्रराजश्वशुराद्यन्न
प्रवर्त्ततेअतइत्रतुप्रवर्त्ततएव अन्यथाइत्रोपतश्चतुल्ययोगक्षेमतैवस्यात्॥अतएवगौर्वाहीकोब्रूतेगांवाहीकंपाठयेत्यादौवृद्ध्यालो
पएवतयोरपिवर्णाश्रयत्वात्॥गोतइतिनपरत्वमोकारांतोपलक्षणार्थमितिवक्ष्यमाणत्वात्॥तथाचौतोमितिसूत्रेभाष्यकृद्वक्ष्यति
॥गामित्यत्रपरापिवृद्धिर्निरवकाशेनात्वेनबाध्यतइति॥तत्रैवकैयटोपिवक्ष्यतिओतइतिसूत्रंपाठ्यम्॥ओकारान्तोपलक्षणतयावागो
तइत्येतद्व्याख्येयमिति॥इत्यादिग्रंथेष्वप्येवमेवस्थितम्॥यत्तुवदंति॥मुख्यएवस्वार्थेसास्नादिमतिगोशब्दोवृत्त्यात्वेलभतेततोवाही
कादिशब्दांतरसन्निधानाद्गौणतापत्तीतिः॥गोभवदित्यत्रतुगौणार्थंविनाच्विरेवदुर्लभइतिवैषम्यं॥तस्मात्पदकार्येषुयंन्यायोनप्राति
पदिककार्येष्वितिस्थितमिति॥तच्चित्यम्॥वाक्यसंस्कारपक्षेवृद्ध्यात्वप्रवृत्तितःप्रागेवगौणार्थावगतेः॥यत्तुकारकाणांक्रिययैवश्रौतसंबंध
स्ततएकक्रियावशीकृतानामरुणैकाहायनीन्यायेनपार्ष्टिकःपरस्परावच्छेदः॥तथाचगामानयेत्यन्वयवेलायांनगौणार्थतानिर्वाहो
केनसहषाष्टिकावच्छेदवेलायांनचांतरंगत्वेनप्रवृत्तः॥पदसंस्कारोबहिरंगगौणत्वप्रतीतावपिनिवर्त्ततइतिनदर्पिन॥तावतापिब्रूनेपाठ
येतिक्रियान्वयायैवगौणतायाआश्रयणीयत्वात् कटोपिकर्मभीष्टादयोपीतिपक्षेकथंचिदुक्तिसंभवेपिसामानाधिकरण्याद्वीष्टादेर्हितौ

येत्येवंरूपेभाष्योक्तपक्षांतरेत्वदुक्तन्यायानवतारात्च। श्वाशुरिति त्रेऽप्यभावापत्तेश्चशब्दप्रयोऽनावाहीकनिष्ठस्यैवकर्मत्वादेर्विवक्षित
त्वाच्चतस्माद्गुणाप्रधत्वादित्याद्यसङ्गइत्येवतत्वंनतुप्रातिपदिककार्य्यत्वादिति॥ अतएवचएकाच्चप्राचामित्यादौप्रातिपदिककार्यत्वेपिन
स्मायादयः॥ विशिष्टरूपपुरस्कारेणैवसर्वनामसंज्ञाविधानात्॥ अभिव्यक्तपदार्थायेदित्यपिगौणमुख्यन्यायसिद्धार्थकथनपरंप्रसिद्धं
प्रसिद्धत्वेएवहिमुख्यत्वंगौणत्वेदित्यन्यत्रविस्तरः। अतएवसर्वादिसूत्रेसंज्ञोपसर्जनप्रतिषेधइतिवार्तिकंप्रत्याचक्षाणोहरदत्तआह।
॥संज्ञाप्रतिषेधस्तावन्नवक्तव्यः॥ अभिव्यक्तपदार्थायेदित्येवंसिद्धत्वादिति। यत्तुतत्रकैयटोवक्ष्यति॥ प्रसिद्ध्यप्रसिद्धिवशात्संभवन्नपिगौ
णमुख्य न्यायेनेहोक्तः। पदकार्येष्वयंनतुप्रातिपदिककार्येष्विति ओत्सूत्रेउक्तत्वादिति॥ तदभ्युच्चयमात्रं। युष्मदस्मदोःस्वरूपमात्रा
श्रयाणांकार्याणामुपसर्जनतापामिवसंज्ञायांप्रवृत्त्यापत्तेः॥ युष्मद्युपपदेअस्मद्युत्तमइत्यादावपितदापत्तेश्चेतिदिक्॥ तदेवमदोभवद्भो
भवदित्यादौओदितिप्रगृह्यसंज्ञाव्यर्थत्वादिवदुर्वारेतिपूर्वपक्षःपर्य्यवसन्नः। अत्रोच्यते। पूर्वसूत्रेनाडितिपर्युदासादाङःसदृशाः प्रतिपदं
घटितानएवनिपातागृह्यन्तेइहाप्यर्थाधिकारेणअनाङ्ग्रहणानुवृत्यावातथैवेतिसर्वंसुस्थं॥ तथाचसर्वादिसूत्रेअकांरात्कारोअनुपसर्ज
नत्वेसत्येवभवत्इतिप्रघट्टकेनदोःसमाविसत्वंनत्वेविशेषितत्वाद्गौणतायामपिस्याद्वित्याशंक्यत्यदादीनामित्यत्रानुपसर्जनादि
तिपरिभाषयानुपसर्जनानामेवग्रहणेसिद्धेतथाभूतानामेवसत्वविधावनुवर्त्तनान्नकश्चिद्दोषइतिसमाधानकैयटः॥ संबुद्धौशाकल्य
स्येत्यावनार्षं॥ ऋषिर्वेदः॥ तदुक्तमृषिणेत्यादौतथादर्शनात्॥ संबुद्धिनिमित्तओकारोवैदिकेइतौपरेप्रगृह्योवास्यात्॥ विष्णोइतिविंष्णो
रिति॥ संबुद्धाविति किंगवित्यर्थमाहेतिवृत्तिकारः॥ एतन्निष्कर्षस्त्वपूर्वसूत्रेउक्तएव॥ अनार्षेकिम्॥ ब्रह्मबंधवित्यत्रगौत्॥ इनाविति किंप

सेत्र॥ ठञः॥उञइतौपरेगृह्यसंज्ञावास्यात्॥उइतिविति॥ऊँ।उञइत्यनुवर्त्ततेशाकल्यस्यप्रगृह्यमितिच॥प्रगृह्यस्यउञइतौपरे ऊँआदे
शोवास्यात्दीर्घोनुनासिकश्चऊँइति॥इहयदिएकोयोगःस्यात्उञऊँइतितदादेशेविकल्पितेरूपद्वयमेवस्यात्॥ऊँइतिउइतिअतोयोगं
विभज्यप्रगृह्यसंज्ञापिविकल्पितास्यादेवमपिऊंइतिद्वितीयसूत्रेयदिप्रगृह्यग्रहणंशाकल्यग्रहणंचेत्युभयमपिनानुवर्त्ततेतदाउञ्मात्रस्यै
नित्यमूंभावविधानात्प्रगृह्यस्येवाप्रगृह्यस्याप्यादेशःस्यात्॥तत्रप्रगृह्यस्यादेशेकृतेस्थानिवद्भावेनप्रगृह्यत्वादूंइतीतिरूपंसिद्धम्॥नचा
त्रविधावितिप्रतिषेधः।उञइतिसमुदायरूपेणाश्रयणात्॥तथाच॥इटइटीतिसूत्रेइदितीसमुदायरूपाश्रयणादग्रहीदित्यत्रचयहो
रितीतिदीर्घस्यस्थानिवद्भावमाश्रित्यसिज्लोपःसिद्ध्यतीतिस्थानिवत्सूत्रेवक्ष्यते॥अप्रगृह्यस्यत्वादेशेनुनासिकोयणस्यात्॥तथा
चेष्टरूपत्रितयमध्येऊंइतीत्येकमेवसिद्धंनत्वपरंद्वयमित्यव्याप्तिः॥अतिव्याप्तिश्चसानुनासिकवकारयुक्तस्यानिष्टस्यापिप्रसंगात्॥अ
थप्रगृह्यग्रहणमात्रमनुवर्त्ततेतदाप्रगृह्यस्योञोनित्यमादेशःस्यात्ततश्चेतिऊंइतिहेएवरूपेस्यातांनतुउइतीतितृतीयं॥अथशाक
ल्यग्रहणमात्रमनुवर्त्ततेततउञ्मात्रस्यादेशविकल्पनादूंइतिउइतीतिहयंप्रगृह्यस्येतिवितीतिहयमप्रगृह्यस्येतिसंकलनयारूप
चतुष्टयंस्यात्॥तत्रत्रितयस्येष्टत्वेपिसानुनासिकवकारयुक्तेमनिष्टमापतति॥तस्माच्छाकल्यग्रहणंप्रगृह्यग्रहणंचेत्युभयमनुवर्त्तत
इत्यक्तं॥इहविभक्तिविपरिणामेनप्रगृह्यस्योञइतिव्याख्यानं॥आदेशसामानाधिकरण्येनप्रगृह्यऊंइत्येतदादेशोभवतीतिव्याख्या
नेपिनकश्चिद्दोषइत्यवधेयम्।ननुपरिनिष्ठितमेवप्रयोगार्हंपरिनिष्ठितत्वंचअप्रवृत्तनित्यविद्युद्दृश्यतावच्छेदकाक्रान्तत्वम्॥निह
तेतिहंतादावव्याप्तिवारणायाप्रवृत्तेतिवैकल्पिकेडागमोद्दृश्यतावच्छेदकाक्रान्तेसेहेत्यादावव्याप्तिवारणायोक्तंनित्येति।अनएवप

चूलदृदृत्यादीनामलौकिकनेतिसिद्धांतः तथाचउइतीत्येतद्रूपंनस्यादेवअत्रशाकल्यमतेऊंआदेशेनभाव्यमेवइनोरेषांमतेतुप्रगृह्यत्वमेवना
स्तिइतिचेत्॥भवेदेवंयदिशाकल्यग्रहणंयथाश्रुतंस्यात्॥तत्तुविकल्पमात्रतात्पर्यकम्॥ तथाचभाष्यं॥ शाकल्यस्यविभाषायथास्यादितिऊं
वाशाकल्यस्येतिच॥तथाचतत्रकैय्यटःशाकल्यश्रुतेरेवफलंवाग्रहणेनप्रतिपाद्यतीतिस्मृत्यंतरानुसंधानद्वारेणविभाषासंपद्यतइतिच॥
यद्वा॥ अस्तुशाकल्यग्रहणंयथाश्रुतं॥तथापिनिपातनएकाजित्यनेनैवसिद्धेउञइतितावन्नियमार्थं॥ तथाचशाकल्यभिन्नमतेनप्रगृ
ह्यतेतिप्रथमसूत्रार्थः॥उत्तरसूत्रेचप्रगृह्यस्योञइत्येतावतैवशाकल्येलब्धेपुनःशाकल्यानुवृत्त्यादितरेषामपिमतेपाक्षिकः प्रगृह्योस्ती
त्यनुमीयतेतेनउइतिरूपंसिद्धम्॥अथवोत्तरसूत्रेपुनःशाकल्यानुवृत्तिसामर्थ्याच्छब्दाधिकाराश्रयणेनसकलस्यैवऋषेरपत्यांतरंगृह्यते
॥अस्मिंश्चपक्षेप्रगृह्यस्योञइत्यनुवादसामर्थ्यादेवप्रगृह्यतापिलभ्यतेयथाढकिलोपइत्यनुवादसामर्थ्याद्गितिदिक्॥ आदेशाभ्याय
मनुनासिकइतिनिर्देशादेववक्तव्यं॥तथाचबह्वृचप्रातिशाख्येउकारश्चेतिकरणेनयुक्तोरक्तोवृक्तोह्रस्वितःशाकलेनेति॥क्तसंज्ञोनुनासि
कइतिच॥अतएवयदेतन्नूंइतिपदकाराःपठंतीत्यनुकरणेयरोनुनासिकेनुनासिकोवेत्येषविधिःप्रवर्त्तते॥ ईदूतौचसप्तम्यर्थे॥शाकल्य
स्येतावितिनिवृत्तं।ईदन्तमूस्त्रंचशब्दरूपंसप्तम्यर्थेवर्त्तमानंप्रगृह्यंस्यात्॥अध्यस्यांमामकीतनूमामक्यांतन्वोमितिप्राप्तेसुपोसुलुगि
तिलुप्तसप्तमीकावेतौ॥ मामकीइतितनूइतीतिपदकालेकार्योदाहरणेबोध्ये॥सोमोगौरीअधिश्रितइतिसंहितायामप्युदाहरणं॥ ईदूता
वितिकिं॥पियःसूर्य्येप्रियोअग्नाभवाति॥अग्निशब्दात्परस्याःसप्तम्याडाआदेशःपदकारैःप्रगृह्येषुइतिशब्दप्रयोगस्यनियमितत्वेनेहापि
पदकालेइतिशब्दप्रयोगप्रसंगइतिप्रत्युदाहरणमिदं।सप्तमीग्रहणंकिं॥धीतीमतीसुष्टुतीधीत्यामत्यासुष्टुत्याइतिप्राप्तेतृतीयैक

वचनस्य पूर्वसवर्णदीर्घैकारः॥ ततोऽकः सवर्णे दीर्घ इत्येकादेशः॥ नत्विहसुपोलुक्कृस्वश्रवणापत्तेः॥ अर्थग्रहणंकिम्॥ वाप्याम्भ्योवाप्यम्भ्यः॥ नद्यामितिर्नद्यानिः संज्ञायामितिसप्तमीसमासः॥ ननुसप्तम्यर्थोपीहास्त्येवतत्कथमर्थग्रहणेकृतेपीष्टसिद्धिरितिचेत्॥ इत्थंजहत्स्वार्थावृत्तिरितिपक्षेपदेवर्णवहूनोवर्त्तिपदानामानर्थक्यादीदन्तमिहानर्थकंननुसप्तम्यर्थवृत्तीतिस्पष्टमेव॥ अजहत्स्वार्थावृत्तिरितिपक्षेपि उपसर्जनपदंसामान्यार्थमात्रेपर्य्यवस्यतिकिंतुनत्संसृष्टेप्रधानार्थे॥ अर्थग्रहणसामर्थ्याच्चयोवानर्थःसप्तम्याभिधीयते॥ आधेयासंसृष्टो निष्कृष्टाधिकरणरूपस्तावन्मात्रस्येहग्रहणमितिवृत्तिप्रविष्टेनभविष्यति॥ यद्यपिवाक्यवत्समासेपिलुप्तसप्तमीवत्तेनाधिकरणमात्रबोधः पश्चाद्वाक्यार्थतयासंसृष्टोपवृत्तिवक्तुंशक्यते॥ तथापिसिद्धांतेतावत्समर्थः पदविधिरितिपरिभाषानुरोधात्समासस्थत्वेएकार्थीभावस्यवसामर्थ्येननुव्यपेक्षा॥ अतस्त्वोपसर्जनेविशेषणान्वयोनभवतिशक्येकदेशत्वादितिहिनीयेवक्ष्यते॥ मीमांसकादीनामपिनिषादस्थपतिन्यायेनपूर्वपदार्थसंबंधिनिलक्षणाभ्युपगमायुक्तैवार्थग्रहणेनवाप्यम्भ्यनद्यानिप्रभृतेर्व्यावृत्तिः॥ आतिर्बलाकाशरारिराटिश्चबलाकाविसकंटिकेत्यमरः॥ आद्यास्त्रयोपिस्त्रीलिंगाः॥ बलाकासाहचर्यादितिकेचित्॥ बस्तस्तस्करार्यादयस्त्रयः पक्षिविशेषवाचकाननुबलाकापर्यायाः अतोबलाकासाहचर्यमकिंचित्करंस्त्रीत्वंतस्त्येव॥ रत्नकोशेस्त्रीलिंगकांडेआदिः शरारिर्वरटेस्त्युक्तेः अटेरपिसाहचर्यात्॥ तपरकरणप्रसंदेहार्थमितिवृत्तिः॥ अत्रवार्त्तिकं॥ ईदूतौसप्तमीस्थेवलुप्तेर्थग्रहणाद्भवेत्॥ पूर्वस्यचेत्सवर्णीसाद्वाम्भावः प्रसज्यते॥ वचनाद्यत्रदीर्घत्वंनत्रापिसरसीयदि॥ ज्ञापकंस्यान्नदन्तत्वेमावापूर्वपदस्यभूत्॥ अस्यार्थः॥ ईदूतौसप्तमीस्थेवास्तकनार्थोर्थग्रहणेन॥ अत्रोत्तरमाह॥ लुप्तइति॥ संज्ञाविधौप्रत्ययग्रहणेतदन्तविधेरभावात् सप्तम्याएवसंज्ञास्यात्॥ लुप्तेपिप्रकृति

भागस्यसंज्ञासिद्ध्येतुकर्त्तव्यमेवार्थग्रहणमित्यर्थः॥ननुसोमोगौरीइत्यादौविभक्तिर्नलुप्यतेकिंतुधीतीमतीत्यादाविवपूर्वसवर्णेकृतेकः१
सवर्णइतिदीर्घएकादेशेतस्यादिवद्भावात्सप्तमीग्रहणेनग्रहणादस्त्येवसप्तमीत्याशंक्याह॥पूर्वस्येति॥आङ्गाभावइति॥एकादेशेवाधि
त्वापरत्वादंगत्वाच्चआङ्गामोस्यातामित्यर्थः॥तस्मात्लुगेवेतिस्थितेर्थग्रहणंकर्त्तव्यमेवेतिभावः॥नन्वर्थग्रहणमास्तुवचनसामर्थ्यात्सं
ज्ञाविधावपिनदन्तविधिर्भविष्यतीत्याशंक्याह॥वचनादिति॥यत्रदीर्घत्वंतत्रैववचनात्स्यात्हरिंनशुष्कंसरसीशयानमितियथा॥अत्रहि
सरश्शब्दात्परस्यसप्तम्येकवचनस्यइयाडियाजीकारागमुपसंख्यानमितिईकारादेशेसप्तमीश्रूयते॥तथाचसोमोगौरीइत्यादौनस्या
देवेत्यर्थः॥एतदूह्यतितत्रापीति॥तत्रापिसप्तम्यालुगेवनत्वीकारः॥यदिसरसीशब्दोप्रवर्त्तते॥असंदिग्धेसंदिग्धवचनमेतत्शास्त्राणि
चेत्प्रमाणंस्युरितियथा॥अस्तिहेसरसीशब्दः दक्षिणापथेहिमहांतिसरांसिसरस्यइत्युच्यंतेइतिभगवद्दुक्तेः कासारःसरसीसरइत्य
मरकोशाच्च॥तथाचसरसीःपरिशीलितुंमयेत्यादिप्रयोगोपिदृश्यते॥एवंचसरसीशब्दोपिलुप्तविभक्तिकएवेतिवचनान्नदन्तविधिरिति
स्थितम्॥ननूक्तरीत्यास्तुसरसीशब्दःसरःशब्दोपिसांतोनिर्विवादएव॥तथाचसांतादेश्चईकारादेशोयमस्तु॥एवंहिसतिसंज्ञाविधौ
ज्ञापकस्यकस्यतदंतग्रहणस्यपुनराश्रयणंनकर्त्तव्यंभवतीतिचेन्न॥तथासतिईकारस्यप्लुत्वेनानुदात्ततयासरःशब्दस्यचसृधातो
रसुनिप्युसादितस्यतित्स्वरेणसरसीइतिपदमाद्युदात्तंप्रसज्येतगौरादिषुपिप्पल्यादयश्चेतिपाठात्पिप्पल्याद्यंतःपातिनःसरःश
ब्दान्ङीषात्वंतोदात्तमिष्यते॥तथैववेदेपागात्॥एवंतर्हिप्रगृह्यसंज्ञाप्रकरणेप्रत्ययलक्षणंनास्तीतिज्ञापनायेदमर्थग्रहणमस्तु॥ए
वंचईदूदेद्विवचनमितिसूत्रेईदूदेदंतेद्विवचनांतेइतिपक्षईदूदेदंतयद्विवचनंतदंतमितिपक्षश्चसमर्थितोभवति।नत्रहिकुमार्योरगारं

कुमार्य्यगारं ॥ अस्तुकेस्तुकेसमपद्येतांशुकूपास्तांवस्त्रेइत्यत्रातिव्याप्तिरितिदोषः॥ सत्यप्रत्ययलक्षणविरहादेवोऽतइत्याह॥ज्ञापक
मिति॥परिगृह्यसंज्ञाप्रकरणेप्रत्ययलक्षणाभावस्येतिशेषः॥केदंज्ञापनमुपयुज्यतेतदाह॥तदंतत्वइति॥तदंतत्वगर्भपक्षहृयेपीत्यर्थः॥ननु
संज्ञाविधौप्रत्ययग्रहणेतदंतविधेरभावादेवतदंतपक्षस्तत्रनास्थितइत्यपरितोषादाह ॥मावेति॥वाप्यस्वइत्यादौमाभूदित्यर्थः॥अ
त्रेदमवधेयम्॥ अवितृस्तृतंत्रिभ्यईरितिसूत्रादीरित्यनुवर्त्तमानेयापोः किहेचवातप्रमीरितिसूत्राभ्यांशब्दत्रयंव्युत्पादितं॥यांत्यने
नेतियायीमुक्तिमार्गः॥पिवतिरस्मान्पातिवालोकमितिपपीःसूर्य्यः॥वातंप्रमिमीतेसंमुखधावनादितिवातप्रमीः॥निःस्यंगोमृगाकृतिर्वी
तमृगनामापशुविशेषः॥एभ्यस्त्रिभ्योपिङीसवर्णदीर्घात्॥पपीयायीवातप्रमीइतिरूपंनिर्विवादम्॥तथाचेहश्रूयमाणस्यईकारस्यसप्र
मीत्वान्नात्रापिसरसीयदीत्यसंगतम्॥ईकारस्यश्रूयमाणस्यासंभवात्सामर्थ्यात्तदंतविधिर्भविष्यतीत्यस्यार्थः॥तस्मादूकारांशेसामर्थ्यो
त्तदंतविधौलब्धेसोमोगौरीइत्यादावपिभविष्यतीत्याशयः कल्प्यः॥पपीआसक्तइत्यादौतुभाव्यमेवप्रकृतिभावेन॥नचायंयोगः छांद
सस्तथाविधानात्रेवोदाहरणानांदत्तत्वादितिवाच्यम्॥मुनित्रयोक्तिंविनास्मदिछयाछांदसत्वकल्पनेतिप्रसंगात्॥लोकेप्रगृह्यत्वंनभ
वतीत्यस्मिन्नर्थेप्रमाणानुपलंभाच्च।अप्रतिषिद्धमनुमतंभवतीतिन्यायेनलोकेयीपपीवातप्रमीइत्येषांप्रगृह्यत्वस्यैवन्याय्यत्वाच्च॥अ
तएवदृग्दृशवतुष्वितिसूत्रेदृसेचेतिवार्त्तिकमुपादायकृसप्रत्ययःसादेश्चछांदस्येवभाष्येसदृक्षासदृगित्युदाहृतत्वादितिकेचिदितिन्याच्च
क्षाणाहरदत्तादयः छांदसत्ववर्त्तामतेस्वस्यापरितोषमाविश्चकृतिदिक्॥दाधाघ्वदाप्॥दारुपाधारूपाश्चधातवोघुसंज्ञाःस्युःदापूदै
पोर्व्वर्जयित्वा।तत्रदारुणश्चत्वारःदुदाञ्॥यणिददाति॥दाण् प्रणियच्छति॥दो॰प्रणिद्यतिदेङ्प्रणिदयते॥धारूपौहौङ्धाञ्॥प्रणिदधाति॥

धेट्प्रणिधयतिवत्सोमातरं॥ अदाखिनिकिम्॥ दापूलवने॥दातंबर्हिः लूनमित्यर्थः।घुत्वाभावादोदूधोरितिनप्रवर्त्तते॥दैप्शोधने।
अवदातंमुरबंदहघुत्वाभावादवउपसर्गान्तइत्येतन्म।घुप्रदेशाः नेगैदनदेत्यादयः। इहदोदेङ्धेटामनुकरणानिव्यवस्थाप्यतत्रप्र
कृतिवदनुकरणमित्यतिदेशादादेचउपदेशेशितीत्वंक्रियते॥ अनैमित्तिकमात्वंशितिनुप्रतिषेधइतिसिद्धांतात्॥ नचैवंविभ
क्तिरुत्पत्तिर्नस्यात् अधातुरितिप्रातिपदिकसंज्ञानिषेधादितिवाच्यं॥ अधातुरितिपर्य्युदासोयंनतुप्रसज्यप्रतिषेधः॥ अस्तिचेहस्ताश्रय
मधातुत्वं॥ यद्वा॥ यत्तदेतेभ्यइत्यादाविवेहापिकार्यविशेषपुरस्कारेणैवातिदेशप्रवृत्त्यप्रवृत्तीभविष्यतः॥ ततश्चतुर्णांदारूपाणांहयो
श्चधारूपयोरेकशेषंकृत्वाहूंहः कर्त्तव्यःप्रणिदातेत्यादौकृतात्वानांदोदेङ्धेटांतुस्थानिवद्भावात्सिद्धंघुत्वंलक्षणप्रतिपदोक्तपरिभाषा
यानिरनुबंधकग्रहणेनसानुबंधकस्येत्यस्याश्रनेहप्रवृत्तिः सर्वेषांस्वरूपेणैवानुकृतत्वात्॥ अतएवदारयतिधारयंत्योर्नातिप्रसंगः॥त
योरनुकरणेआत्वासंभवेनेहदृश्इत्यनुपपत्तत्वात्॥ ननुकृतात्वस्यसूत्रेनिर्देशात् प्रणिदातिप्रणिधयतीत्यादौचात्वविरहात्कथंघुत्वमि
तिचेत्॥ भ्रांतोसि॥नहिवयंकृतात्वमनुकुर्मोयेनोक्तदोषःस्यात्॥ अपितुदेदोधेइत्येतेष्वेवानुक्रियमाणेषुलक्षणवशान्निष्पन्नमात्व
मित्युक्तं॥नचलक्षणेनस्वरूपान्यत्वेपिअनुकरणताहीयते॥सरव्युरसंबुद्धावित्यत्रापिसुविरूपप्रतीतेःगवित्ययमाहेत्यत्रगोशब्द्प्र
तीतेश्च॥ दीङःस्तनेहयग्रहणंतदनुकरणेआत्वासंभवात्॥ वार्तिकमतेएजंतानांदीङादीनामात्वविधानात्॥ भाष्यमतेत्वेजन्निमित्तेप
रतस्तद्विधानात्॥तेनदीङस्तृजादावात्वेकृतेपिघुसंज्ञाविरहात् प्रनिदात्तेत्यत्रनेगदेतिनित्यंणत्वंनभवतिशेषेविभाषेतिवैकल्पिकंनु
स्यादेव॥नचोपदास्तास्यस्वरःशिष्यकस्येत्यत्रस्थाध्वोरिच्चेतीत्वंनभवतीतिसूत्रकारस्यमतं॥ननुचास्मिन्पक्षेदापूदैपावनुकृतौनवाआ

यनुकरणपर्युदासोभयसामर्थ्यात्तपोर्घुसंज्ञाविकल्पःस्यात्॥अंत्येअदाविति व्यर्थंस्यात्॥अननुकृतत्वादेवदापदेपोर्घुसंज्ञाप्राप्तिविरहादितिचेन्न॥अदाक्रियस्मिन्नसतितयोरप्यनुकरणंसंभाव्येतनहिलक्षणैकचक्षुषादोदेङादीनांदापदैपोश्चवैलक्षण्यंकिंचिदनुभूयतेयद्बलाद्ग्रहणाग्रहणेव्यवस्थाप्येयातांव्याख्यानतोविशेषप्रतिपत्तिरितिपरमवशिष्यते॥किंत्वगतिरुगतिरेषाऽनभिधानवत्॥नचतद्बलेनसिद्धस्यप्रत्याख्यानंशोभते॥वार्त्तिककारमतेतुप्रयोगस्थानामेवदाधारूपाणामिदमनुकरणं॥नचैवंप्रणिद्यतिप्रणिदयतइत्यादिसिद्धिरितिनस्यात्॥आत्वाभावात्॥तथादेङ्रक्षणे॥अदित्यधेट्व्यत्यधित्त॥प्रणिदातेतिप्रणिधातेत्यादावपिनस्यादात्वंस्यात्सूक्ष्मक्षणिकत्वात्॥लक्षणप्रतिपदोक्तयोःप्रतिपदोक्तस्यग्रहणमितिन्यायादितिवाच्यं॥वचनबलेनैवतत्समाधानात्॥तथाचकात्यायनवार्त्तिकं॥घुसंज्ञायांप्रकृतिग्रहणंशिरर्थमिति॥भारद्वाजीयास्तुपठंति॥शिहिकृतार्थमिति॥तथाचदाधाप्रकृतयोघुरितिपठित्वादाश्वधाश्वप्रकृतयश्चेतिहूंहूंकृत्वासन्निधानाद्दाधामेवप्रकृतयइतिव्याख्येयम्॥भाष्यकारास्तुवार्त्तिकंप्रत्याचख्युः॥तथाहि।नेर्गदेतिसूत्रेतावदवश्यंप्रकृतिग्रहणंकर्त्तव्यंप्रणिमयतेप्रण्यमयतेत्यत्रापिणत्वंयथास्यात्॥तदेवपुरस्तादपकृष्यघुप्रकृतिमाङितिपठिष्यामः॥घुश्चप्रकृतिश्चमाश्चेतिहूंहूंः सन्निधानाच्चपूर्वोत्तरयोः प्रकृतिर्ग्रहीष्यते।नचैवंमीनातिमिनोतिदीङामपिमाप्रकृतित्वात्ग्रहणापत्तिः माङ्ङेङ्कारानुबंधस्येवतत्रावश्यपठनीयत्वात्॥अन्यथामामानेइत्यत्रातिप्रसंगात्॥तस्माद्घुप्रकृतिमाङितिपाठेनप्रणिद्यतिप्रणिदयतइत्यादेःसिद्धत्वाच्छिदर्थंतावद्घुसंज्ञायांप्रकृतिग्रहणंनकर्त्तव्यमितिस्थितम्। भारद्वाजीयोक्तेरीत्याविकृतार्थंकर्त्तव्यमितिपुनरवशिष्यते।तदपिन।गामादाग्रहणेष्वविशेषइतिपरिभाषयैवलाक्षणिकस्यापिदारूपस्यघुसंज्ञासिद्धेः॥अस्यांचपरिभाषायांदैपःपित्त्वंलिंगं॥

तर्हि अदाविति सामान्यग्रहणार्थं क्रियते लासणिकत्वादेवघुसंज्ञायां दैप्यग्रहणाभावेतुकिन्निषेधेसामान्यग्रहणार्थेनपित्वेन ॥ नचैवमपि
धेटोघुसंज्ञानस्यादेवेतिवाच्यं ॥ दोदद्घोरित्यत्रधेटोनिवृत्त्यर्थेक्रियमाणे न दद्इत्यनेनधेटोपिघुसंज्ञाज्ञापनात् ॥ नचदधातिनिवृत्त्यर्थं दद्
इत्युक्तमितिवाच्यम् ॥ तत्रदधातेर्हिरितित्वादेशविधानादेवदद्भावाप्रसंगात् ॥ नन्वेवमपिगामादाग्रहणेष्वविशेषइत्येतेनलक्षणप्रतिपर
देशक्तपरिभाषायानिरनुबंधकग्रहणेइतिपरिभाषायाश्चयथाबाधस्तथार्थवद्ग्रहणपरिभाषयाअपिबाधःस्यात् ॥ तथाचप्रतिदारयतिप्रतिधारय
तीत्यत्राप्यतिप्रसंगइतिचेन्न ॥ गदादीनांयउपसर्गस्तत्स्थान्निमित्तादुत्तरस्यतानेवगदादीन्प्रत्युपसर्गस्यनेरितिव्याख्यानात् ॥ दारयतिधार
यत्यवयवयोस्तुदाधारूपयोरनर्थकत्वान्नतंप्रत्युपसर्गत्वं ॥ यक्रियायुक्ताः प्रादयस्तंप्रत्येवगत्युपसर्गसंज्ञाइतिवक्ष्यमाणत्वात् ॥ नचैवंप्र
णिदापयतिप्रणिधापयतीत्यत्रापिणत्वंनस्यादितिवाच्यम् ॥ तत्रयुगागमात् पूर्वंदाधाइत्यवस्थायांघुसंज्ञाप्रवृत्तौयुगविशिष्टस्यापिघुग्रह
णेनग्रहणात् ॥ अनागमकानांसागमकाआदेशाइतिपक्षेतुस्थानिवद्भावेनघुसंज्ञाप्रवृत्तेः ॥ नन्व—नांनर्थमेवैतयोरानर्थ्यंसंप्रयोगोवानि
ष्टंस्वदग्धरथवदितिस्थानेंतरतमसूत्रस्यभाष्यरीत्याद्रयत्यादेरपिदापयत्यादिसाम्यमेव ॥ निष्यन्नस्याणोरपरत्वांभ्युपगमेनरेफपुको
रविशेषादितिचेत् ॥ सत्यं ॥ सिद्धेतुप्रसंगेरपरत्वादित्युरणपरसूत्रस्थवार्त्तिकरीत्यासयाधानेरुक्तं । उक्तभाष्यरीत्यातुप्रसक्तोदोषः प्रागुक्त
सूत्रकारमतमाश्रित्योद्धर्त्तव्यः ॥ नहिदधृङित्यनयोरनुकरणेआत्वंलभ्यतइतिदिक् ॥ इदंत्ववधेयं ॥ प्रणीदापयतीत्यत्राप्युपसर्गयोः प्रकृ
त्यर्थविशेषणत्वेसत्येवनैर्गदेतिनित्यंणत्वंण्यर्थविशेषकत्वेतुघुसंज्ञकंप्रत्यनुपसर्गत्वाच्छेषेविभाषेतिविकल्पएवननुनित्यंणत्वमिति ॥ स्या
देतत् ॥ उपदिदीषतइत्यत्रसन्निमीमेतीस्भावः स्यात् ॥ वार्त्तिकरुतांघुसंज्ञायांप्रकृतिग्रहणात् ॥ सूत्रकारभाष्यकारयोस्त्वनासौदोषः सूत्र

कृतादीङोऽननुरुकृतत्वात्॥ भाष्यमतेणत्वेप्रकृतिग्रहणेपि घुसंज्ञायोतद्विरहादिति चेत्॥ सत्यं। वार्त्तिकमतेपिनेयंदाप्रकृतिः॥ एजंतानामात्वविधानाभ्युपगमात्॥ नचैवमादन्तत्वनिबंधनयुच्प्रत्ययासिद्धिः॥ तत्राकारांतलक्षणप्रत्ययविधिरितिवचनेनैवतत्सिद्धेः॥ भाष्येत्वेतद्वचनप्रत्याख्यानायैज्विषयेआत्वंसिद्धांतितमित्यन्यदेतत्॥ इदंत्ववशिष्यते॥ भाष्यवार्त्तिकोभयमतेपिपादास्तास्यस्वरःशिक्षकस्येत्यत्रस्थाघ्वोरितीत्वंप्राप्तं तच्चभाष्येसन्निपातपरिभाषयापरित्यक्तं॥ उपदीक्षतइतिस्थितेएजन्विषयेप्रवर्त्तमानमात्वंप्रतिचोकित्त्वमुपजीवतियदिचात्र घुसंज्ञास्यान्नहिस्थाघ्वोरिच्चेतिनिमित्तंचः कित्त्वंस्यादतोकित्त्वमुपजीव्यप्रवृत्तआत्वंरः कित्त्वप्रवर्त्तिकांघुसंज्ञांनप्रवर्त्तयत्येवेति॥ वार्त्तिकेकृतानुदीङः प्रतिषेधःस्याघ्वोरित्त्वेइतिवचनमेवकृतं॥ उभयमतेपिदीङःस्तृजादावात्वेकृतेप्रणिदातेत्यादौनेर्गदेतिणत्वंभवति॥ अतएववार्त्तिककृतादीङः प्रतिषेधइत्येवनोक्तंकिंतुस्थाघ्वोरित्त्वेइतिविषयविशेषोनिर्दिष्टः॥ सूत्रमतेतुनभाव्यंणत्वेनेतिस्पष्टमेव॥ किंच॥ भाष्यवार्त्तिकयोर्नकेवलंसूत्रकृतासहविरोधः किन्तुपरस्परेणापि॥ ॥तथाहि॥ भाष्यमतेप्रणिदीयतेप्रणिदीनइत्यादावपिनित्यंणत्वंणत्वविधौप्रकृतिग्रहणात्॥ वार्त्तिकमतेतुवैकल्पिकं॥ एजंतानामेवप्रकृतित्वाभ्युपगमेनईदन्तस्याप्रकृतित्वात् अन्यथाउपदिदीषतइत्यत्रेस्भावापत्तेः॥ तदेवप्रणिदातेत्यादौसूत्रकृतासहहूयोर्विरोधः प्रणिदीनइत्यादौतु भाष्यकृतासहेतरयोर्विरोधोदुष्परिहरइति॥ अत्रेदंवक्तव्यम्॥ यथोत्तरंमुनीनांप्रामाण्यमितिसिद्धांताद्भाष्योक्तरीत्यासर्वत्रदीङि परेनेर्नित्यंणत्वमितिस्थितेसूत्रवार्त्तिकमतेपिशेषेविभाषेतिव्यवस्थितविभाषामाश्रित्यभाष्यविरोधःसंपादनीयः॥ एकवाक्यतयैवसर्वनिर्वाहसंभवेमतभेदकल्पनस्यानाश्रयणीयत्वादिति॥ नन्वदाविति प्रतिषेधेदापूलवनइत्यस्यैवग्रहणंयुक्तं॥ ननुदैपः॥ पकारेश्रूयमाणेआत्वायोगादितिचेन्न॥ अनुबंधाअनेकांताइतिपक्षेश्रूयमाण

स्यापिपकारस्यकाकादिवदनञपवत्वेनधातोरेजंतत्वानपाये आत्वप्रवृत्तेः एकांता अनुबंधाइतिपक्षेपिभवत्येवात्वं॥ नानुबंधकृतमनेजं
तत्वमितिसिद्धांतात्॥ अत्रोदीचांमाङ्योव्यतीहारइतिकृतात्वस्यमेङोनिर्देशोज्ञापकः॥ नचमाङ्मानइत्यस्यैवायंनिर्देशोव्यतिमिमीनइ
स्यादौनस्यापिकदाचिद्व्यतीहारेवृत्तिसंभवादितिवाच्यं॥ अपूर्वकालार्थस्यक्ताभत्ययस्यमाङ्मानइत्यस्यादनभिधानात्॥ अत्रञभ्योष्यो
क्तेरेवप्रमाणत्वादित्याहुः॥ एवंचमेङ्दृत्येवपठनीयेमाङोव्यतीहारइतिगुरुकरणंनानुबंधकृतमनेजंतत्वमितिज्ञापनार्थमेव॥ भा
ष्यकारास्तुनायंदैपूकिंतुदिवादिषुद्यपूशोधनइत्येवपठिष्यनइत्याहुः॥ नचस्वरेभेदःदायतीत्यादेरुभयथाप्याद्युदात्तत्वात्॥ ननुना
ञ्जीलिकेचानशि ह्रायमानइत्यत्रस्वरेभेदः॥ ण्यनिधातोराद्युदात्तत्वंशपितुचानशोनोदात्तत्वमितिचेन्न॥ उभयथाप्यंतोदात्तत्वानपापा
त्॥ नचञ्णन्स्वरस्यसतिशिष्टत्वेनप्राबल्यमितिवाच्यं। अन्यत्रविकरणेभ्यइतिपर्युदासात्॥ आत्मनेरचश्चेत्यत्रत्यभाष्यकैय्यट
बलेनस्वरशीवचानञ्पि अंतोदात्ततयानिर्णयात्॥ स्थानिवत्सूत्रीयःकैयटग्रंथस्तुस्वरसूत्रस्थभाष्यस्वोक्तिभ्योंविरोधात् ग्रामादि
कइतिवक्ष्यते॥ ष्यादयस्तुदिवादिष्वेवादंतत्वेननपठिताः॥ गणकार्यमनित्यमितिज्ञापयितुम्॥ तेननविष्वसेदविष्वस्तेपथिकवनि
ताःप्रत्ययाश्चसंत्यइत्यादिसिद्धं॥ यत्तुभाष्येएकांतत्वपक्षेपिनदोषइत्युपक्रम्यपकारलोपेकृतेभविष्यतिदापत्वंतुभूतपूर्वंनानुबंधमा
श्रित्यव्युत्पादनीयमितिसिद्धांतितं॥ तत्रेत्थंप्रत्यवनिष्ठते॥ सत्यप्येजंतत्वेउपदेशेएजंतत्वंकथमिति॥ अत्रोच्यते॥ पित्करणसामर्थ्यो
दुपदेशेएजंतत्वाभावेपिआत्वप्रवृत्तिः॥ वस्तुतस्तूपदेशग्रहणंभाष्यकारोनमन्यते॥ तथाचतत्रवक्ष्यति॥ उपदेशग्रहणंनकरिष्यते॥
यद्युपदेशग्रहणंनक्रियतेचेतास्तोतेत्यत्रापिप्राप्नोति॥ अत्राप्याचार्यप्रवृत्तिर्ज्ञापयतिनपरनिमित्तस्यैवआत्वंभवतीति॥ यदयंकीङ्जी

कृतादीङोननुकृतत्वात्॥ भाष्यमतेणत्वेप्रकृतिग्रहणेपि घुसंज्ञायोतद्विरहादितिचेत्॥सत्यं।वार्त्तिकमतेपिनेयंदाप्रकृतिः॥एजंतानामात्वविधानाभ्युपगमात्॥नचैवमादन्तत्वनिबंधनयुच्प्रत्ययासिद्धिः॥तत्राकारांतलक्षणप्रत्ययविधिरितिवचनेनैवतत्सिद्धेः॥भाष्येत्वेतद्वचनप्रत्याख्यानायैज्विषयेआत्वंसिद्धांतितन्मित्यन्यदेतत्॥इदंत्ववशिष्यते॥भाष्यवार्त्तिकोभयमतेपिःपादास्तास्यस्वरःशिक्षकस्येत्यत्रस्थाघ्वोरितीत्वंप्राप्तं नचभाष्येसन्निपातपरिभाषयापरित्यक्तं॥उपदीव्यतइतिस्थितेएज्विषयेवर्त्तमानमात्वंप्रतिचोकित्त्वमुपजीवतियद्विचात्रघुसंज्ञास्यात्तर्हिस्थाघ्वोरित्त्वेतिसिचःकित्त्वंस्यादतोकित्त्वमुपजीव्यप्रवृत्तआकारःकित्त्वप्रवर्त्तिकांघुसंज्ञांनप्रवर्त्तयत्येवेति॥वार्त्तिककृतादीङःप्रतिषेधःस्याघ्वोरित्त्वेइतिवचनमेवकृतं॥उभयमतेपिदीङःस्तृजादावात्वेकृतेप्रणिदातेत्यादौनेर्गदेतिणत्वंभवति॥अतएववार्त्तिककृतादीङः प्रतिषेधइत्येवनोक्तंकिंतुस्थाघ्वोरित्त्वेइतिविषयविशेषोनिर्दिष्टः॥सूत्रमतेतुनभाव्यंणत्वेनेतिस्पष्टमेव॥किंच॥ भाष्यवार्त्तिकयोर्नकेवलंसूत्रकृतासहविरोधः किन्तुपरस्परेणापि॥ ॥तथाहि॥भाष्यमतेप्रणिदीयतेप्रणिदीनइत्यादावपिनित्यंणत्वंणत्वविधौप्रकृतिग्रहणात्॥वार्त्तिकमतेतुवैकल्पिकं॥एजंतानामेवप्रकृतित्वाभ्युपगमेनईदन्तस्याप्रकृतित्वात् अन्यथाउपदिदीषतइत्यत्रेस्भावापत्तेः॥तदेवप्रणिदातेत्यादौसूत्रकृतासहहूयोर्विरोधः प्रणिदीनइत्यादौतु भाष्यकृतासहेतरयोर्विरोधोदुष्परिहरइति॥अत्रेदंवक्तव्यम्॥यथोत्तरंमुनीनांप्रामाण्यमितिसिद्धांताद्भाष्योक्तरीत्यासर्वत्रदीङःपरेनेर्नित्यंणत्वमितिस्थितेसूत्रवार्त्तिकमतेपिशेषेविभाषेतिव्यवस्थितविभाषामाश्रित्यभाष्यविरोधःसंपादनीयः॥एकवाक्यतयैवसर्वनिर्वाहसंभवेमतभेदकल्पनस्यानाश्रयणीयत्वादिति॥ननुदाषितिप्रतिषेधेदापूलवनइत्यस्यैवग्रहणंयुक्तं॥ननुदैपः॥पकारेश्रूयमाणेआत्वंयोगादितिचेन्न॥अनुबंधाअनेकांताइतिपक्षेश्रूयमाण

स्यापिपकारस्यकाकादिवदनन्वयवत्त्वेनधातोरेजंतत्वानपायेआत्वप्रवृत्तेःएकांताअनुबंधाइतिपक्षेपिभवत्येवात्वं॥नानुबंधकृतमनेजंतत्वमितिसिद्धांतात्॥अत्रोदीचांमाङ्योव्यतीहारइतिकृतात्वस्यसेडोनिर्देशोज्ञापकः॥नचमाङ्माननइत्यस्यैवायंनिर्देशोव्यतिमिमीतनइत्यादेनस्यापिकदाचिद्व्यतीहारेवृत्तिसंभवादितिवाच्यं॥अपूर्वकालार्थस्यक्त्वाप्रत्ययस्यमाङ्माननइत्यस्यादनभिधानात्॥अत्रत्रभोक्त्योरेवप्रमाणत्वादित्याहुः॥एवंचमेङ्.इत्येवपठनीयेमाङोव्यतीहारइतिगुरुकरणंनानुबंधकृतमनेजंतत्वमितिज्ञापनार्थमेव॥भाष्यकारास्तुनायंदैपृकिंतुदिवादिषुद्यपृशोधनइत्येवपठिष्यतइत्याहुः॥नचस्वरेभेदःदायतीत्यादेरुभयथाप्यायुदात्तत्वात्॥ननुनाछीलिकेचानशिद्दायमानइत्यत्रस्वरेभेदः॥एयनिधातोरायुदात्तत्वंशपितुचानशोनोदात्तत्वमितिचेन्न॥उभयथाप्येतोदात्तत्वानपायात्॥नचश्यनस्वरस्यसतिशिष्टत्वेनप्राबल्यमितिवाच्यं।अन्यत्रविकरणेभ्यइतिपर्युदासात्॥आत्मनेरवश्चेत्यत्रत्यभाष्यकैय्यटबलेनस्वरशीवचानश्यपिअंतोदात्ततयानिर्णयात्॥स्थानिवत्सूत्रीयःकैयटग्रंथस्तुस्वरशस्सूत्रस्थभाष्यस्तोक्तिभ्योविरोधात्प्रामादिकइतिवस्यते॥ज्यायत्यादयस्तुदिवादिष्वेवादंतत्वेननपठिताः॥गणकार्यमनित्यमितिज्ञापयितुम्॥तेननविश्वसेद्विश्वस्तेपथिकवनिताःप्रत्यायास्यंत्यइत्यादिसिद्धं॥यत्तुभाष्येएकांतत्वपक्षेपिनदोषइत्युपक्रम्यपकारलोपेकृतेभविष्यतिदापूत्वंतुभूतपूर्वमनुबंधमाश्रित्यव्युत्पादनीयमितिसिद्धांतितं॥तत्रेत्थंप्रत्यवनिष्ठंते॥सत्यप्येजंतत्वेउपदेशेएजंतत्वंकथमिति॥अत्रोच्यते॥पित्करणसामर्थ्यादुपदेशेएजंतत्वाभावेपिआत्वप्रवृत्तिः॥वस्तुतस्तूपदेशग्रहणंभाष्यकारोनमन्यते॥तथाचतत्रवस्यति॥उपदेशग्रहणंनकरिष्यते॥यद्युपदेशग्रहणंनक्रियतेचेत्तास्तोतेत्यत्रापिप्राप्नोति॥अत्राप्याचार्यप्रवृत्तिर्ज्ञापयतिनपरनिमित्तस्यैवआत्वंभवतीति॥यदयंकीङ्जी

नांणावेच आत्वंशास्ति॥ नैतदस्ति ज्ञापकंनियमार्थमेतत्स्यात्॥ क्रीङ्जीनांणावेवेति॥ यत्तर्हि मीनातिमिनोतिदीङांल्यपिचेत्यत्रग्रहणमनुवर्त्तयतीति॥ ननुघणिदापयतीत्यत्राप्यदावितिप्रतिषेधःस्यादितिचेन्न॥ यथोद्देशपक्षेतरंगत्वाद्धावस्थायामेवघुसंज्ञायानिर्द्देशत्वात्॥ कार्यकालपक्षेतुघुसंज्ञायाणत्वसमानदेशतयापुकंप्रतिणत्वघुसंज्ञयोरसिद्धत्वेनाग्रेवपुकृतेघुसंज्ञानस्यादितिदोषः ग्रसजत्येव॥ अतएवभाष्येद्वेधासमाहितं॥ दाधाघ्वदाप्दिविति॥ यद्वाबांतावेतौधातूसूत्रमपिबांतं॥ चर्त्वेनसर्वत्रपकारोनिर्दिष्टः अतोदापयतीत्यत्रनासौनिषेधः तस्यापित्वादबांतत्वाच्चेति॥ आद्यंतवदेकस्मिन्॥ असहायेआद्यंतवदुक्तकार्याणिस्युः॥ औपगवः॥ यथानव्यादीनांप्रत्ययाद्युदात्तत्वंप्रवर्त्तते॥ एवमिहाणोपि आभ्यां॥ यथावृक्षाभ्यामित्यादौसुपिचेतिदीर्घत्वंभवतिएवमिहापि। ईङ्गतौदिवादिः॥ एयंअचोयदिति॥ अजंन्तान्नातोर्विधीयमानोयत्प्रत्ययोयथाचेयंजेयमित्यादौभवतितथेहापि॥ इणस्तक्ष्णुतिस्त्विति क्यपिइत्यमित्येवरूपंनतुएयमिति॥ एकस्मिन्निति किं॥ सभासन्नयनेभवःसाभासन्नयनः॥ अत्रत्याकारस्यादित्वेसतितमेवाश्रित्यसभासन्नयनशब्दस्यवृद्धत्वंस्यात्॥ ततश्चाणंवाधित्वावृद्धच्छः प्रसज्येत॥ ननुवृद्धिर्यस्याचामादिरिति सूत्रेआदिग्रहणस्यापीदमेवव्यावर्त्त्यं॥ नत्सामर्थ्यादेवसमासन्नयनशब्देवृद्धसंज्ञानभविष्यतीतिचेन्न॥ यदिहिवृद्धसंज्ञासूत्रेआदिग्रहणसामर्थ्यादनादेशिकस्यमुख्यस्यैवादेर्ग्रहणंनर्हिजानातीतिज्ञाब्राह्मणीत्यादिरसहायोपिवृद्धोनस्यात्॥ ततश्चज्ञायाअयंज्ञीयइत्यादिनसिद्ध्येत्॥ असतिहिमुख्यसूत्रस्थैकग्रहणेयत्रादिव्यपदेशोमुख्योनास्ति॥ असहायेमध्येअंतेचससंज्ञौप्यविशेषादतिदेशस्यविषयःस्यात्॥ यदित्वतिदेशसामर्थ्याज्ज्ञाशब्देवृद्धत्वंतत्रैवविशेषात्सभासन्नयनेपिस्यात्॥ वृद्धसंज्ञायामादिग्रहणंतर्हिव्यर्थमेवेतिचेत्॥ हंतैवमतिदेशस्यादि

ग्रहणस्य च सामर्थ्यात् सर्वत्र विकल्पाप्राप्तिः॥ इहैकग्रहणेकृतेत्वन्त्यमध्ययोर्व्यावृत्त्या वृद्धसंज्ञायामादिग्रहणं सार्यकमितिदिक्। यत्तु न्या
सकृतोक्तम्॥ अतिदेशसूत्रेणैकग्रहणाभावेवृद्धसंज्ञासूत्रस्थमादिग्रहणमनातिदेशिकप्रतिपत्त्यर्थंसदसद्भायानांज्ञादीनामेववृद्धसंज्ञा
वारयेन्नतुसभासन्नयनस्यसन्नयनेत्येतदंतर्गतांश्चनुरोचोपेस्यानातिदेशिकस्यादित्वस्यतत्रसत्वादिति॥ तच्चिंत्यम्॥ परस्मिन्नंशुति
यस्मात् पूर्वंनास्तिसआदिरितिसिद्धांतरीत्यामध्यस्थेप्यादित्वविरहात्॥ इयानेवहिविशेषः॥ असद्भायेसत्यन्तादिशेषणविरहाद्विशि
ष्टाभावः मध्यस्थेनुविशेष्याभावाद्विशिष्टाभावइति॥ वार्त्तिककारस्तुलाघवात्पूर्वत्वमात्रमादिशब्दस्यप्रवृत्तिनिमित्तम्॥ अनुत्तरत्व
मात्रंचोत्तरशब्दस्यनतुसत्यन्यस्मिन् इत्यपिविशेषणंगौरवात्॥ तथाचासद्भायेपिमुख्ययोरेवाद्यंतयोः संभवइतिमन्वानः सूत्रमेतत्प्रत्या
चख्यौ॥ आहच॥ अपूर्वानुत्तरलक्षणत्वादाद्यंतयोः सिद्धमेकस्मिन्निति भाष्यकारस्तुनैतन्मेने। सत्यन्यस्मिन्निति विशेषणप्रक्षेपप्रयुक्त
स्यगौरवस्यप्रामाणिकत्वात्॥ लोकेत्ययमादिरंतोवेत्युक्ते अवशिष्टमपिकिंचित्अस्तीतिनियमेनप्रतीयते॥ परान्नियतोपस्थितिश्च
शक्तिसाध्या॥ अनुभवमपलप्यैकदेशमात्रेशक्तिकल्पनेतुश्वशुरादिपदानामपिलोपवाङ्मात्रेत्वमात्रंपितत्वमात्रंतद्वदकपुंस्त्वमात्रंवाश
क्यतावच्छेदकंस्यादितिविशिष्टविषयकशक्त्युच्छेदेनसकलशिष्टव्यवहारव्याकोपःस्यादिति॥ नन्वेवमपिव्यपदेशिवद्वचनंकर्त्तव्यमेव
इत्याद्यारेत्यादौ धात्ववयवत्वंप्राथम्यमेकाच्त्वंचाश्रित्यद्वित्वंयथास्यात्॥ एकाच इतिहिबहुव्रीहिरितिवक्ष्यते॥ नचेणोवृद्ध्यापा दे
शयोरंतेश्चरपरत्वेचकृतेआपआर्इत्यनयोरेकाच्त्वंचादेरिवमुख्यमेवास्तीतिवाच्यम्॥ द्विर्वचनेचीतिरूपातिदेशेनइकअनयोरेवद्वि
रुक्तेः॥ किंच। यजेः पंचमलकारेसदेवान्यक्षद्विषितोयजीयानीत्यादौसिच्बहुलंलेटीतिसिप्॥ तस्यवत्त्वंव्यपदेशिवद्भावेनैवसाध्यंप्र

त्यपस्यपः सकारस्तस्यषत्वमितिसिद्धांतात्॥ तस्मात्व्यपदेशिवदेकस्मिन्नित्येवसूत्र्यतांकिंप्रकृतसूत्रेण॥व्यपदेशोनामविशिष्टेमु
रव्योपदेशोव्यवहारएकाचइत्यादिः सोस्यास्तीतिव्यपदेशीपचिप्रभृतिस्तस्मिन्निवासहायेपिकार्य्यस्यादित्यर्थः॥अत्राहभाष्यकारः
॥अवचनाल्लोकविज्ञानात्सिद्धमिति॥वचननिरपेक्षाल्लोकव्यवहारादेवव्यपदेशिवद्भावसिद्धेरायंतवदितिव्यपदेशिवदितिचोभयम
पिनसूत्रपितव्यमित्यर्थः॥अस्तिहिलोकेनिरूढोयंव्यवहारः॥अयमेवमेज्येष्ठः पुत्रोयंमेवमध्यमोयमेवकनिष्ठइति॥तथा।असूता
यामसोष्यमाणायांचपश्यमगर्भेणहतेतिव्यवहरति॥तथापूर्वमनागतोग्रेनाजिगमिषुश्चाह॥इदंमेप्रथमागमनमिति॥ननुसर्वइमे
गौणाव्यवहारास्तत्कथंमुख्येचरितार्थेशास्त्रंगौणेप्रवर्त्तेतेतिचेन्न॥निरूढतरतयागौणस्याप्यस्यमुख्यसमकक्षत्वात्॥ज्ञापकाच्च
॥यदयमिदंदीतिसिचोलोपंशास्तितद्ज्ञापयति॥व्यवदेशिवदेकस्मिन्निति॥नह्यन्यथाइदलभ्यते॥वस्रूरूपत्वेपिवलादित्वविर
हात्॥तथादीर्घदृणःकिनीत्यादीन्यपिज्ञापकानिनहिव्यपदेशिवद्भावेविनादृणोभ्यासोलभ्येतदितिदिक्॥यत्तूक्तंकैय्यटेन।अर्थ
वताव्यपदेशिवद्भावात्कुरुतेइत्यादौनच्छब्दाकारस्यानर्थकत्वेनतत्रटिसंज्ञासिद्धेआदिवद्भावोवचनेनैवसाधीयइति॥अत्रेद
वक्तव्यम्। अर्थनाव्यपदेशिवद्भावइतिनावश्येयंपरिभाषातस्याविध्यंगत्वात्॥व्यपदेशिवद्भावस्तुलोकिकइत्युक्तत्वात्प्रत्यंगत्वा
योगात्॥किंतुशास्त्रेव्यपदेशिवद्भावयोजनायशब्दार्थसमुदायमाश्रित्यतत्रैकदेशःशब्दइतिव्युत्पादयितुमर्थवत्ताापेक्षितेतिपर
तस्याशयः॥अतएवषष्ठेनिजोचत्वारएकाचइत्यनद्व्युत्पादनावसरेभाष्यकैयटयोरनर्थकेनापिव्यपदेशिवद्भावः स्वीकृतः लोकइ
वशास्त्रेप्यनर्थकस्यव्यपदेशिवद्भावसंभवात्॥तस्मादर्थवतेतिप्रायोवादमात्रंसूत्रप्रत्याख्यानंतुसम्यगेवेतिदिक्॥ तरसमपोघः॥ राम ८०

एतौघसंज्ञौस्तःकुमारितरा॥कुमारितमा॥घरूपेतिह्रस्वः॥नद्यास्तरोनदीतरदित्यत्रतुनभवति॥तमपासाहचर्येणप्रत्ययस्यैवतर पो
ग्रहणात्॥यद्वातरतिरूपंसंज्ञाप्रवृत्तावाश्रितंतच्चपरिनिष्ठितेप्रयोगेक्वापिनास्तीत्यौपदेशिकंकृत्वातेनतच्चतरप्रत्ययस्यैवास्ति॥अपिच्च
प्रतिपदोक्तत्वमपीहसुलभं॥तेनावयवशोव्युत्पादितेनदीतरेनातिप्रसंगः॥किंच॥समानाधिकरणेस्त्रीलिंगेपरेह्रस्वत्वंविधीयतेऽअ
न्यथामहिषीवरूपंमहिषीरूपमित्यत्रापिस्यात्॥सुप्सुपेतिसमासः॥रूपमाकृतिःमहिषीवेयमाकृतिरित्यर्थः॥सामानाधिकरण्यस्त्री
त्वेचस्वार्थिकत्वादतिशायनिकस्यस्तोनतुनदीतरेऽतोनोक्तदोषः॥नन्वातिशायनिकप्रकरणएवतादीघइतिपितौघइतिवाक्रियतां
लाघवादितिचेन्न॥प्रकरणोत्कर्षेणेहसंज्ञाकरणस्यान्योपितरबस्तीतिज्ञापनार्थत्वात्॥सचानिर्दिशार्थत्वात्स्वार्थेभवति॥तेनाल्पा
च्तरंलोपश्चबलवत्तरइत्यादिसिद्धं॥केचित्तुसामान्यापेक्षंज्ञापकमाश्रित्यईयसुनोपिस्वार्थिकतामाहुः॥तेनाहौमहीयस्त्वमसाहसि
क्यमित्यादिप्रयोगाः समर्थिताभवंति॥बहुगणवतुडतिसंख्या॥एतेसंख्यासंज्ञाःस्युः॥बहुकृत्वःसंख्यायाःक्रियाभ्यावृत्तिगणने
कृत्वसुच्॥बहुधासंख्यायाविधार्थेधाबहुभिःकीतोबहुकः॥संख्याया अतिशदंतायाःकन्बहुशःबहुत्वार्थाच्चस्कारकादित्यनुवर्त्त
मानेसंख्येकवचनाच्चवीप्सायामितिशस्॥गणकृत्वः॥गणधागणकः॥गणशः॥तावत्कृत्वः॥तावद्धातावत्कः तावच्छः॥एतदेते
भ्यःपरिमाणेवतुप्॥आसर्वनाम्नः शेषंप्राग्वत्॥कतिकृत्वः॥कतिधाकतिशः किमःसंख्यापरिमाणेडतिच॥शेषंप्राग्वत्॥स्यादेत
त्॥वैपुल्येपिबहुशब्दोवर्त्तते॥बहुर्हिमवानितिसंघेचगणशब्दःभिक्षुकाणांगणइति।समवायश्चयोगणइत्यमरः॥तथाचसंघ
वैपुल्यवाचिनोरप्यनयोःसंख्यासंज्ञास्यादितिचेन्नसंख्यायतेनयेत्यन्वर्थसंज्ञाविज्ञानात्॥तस्मात्संख्यावाचिनोरेवबहुगणश

ब्द्योरिहग्रहणंतच्चनियमार्थं॥अनियतबहुत्ववाचिनांमध्येनयोरेवसंख्यासंज्ञाननुभूर्यादीनामिति॥तेनाबहुविषययोर्द्वयोरेकयोर्निपतबहुत्ववाचिनांच्यादीनांचनव्यावृत्तिः॥ननुनियमार्थत्वेसिद्धेसजातीयापेक्षत्वान्नियमस्यत्वदुक्तव्यवस्थासिद्ध्येत्॥नियमार्थत्वमेवतुदुरुपपादं॥विध्यर्थतायाएवौचित्यात्॥तथाहि॥अस्तितावत्कृत्रिमाकृत्रिमयोःकृत्रिमेकार्थंप्रत्ययइतिपरिभाषासाचन्यायमूलासंज्ञासूत्रेणसंज्ञिविशेषेनियम्यमानोहिसंज्ञाशब्दःकथंनदिशंबोधयेत्॥एवंस्थितेबहुगणयोरिहग्रहणाभावेसंख्याप्रदेशेषुग्रहणमेवनस्यात्॥अकृत्रिमत्वात्॥तस्मात्स्वसंग्रहार्थमेवबहुगणग्रहणंननुभूर्यादिनिवृत्त्यर्थमितिअत्राहुः॥संज्ञिविशेषेक्रियमाणाःसंज्ञानियमोयदिसामान्यापेक्षस्तदापुक्ताऽकृत्रिमस्यव्यावृत्तिःविशेषपरत्वेतुसजातीयंकृत्रिमांतरमेवनियमेनव्यावर्त्यतेनत्वकृत्रिममपि॥तदेतदुच्यते॥उभयगतिरिहशास्त्रेभवतीति॥कृत्रिमाकृत्रिमयोरुभयोरपिग्रहणमित्यर्थः॥अस्तिचसंख्याप्रदेशेषूभयग्रहणेलिंगंसंख्यायाअतिशदंतायाःकन्नितिसूत्रेशदंतपर्युदासः॥नहिकृत्रिमांसंख्याशदंतास्तीतिदिक्॥तेनपंचधापंचकृत्वइत्यादिसिद्धंभवति॥यद्यपिसंज्ञाविधौप्रत्ययग्रहणेनदंतग्रहणंनास्तितथापिवनुङत्योःकेवलयोःसंज्ञायांप्रयोजनाभावात्सामर्थ्यान्तदंतग्रहणं॥नहितविधौहिङ्याप्प्रातिपदिकादित्यधिकृतेनचेकेवलस्यप्रत्ययस्यप्रातिपदिकत्वमस्तीतिबोध्यम्॥एतच्चसूत्रेभाष्येप्रत्याख्यातं॥बहुपूगगणसंघस्यतिथुक्॥वनोरिथुक्॥षट्कतिकतिपयचतुरांथुगितिसूत्रैर्डतिपरेआगमाविधीयमानाबहुप्रभृतीनांडतिनिर्वाहकंसंख्यात्वंज्ञापयंतीतिकिमनेनसूत्रेण॥ननुबहुपूगगणसंघेत्यादौविशेषाश्रयणात्संघवैपुल्यवाचिनोरपिबहुगणशब्दयोःसंख्याकार्यंस्यादितिचेन्न॥अनियतसंख्यावाचिनोरप्येतयोःसंख्याकार्यंभवतीत्येतावन्मात्रज्ञापनेनचरितार्थत्वेसतिसर्वथासंख्यामप्रतिपाद्यनोरपिसंख्याकार्य

कल्पनस्यगौरवपरास्तत्वात्॥ भूर्यादीनांत्वनियतसंख्यावाचिनांग्रहणंनभवतिनियतसंख्यावाचिनोपञ्चादीनामेवलोकेसंख्याशब्द
त्वेनप्रसिद्धत्वात्॥प्रसिद्धाप्रसिद्धयोःप्रसिद्धग्रहणस्यन्याय्यत्वात्॥ननुचैवमपिबहुगणयोरिवपूगसंघादीनामपिधाशस्रुत्वसुना
दिसंख्याकार्यप्रसंगः॥नचबहुगणयोःसामान्यापेक्षंज्ञापकंपूगादीनांतुडद्विषयकमेवेतिवाच्यम्॥अनुपपत्तेःसमानत्वेनएकसूत्रेण
त्तत्वेनचवैषम्येबीजाभावादितिचेत्॥मैवं॥लक्ष्यानुरोधेनक्वचित्सामान्यापेक्षंक्वचिद्विशेषापेक्षंज्ञापकमित्याश्रयणात्तदनुरो
धेनवैरूप्यस्यसोढव्यत्वादितिदिक्॥इमांकुसृष्टिमसहमानेनैवसूत्रकृतासूत्रमिदंप्रणीतमितितुपरमार्थः॥अत्रवार्त्तिकानि॥अ
ध्यर्द्धग्रहणंचसमासकरणंविध्यर्थं॥अर्द्धेनाधिकमध्यर्द्धं॥एकदेशवाचकोयमर्द्धशब्दः॥तस्याधिशब्देनसमासेकृतेयौगिकार्थः प्र
तीयतेनसंख्येतिवार्त्तिकारंभः अध्यर्द्धेनक्रीतमध्यर्द्धमूर्ण्यादिकंसंख्येइत्यनुवर्त्तमानेतद्धितार्थेतिसमासः ततःपूर्णादञन्यतरस्या
मित्यत्रष्ठञोर्वाअध्यर्द्धपूर्वेतिलुक्॥अध्यर्द्धेनक्रीतमध्यर्द्धकं॥संख्यायाअतिशदन्तायाःकनितिकन्॥इहसमासविध्यर्थमितिसंबंधसामा
न्येषष्ठी॥समासेविधीयमानेसमासनिमित्तेवान्यस्मिन्कार्येविधीयमानइत्यर्थः॥तेनद्विगुनिमितोलुगपिलभ्यते॥तथाचाध्यर्द्धपूर्वेतिसू
त्रेध्यर्द्धग्रहणंनकर्त्तव्यंभवति नदुक्तंलुकिचाग्रहणमिति॥अर्द्धपूर्वपदश्चपूरणप्रत्ययांतःसंख्येत्यनुवर्त्तते॥पूरणप्रत्ययांतइत्यस्यपूरण
प्रत्ययांतोत्तरपदइत्यर्थः॥समासकन्विध्यर्थमित्येव॥अर्द्धपंचमयेषामितिबहुव्रीहिः॥अर्द्धपंचमैरर्द्धाधिकैश्चतुर्भिःमूर्णैःक्रीतमर्द्धपंचम
शूर्ण्यपूर्ववदञष्ठञोर्वालुक्॥अर्द्धपंचमेनक्रीतमर्द्धपंचमकं॥अधिकग्रहणंचालुकिसमासोत्तरपदवृद्ध्यर्थंअधिकयाषष्ठ्याक्रीतोधिक
षाष्ठिकः॥अधिकसाप्ततिकः॥तद्धितार्थेतिसमासः॥प्राग्वतेष्ठञ्॥अलुकीतिवचनान्लुकिकर्त्तव्येसंख्यासंज्ञानास्तीतिद्विगुत्वमपिन

तेनाध्यर्द्धपूर्वद्विगोरितिलुङ्न॥ ततःसंख्यायाःसंवत्सरसंख्यस्यचेत्युत्तरपदवृद्धिः॥ नन्वलुकीतिव्यर्थम्॥ उत्तरपदवृद्ध्यर्थमितिवचनादेवलुग
भावस्याप्येतुंशक्यत्वादितिचेन्न॥ अर्हत्यर्थात्परेष्वर्थेषुयेप्रत्ययास्तेषांलुगप्रास्यातत्रैवोत्तरपदवृद्धेःसावकाशत्वात्॥ ष्णंतात्षट्॥षांता
मांताचसंख्याषट्संज्ञास्यात्॥षट्तिष्ठंतिषट्पश्य पञ्चसप्तेत्यादि॥संख्येतिकिम्॥विप्रुषःपामानः॥ननुशतानिसहस्राणीत्यत्रनुमिक्रु
तेनस्यपूर्वभक्तत्वेनांतासंख्येतिषट्संज्ञास्यादितिचेत्॥अस्तु॥नचैवंषड्भ्योलुगितिलुक्स्यादितिवाच्यम्॥सर्वनामस्थानसन्निपाते
नक्रुतस्यनुमःतद्विघातकत्वात्॥नन्वेवमप्यष्टानामितिनसिद्ध्यति॥तथाहि॥अष्टन्आमितिस्थितेपरत्वान्नित्यत्वाच्चाष्टनआविभक्ता
वित्यात्वेकृतेःनांतत्वात्संज्ञायामसत्यांषड्भ्युर्भ्यश्चेतिनुट्नप्राप्नोतिइतिचेन्न॥यथोद्देशपक्षेआत्वात्प्रागेवषट्संज्ञा॥अंतरंगत्वात्॥त
नःक्रुतेप्यात्वेसत्येकदेशविक्रुतस्यानन्यतयाषट्संज्ञकत्वेननुटःसिद्धत्वात्॥कार्यकालपक्षेतर्त्युक्तदोषस्तदवस्थएव॥किंच॥यथोद्देशेप्य
ल्विधित्वादतिदेशोदुर्लभः॥अतएववब्रश्चेत्यचःपरस्मिन्नित्यस्यफलमितिकैयटइतिचेन्न॥अष्टनोदीर्घादितिदीर्घग्रहणेनक्रुतात्वस्या
पिषट्संज्ञाज्ञापनात्॥तथाहि॥न्रःसंख्यायाइत्याद्युदात्तत्वंबाधित्वाघृतादिपाठादंतोदात्तोष्टन्शब्दःसाधितः॥तस्माद्भिसि अष्टभिर
ष्टाभिरितिरूपद्वयंतन्मात्वाभावेमध्योदात्तमात्वपक्षेत्वंत्तोदात्तत्वमितिसिद्धांतः॥तत्रषट्त्रिचतुर्भ्योहलादिरितिसूत्रेणषण्णांषड्भिरित्या
दाविवविभक्तेरुदात्तत्वंषासंतद्बाधित्वाझल्युपोत्तममिति प्राप्तंषट्त्रिचतुर्भ्योयाझलादिर्विभक्तिस्तदंतेपदेउपोत्तममुदात्तंभवतीतिहितस्या
र्थः॥तद्बाधनायाष्टनोदीर्घादित्यारभ्यते॥दीर्घोतादष्टनःपराःसर्वनामस्थानंविभक्तिरुदात्ताभवतीतिसूत्रार्थः॥तत्रयद्यात्वपक्षेषट्संज्ञा
नस्यात्॥तर्हिसावकाशोष्टनःस्वरःपरत्वादात्वाभावपक्षेझल्युपोत्तममिति षट्स्वरेणवाधिष्यतइतिकिंदीर्घग्रहणेन। क्रुतात्वस्यापिषट्

संज्ञायांसत्यांनुषट्स्वरस्याष्टनःस्वरोपपादःसंपद्यते॥नचाष्टनःस्वरःशसिसावकाशइतिवाच्यं॥नत्रैकादेशउदात्तइतिसूत्रेणैवगतार्थ
त्वात्॥अष्टनशब्दोनोदात्तइतिसमनंतरमेवोक्तत्वात्॥तेनदीर्घपक्षइवनदभावपक्षेपिविभक्तेरुदात्ततास्यादितितद्व्यावृत्त्यर्थंक्रियमा
णंदीर्घग्रहणंसार्थकमेव॥तस्माद्दीर्घग्रहणेनात्वपक्षेषिषट्संज्ञाज्ञाप्यतइतिस्थितम्॥नचैवंदीर्घग्रहणस्यात्वविकल्पज्ञापकत्वंन्
स्यादितिवाच्यम्॥उभयज्ञापकत्वसंभवात्॥नह्येकेनैकमेवज्ञाप्यतइतिनियमः॥यावतात्रिनानुपपत्तिस्तावतोज्ञाप्यत्वात्॥तच्चैकम
नेकंवेत्यन्यदेतत्॥प्रकृतेचोभयंविनादीर्घग्रहणवैयर्थ्यानुद्धारादितिदिक्॥यदितुष्णाःषकारनकाराकाराअंतेयस्याःसाष्णांनेतिप्रकृ
तसूत्रेणषकारोपिप्रश्लिष्येततदाह्वाभ्यामित्यत्रषट्त्रिचतुर्भ्योहलादिरितिविभक्तेरुदात्तत्वंस्यात्॥॥आह्वाभ्यांहरिभ्यामिंद्रयाही
त्यादौआद्युदात्तमेवतुह्वाभ्यामितिपदंपठ्यतेतस्मादिहाकारप्रश्लेषोनवर्णनीयःकिंतूक्तप्रकारेणवादर्तव्यइतिस्थितम्॥तथासप्त मे
योगविभागंकृत्वा नह्लेनापिद्वेधाभाष्येसमाहितम्॥तथाहि॥षड्भ्योलुगित्यत्रषड्भ्यइतिविभज्यतेअष्टाभ्यऔशिति सूत्रादष्टाभ्यइ
त्यनुवर्त्तते॥तेनषड्भ्योयदुक्तंकृताकारादष्टनोपितत्स्यादितिसूत्रार्थः॥नचैवंजश्शसोर्लुगप्यतिदिश्येतेतिवाच्यम्॥औश्त्वविधिवैय
र्थ्यापत्तेः॥अथवाष्टनआविभक्तावित्यस्मादनंतरंरापइतियोगंविभज्यह्लीत्युभयोर्योगयोःशेषोव्याख्येयः॥तेनाष्टानामित्यत्रनुटःपश्चा
देषात्वंनतुषाक्॥नचैवंजश्शसोरात्वंनस्यादितिवाच्यम्॥लाघवार्थमष्टभ्यइतिनिर्देष्टव्येष्टाभ्यऔश्इतिकृतात्वनिर्देशेनजश्शसोर्विष
येआत्वानुमानात्॥यत्रात्वंनत्रैवौश्त्वंयथास्यादित्येवदर्थंहितत्रदीर्घोच्चारणंकृतमिति॥स्यादेतत्॥ह्लीनियद्युभयोःशेषस्तर्हिप्रिय
ष्टनशब्दे औजसमोट्टास्टाङेङसिङसोसाम्ङ्योस्सुबैकल्पिकतयेष्यमाणमात्वंनसिद्ध्येत्॥नचतत्रात्वंनेष्यतएवेतिवाच्यम्॥इतःप्रावी

नपक्षाणामनिष्टापत्तिप्रसंगात्॥ तेषुत्वात्वंप्राप्यतएवविभक्तिमात्रेनहिधानात्॥ नचषड्भ्योलुक्षदृचतुर्भ्यश्चेतिसूत्राभ्यांविधीयमानौलु
ग्नुटौयथागौणतायांनस्तस्तथात्वमपिनस्यादेवेतिवाच्यम्॥ वैषम्यात्॥ लुग्नुटोर्विधौहिषड्भ्यइतिषट्चतुर्भ्यइतिबहुवचननिर्देशात्ष.
डर्थप्राधान्यएवतौप्रवर्त्तेते॥ आत्वविधौतुअष्टनइत्येकवचननिर्देशात्गौणेपिप्रियाष्टाभ्यामित्यात्वंप्रवर्त्तनएव॥ पदांगाधिकारेतस्यतदुक्त
रपदस्यचेतिवक्ष्यमाणत्वात्॥ नचजश्शसोरष्टाभ्यऔशिनिरुक्तात्वनिर्देशेनानुमीयमानमात्वंकेवलेप्राधान्येचाष्टौपरमाष्टावित्यत्रयथा
भवत्येवंगौणत्वेपिभविष्यतीतिनदंशेनानुपपत्तिरितिवाच्यं॥ औश्त्वंहिलुग्नुटावितवगौणत्वेनभवति॥ अष्टाभ्यइतिबहुवचननिर्देशात्
अन्यथाहिरुक्तात्वानुकरणेपिएकवचनेनैवनिर्दिशेत्॥ अष्टऔशिति॥ अष्टइतिवास्पष्टंचैतद्दिक्षैवसूत्रेभाष्यकैय्यटयोः॥ तथाचौश्त्वविधौ
रुक्तात्वनिर्देशबलेनानुमीयमानमात्वमपिप्राध्यान्यएवस्यान्नतुगौणतायामितितदंशेप्यनुपपत्तिसाम्यात्॥ तस्माद्ध्रीत्युभयशेषश्चे
न्नस्यादात्वंप्रियाष्टनाताड्ड.सिड.सोसाम्सुतथैवौजसमौद्दशसि॥ प्रागुक्तेषुनुपक्षेषुभवेदात्वममीष्वपि॥ फलभेदेमहत्येवंकथंपक्ष
विकल्पनात्॥ अत्रोच्यते॥ प्रियाष्टन्शब्दस्याजादावात्वमनिष्टमेवह्रीत्युभयोःशेषस्यभाष्यएवसिद्धांतितत्वात्॥ तथासतिओजसोःक्रमेणप्रि
याष्टौप्रियाष्टान इत्येवरूपंस्यान्नतुप्रियाष्टौप्रियाष्टइत्यपिइत्याशंक्यंयथालक्षणमप्रयुक्तेइत्यभिहितत्वाच्च॥ अतएवयथालक्षणमिति
प्रतीकमुपादायनभवत्येवात्रात्वमित्यर्थइतिकैय्यटोव्याख्यात्॥ एवंस्थितेप्राचीनाःपक्षाअपरितोषयस्तास्एवव्यवस्थितविभाषयागौणता
यामजादिष्वात्वंनभवतीत्याशयेनवायोज्याः॥ उदात्ततभाष्यकैय्यटप्रामाण्यात्॥ तस्मात्प्रियाष्टनःसर्वेषुवचनेषुराजन्शब्दसाधारणंरू
पंहलादौतुह्राहाशब्दसाधारणमपरंरूपं॥ औश्नुटोस्तुप्राप्तिरेवनास्तीतिप्रामाणिकःपंथाः॥ अतएवसर्वादीनिसर्वनामानीतिसूत्रेहरदत्ते

नगौणत्वेऽौश्नभवतीतिस्पष्टमेवाभिहितं॥अतएवाष्टाभ्यऔशिनिसूत्रेनदेनग्रहणमत्रेष्यते॥परमाष्टाविद्युत्काप्रियाष्टानइत्यत्रात्वस्या
भावादौश्नभवतीतिकाशिकासंगच्छते॥अतएवचानड्वनआविभक्ताविनिसूत्रेनदंतविधिश्चात्रेष्यतेप्रियाअष्टौयस्यप्रियाष्टाइत्यपिय
थास्यादितिकाशिकायंथोपिसंगच्छते॥ह्लादावात्वस्यनिर्बाधत्वात्॥हरदत्तस्त्वष्टाभ्यऔशिनिसूत्रेप्रियाष्टानइत्यत्रेतिवृत्तिग्रंथमुपादाय
यथापुनर्गौणात्मात्वंनभवतितथातद्धिधावेववस्यतइतिप्रतिज्ञायअष्टनआविभक्ताविनिसूत्रेणकवचननिर्देशात्स्वरूपस्यग्रहणं
नार्थस्यतेनोपसर्जनेप्यष्टनिभवति॥तत्रापिविकल्पितत्वात्॥प्रियाष्टानौप्रियाष्टानइत्यपिभवति॥तत्राप्यात्वपक्षेभसंज्ञाविषयेआतोलो
पमिच्छंतिः॥प्रियाष्टःपक्षेत्यादिआत्वाभावपक्षेप्यल्लोपेष्टत्वंप्रियाष्टइतिभवति इत्येतेनग्रंथेनपूर्वप्रतिज्ञातार्थविपरीतंभाष्यवृत्त्यादिविरुद्धं
चकथमभिहितवानितिनस्याशयंसएवप्रष्टव्यः॥अल्लोपेष्टुत्वमित्यपिनदुक्तिश्चिंत्यैव॥पूर्वस्मादपिविधावल्लोपस्यस्थानिवद्भावेनष्टुत्वा
योगात्॥नचपूर्वत्रासिद्धीयेनस्यानवदिनिषेधः॥नस्यदोषःसंयोगादिलोपलत्वणत्वेष्विति मापवादत्वात्॥ननुरषाभ्यांणोनइतिप्रतिपदोक्तेणत्वेनत्रगृ
ह्यतेननुष्टुत्वविधिर्लभ्यमपिविलंबितप्रतीतिकत्वादितिचेन्न॥अपदांतस्यमूर्द्धन्यइतिसूत्रंसंपूर्णरषाभ्यामितिसूत्रेनुवर्त्यनत्रत्यस्यणग्रहणस्यपदांत
स्येतिनिषेधसूत्रस्यचभाष्येप्रत्याख्यातत्वात्॥षष्ठोत्तरंमुनीनांप्रामाण्यात्॥नचमूर्द्धन्यशब्देनष्टशब्देनवानिर्वर्त्यमानेणकारेवैषम्यमस्तिसूत्रकारीत्याक
थंचित्संभवन्नपिन्यायेत्रभाष्यानुरोधात्त्याज्यएव॥तथाचशर्पूर्वाःखयइतिसूत्रेस्वर्पूर्वग्रहणंकर्त्तव्यमितिवार्त्तिकंप्रत्याचक्षाणोभगवानाह॥अभ्यासजश्चत्वचर्त्वे
सिद्धमित्येवमत्वतुग्रहणंनकर्त्तव्यमिति॥नचाचद्ह्लादिःशेषेकर्त्तव्येनुकश्रुत्तेननिष्ठानस्यचकारस्यापिचर्त्वेनसिद्धतयाउचिच्छिषतीतिरूपंसिद्धमि
तितदाशयःकैय्यटेनवर्णितः॥तदेवंप्रियाष्टइत्याद्येवरूपमुचितं॥नचैवंपूष्णइत्यादावपिनरूपएवपरेणेतिवाच्यं॥तत्राडुपाद्यादिसूत्रेणणत्वप्रवृत्तेरितिदिक्॥

डतिच॥ डत्यन्तासंख्याषट्संज्ञास्यात्॥ कतिसंतिकत्यङ्क्षीःषट्त्वाज्जशशसोर्लुक्॥संख्येतिकिं॥पानेर्डतिःपतयः॥नचास्यसंज्ञापिस्या
दितिवाच्यम्॥वतुसाहचर्यैणतत्रतद्धितस्यैवग्रहणात्॥दृदंसूत्रेप्रत्याख्यानंभाष्ये॥बहुगणवतुसंख्या डति संख्येत्यनुवर्त्तते॥ततःष्णं
तात्षट्संख्याडतीत्युभयमनुवर्त्तते॥पूर्वसूत्रेप्यन्वर्थसंज्ञाविज्ञानात्॥संख्याप्रश्न विषयस्यैवडतेर्ग्रहणंनत्वौणादिकस्येति॥क्तक्तवतूनि
ष्ठा॥एतौनिष्ठासंज्ञौस्तः॥कृतःकृतवान्॥ननुविहितयोःप्रत्ययोरनेनसंज्ञासंज्ञयाचविधानं॥वक्ष्यतिहितीयेनिष्ठेति॥तथाचान्योन्या
श्रयइतिचेन्न॥सूत्रशाटकवज्जातिसंज्ञाविज्ञानात्॥तौभूतेकालेभवतोययोर्विहितयोर्निष्ठेत्येषासंज्ञाभविष्यतीति॥स्यादेतत्॥अनुबं
धाःकार्यार्थमुपादीयंतेननुश्रवणार्थंतेषांलोपविधानात्॥तथाचलुप्तानुबंधस्यपरिनिष्ठितस्ययत्रसारूप्यंतत्रक्तानुबंधकार्य्यंभवतु
क्तवानेतितुनिश्चेतुमशक्यं॥नचकाकादिवदुपलक्षणस्यापिव्यावर्त्तकताभविष्यतीतिवाच्यम्॥काकादिनापिहिवेदिकापुंडरीकादि कं
स्थिरंकिंचित्परिचाप्यतेतद्दलाच्चोडीनेपिकाकेव्यवहारोनसंकीर्य्यते॥नचेहपरिचेयंनरमुपलभ्यते क्तप्रत्ययतन्त्रस्ययोः काकादि
कल्पौहिककारनकारौनद्दपगमेसंवृत्तेतइत्यत्रपरिचेयस्यपरस्परव्यावृत्तस्यदुर्वचत्वात् इति। अत्राहुः कालकारकविशेषाद्योअर्थो
एवात्रवेदिकापुंडरीकादिस्थानापन्नास्तद्दर्शनाच्चानुबंधस्मृतौसत्यांनक्तप्रयुक्तंकार्य्यंसाधुतयाज्ञायते॥तूष्णालूनःशालिरितिके
नचित्प्रयुक्तेलक्षणज्ञेनकर्मभूतकालबलात् क्तप्रत्ययोपपत्तिर्निर्णीयते॥लोक्तमालभेतेतिप्रयुक्तेतुमेषवाचीलोनशब्दस्तेन प्र
त्ययानःप्रयुक्तः इतिनिर्णीयते। हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन्नित्सुणादिसूत्रात्॥लोतःस्यादश्वचिन्हयोरितितुपंचपाद्यां
वृत्तौस्थितं॥तथाप्राभिन्नघटंदेवदत्तइतिप्रयोगेकर्त्रैकत्वाद्यवगमाल्लुडंतस्यायंप्रयोगोननुनिष्ठांतस्येतिनिर्णीयते॥स्यादेतत्॥

अंजिघृसिभ्यः क्तः इतिक्तप्रत्ययेअक्तःपृक्तंसिक्तमितिव्युत्पादितं॥तत्रापिनिष्ठासंज्ञास्यात्॥ननश्चनिष्ठाचद्युजनादितिस्वरःस्यात्॥निष्ठांतंच
क्तंसंज्ञायामाशुदानंस्यात्सचेदादिराकारोनेतिसूत्रार्थः।नचेष्टापत्तिः।पृक्तंमिमिक्षदित्यादावंतोदात्तस्यैवपठ्यमानत्वादिति॥अत्राहुः॥अनः
कंकमीतिसूत्रेकमिग्रहणेनैवसिद्धेकंसग्रहणेनज्ञापितमुणादयःक्वचिद्व्युत्पत्तिकार्यंनलभंतइति॥अतोनात्रनिष्ठासंज्ञेति॥पद्धृत्रादीनां
चेतिफिट्सूत्रेणसिद्धम्॥ ॥ इतिश्रीशब्दकौस्तुभेप्रथमाध्यायस्यप्रथमेपादेपंचमान्हिकम्॥ ॥ ॥ सर्वादीनिसर्वनामानि॥एतानि
सर्वनामसंज्ञानिस्युः॥नहुणसंविज्ञानोयंबहुव्रीहिः॥तस्यान्यपदार्थस्यगुणानांवर्त्तिपदार्थरूपाणांविशेषणानांकार्यान्वयिनयासंविज्ञानंयत्र
सनहुणसंविज्ञानः॥तत्रसर्वआदिर्येषांतानीतिविग्रहः॥तच्चशब्दप्रयोगेणान्यपदार्थप्राधान्यंलभ्यते॥एवंचित्रागावोयस्यसइत्यादावपि॥
अन्यथाहियस्यगावश्चित्राइतिगोशब्दार्थप्राधान्यंस्यात्॥नचैवंविधेर्थेवहुव्रीहिरिष्यते॥यत्तुवृत्तिवाक्ययोर्विशेष्यैक्यसंपत्तयेचित्राणां
गवामयमित्यादिविग्रहवर्णनंमीमांसावार्त्तिककृते॥तन्नुनमुनिवचसामनुकूलं॥अप्रथमाविभक्त्यर्थेबहुव्रीहिरितिवार्त्तिककृतावक्ष्यमाण
त्वात्॥भाष्यकृताचशेषोबहुव्रीहिरितिसूत्रेत्रिकृतः शेषमाश्रित्यसूत्राक्षरैरेवोक्तस्यार्थस्यसाधितत्वात्॥हितीयाश्रितातीतादिभिस्तती
यातत्कृतार्थेनेत्यादिक्रमेणहिषण्णांत्रिकाणांसमासउक्तस्तदपेक्षयाशेषः॥प्रथमारूपस्त्रिकस्तस्यैववहुव्रीहिसंज्ञेतिसृष्टेदेवेगतइत्या
देरिवचित्राणांगवामित्यस्यापिदूरापास्तंबहुव्रीहित्वम्॥किंच।मत्वर्थेवहुव्रीहिरितिकात्यायनवचनात्कथंचित्राणांगवामित्यत्रतत्प्रसक्तिः
॥ननुदंडीत्यादावपिदंडस्यायमितिविग्रहाभ्युपगमादस्मद्दीत्यायमेवमत्वर्थइतिचेन्नहिसूत्रंमुनिवचनविरोधः॥तदस्यास्त्यस्मिन्निति
सूत्रेणप्रथमांतादस्त्युपपदिकात्संबंधिन्यनुविधानात्॥समर्थानांप्रथमाद्वेतिसूत्रेणप्रथमनिर्दिष्टस्यैवप्रकृतित्वावधारणाच्च॥नन्वेता

न्यपिसूत्रवार्त्तिकभाष्यवचांसिकथंचिद्व्याख्यानेष्यामइतिचेत्॥समर्थःपदविधिरित्यादीनिव्रीहिभिर्यजेतेत्यादिषुपदविधिभिन्नेष्वपियो
जयित्वासामर्थ्यंचभाष्यादिसंमताहिपरीतमेववर्णयन्भवादृशोनिरंकुशःकिंकिंनकुर्यात्॥किंतुव्याकरणाधिकरणेसिद्धांतितंव्याकर
णप्रामाण्यंकथंस्वेच्छयाव्याकुलयसीतिपरंपर्य्यनुयोगेसमाधानंविभावय॥तस्माच्चित्रागावोयस्येत्येवविग्रहःसकलशिष्टसंप्रदाय
सिद्धोमुनित्रयवच-सामनुकूलश्चेतिदिक्॥आदिशब्दस्यावयववाचित्वादुद्भूतावयवभेदैःसमुदायःसमासार्थस्तस्यचसमुदायस्य
युगपल्लक्ष्यप्रयोगाभावात्तानर्थक्यात्तदंगेषितिन्यायेनतदवयवेषुप्रवर्त्तमानासंज्ञाऽविशेषात्सर्वशब्देपिप्रवर्त्ततइतियुक्तंनद्रुणसं
विज्ञानत्वंहरिमर्वेषामित्यादिनिर्देशाश्चेहलिंगं॥जक्षित्यादयःषडितिसूत्रेनुजक्षितियोगंविभज्यजक्षेःसंज्ञाविधानसामर्थ्यादेवद्र
त्यादयइत्यतद्रुणसंविज्ञानोबहुव्रीहिः।एतेनकतेभ्यःकण्वादिभ्यइत्युभयत्रापिशकलशब्दसंग्रहार्थंयथातत्पुरुषबहुव्रीह्योरेकशेष
इतिचतुर्थेवस्यते॥तथेहापिनपुंसकमनपुंसकेनेतिवास्वरभिन्नानांयस्योत्तरःस्वरविधिःसशिष्यतइतिवातत्पुरुषवद्बहुव्रीह्योःसहविवक्षा
यांबहुव्रीहेःशेषइतिपरास्तं॥तद्रुणसंविज्ञानबहुव्रीहिणैवसर्वशब्दस्यापिसंग्रहेसिद्धेएकशेषाश्रयणस्यगौरवपराहतत्वात्॥महासं
ज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थंसर्वेषांनामानीति॥तन्नसामर्थ्याच्चसर्वाभिधानसामर्थ्येविशिष्टानामेवसंज्ञित्वमनुमीयते॥तथाचनथा
भूतानांगणेपाठस्यावश्यकतयाप्रकारांतरेणचपाठेप्रमोणाभावादेवविशेषेवस्थितानांसंज्ञानामुपसर्जनानांचसर्वादित्वमेवनास्तिते
नेषांगणकार्यंसंज्ञाप्रयुक्तकार्य्यंचेत्युभयमपिनभवति॥गणकार्यंयथात्यदादीनामः॥तद्नामकश्चित्तु॥अतिक्रांतस्तमतितत्॥त राम
श्राद्भृतरादिभ्यः॥अन्यमतिक्रांतमत्यन्यम्॥अतिकतरम्॥संज्ञाप्रयुक्तं॥यथासर्वनाम्नःस्मै॥अतिसर्वाय॥तदेतदभिप्रेत्योक्तं वार्ति ८५

कक्नासंज्ञोपसर्जनप्रतिषेधःपाठान् पर्युदासःपठितानांसंज्ञाकरणमिति॥तस्मात्प्रसिद्धेनप्रवृत्तिनिमित्तेनप्रयुक्तइतरंप्रत्यनुपस
र्जनीभूतस्वेहसंज्ञीतिस्थितं॥यत्तुस्वरूपमात्राश्रयंकार्य्यंनतुगणपाठंसंज्ञांवापेक्षतेयथायुष्मदस्मद्भ्यांङःसोशइत्यादितदुपसर्जनस्वे
पिभवत्येवेत्यवधेयं॥नचैवंयुष्मद्युपपदइत्यत्रापित्वमादिप्रसंगः॥लोकप्रसिद्धार्थपरतायामेवतत्प्रवृत्तेः॥अभिव्यक्तपदार्थोमेइ
तिन्यायात्॥तदंतग्रहणमत्रबोध्यम्॥हूंहूंचेतिज्ञापकात्॥तच्चतत्रैववक्ष्यते॥प्रयोजनंसर्वनामाव्ययसंज्ञायांमितिवार्त्तिकवचनाच्च
तेनपरमसर्वतःपरमसर्वत्रपरमसर्वकेइत्यत्रसमस्तान्तसिल्लुअकच्चसिद्ध्यति॥नचनसिलादिविधौप्रातिपदिकादित्यनुवृत्तेःस
र्वनाम्नाचतद्विशेषणेनतदंतविधिर्भविष्यतीतिवाच्यं॥समासप्रत्ययविधौननदंतविधिरितिनिषेधात्॥नचैवमतिसर्वायेत्यादावतिप्रसं
गः॥उपसर्जनपर्युदासस्योक्तत्वात्॥अतएवपरमसर्वस्मादित्यादौस्माप्रादयोभवंत्येव।स्यादेतत्॥अंसःअनस्मिन्अनेषइत्यादा
वपिअत्वसत्वस्मिन्नादीनिनस्युः॥अतिसर्वइत्यत्रेवोपसर्जनत्वात्॥तथाचअब्राह्मणइत्यादेर्ब्राह्मणभिन्नइत्यादिक्रमेणपूर्वपदा
र्थप्राधान्येनविवरणंकुर्वंति।सत्यं।वैयाकरणमतेनञ्समासस्योत्तरपदार्थप्राधान्यमेवनञ्सूत्रेभाष्यकारेणतथैवसिद्धांतितत्वात्॥त
स्याहि॥आरोपितत्वंनञर्थः॥मायामनुष्यमायामृगव्याजनिशाकरकपदब्राह्मणादिशब्देभ्यइवआरोपितोमिथ्याभूतोयंब्राह्मणइ
त्येवंशाब्दबोधपर्यवसानेब्राह्मणभिन्नइत्यादिकमार्थिकार्थविवरणंनतुशाब्दोयमर्थः॥अतएवस्तत्तदोरितिसूत्रेःनञ्समासइति
ज्ञार्थकं।अतएवचऔत्सर्गिकीतत्पुरुषस्योत्तरपदार्थप्रधानतापिनिर्वहतीतिदिक्॥ननुयदीहतदंतविधिरिष्यतेतर्हिभाष्यविरोधः॥तत्र
हिसंज्ञोपसर्जनप्रतिषेधइतिवार्त्तिकस्यप्रत्याख्यानमुपक्रम्यार्थद्वारकंविभक्तिविशेषणमाश्रित्यातिप्रसंगउद्धृतःसर्वनामार्थसम्बंधसं

ख्याकारकाद्यभिधायिनोऽङः स्मैस्यादित्यादिनाऽकरीत्यादन्तविधौसतित्वतिसर्वादेत्यादौसमुदायस्यसर्वनामतयार्थद्वारकविभक्तियो
गाश्रयणेपिस्मायादिप्रसंगः तद्वत्स्थएवस्यादितिचेत्॥सत्यं॥अतएवापरितोषाङ्ग्राष्ये अथवामहतीयंसंज्ञाक्रियतइतिपक्षांतरमुपन्य
स्तमितिगृह्णण॥ननुयदीयमन्वर्थसंज्ञानर्हिपूर्वपदात्संज्ञायामगइत्यादिणत्वंस्यादितिचेत्॥सत्यम्॥अतएवनिपातनाण्णत्वाभावः॥सण
त्वंतुरूपमसाध्वेव॥निपातनेनणत्वशास्त्रस्यबाधितत्वात्॥अतएवशाश्वत्कइत्याद्यप्यसाध्वेवयेषांचविरोधःशाश्वतिकइतिनि
पातनेनइमुमुक्तांतादित्यस्यबाधितत्वात्॥ननन्वेवमपरस्पराःक्रियासातत्यइतिनिपातनेनसंततशब्दोबाध्येतेतिचेन्न॥नत्रसातत्य
इत्यनेनैकदेशानुमतिद्वारातुल्येदवश्यमःकृत्यइतिपूर्वाचार्य्यपठितस्यश्लोकस्यैवज्ञापनात्॥ननन्वेवमपिपुराणंप्रोक्तेषुब्राह्मणक
ल्पेष्वितिपुराणशब्देनपुरातनशब्दस्यबाधःप्राप्नोति।सत्यं।पृषोदरादिषुपुरातनशब्दस्यपाठोबोद्धव्यः॥ आगमशास्त्रस्याव्ययंहिं
लोपस्यचानित्यतामात्रेपुराणेतिनिर्देशेनज्ञाप्यतइतिनुतत्वम्॥तदेवबाधकान्येवनिपातनानीतिभाष्येस्थितं॥यद्वानेदंसंज्ञासूत्रंकिं
नुगणशुद्धिमात्रफलकम्॥यानिसर्वनामानितान्येवसर्वादीनिनत्वितराण्यपीतिन्यारंभ्यानात्॥यथातिङोगोत्रादीनिकृत्स्नाभीस्यय
योरितिसूत्रेकृत्स्नाभीस्ययोरितियोगंविभज्यगोत्रादीनीत्यनुवर्त्यएतयोरर्थयोर्यानिवर्त्तंतेतेनान्येवगोत्रादीनिइतिगणशुद्धिपरतयाव्या
ख्यास्यतेतेनचनचिदिवगोत्रादित्तद्धितान्प्रेङितेष्वगतेःकृत्स्नेचसुप्यगोत्रादावितिसूत्रयोरपिविशिष्टार्थानामेवैगोत्रादीनांग्रहणंतथे
हापि॥ननूक्तरीत्यात्सर्वादीनामइत्याद्येनगणकार्यंसिद्ध्यतुसर्वनाम्नःस्मैइत्यादिकंतुकृत्त्वसकलादिशब्देष्वतिव्याप्तंस्यादितिचेन्न॥ग
णपाठसामर्थ्यात्तत्रपठितानामेवग्रहणात्॥एतावानेवहिभेदः॥यत्सूत्रोक्तेपक्षेसंज्ञाविधेयागणशुद्धिस्त्वार्थिकीअस्मिंस्तुपक्षेगणशुद्धिः

श्ण स्त्रीरूत्त्वादिव्यावृत्तिस्त्वर्थादिति॥अथवोभयमनेनक्रियते॥पाठमुद्दिः॥संज्ञाच॥तंत्रावृत्त्येकशेषाणामन्यतमाश्रयणात्॥तत्रस
हविवक्षांविनापिवाचनिकमेकशेषः॥आकृतिपक्षेहिप्रत्याख्यातंसरूपसूत्रइकोगुणवृद्धीइत्यादिवच्छास्त्रप्रक्रियार्थंसत्सहविवक्षां
विनाप्येकशेषंविधत्तेतदित्थंपंचापिपक्षाःस्थिताः॥संज्ञाभूतानांव्यावृत्तिस्तुगौणमुख्यन्यायेनापिसिद्ध्यति॥नचासौपदकार्यैश्चेकेतिवा
च्यम्॥विशिष्टरूपोपादानेसर्वत्रतत्प्रवृत्तेरित्युपपादितमोत्सूत्रे॥वार्त्तिकरीत्यात्वेकसंज्ञाधिकारेसर्वनामसंज्ञानंतरमेकद्रव्यनिवेशिनी
संज्ञेतिसंज्ञासंज्ञयासर्वनामसंज्ञाबाध्यतइत्यपिसमाधानांतरंबोद्धव्यम्॥यद्वा॥पूर्वपरावरेतिगणसूत्रेसंज्ञायामितियोगंविभज्यपूर्वो
त्तरयोःशेषोव्याख्येयः॥उक्तःसर्वादयोवक्ष्यमाणःस्वादिरश्चासंज्ञायामिति॥तस्मादुपसर्जनव्यावृत्तिरेवान्वर्थसंज्ञाश्रयणस्यमुख्यं
फलं॥ननूनुपसर्जनादितियोगंप्रकारांतरेणव्याख्यायतद्बलेनैवांतर्गणकार्यंवारितेभाष्ये॥तद्यथा॥अनुपसर्जनेतिलुप्तषष्ठीकंपदम्॥
अः आदित्त्विच्छेदः अश्चअच्चतयोः॥समाहारआत्॥अकारात्परौअअत्इत्यादेशौयत्रक्रियेतेतत्रानुपसर्जनस्यग्रहणमितिपरिभा
षार्थः॥नेनत्यङ्यत्वमङुतरादिभ्यइत्यदड्भावश्चगौणतायांनभवति॥अकारात्परत्वेनविशेषणत्वंकिम्॥पंचम्याअत्॥गुणानति
क्रांतेभ्योतियुष्मत्॥एकवचनस्यचयुष्मानेतिक्रांतात् अतियुष्मत्॥नद्यृतश्चेतिकप्॥तथाचोपसर्जनव्यावृत्तेरप्यन्य
थासिद्धेःकिंमहासंज्ञयेतिचेन्न॥अतिसर्वायेत्यादिवारणस्यतदेकसाध्यत्वात्॥नहीदंमनुपसर्जनादित्यनेनसाधयितुंशक्यते॥एतद्
परिनोषादेवहिभाष्येपक्षांतराश्रयणमितिदिक्॥एवंचानुपसर्जनादितिसूत्रेपरिभाषात्वेनापिनोपयुज्यतइत्यर्थात्प्रत्याख्यानमेवभव
तीत्यवधेयम्॥स्यादेतत्॥कौंभकारेयसिद्ध्यैसूत्रमारंभणीयं॥तत्रहिकुंभकारीशब्दादेवढगुत्पादयितव्यभन्यथाकुंभेत्युकारस्य

वृद्धिर्नस्यात्॥तथाचविशिष्टस्यस्त्रीप्रत्ययांतताप्येष्टव्यासाचतदेवनिर्वहति॥ ॥ ॥ यदिदिङ्ढाञ्णित्यत्रेप्रत्ययग्रहणपरिभाष
याऽणित्यनेनाणंतग्रहणेतेनचप्रातिपदिकविशेषणाद्णंतांतंप्रकृतिःस्यात्॥नच्चसमासप्रत्ययविधौप्रतिषेधइतिग्रहणवताप्रातिपदि
केननदंतविधिर्नेतिचप्रतिषेधाद्दुर्लभम्॥अनुपसर्जनादित्युपसर्जननिषेधसामर्थ्यात्तुप्रधानेननदंतविधौज्ञापितेकौंभकारेयःसिद्ध्यती
तिस्पष्टमेव।नचरुद्रहणेगतिकारकपूर्वस्यापीतिपरिभाषयाकुंभकारशब्दादेवस्त्रीप्रत्ययोस्त्वितिवाच्यम्॥अणितिहितद्धितोपिगृह्य
ते॥औपगवीतियथा॥रुद्रहणइतिपरिभाषानुरुन्मात्रग्रहणेप्रवर्त्तनेननुरुद्रुद्रहणेपिएवमर्थमेवेदंसूत्रमितिभाष्यरुतैवचतुर्थं
स्थापयिष्यते॥तत्कथमिहोन्मनुपसर्जनादित्ययंयोगः प्रत्याख्यायतइति॥अत्रोच्यते॥चतुर्थसूत्रकाराभिप्रायवर्णनमात्रंकरिष्य
तेनिष्कर्षेतुक्रियमाणेसूत्रवैयर्थ्यमेवायातीत्याशयेनेहभगवतोक्तंप्रत्याख्यायतेइति॥तथाहि॥कारशब्दान्ङीवुत्पत्तावपिकौंभका
रेयःसिध्यत्येवष्यङःसंप्रसारणमित्यत्रभाष्यरुतापठिष्यमाणयावाचनिक्यास्त्रीप्रत्ययेचाऽनुपसर्जनेनेतिपरिभाषयानुपसर्जनेस्त्री
प्रत्ययेतदादिनियमनिषेधेनकुंभकारीशब्दाद्ङीषुत्पत्तेः॥अतएवहिपरमकारीषगंधीपुत्रइत्यत्रष्यङंतस्योच्यमानंसंप्रसारणंपरमका
रीषगंध्याशब्दस्यापिभवत्येव॥नचैवमतिकारीषगंध्यापुत्रइत्यादावतिप्रसंगः॥अनुपसर्जनइत्युक्त्वेनोपसर्जनेतदादिनियमसत्वा
त्॥नचैवमर्द्धपिप्पलीत्यादौहलङ्यादिलोपोनस्यादितिवाच्यम्॥हलङ्यादिसूत्रेदीर्घग्रहणसामर्थ्येननत्रोपसर्जनेनापितदादि
नियमोनास्तीतिज्ञापितत्वात्॥वस्कनस्कनिष्कौशांब्यादौसमुदायस्याऽव्ययत्वेपिअवयवस्याऽव्ययत्वंतनयातनतःपरस्यसोर्लोपप्रा
प्तेर्नैतत्ज्ञापकं॥अर्द्धपिप्पल्यादावप्यवयवस्याऽव्ययत्वेनतयैवनिर्वाहः॥नचविहितविशेषणतावत्कृश्याश्रयेत्यादावव्याप्तेः॥नचनत्र

हलंताद्विहितत्वेननिर्वाहः॥ कर्त्रीहर्त्रेत्यादावलोपापत्तेः॥ यःसइत्यादौलोपापत्तेश्च॥ यद्वा॥ सुप्तिसीतिप्रत्ययैःप्रकृतिरासिप्यतेहलंत्य
सूत्रेकैय्यटग्रंथनिर्वाहायविवरणेतथैववर्णनात्॥ एवंचज्ञापकंसुस्थंएकदेशस्याप्रकृतित्वात्॥ अतएवपंचमसमासौगौस्त्रियोरुपसर्ज
नस्येतिसूत्रेचकैयटेनज्ञापकत्वपक्षएवोक्तः॥ ननूभयथापिमालादृष्ट्यादौसमुदायादावंतत्वप्रयुक्तः सुःस्यात्तन्चैकपदैकस्वर्ययो
रापत्तिः॥ एकवाक्यतयाविधिरितिपक्षेपिपचतिकल्पमित्यादिसिद्ध्येएकवचनमुत्सर्गइत्यस्यावश्याश्रयणीयत्वादितिचेन्न ङ्याब्ग्र
हणस्यान्यार्थतयायथाकथंचित् प्रातिपदिकग्रहणेलिंगविशिष्टग्रहणेनचावंतत्वात्सुबुत्पत्तेश्चवक्ष्यमाणत्वात्॥ इहचसमुदाय॥
स्याप्रातिपदिकत्वात्॥ अर्थवत्समुदायानांसमासग्रहणंनियमार्थमितिहिस्थास्यति॥ नचैवमपिकदाचित्कारीशब्दाठक्स्यादेवेति
वाच्यम्॥ एकाज्ह्रिर्वचनन्यायेनसमुदायादेवोत्पत्तेः॥ कुंभेनैकार्थीभूतस्यनिष्कृष्यापत्येनयोगइतिवक्तुमशक्यत्वाच्च॥ किंच॥ सूत्रमा
रभ्य माणस्याप्येषैवगतिः॥ औपगवीत्यादाविवकेवलात्कारशब्दादपिकदाचिन्ङीप्प्रसंगेनकौंभकारेयेपाक्षिकदोषस्यत्वतप
क्षेपितुल्यत्वात्॥ स्यादेतत्॥ अक्रियमाणेस्मिन्सूत्रेकुंभकारीत्यत्रङीर्वेवनस्यात्॥ कुंभेनैकार्थीभूतस्याणंतस्यस्त्रीत्वेनायोगात्॥
यस्यचस्त्रीत्वेनयोगोविशिष्टस्यनतदणंतं॥ तस्मादमहत्पूर्वादितिनिषेधेनज्ञाप्यमानस्तदंतविधिरुत्तरत्राप्यभ्युपगंतव्यःसचयथा
पूर्वत्रोपसर्जनेनापिभवतिनषट्स्वस्त्रादिभ्यः॥ प्रियपंचाद्रौपदीः॥ वनोस्व॥ अतिधीवरीति॥ तथातिदादावपिस्यात्॥ ननुचबहुकुरुच्च
रेत्यादावतिप्रसंगः॥ अतोनिषेधसूत्रमिदमर्थकं॥ ननुपूर्वत्रोपान्तेनदंतंचस्त्रियामित्यनेनविशेष्यतेतिङ्ङाणञित्यादौतूपान्तेदादिकं
मेवतेनबहुकुरुचरेत्यादौतिदादेरस्त्रीत्वान्नङीप्॥ कुंभकारीत्यादौतुणंतस्यस्त्रियांवर्त्तेतस्तदंतादपिङीप्भविष्यतीतिचेन्न॥ एतंहिव

यविभागस्यदुरूहत्वात्तज्ज्ञानार्थमेवसूत्रारंभस्योचितत्वात्॥नैतदेवं॥आरब्धेष्वस्मिन्सूत्रेव्याख्यानस्यैववशरणीकरणीयत्वात्॥अन्यथापंचाजीत्यत्राजानामस्त्रीत्वेपितदंतस्यस्त्रियांङीप्स्याटाप्प्रसंगात्॥अतोविशेषणविशेष्यभावंप्रतिकामचारादजाद्यतष्टाबित्यत्रेवस्त्रिद्वाणञित्यादौचोपात्तंस्त्रीत्वेनविशेष्यतेवनोरचेत्यादौत्वपात्तंतदंतंचेतिसकलेष्टसिद्धेःसूत्रंव्यर्थमेव।स्यादेतत्॥तदंतविधिज्ञापनार्थमेवेदंसूत्रमारंभणीयं॥नचामहत्पूर्वत्वस्यनेनैवतत्सिद्धिरितिवाच्यम्॥तस्यज्ञापकत्वायोगात्॥पंचाजीत्यादिसिद्ध्यर्थमजादिभिःस्त्रीत्वविशेष्यतइतिहिवक्ष्यते॥नथाचमहाशूद्रीत्यत्रसमुदायस्यस्त्रियांवृत्तावप्यवयवस्यातथात्वेनसत्यपितदंतविधौटाप्प्राप्नोतीतिकथंतदंतविधिंज्ञापयित्वानिषेधःपर्यवस्येत्॥मैवम्॥इतरैरजादिभिःस्त्रीत्वविशेषणेपिशूद्रशब्देनाविशेषणात्॥एवंस्पष्टमेवज्ञापकपर्यवसानं॥नचैवंपंचशूद्रीत्यत्रापिप्रसंगः जातिरित्यनेनशूद्रस्यविशेषणात्॥स्यादेतत्॥पूर्वसूत्रनिर्देशोवापिशलमधीतइतीनिकात्यायनोक्तरीत्यासूत्रंसार्थकं॥तथाहि॥अप्रधानमुपसर्जनं॥तथैवपूर्वाचार्यसूत्रेषुलोकेचव्यवहारात्॥ततश्चापिशलिनाप्रोक्तमित्यस्मिन्यण्॥ततोऽस्मिन्नंतदधीतइत्यण्तस्यप्रोक्तालुगितिलुक्॥आपिशलाब्राह्मणीअत्रप्रोक्तार्थस्याणोऽप्रधानत्वान्नदंतान्नङीप्॥अण्पोऽप्रधानमितिविशेषणात्॥नचैवमप्यधेत्र्यामुत्पन्नस्याणोऽनुपसर्जनतयातदाश्रयोङीप्स्यादेवेतिवाच्यम्॥तस्यलुप्तत्वात्॥नचप्रत्ययलक्षणंशंक्यंवर्णाश्रयेतन्निषेधात्टिड्ढाणञित्यत्रस्थतइत्यनुवर्तते॥अणाचअकारोविशेष्यते॥अण्योऽकारइन्निनंतुविपरीतोविशेषणविशेष्यभावः॥वर्णस्याप्राधान्यंप्रत्ययलक्षणापत्तेः अतृणेडित्यत्रतृणहइम्वत्।ननुस्त्रियामित्यनेनाणोविशेषणान्नोक्तदोषइतिचेन्न॥काशकृत्स्निनाप्रोक्तामीमांसाकाशकृत्स्नीनामधीतेकाशकृत्स्नाब्राह्मणी॥अत्रद्वितीयेणिप्रोक्तालुगितिलु

सिप्रथमोप्यण्स्त्रियामेवोत्पन्नइतिनदंताङ्ग्रह्मण्यांवर्त्तमानान्ङीप्स्यात्॥ तस्मान्प्रधानाद्यथास्यादप्रधानान्माभूदित्येतदर्थमारंभणी
यंसूत्रमिति॥ अत्रोच्यते॥ अध्येत्र्यामभिधेयायामणईकारेणभवितव्यं॥ यश्चेहाध्येत्र्यामणुत्पन्नः सलुप्तएव। यश्चश्रूयते॥तस्मादीकारउ
त्पन्नोलुप्तश्चेतिपुनर्नभवतिसकृत्प्रत्यालक्षणस्यचरितार्थत्वात्॥ तस्मादनुपसर्जनादित्ययंयोगः प्रत्यारभ्यतइतिभगवदुक्तिर्निर्बीजैवे
तिदिक्॥सर्वादयश्चपंचत्रिंशत्॥सर्व-विश्व-उभ-उभय-डतर-डतम-अन्य-अन्यतर-इतर-त्वत्-त्व-नेम-सम-सिम-पूर्वपरावरदक्षिणोत्तरा
पराधराणिव्यवस्थायामसंज्ञायां॥स्वमज्ञातिधनाख्यायां॥अंतरंबहिर्योगोपसंव्यानयोः॥त्यदादद्यदेतदिदम् अदस्एकद्वियुष्मद्अ-
स्मद्भवतुकिम्॥इति॥ तत्रसर्वविश्वशब्दौकृत्स्नपर्यायौसर्वशब्दस्यसांगशिताभित्याद्युदात्तत्वेप्राप्तेनोदात्तत्वंगणेनिपात्यतेतेनसर्वे चादि
कारइत्यत्रानुदात्तादेरञ्सिद्धः सह्यनुदात्तादिप्रकृतिकाहिधीयतेइतिऊप्यसूत्रेभाष्येस्थितंप्रयोगेतुसर्वस्यसुपीत्याद्युदात्तएव।उभशब्दो
हित्वविशिष्टस्यवाचकः॥ अतएवनित्यंद्विवचनांतः॥यद्येवंनर्हिकिमर्थमसौसर्वादिषुपठ्यते॥नह्यत्रस्मायादयः संभवंति॥काकचोरुक्तं
नास्तिरूपेस्वरेवाविशेषः॥अवग्रहस्तुकप्रत्ययेपिपदकारैर्नक्रियतेचित्रइद्राजाराजकाइदन्यकेइत्यादौतथैवनिर्णीतत्वात्॥नचोभाभ्यां
हेतुभ्यामुभयोर्हित्वोरित्यत्रसर्वनाम्नस्तृतीयाचेतिपाक्षिकतृतीयासिद्ध्यर्थइहपाठइतिवाच्यं॥निमित्तकारणहेतुषुसप्तमीसांप्रायदर्शन
मितिनृतीयार्थत्वात्॥नचवृत्तिकृतासर्वनाम्नस्तृतीयाचेतिसूत्रेपठितत्वादिदंवार्तिकमपिसर्वनामसंज्ञासापेक्षमेवेतिवाच्यं॥भाष्येहेतु
वितिसूत्रेनस्यपठितत्वात्॥अतएवान्येनकारणेनवसत्यन्नस्यकारणस्येत्युदात्तंहरदत्तेन॥अत्रोच्यते॥उभशब्दस्तावद्द्विवचनां
मात्रविषयः॥वृत्तौतुद्विवचनलोपन्यासोप्रयुज्यते॥उभाभ्यांपक्षाभ्यांविनीतनिद्राइतिविग्रहेउभयपक्षेत्यादिप्रयोगदर्शनात्॥कथंत

र्हिउभस्थानेउभयशब्दसिद्धिरितिचेत्॥ इत्थं। उभादुदात्तोनित्यमित्यत्रोभादितियोगोविभज्यते॥ अवयवरूपेः संख्यावाचिनउभशब्दा
दवयविन्यर्थेअयच्स्यात् उभयोमणिः॥ ततोनित्यंउभशब्दादित्तिविषयेनित्यमयच्स्यात्॥ अनिर्दिष्टार्थत्वात्स्वार्थे॥ नदेतदुक्तंवार्तिककृता
उभयोन्यत्रेति॥ एवंस्थितेउभयतउभयत्रेत्यादाविवकप्रत्ययेप्युभयएवप्राप्तः॥ अकेचिदुउभकावित्यादिसिद्ध्यति॥ नचेहाप्युभयइतिस्या
देवेतिवाच्यम्॥ अकजर्थसर्वादिषुपाठेनायचोबाधात्॥ अन्यथापाठवैयर्थ्यापत्तेरितिदिक्॥ स्वांगशिटामदंतानामित्यादुदात्तार्थपाठइति
तुनयुक्तं॥ गणएवांतोदात्तस्यनिपात्यमानत्वात्॥ अन्यथाउभेप्रभद्रेजोषयेते॥ उभाउनूनमुभाभ्यांदेवसवितः॥ सपत्यतउभयोर्नृम्णम
योरित्यादावाद्युदात्तप्रसंगात्॥ उभयशब्दस्तुअवयवद्वयारब्धेःवयविनिवर्त्तनेउभयोमणिरितियथाश्यामलोहिताभ्यामवयवाभ्यामार
ब्धइत्यर्थः॥ तिरोहितावयवभेदत्वादेकवचनम्॥ उभयमेववदंतिमनीषिणइत्यादौतुसमुदायिद्वयघटितंः॥ समुदायोर्थः॥ तिरोहितावय
वभेदत्वंतुतुल्यमेव॥ यदातुवर्गद्वयारब्धेमहासमुदायेवर्त्तनेनदावर्ग्यभिन्नेनवर्गद्वयेनमहाभेदविवक्षयोद्भूतावयवभेदत्वाद्बहुवचनांत
एवउभयेदेवमनुष्याः॥ तस्य मित्राण्यमित्रास्तेयेचयेचोभयेनृपाइतियथा॥ यदातुप्रागुक्तरीत्याउभयोमणिरितिव्युत्पाद्यतादृशमेवमणि
द्वयंसहविवक्ष्यते॥ तदाएकशेषेणद्विवचनंप्राप्नोति॥ अनभिधानात्तुनभवति॥ तथाचतद्धिनम्श्रा सर्वविभक्तिरितिसूत्रेकृत्तद्धितानांग्रह
णंचपाठेइतिभाष्यमवतारयन् कैय्यटआह॥ उभयशब्दस्यद्विवचनानुत्पादसर्वविभक्तित्वमिति॥ हरदत्तस्तुतस्मिन्नेवसूत्रेउभ
यशब्दाद्विवचनमंगीकृत्यपाठाश्रयणंतुपचतिकल्पंपचतिरूपमित्यादावतिप्रसंगंवारयितुमित्याह॥ इहायजादेशस्यस्थानिवद्भावे
नतयप्रत्ययांनतयाप्रथमचरमेतिसूत्रेणजसिविभाषाप्राप्नोतिव्यवस्थितविभाषया पूर्वविप्रतिषेधेनवानित्यमेवजसिसर्वनामनेतिकेचि

त्॥विभक्तिनिरपेक्षत्वेनांतरंगयानित्यसंज्ञयाबहिरंगावैकल्पिकीबाध्यतइतिनुमिच्छांतः॥नवेतिविभाषेतिसूत्रेभाष्यकारस्त्वाह॥अयच्
प्रत्ययांतरमेवनत्वसौतयस्यादेशः उभादुदात्तइतिसूत्रेनयषोऽननुवृत्तेः अयचएवानुवृत्तेः नचैवंउभयीइत्यत्रदिङ्नाणञ्इतिसूत्रेण
तयबंतत्वप्रयुक्तोङीपूनस्यादितिवाच्यं॥तत्रमात्रजितिमात्रशब्दात्प्रभृत्यपचश्चकारेणप्रत्याहारग्रहणात्॥एवंचतयबग्रहणमपि
नतत्रकार्यं॥यद्वा॥हयसजितिप्रत्याहारः॥तथाचदध्नमात्रचोरपिग्रहणनकर्त्तव्यमितिमहदेवलाघवं॥वस्तुतस्तुप्रमाणेमात्रच्चह्
यसचूदध्नइतिपाठ्यमिति भाष्याशयः॥तथाचततोपिलाघवं॥नचैवंकतिस्त्रियइत्यत्रातिप्रसंगः। अतइत्यनुवृत्तेः॥नषट्स्वस्त्रादि
भ्यइतिनिषेधाद्वा।नचैवंतैलमात्रेत्यादावतिप्रसंगःसदृशस्याप्यस्यप्रत्याहारेऽसन्निविष्टत्वात्इति॥अत्रकश्चित्॥उभयेत्यर्थपरो
निर्देशः॥तेनव्यर्थाहयेषामपिमेदिनीभृतामितिमाघप्रयोगः समर्थितोभवतीत्याह॥तन्न॥अर्थपरतायांवृत्तिकाद्यभिपुक्तवचनानु
पलंभात्॥महाकविप्रयोगबलादेवंकल्प्यतइतिचेत्॥न॥महाकविभिरेवंतद्विपरीतस्यबहुशः प्रयोगांत्॥तथाचमाद्यः॥गुरुहूर्य
यगुंरुणोरिति॥कालिदासोपि॥अस्मिन्हूयेरूपविधानयत्नइति॥श्रीहर्षश्च॥अयेममोत्तांसितमेवजिह्मयाहूयेपितस्मिन्ननतिप्र
योजनइति॥तस्माद्धूयंहैधमिष्यंतिगच्छंतीतिहूयेषस्तेषांहूयेषामितिइषेःकिवंतस्यरूपंबोध्यम्॥यत्तुकश्चिदाह॥अकवर्मण व्या
करणेहूयशब्दस्यापिसर्वनामताभ्युपगमात्तद्रीत्यायंप्रयोगइति॥तदपिन॥मुनित्रयमतेनेदानींसाध्वसाधुविभागस्यैवेदानी
तनशिष्टैर्वेदांगतयापरिगृहीतत्वात्॥दृश्यंतेहिनियतकालाःस्मृतयः॥यथाकलौपाराशरस्मृतिरित्यादौति।शताच्चठन्यतावशतइ
तिसूत्रेसर्वैकवाक्यतयासिद्धांतितत्वात्॥डतरडतमौप्रत्ययौ॥यद्यपिसंज्ञाविधौप्रत्ययग्रहणेतदंतग्रहणंनास्तितथापीहप्रयोजनं

सर्वनामाव्ययसंज्ञायामितिवाचनिकस्तदंतविधिः केवलयोः संज्ञायाः प्रयोजनाभावाद्वा॥ अन्योभिन्नः॥ अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावादेवबहुविषयेनिधारणेवर्त्तेतेइतिपस्पशायांकैय्यटः॥तत्रान्यतमशब्दस्यगणेपाठाभावान्न सर्वनामकार्यं॥नाव्ययत्वादिभ्यइत्यद्युत्तरगणकार्य्यम्॥नथात्वप्रयुज्यते॥नताचतत्सामान्यादिष्वन्यतमंतमइति॥शाकटायनस्त्वन्यतरान्यतमोहतरडतमंतौव्युत्पादितवान्॥तन्मतेप्यन्यतरशब्दपाठस्यनियमार्थत्वादन्यतमशब्दोंतर्गणकार्यंसर्वनामसंज्ञाकार्यंचनलभ्यतइतितद्धारव्याख्यातारः॥इतरस्त्वन्यनीचयोरित्यमरः॥त्वत्वइतिह्रावप्यदन्तावन्यपर्यायौतत्रैकउदात्तोपरोनुदात्तएतंत्वमन्येदशपत्रमुत्तमित्युदात्तस्यप्रयोगः॥उतत्वःपश्यन्नित्यादिरनुदात्तस्येतिविशेषः॥केचित्तुत्वदितितांतमेकंपठंति॥तथाचजयदेवःप्रायुंक्त॥त्वदधरमधुरमधूनिपिबंतंइति॥त्वत्तोन्यस्याअधरइतिषष्ठीतत्पुरुषोननुतवाधरस्त्वदधरइति॥पश्यतिदिशिदिशिरहसिभवंतंइतिपूर्वन्नाक्येनसहानन्वयापत्तेः॥अनुदात्तस्ङ्याय्यम्॥त्वत्समसिमेत्यनुङ्ङानीतिफिट्सूत्रात्॥तथाचप्रयुज्यते स्तरीरुत्वङ्वतिसूतउत्वदिति॥त्वदितिसर्वनामसुपठितोन्यपर्यायइतितद्धारव्यायांवेदभाष्यकाराः॥इहेप्रागुक्तरीत्याउदात्तानुदात्तयोरकारांतयोरनुदात्तस्यतकारांतस्यचयामाणिकत्वंनिर्विवादमेव॥गणपाठेपरंविप्रतिपत्तिः॥तत्राप्यनुदात्तस्याकारांतस्यगणपाठेनसंशयः॥उतोत्वस्मैतवमित्यादिप्रयोगात्॥अवशिष्टयोर्मध्येकतरस्यगणेपाठइतितुसंशयः उदात्तप्रयोगाणांतत्रौदासीन्यात्॥तस्मात्तांतस्याकजादिकमुदात्तस्यषास्मांयादिकंक्वचिच्छाखायांप्रयुज्यतेनवेतिविभाव्यतत्वंनिर्णेयंबहुश्रुतैरितिदिक्॥वस्तुतस्तुआद्यस्यतांतच्छेदएवयुक्तः अन्यथाऽस्याकशब्दद्वयस्वरसर्वनाम्नाएकश्रुत्योभयसंग्रहसंभवात्वशब्दमेकमेवापठिष्यदितिध्येयं॥त्वेषस्तनित्नेरायइत्यादयस्तुशेषप्रत्ययांत

स्यपुष्पदः प्रयोगानङुत्वशब्दस्यपदकारैः प्रगृह्यत्वप्रयुक्तस्येतिशब्दस्यप्रयोगादितिस्थितंवेदभाष्ये। नेमइत्यर्द्धप्रयोगश्च। एनेमस्मिन्नद्दृशेसोमइति। समःसर्वपर्यायः॥ नभन्तामन्यकेसमे। मानोवृकायवृक्येसमस्मै। उरुष्याणोअध्यायतःसमस्मात्॥ उतोसमस्मिन्न॥ तुल्यस्यौपस्यङुसमशब्दस्यनसर्वनामता॥ यथासंख्यमनुदेशःसमानामितिज्ञापकात्॥ कुन्मेजंतइतिसूत्रेसनेदीषाःसमाभूयांसोवैतिभाष्यकृत्प्रयोगाच्च॥ एतेनसमेयजेतेतिप्रयोगोव्याख्यातः। सिमःकुत्स्नेचशक्तेचस्यान्मर्यादावबद्धयोरितिनिघंटुः॥ आद्रात्रीवासस्तनुतेसिमस्मै। उच्छुक्रमक्तमजनेसिमस्मात्॥ यद्यपीहत्वत्वसमसिमेत्यनुच्चानीतिप्राप्तंतथापिसिमस्याथर्वणीनउदात्तइत्युदात्तता॥ अथर्ववेदप्रविष्टेमन्त्रेऋग्वेदादिगतेपीत्यभियुक्तैर्व्याख्यातत्वादितिअवधेयम्॥ पूर्वपरावरोत्तरापराः पंचदिक्कालयोस्तद्वच्छिन्नेच॥ पूर्वस्यांदिशिपूर्वस्मिन्कालेपूर्वस्यांवाप्याम्॥ पूर्वस्मिन्नुरावित्यादि॥ दक्षिणाधरशब्दौदिशितद्वच्छिन्नेच॥ अर्थनियमंप्राप्तंव्यवस्थायमितिसुत्रेर्गम्यते॥ स्वाभिधेयेनापेक्ष्यमाणस्यावधेर्नियमोहिव्यवस्था॥ पूर्वादिशब्दानामुक्तोर्थोहिनियमेनकिंचिदवधिमपेक्षते॥ स्थागाषपचोभावेइतिक्तिनिप्राप्तेऽनएवनिपातनाद्दृढव्यवस्थायांकिं॥ दक्षिणागाथकाः॥ प्रवीणाइत्यर्थः॥ अधरेतांबूलरागः॥ उत्तरेप्रत्युत्तरेवाशक्तः॥ कथंतर्हितथापरेषांबुधिचेतिकालिदासः। अपरेप्रत्यवनिष्ठंनेइत्यादिच॥ अत्राहुः॥ देशवाचितयाव्यवस्थाविषययोरेवपरशब्दयोरुपचाराच्छत्रौप्रतिवादिनिचप्रयोगः॥ नचैवमुपसर्जनता॥ नहिलाक्षणिकत्वमुपसर्जनत्वंकिंतुस्वार्थविशिष्टार्थान्तरसंक्रमः सतुनवृत्तिप्रविष्टस्यापिप्रधानस्यनवालाक्षणिकस्यापिवृत्तिमप्रविष्टस्य॥ अतएवतस्माद्वन्हिमानित्यादौलक्षणालक्षणापक्षेपिसर्वनामकार्यं तद्योहंसोसौयोसौसोहमित्यत्रभागत्यागलक्षणायामपिसर्वनामकार्यप्रवृत्तिरिति॥ भूवादिसूत्रेएताम्पीतिएतत्प्रतिपाद्यानिवस्तूनीत्य

र्थेऽपि केचित्। वस्तुतस्त्वत्रशब्दात्प्रकारकोबोधोऽन्यादिशब्देभ्योभिन्नत्वादिरिवार्थिकः। शब्दानुदेशांतरनिष्ठत्वादिप्रकारकएवेतितत्त्वं॥ असेतौ यांकिम्॥ उत्तराःकुरवः॥ सक्थेरक्ष्णयधिमपेक्ष्यकुरुषुउत्तरशब्दोवर्त्ततइत्यस्तीहव्यवस्थाप्रसिद्ध्यानुनावधेः प्रयोगः। मघोवर्षतीत्यत्रेत्यर्थः॥ एवंदिशः सपत्नी भवद्क्षिणस्या इत्यादावपिवस्तुतोव्यवस्थास्तीतिसर्वनामकार्यंसंभवत्येव॥ नचसंज्ञात्वान्निषेधः॥ आधुनिकसंकेतोहिसंज्ञानचदिक्षुसास्तीतिपंचमेऽस्तातिप्रकरणेकैयटहरदत्तादयः॥ अत्रदिक्षुचिरंतनः॥ कुरुषुत्वाधुनिकसंकेतइत्यत्रव्याख्यातृवचनमेवप्रमाण्॥ स्वशब्दस्यचत्वारोर्थाः॥ आत्माआत्मीयोज्ञातिर्धनंचेति। स्वोज्ञातावात्मनिस्वंस्त्रिष्वात्मीयेस्वोस्त्रियांधनइत्यमरः॥ यद्यपिस्वाभिनैश्वर्यइतिसूत्रेऽीश्वरत्ववाच्यपिस्वशब्दःस्वीकृतस्तथाप्यसौमत्वर्थीयामिनिच्प्रत्ययमात्रविषयोनतुकेवलः प्रयोगार्हः॥ तत्रज्ञातिधनयोर्निषेधात्तदात्मात्मीययोरेवसंज्ञा॥ आरव्याग्रहणंकिम्॥ आत्मीयत्वंपुरस्कृत्यज्ञातिधनयोरपिप्रवृत्तौसर्वनामतायथास्यात्॥ आत्मात्मीययोरित्येवतुवक्तुमिहोचितं॥ स्वस्मैइत्यादि॥ जसिविभाषाविधायकेऽष्टाध्यायीस्थेसूत्रेप्येवम्॥ यत्तुतत्रस्वमात्मीयइत्येववक्तुमुचितमात्मवाचिनोनपुंसकतयाजसिविभाषायामुपयोगाभावादितिकेचित्तच्चिंत्यं॥ सूत्रसामर्थ्यादेवात्मन्यपिपुंस्त्वलाभात्॥ अतएवामरकोशेपिआत्मनीतिपूर्वान्वयिस्वमितितूत्तरान्वयि॥ तथाचहेमचंद्रः॥ द्यौःस्वर्गनभसोः स्वोज्ञात्यात्मनोः स्वंनिजेधनेइति। मेदिनीकारोपि॥ स्वःस्यात् पुंस्यात्मनिज्ञातौत्रिष्वात्मीयेस्त्रियांधनेइति॥ वस्तुतस्तुपूर्वंपरेत्यादित्रिसूत्र्यामर्थनिर्देशःपाठविशेषणं॥ तेनेतरेषांपाठादेवपर्य्युदासः॥ तथाचविभाषाजसीतिप्रकरणेपूर्वादीनिनवेत्येवलाघवात्कर्त्तव्यम्॥ त्रिसूत्रीतुनपठनीयेवेतिनिष्कर्षः॥ अथवागणपाठएवपूर्वादिनवकपाठांतरंविभाषाजसीतिकर्त्तव्यंपूर्वादीनिचार्थविशिष्टान्यनुवर्त्तनीयानि॥ नचसर्वादीनामप्यनुवृत्तिःशंक्या॥ नेम

स्यजसिविभाषारंभात्॥ यद्वा॥जसूङ्सिङीनांञिस्मात्स्मिनःपूर्वादिभ्योनवभ्योवा औङ आपःशी॰ नपुंसकाच्चेतिसप्तमेन्यासः कर्त्तव्यः॥परमा
र्थस्तुसप्तमेयथान्यासमेवास्तु॥ पूर्वादिभ्योनवभ्योवेत्येतज्जसःशीत्यत्रानुवृत्यवाक्यभेदेनसंभवत्स्यनेवाच्छंदसीत्येतदपिपूर्वइत्यत्रयथातथा
चेयंविसृष्टीअष्टाध्याय्यांनपाठ्येतिस्थितम्॥ असंज्ञायामितितुनकार्ये अन्वर्थसंज्ञयाभिव्यक्तपदार्थायेइतिन्यायेनवासंज्ञायाव्युदस्तत्वात्
॥अंतरशब्दस्तुनानार्थः॥ तथाचामरः॥ अंतरमवकाशावधिपरिधानांतर्हिभेदतादर्थ्येऽन्तर्हितात्मीयेविनाबहिरवसरमध्येंतरात्मनिचेति॥ त
त्रबहिर्योगोपसंव्यानयोरेवार्थयोःसंज्ञा॥ बहिरित्यनादृतोदेशोबाह्यंचोच्यते॥तत्राद्येअंतरेअंतराबागृहाः॥नगरबाह्याश्चांडालादिगृहाइत्यर्थः
॥द्वितीयेनगराभ्यंतरगृहाइत्यर्थः॥उपसंव्यानशब्दोपिकरणव्युत्पत्त्याउत्तरीयपरः॥ कर्मव्युत्पत्त्यात्वन्तरीयपरः॥उभयथापिबहिर्योगेण
नतार्थत्वात्॥उपसंव्यानग्रहणंनकर्त्तव्यमितिभाष्येस्थितं।केचित्तुशाटकानांत्रयेशरीरसंयुक्तस्यतृतीयस्य।चतुर्थेतुचतुर्थस्यनतत्संयुक्त
स्यचतृतीयस्यबहिर्योगाभावादुपसंव्यानग्रहणंकर्त्तव्यंशाटकयुगाद्यर्थमितिवदंतोवार्त्तिककारस्याप्ययमेवाशयःअदिशब्दबलादेवम
भ्यनेभाष्यमनेतुबहिर्योगग्रहणंस्वर्यतेतेनशीतोष्णाभ्यांकारिणीत्यादाविवगोणग्रहणात्परंपरयाबाह्यसंबद्धस्यापिभविष्यतीत्याहुः स
त्यपिबहिर्योगेपुरीविषयनायांनसर्वनामताअपुरीतिचवक्तव्यमितिवार्त्तिकात्॥ तद्धिगणसूत्रस्यशेषोनतुजसिविभाषाधिकारस्यअंत
इत्यधिकृत्यजसःशीविधानादावंतात्प्राग्भावात्॥ अंतरायांपुरिप्राकाराद्ह्यायांतदंतवर्त्तिन्यांवेत्यर्थः॥लिंगविशिष्टेपिभाषयाएकद
देशस्यपूर्वंतद्ग्रहणेनग्रहणाद्ह्यान्तिर्बोध्या।एवंतदेतौपूर्वोक्तपरामर्शकौतत्राद्यच्छांदसः॥एषस्यभानुरितिगणरत्नकारस्तन्न॥तथासति
स्यश्चुरस्मिबहुलमितिसूत्रेछंदोग्रहणवैयर्थ्यापत्तेः॥ यदुद्देश्यसमर्प्यकः एतदिदमोपत्यस्योपस्थिते॥ अदस्त्यबहिते॥ एकोन्यार्थेवर्ते

नेत्वप्रथमेकेवलेतथा॥साधारणेसमानेचसंख्यायांचप्रयुज्यते॥द्विशब्दोद्वित्वविशिष्टेअलिंगःसंबोधनैकविषयश्चयुष्मदर्थः॥अस्मच्छब्दस्तूत्तमार्थपित्रर्थः॥सलिंगःसंबोधनव्यभिचारीचभवत्वर्थः॥भातेर्डवतुरितिव्युत्पादितोयं॥यद्यप्यस्मात्स्मायादयोनसंभवंतिसर्वनाम्नस्तृतीयाचेतिनिमित्तकारणहेतुषुसर्वासांप्रायदर्शनमित्यनेनैवगतार्थंतथापि॥फिञ्दिमयटःपूर्वनिपातश्चकुळुसौतथा॥ओत्वंशेषेष्यञ्त्रिमदाभकश्चभवतःफलंफिञ्॥भवतायनिः॥त्यदादित्वेनवृद्धत्वादुरीचांवृद्धादितिफिञ्भवंतमंचतीतिभवद्यड्॥विष्वग्देवयोश्चेतिचकारेणसर्वनाम्नोनुकर्षणाद्यादेशः॥भवन्मयः॥नित्येवृद्धशरादिभ्यइतिमयट्॥भवन्मित्रः॥सर्वनामसंख्यपोरितिप्राङ्निपातःभावत्कःभवदीयःभवतष्ठक्छसावित्यत्रहिशब्देननिरुक्तपेवृद्धादित्यनुवर्त्यते॥आत्वम्॥भवादृक्॥आसर्वनाम्नइत्यात्वंदेवदत्तस्यभवांस्यभवदीयः॥त्यदादीनिसर्वैरित्येकशेषः॥भवतोभावोभवत्तेत्यत्रसर्वनामसंज्ञयागुणवचनसंज्ञाबाधनात्ष्यञ्विरहोपिफलं॥अन्यथाहिभावत्त्वमितिस्यात्॥भवकान्॥सर्वनाम्नोवृत्तिमात्रइतिपुम्भावोपिफलं॥भवत्साःपुत्रोभवत्सुतः॥किंशब्दःप्रश्नेआक्षेपेचेतिदिक्॥वृत्तसर्वादिगणोवृत्तःसमाप्तइत्यर्थः॥यदींद्वयीअवमस्यांपृथिव्यांमध्यमस्यांपरमस्यासुतस्थइत्यत्रतुअवममध्यमपरमशब्देषुछंदसिसकलविधिव्यत्ययात्स्याडागमः॥नन्वेतदनुरोधेनसर्वादेराकृतिगणत्वमितिमंतव्यं अतएवछंदस्यपिसर्वनामकार्यमेषांननियतं॥येमध्यमाःपितरःविष्णोःपदेपरमेइत्यादौनदभावात्॥व्यूहाबुभौनावितरेतरस्मात्अन्योन्येषांपुष्करैरामृफंतइत्यादितुद्विःप्रयोगोद्विर्वचनमितिपक्षेतदंतंविधिनासिद्धं॥स्थानेद्विर्वचनपक्षेतुस्थानिवद्भावेनेत्यवधेयम्॥ननुवस्नसादाविवप्रकृतिप्रत्ययविभागस्यसंमोहात्स्थानिवद्भावेनापिपंदत्वमात्रंस्यात्॥ननुसर्वनामतासुविशिष्टेस्थानिनितद्विरहादितिचेन्न॥सन्नियोगशिष्टत्वेनांतरंगमपिद्वित्वंबाधित्वासमासवच्चबहुलमिति॥ राम ९२

समासवद्भावप्रसङ्गस्यलुकःप्रथमंप्रवृत्तेः॥ अंतरंगानपिविधीन्बहिरंगोलुग्बाधतइतिवक्ष्यमाणत्वात्॥ ततःप्रत्ययलक्षणेनपदत्वमाश्रि
त्यहित्वप्रवृत्तेः॥ एतेनतत्तन्नामसभूतभीनपइत्यादिव्याख्यातं॥ ननुसूत्रक्रमेणात्रेतरस्यादित्यस्यसिद्धिः॥ अन्योन्येषामितिकथं॥ नच्च
समासवद्भावोस्तीतिचेत्॥ तत्रप्रथमैकवचनांतत्वंपूर्वपदस्यद्वितीयाद्यत्कपरपदइतिवचनबलेनैवप्रकृतिप्रत्ययविभागस्यसिद्धेरि
तिदिक्॥ वन्येतराजानपदीपदाभिरितितुवन्याइनरेयेभ्यइतिबहुव्रीहिणासमाधेयं॥ तपरइतिज्ञापकात्सर्वनाम्नःपूर्वनिपातोऽनित्यः॥
पुत्रादेकात्पराजयइतितुप्राधान्यादिनाआख्यातादित्यर्थेआख्यातणिजंतात्रञर्थेकप्रत्ययेलाक्षणिकस्यसर्वनामत्ताविरहात्समा
धेयम्॥ विभाषादिक्समासेबहुव्रीहौ॥ अत्रसर्वनामसंज्ञावास्यात्॥ उत्तरपूर्वस्यै॥ उत्तरपूर्वायैदिङ्नामान्यंतरालइतिप्रतिपदोक्तोदि
क्समासोगृह्यते॥ तेनेहन्न॥ यापूर्वासैवोत्तरायस्यभ्रांतस्यतस्यैपूर्वोत्तरायएवंचबहुव्रीहिग्रहणंनकर्त्तव्यं॥ दक्षिणोत्तरपूर्वाणामितिहृद्भ
स्यलक्षणप्रतिपदोक्तपरिभाषयैववारणात्॥ ननूक्तरार्थंतत्॥ तथाहि॥ एकंबहुव्रीहिवत्॥ आबाधेचेतिहृद्भावेएकैकस्मैदेहि॥ दक्षिणो
दक्षिणस्यैइत्यादीष्यते॥ तत्रोत्तरसूत्रेणनिषेधोमाभूत्॥ बहुव्रीहिरेवयोबहुव्रीहिर्नेत्यनिर्दिष्टबहुव्रीहिस्त्रेवयथास्यादिति॥ मैवं॥ समा
सग्रहणानुवृत्त्याप्युक्तार्थलाभात्॥ उत्तरसूत्रप्रत्याख्यानाच्च॥ नबहुव्रीहौ॥ बहुव्रीहावकर्त्तव्येसतिसर्वनामसंज्ञानस्यात्तत्रकृपितायस्यत्व
त्कृपितकः॥ अहंकृपितायस्यमत्कृपितकः॥ द्वौपुत्रौयस्यद्विकपुत्रः॥ इहहिसमासप्रवृत्तेःप्राक्अंतरंगतयाअकच्प्रत्ययेनसत्वसमो
सेसत्यपिश्रूयेत॥ अतिक्रांतोभवंतमतिभवकइतिवत्॥ नहिवृत्तेःप्रागपिउपसर्जनतास्ति॥ ननुयदिप्रागेवप्राप्नुवन्अकच्निवर्त्ति
तः॥ तर्हितत्कृपितेत्यादिकंविगृह्यतेतत्कृपितेत्यादिकप्रत्ययदर्शनौचित्यादिति चेत्॥ अत्रोच्यते॥ यदियस्मिन्प्राप्तिर्नास्त्युतेनाप्य

त्रगोचरेबहुव्रीहिसंज्ञाप्रवृत्तासर्वनामसंज्ञाचनिष्ठिद्यातत्प्रयुज्यते॥अपरिनिष्ठितत्वात्किंतुतत्सदृशंबहुव्रीहिसंज्ञाशून्यंवास्यान्नरवेद॥
यदाहकैयटः॥अप्रयोगसमवायियत्प्रक्रियावाक्यंतत्रायंनिषेधोनतुलौकिके॥तस्यपृथगेवप्रयोगान्नाद्यर्थीभावादिति॥अतएवदृष्टा
सर्वैयेनेत्येवविग्रहोनतुसर्वाद्इति॥राज्ञःपुरुषइत्यादिविग्रहेपिह्येषैवगतिः॥अलौकिकेवाक्येअल्लोपोनद्इत्यादेरप्रवृत्तेःअंतरंगान्पि
धीनित्यसिद्धांतात्॥अतएवगोमत्प्रियइत्यादौसोर्लुगेवभवतुहल्ङ्यादिलोपः॥तेननुस्त्रीघादयोनभवंतीति॥भाष्येत्वकृत्तिकृदित्याद्येव
रूपंस्त्रीरुत्येदंसूत्रंप्रत्याख्यातम्॥यदाहअकच्स्वरौतुकर्त्तव्यौप्रत्यंगंमुक्तसंज्ञायाविति॥अंगेभवतीतिप्रत्यंगं॥अनकारांतेषुत्वकृत्पितृक्ते
हृकिपुत्रइत्यादिष्वकच्॥विम्बप्रियइत्यादिष्वदंतेषुतुस्वांगशिटामदंतानामित्याद्युदाहरणेतिविषयविवेकोबोध्यइत्यर्थः॥षष्ठीउत्तरेसुनीग
मामाण्यात्॥भाष्योक्तेवज्रवस्थेत्यवधेयम्॥तृतीयासमासे॥अत्रसर्वनामतानस्यात्॥मासपूर्वाय॥लक्षणप्रतिपदोक्तपरिभाषयापूर्वस
दृशेतिसमासोगृह्यतेनकर्तृकरणेकृतेत्यादिरपिनेनत्वयकाकृतंत्वकृतमित्यादौनिषेधोन॥समासइत्यनुवर्त्तमानेपुनःसमासग्रहण
मौणार्थस्यापिसंग्रहार्थंतेनसमासार्थवाक्येपिनिषेधः॥मासेनपूर्वाय॥अयंचलौकिकेवाक्येनिषेधोनतुबहुव्रीहाविति॥वदलौकिके॥अ
कारांतेकाकचोरविशेषेणानकारांतानांप्रतिपदोक्ततृतीयासमासविरहेणालौकिकेनिषेधस्यवैयर्थ्यापत्तेः॥हूंहेच॥इहोक्तासंज्ञानस्यात्
॥पूर्वापराधराणां॥समुदायस्यायंनिषेधोनत्ववयवानाम्॥तथाहि॥त्यदादीनांतावद्धूंहूएवनास्ति त्यदादीनिसर्वैर्नित्यमित्येकशेषेणरांधि
तत्वात्॥नचहूंहेरुनेएकशेषइतिभ्रमितव्यम्॥एकवद्भावस्वरसमासांतप्रसंगेनहूंहापवादत्वपक्षस्यैवस्थापयिष्यमाणत्वात्॥अन्यथा
तेषामित्यादावपिहूंहेचेतिनिषेधापत्तेश्च॥त्यदादिभ्यःप्राचीनास्त्वदंनाः॥तत्रकाकचोरविशेषः॥सर्वनाम्नोवृत्तिमात्रेइतिपुंवद्भावस्त्वि

ष्यतएवदक्षिणोत्तरपूर्वाणामिति॥किंचसर्वनामसंज्ञानिषेधेनाप्यसौदुर्वारः॥तत्रहिमात्रग्रहणंक्वचित्सर्वनामत्वेनदृष्टानांसंभत्यसर्वनामत्वे
पिपुंवद्भावार्थं॥अतएवदक्षिणपूर्वायैइत्यत्रसंज्ञाभावेपिपुंवद्भावः॥नन्ववयवेसंज्ञाचेन्ननिषिद्धानहिअंगाधिकारेनस्यात्तदुत्तरपद
स्यचेतिवचनात् दक्षिणोत्तरपूर्वाणामित्यादौसुडागमादिप्रसंगः॥नचनिषेधवैयर्थ्यं॥अनंगस्यत्रतसिलादेर्व्यावृत्याचरितार्थत्वात्तद
तिचेन्न॥अंगकार्येषुसर्वनाम्नोविहितस्यामोऽैऽैसिङ्योरित्यादिक्रमेणव्याख्यानात्॥विहितविशेषणत्वस्याश्रयणेप्रमाणंतुदक्षिणो
त्तरपूर्वाणामितिभाष्यप्रयोगएव॥तस्मात्समुदायस्यैवायंप्रतिषेधोनावयवानांइतिस्थितम्॥अतएवसर्वनामसंज्ञायांतदंतविधि
सञ्ज्ञावेहेहेचेतित्तापकमित्युक्तं॥विभाषाजसि॥जसीतिकार्योपेक्षेयाधिकरणसप्तमी॥जसाधारंयत्कार्यंश्रीभावाख्यंतत्रकर्त्तव्येहे
हेउक्तसंज्ञावास्यात्॥वर्णाश्रमेतराः॥श्रीभावंप्रत्येवेयंविभाषेतिव्याख्यातं॥तेनअकच्चूनभवति॥तस्मिन्कर्त्तव्येहेहेचेतिनित्यंत्रिप्रे
धात्॥अतस्तत्रकप्रत्ययएवभवति॥वर्णाश्रमेतरकाः॥केनव्यवधानान्नेहश्रीभावः॥अकचिहलंतेतुतन्मध्यपतितन्यायेनश्रीभावःस्या
दिव॥प्रथमचरमतयाल्पार्धकतिपयनेमाश्च॥एतेजसःकार्यंप्रतिसर्वनामसंज्ञावास्युः॥प्रथमेप्रथमाइत्यादिशेषंरामवत्॥नेमेनेमाः॥
शेषंसर्ववत्॥इहापिप्राग्वच्छ्रीभावंप्रत्येवसंज्ञाविकल्पः॥तेनप्रथमकाइत्यादावकजून्॥अन्यथाप्रथमकेइतिस्यात्॥उभयशब्दस्तुनि
यंविभाषाकिंतुनित्यासंज्ञेतिगणव्याख्याप्रसंगेनोपपादितं॥पूर्वपरावरदक्षिणोत्तरापराधराणिव्यवस्थायामसंज्ञायां॥स्वमज्ञातिधनाख्य
यां॥अंतरंबहिर्योगोपसंव्यानयोः॥एषात्रिसूत्रीगणमध्येपिपठ्यतेसाचव्याख्यातातयायस्मिन्नेवोपाधौनित्यासंज्ञाप्राप्तातत्रैवजसिविभा
षानयाविधीयते॥पूर्वेपूर्वाइत्यादि॥स्वेस्वाआत्मीयाइत्यर्थः॥आत्मानइतिवा॥इहत्रिसूत्र्यांयदुक्तंव्यंतत्सर्वंगणव्याख्यावसरएवोक्तं

विभाषाप्रकरणेतीयस्यद्वित्वमुपसंख्यानं॥द्वितीयस्मैद्वितीयायेत्यादि॥एकादेशस्यपूर्वांतग्रहणेनग्रहणाल्लिंगविशिष्टपरिभाषयावा॥
द्वितीयस्यैद्वितीयायैदित्यादावपिसिद्धं॥एवंचविभाक्द्वितीयातृतीयाभ्यामितिसूत्रंनकर्त्तव्यंभवति॥अर्थवत्त्वात्॥प्रतिपदोक्तत्वाच्च
द्वैस्तीयस्त्रैःसंप्रसारणंचेत्ययमेवगृह्यते॥नेनेहनप्रकारवचनेजातीयर्प्टुजातीयाय॥ज्यादेस्तांछब्न्युनि॥ब्राह्मणज्यानीयाय॥प्रु
रवपार्श्वशब्दाभ्यांतसंताभ्यांगह्यादिभ्यश्चेतिछः मुरवतीयाय॥पार्श्वतीयाय॥तथाद्वितीयाय भागायेत्यत्रापिनभवतिपूरणाङ्गागेती
यादन्नित्यनिकृतेयस्येतिचेत्यकारलोपेचसतितीयस्यलासणिकत्वादितिदिक्॥इतिसर्वनामसंज्ञाप्रकरणं॥स्वरादिनिपातेमव्ययं॥स्व
रादयोनिपाताश्चाव्ययसंज्ञाःस्युः॥प्राग्रीश्वरान्निपाताइत्यारभ्याधिरीश्वरइत्येतत् पर्यंतंयेवस्यंतेतेनिपाताः॥नन्वेवंचादिष्वेवस्वरादि
योपिपठ्यंतांप्रकृतसूत्रंचत्यज्यतां॥अव्ययप्रदेशेषुनिपातशब्देनैवव्यवह्रियतामितिचेन्न॥चादीनांह्यसत्ववाचिनामेवनिपातसं
ज्ञा॥यथालोकंनयंतिपशुमन्यमानाइत्यत्रसम्यगर्थस्यपशुशब्दस्यनतुसत्ववाचिनां॥यथापशूंस्तांश्चक्रेवाय्वाख्यादीस्वरा
दीनांतुसत्ववचनानामव्ययसंज्ञेष्यते॥स्वस्तिवाचयति॥स्वःपश्येतियथा॥अथप्राग्रीश्वरान्निपाताःस्वरादीनि चादयोसत्वेइतिकु
तोनसूत्रितं इतिचेन्न॥एवंहिसतिनिपानमेकाजनाङ्नित्यंप्रगृह्यसंज्ञास्वरादीनामप्येकाचांप्रसज्येतस्तोहिस्वरादिषुकिमोत्तदसि
णादजित्येकाचौनहितौ॥केनप्रभृतयस्तुकृतएकाचः॥यदितुचादिरेकाजनाङ्नित्यंनिपातेनतत्राचादीनामसत्ववचनत्वंविशेषणेन
लभ्येत॥ततश्चास्यापत्यमित्यादिनस्तस्यसंबोधनमेअवेत्यत्रप्रगृह्यत्वंस्यात्॥ननुचादयोसत्वइत्यत्रासत्वइतिपाठविशेषणं॥तथा
हि॥चादयइतियोगोविभज्यते॥चादयोनिपातसंज्ञाःस्युः॥ततोसत्वे॥इहशास्त्रेचादयोसत्वेहेयाः॥ततश्चाचादीनामसत्ववाचिनां

पाठात्पर्युदासस्तेनएवेत्यादौनदोषः॥एवंचोभेसंज्ञेनकर्त्तव्ये॥अव्ययंनिपाताइतिवाअव्ययानीतिवा
सूत्र्यताम्॥ततःस्वरादीनि॥तद्धितश्चासर्वविभक्तिरित्याद्यव्ययीभावश्चेत्यंतंसूत्र्यताम्॥ततश्चादयोऽसत्त्वेइत्यारभ्ययावदधीश्वरेवि
भाषाङसीति॥तत्रयस्मिन्प्रदेशेनिपातग्रहणंतत्रचादिग्रहणमस्तु॥अव्ययप्रदेशेव्ययग्रहणंनिपातग्रहणंवेति॥उच्यते॥अव्यपसंज्ञा
विरहेन्वर्थसंज्ञावलभ्यंवक्ष्यमाणंप्रयोजनंनसिद्ध्येत्॥निपातसंज्ञाविरहेतुशंतनवाचार्यप्रणीतस्यनिपाता आद्युदात्ताइतिफिट्
सूत्रस्यविषयविभागोनलभ्येत॥अथफिट्शिट्नवादिशब्दानामिवनिपातशब्दस्याप्यन्यतरवार्थाध्यवसायः॥तत्रैव्ययसंज्ञामा
त्रेणनिर्देशसुकरएवेत्यवधेयं॥महासंज्ञाकरणमन्वर्थसंज्ञाविधानार्थंनव्येतिविधंविकारंनगच्छति॥सत्वधर्मान्लिंगसंख्याकारका
दीन्नगृह्णातीतियावत्॥तेनोपसर्जनप्रतिषेधःसिद्धः॥अत्युच्चैसौ॥अत्युच्चैसइति॥अतिक्रांतप्रधानत्वेनसत्वधर्मपरिग्रहान्नेहाव्ययसं
ज्ञा॥ननुस्वरादिषूच्चैःशब्दःपठ्यतेतत्रकथंतदंतस्यसंज्ञेतिचेन्न॥अन्वर्थसंज्ञयैवतदंतविधेरपिज्ञापनात्॥अन्यथोपसर्जनेप्रसंगोभवे
नतन्निवृत्त्यर्थायास्तस्यावैयर्थ्योपपत्तेः॥नेनपरमस्वः॥परमोच्चैरित्यादौस्वरादिप्राधान्येव्ययत्वंसिद्धं॥अव्ययसंज्ञायाअन्वर्थत्वमा
थर्वणेप्रणवविद्यायांश्रुतिरपिदर्शयति॥सदृशंत्रिषुलिंगेषुसर्वासुचविभक्तिषु॥वचनेषुचसर्वेषुयन्नव्येतित्तदव्ययमिति॥एतेषुय
न्नव्येतिकिंतुसदृशमेकप्रकारंतदव्ययमितियोजना॥यद्वायस्मान्नव्येतिनतस्मादव्ययमिति॥त्रिषुलिंगेषुसदृशंलिंगविशेषप्रतिपादे
नेसामर्थ्याभावादिति भावः॥विभक्तिषुकारकेषुवचनेषुचएकत्वादिसंख्यासुअव्ययीभावस्ययद्यपिलिंगकारकसंख्यायोगोस्तितथाप्य
पिवचनादव्ययत्वम्॥अथस्वरादयःस्वरितिस्वर्गपरलोकयोः॥स्वर्गेलोकेयेवयास्वर्जनलधेर्जनेषु॥परलोकेस्वर्यातस्यह्यपुत्रस्येति॥अं

नरिति मध्येअंतर्वाप्याश्चिरमनुचरः॥ प्रातरिनि॰प्रत्यूषेप्रातः संध्यामुपासीत॥ एतेत्रयोनोदात्ताः इतिकाशिका॥ नच्चित्संस्वः शब्दस्यसो॰ तत्वात्॥ तथाचफिट्सूत्रम्॥ न्यङ्स्वरौस्वरिताविति॥ प्रयोगश्च॥ अंतरिक्षमथोस्वः यत्तुप्रातःशब्दआद्युदात्तइतिकश्चित्॥ तन्न॥ प्रत्ने॰ रग्निंप्रातरिंद्रंहवामहेइत्यादावंतोदात्तस्यैवप्रसिद्धत्वात्॥ पुनरित्याद्युदात्तोऽप्रथमेविशेषेच॥ अप्रथमे॥ पुनरुक्तं॥ किंपुनर्ब्राह्मणाः पुण्याः॥ सनुतरित्यंतर्द्धौ॥ सनुतश्चोरोगच्छनिउच्चैरितिमहति॥ नीचैरित्यल्पेशनैरितिक्रियामांद्ये॥ ऋधगितिमर्त्यवियोगशीघ्रसामी प्यलाघवेष्वित्यन्येऋतेदूनिवर्जने॥ युगपदित्येककाले॥ आरादूरसमीपयोः॥ पृथगितिभिन्ने॥ एतेसनुतप्रभृतयोनवांतोदात्ताइतिकाशि॰ का॥ शनैश्चिदंतोऽद्रिवः ऋधक्त्वासमर्त्यः॥ इत्यत्रतुशनैर्ऋधकशब्दावाद्युदात्तौप्रयुज्येतेत्यसिनि अनीतेन्हिभ्यो नागतेन्हि॥ दिवेदिवेसेरात्रावितिनिशासायमितिनिशामुखेचिरमितिबहुकालेमनागितिईषदर्थेईषदित्यल्पेजोषमितिसुखभोजनयोः॥ तूष्णीमितिमौनेवाहसःअ वस्दित्येतौबाह्ये॥ समयेन्हिसमीपेमध्येचयामंसमयानिकषेत्यंतिके॥ विलंब्यलंकानिकषाहनिष्प्रतिस्वयमित्यात्मनेत्यर्थे॥ स्वयंकृतं॥ दृषेति ज्यर्थे॥ नक्तमितिरात्रौ॥ नञ्निनिषेधेहेताविनिमित्तार्थे॥ इद्धेतिपाकाश्ये॥ अद्धेतिस्फुटावधारणयोः॥ तत्वातिशययोरित्येके॥ साम्प्रत्य द्दनुयुष्मिनयोः॥ एतेत्यस्यभृतयः साम्यंताह्यविंशतिरंतोदात्ताइतिकाशिका॥ दिवाचिनमः कृण्वंतिरथासःजत्यथिभिः॥ नक्तंदद्दशेकुहचि द्दिवेयुः॥ इत्यादीतुआद्युदात्ताःप्रयुज्यंतेवत्॥ वत्यत्ययांतमव्ययमंतंस्यात्॥ ब्राह्मणवत्॥ तेनतुल्यमित्यादिभिर्विहितोवतिरिहगृह्यतेनतू पसर्गाद्वात्वर्थइतिविहितःसत्वार्थकत्वात्॥ यदुदृतोनिवतोयासिवप्सत्॥ सनेतिनिस्ये सनाजातइंद्रः॥ सनात्॥ सनत्दृदमपिनित्येस नत्कुमारः॥ तिरसित्यं॰तर्द्धौतिर्यगर्थेचतिरोहितः॥ तिरःकाष्ठंकुरु॥ परिभूतेनुलक्षणा॥ तिरस्कृतोरिरिति यथा॥ सनेत्यादयस्तिरोंता आद्यु

दान्ता इतिकाशिका ॥ सनाच्चहोतानव्यश्वसत्सि तिरःपुरूचिदश्वि नेत्यादौत्वंत्तोदात्तं प्रयुज्यतेऽंतरेत्यंतोदात्तोमध्येविनार्थे ॥ त्वांमाचोंतरा
कमंडलुः ॥ त्वामंतरातामरसायनास्मि ॥ अंतरेणेतिवर्जने ॥ अंतरेणहरिंनसुखं ॥ ज्योगितेकालभूयस्त्वेप्रश्नेशीघ्रार्थेसमभ्यर्थेच ॥ कमिति
वास्मिन्मूर्द्धनिंदासुखेषु ॥ वारिणिकंजंपद्मं मूर्द्धिकंजाःकचाःनिंदायां कंदर्पःसुखेकंयुःशमिति सुखेशंकरःसहसेत्याकस्मिकाविमर्षयोः ॥ दि
वःप्रसूनंसहसापपात ॥ सहसाविदधीतनक्रियां ॥ स्वधेतिपितृदाने ॥ अलमिति भूषणपर्याप्तिशक्तिवारणनिषेधेषु भूषणेअलंकारः ॥ पर्या
प्तौ अलमस्यधनंबहुइत्यर्थः ॥ शक्तौअलंमल्लोमल्लायशक्तइत्यर्थः ॥ वारणेअलमतिप्रसंगेननिषेधेआलप्यालमिदंबभ्रोर्यत्सदानपाहर
त् ॥ नवक्तव्यमित्यर्थः ॥ वषडितिहविर्दानेविनेतिवर्जने ॥ नानेत्यनेकविनार्थयोः ॥ ॥ नानाभूतंदेहभृतांसमाजं ॥ नानानारीर्विफलालो
कपात्रा ॥ स्वस्तीतिमंगले ॥ अन्यदित्यन्यार्थे ॥ देवदत्तआयातोन्यश्चयज्ञदत्तइति ॥ अस्तीतिसत्तायां ॥ अस्तिपरलोकइतिमतिरस्यास्तिकः
उतास्मिति अस्मत्कोऽस्मच्चारणरहस्ययोः क्षमेतिक्षांतौ ॥ क्षमाकरोतु भवान् ॥ विहायसेतिविपदर्थे ॥ विहायसारम्यमितोविभाति ॥ दोषेतिरा
त्रौमृषामिथ्येतेतौवितथे ॥ मुधेतिव्यर्थौनिष्कातोसुनःकसुनः ॥ कृन्मकारसंध्यक्षरांतःअव्ययीभावश्चइदंगणसूत्रत्रयम् ॥ अणध्यायीस्थ
त्रिसूत्र्यासमानार्थं वैयर्थ्यंतूद्दिष्यने ॥ पुरेति अविरतेचिराप्तीनेभविष्यदासन्नेच ॥ पुराधीतेअविरतमणाधीदित्यर्थः ॥ पुरिलुङ्लिट् ॥
चिरातीते । पुरापिनवंपुराणं ॥ पुरेदमूर्द्धेभवतीतिवेधसंसमनंतरंभविष्यतीत्यर्थः स्यात् प्रबंधेचिरातीतेनिकटागामिकेपुरेत्यमरः ॥ मि
थोइतिरहःसहार्थयोः ॥ मन्त्रयंतेमिथोमिथसित्यपिपूर्वंवत् ॥ प्रायसितिबहुकल्पेमुहुस्तितुपरार्थे ॥ प्रवाहुकमितिसमकालेयुर्द्धार्थेच ॥
केचित्तुप्रवाहिकेतिपठंति ॥ आर्यहलमितिबलात्कारे शाकटायनस्त्वाह ॥ आर्येतिप्रतिबंधेहलमितिप्रतिषेधविवादयोरिति ॥ आसी

नरिति मध्येअंतर्वाप्याश्चिरमनुचरः॥ प्रातरिति प्रत्यूषेप्रातः संध्यामुपासीत॥ एतेत्रयोंतोदात्ताः इतिकाशिका॥ नक्षित्यंस्वः शब्दस्यस्वरि
तत्वात्॥ तथाचफिट्सूत्रम्॥ न्यङ्स्वरौस्वरितावितिः॥ प्रयोगश्च॥ अंतरिक्षमथोस्वः यत्तुप्रातः शब्दआद्युदात्तइतिकश्चित्॥ तन्न॥ प्रत्ने
रग्निंप्रानरिंद्रंहवामहेइत्यादावंतोदात्तस्यैवप्रसिद्धत्वात्॥ पुनरित्याद्युदात्तोः प्रथमेविशेषेच॥ अप्रथमे॥ पुनरुक्ते॥ किंपुनर्ब्राह्मणाः
पुण्याः॥ सनुतरित्यंतर्द्धाने॥ सनुतश्चोरोगच्छनिउच्चैरितिमहति॥ नीचैरित्यल्पेशनैरितिक्रियामांद्ये॥ ऋधगितिसत्यवियोगशीघ्रसामी
प्यलाघवेष्वित्यन्येऋतेइतिवर्जने॥ युगपदित्येककाले॥ आराद्दूरसमीपयोः॥ पृथगितिभिन्ने॥ एतेसनुतप्रभृतयोनवांतोदात्ताइतिकाशि
का॥ शनैश्चियंतोअद्रिवः ऋधमित्वासमर्त्यः। इत्यत्रतुशनैर्ऋधैकशब्दावाद्युदात्तौप्रयुज्येतेत्यसिनि अनीतेन्हिष्ठोनागतेन्हि॥ दिवेदिवे
वसेरात्रावितिनिशिसायमितिनिशामुखेचिरमितिबहुकालेमनागितिईषदर्थेईषदित्यल्पेजोषमितिसुखमौनयोः॥ तूष्णीमितिमौनेवहिस्तूभ
यस्मिन्नित्येतौबाह्ये॥ समयेनिसमीपेमध्येचयामंसमयानिकषेत्यंतिके॥ विलंब्यलंकालनिकषाहनिष्पतिस्वयमित्यात्मनेत्यर्थे॥ स्वयंकृते॥ स्वयेति
त्यर्थे॥ नक्तमितिरात्रौ॥ नञितिनिषेधेहेतावितिनिमित्तार्थे॥ इद्धेतिपाकाशये॥ अद्धेतिस्फुटावधारणयोः॥ तत्वातिशययोरित्येके॥ सम्प्रत्य
द्दुजुगुम्मितयोः॥ एतेत्वस्मभृतयः सामंतादविंशतिरंतोदात्ताइतिकाशिका॥ दिवाचिनमः कृण्वंतिरथासःजत्यधिभिः॥ नक्तंददृशेकुहचि
द्दिवेयुः॥ इत्यादीनुआद्युदात्ताः प्रयुज्यंतेवत्॥ वत्यत्ययांतमव्ययंसंस्यात्॥ ब्राह्मणवत्॥ तेननुल्यमित्यादिभिर्विहितोवतिरिहगृह्यतेतन्नू
पसर्गाद्वात्वर्थइतिविहितःसत्वार्थकत्वात्॥ यदुक्तोनिवतोयासिवप्सत्॥ सनेतिनिश्चे सनाजातइंद्रः। सनातनः॥ सनन्नेदमपिनिस्येस
नत्कुमारः॥ तिरसित्यंतर्द्धौतिर्यगर्थेचतिरोहितः॥ तिरःकाष्ठंकुरु। परिभूतेनुलक्षणा॥ तिरस्कृतोरिरिति यथा। सनेत्यादयस्तिरोंता आयु

दान्ता इतिकाशिका ॥ मनाच्चहोतानव्यश्चसत्सि निरःपुरूचिदश्चि नेत्यादौत्वंत्तोदानं प्रयुज्यते।अंतरेत्यंतोदानोमध्येविनार्थे॥त्वांमाचांतरा
कमंडलुः॥ त्वामंतरातामरसायनास्ति॥ अंतरेणेतिवर्जने॥ अंतरेणहरिंनसुखं॥ज्योगितिकालभूयस्त्वेप्रश्नेशीघ्रार्थेसंपन्नार्थेच॥ कमिति
वारिमूर्द्धनिंदासुखेषु॥ वारिणिकंजंपद्मं मूर्द्धिकंजाःकचाःनिंदायां कंदर्पःसुखेकंयुःशमिति सुखेशंकरःसहसेत्याकस्मिकाविमर्षयोः॥दि
वःप्रसूनेसहसापपात॥सहसाविद्धीतनक्रियां॥ स्वधेतिपितृदाने॥ अलमिति भूषणपर्याप्तिशक्तिवारणनिषेधेषु भूषणेअलंकारः॥पर्या
प्तौ अलमस्यधनंबहुत्वर्थः॥शक्तौअलंमल्लोमल्लायशक्तइत्यर्थः॥ वारणेअलमतिप्रसंगेननिषेधेआलप्यालमिदंवभ्रोर्यत्सदारान पाहर
त॥नवक्तव्यमित्यर्थः॥ वषडितिहविर्दानेविनेतिवर्जने॥ नानेत्यनेकतिनार्थयोः॥ ॥नानाभृतंदेहभृतांसमाजं॥नानानारीर्विष्फलालो
कयात्रा॥ स्वस्तीतिमंगले॥ अन्यदित्यन्यार्थे॥देवदत्तआयातोन्यश्चयज्ञदत्तइति ॥अस्तीतिसत्तायां॥ अस्तिपरलोकइतिमतिरस्यास्तिकः
उतांस्विति अप्रकाशेचारणरहस्ययोः क्षमेतिक्षांतौ॥ क्षमाकरोतु भवान्॥विहायसेतिविषदर्थे॥विहायसारम्यमितोविभाति॥दोषेतिरा
त्रौमृषामिथ्येत्येतौवितथे॥मुधेतिव्यर्थौमुक्तोमुन्मुक्तमुनः॥ कृन्मकारसंध्यक्षरांतःअव्ययीभावश्चइदंगणसूत्रत्रयम्॥अशाश्वतीस्त्र
त्रिसूत्र्यासमानार्थं वैयर्थ्यंतूद्दिष्यते॥पुरेति अविरतेचिरातीतेभविष्यदासन्नेच॥पुराधीतेअविरतमपाठीदित्यर्थः॥पुरिलुङ्लिटौ॥
चिरातीते। पुराणपिनवंपुराणं॥पुरेदमूर्द्धेभवतीतिवेधसंसमनंतरंभविष्यतीत्यर्थः स्यात्प्रबंधेचिरातीतेनिकटागामिकेपुरेत्यमरः॥मि
श्रोइतिरहःसहार्थयोः॥मन्त्रयंतेमिथोमिथसित्यपिपूर्ववत्॥प्रायसितिबहुकाल्येमुहुस्तितिपुनरर्थे॥प्रवाहुकमितिसमंकालेयुर्द्यर्थेच॥
केचित्तुप्रवाहिकेतिपठंति॥आर्यहलमितिबलात्कारे शाकटायनस्त्वाह॥आर्येतिप्रतिबंधेहलमितिप्रतिषेधविवादयोरिति॥आशी

स्णमितिपेोनःपुन्येसाकंसार्द्धमित्येतौसहार्थेनमसितनतौहिरुगितिवर्जनेधिगितिनिंदाभर्त्सनयोः॥तसिलादिस्तद्धितएधाच्येतेः॥
शस्तंसी रुत्वसुच्॥सुच्आस्थालौच्यर्थाश्चेतिनसिलादिरित्यादेरयमर्थः॥पंचम्यास्तसिलित्यारभ्यएधाच्चेत्येतदंतैःसूत्रैरुक्तोयः
स्तद्धितस्तदंताःस्वरादिषुबोद्व्याः॥तथाबह्वल्पार्थीच्छस्॥प्रतियोगेपंचम्यास्तसिः॥क्रियाभ्यावृत्तिगणनेरुत्वसुचौ॥द्वित्रिचतुर्भ्यःसु
चौ॥दूणआसिरित्युणादिसूत्रेणआसिप्रत्ययोविहितः॥अयादेत्युदाहरणं॥प्रत्नपूर्वविश्वेमाथालछंदसिसंपद्यकर्तरीत्विः विभाषासा
तिकात्स्न्येदेयेत्राच॥एतदंताअपिग्राह्याः॥अमूइति अमुच्छंदसीतिविहितः आमित्यंगीकारेआमुकुर्मः किमेत्तिङव्ययघादाम्॥
कासप्रत्ययादामंत्रेलटीत्युक्तेरिति केचित्॥प्रतामितिग्लानौ॥प्रशानितिसमानार्थे॥प्रशान्देवदत्तोयज्ञदत्तेनप्रतानितिविस्तारे॥मा
इतिनिषेधेमाभवतुमाभविष्यति॥माङितिनिषेधाशंकयोःमाकार्षीत्॥अस्यपापंमाभूदिति॥आकृतिगणश्चायं॥तेनान्येपिग्राह्याः॥स्तो
द्यथाभमितिशैघ्र्येअल्पेचकाममितिस्वाछंद्येप्रकाममित्यतिशये॥भूयइतिपुनरर्थेसांप्रतमितिन्याय्येपरमितिकिंत्वर्थेगुणवानस्मिपरमद्
कारीसास्मादितिप्रत्यस्से साचीतितिर्यगर्थेसत्यमित्यर्द्धंगीकारेमन्वितिशैघ्र्ये॥आम्बितिच॥संवदितिवर्षे॥अवश्यमितिनिश्चयेसपदिशैघ्र्यो
वलवदित्यतिशयेवलवदपिशितानांप्रादुस्आविस्इतिप्रकाशेअनिशंनित्यंनित्यदासदा॥अजस्रंसंततम्॥एतेसातत्येउषेतिरात्रौउषा
तनोवायुः॥द्यावापृथिव्यर्थे॥ओमितिब्रह्मवाचीभूर्भुवरितिपृथिव्यंतरिक्षलोकयोःभूर्लोकःभुवर्लोकः॥झटितिझगितितरसाइति
शैघ्र्ये॥त्वाकूदुनंशैघ्र्यंक्षिप्रमितिच॥अतीवेत्यतिशयेसुष्ठुइतिप्रशंसायाम्॥कुइतिकुत्सितेषदर्थयोः॥कापथःकदोष्णम्॥अंजसेतिन
त्वशीघ्रार्थयोःअइतिवहिरर्थेमिथुरितिह्वावित्यर्थे॥मिथुर्मन्त्रयेतेः॥विश्वगितिसमंनात्भावे भाजगितिशैघ्र्ये॥भाजकम्यचनि॥अन्वक्इ

स्यानुकूल्ये॥चिरायचिररात्रायचिरस्यायाश्चिरार्थकाः॥आद्यशब्दाच्चिरंचिरेणचिरादितिगृह्यतेअस्तमितेविनाशे॥आनुषगित्यानुपूर्व्ये॥
आनुषक्तमविशतीहबंधुना॥अनुमानेनुषगितिशाकटायनः॥आनुषट्तिनिंदासंकेचित्॥अभ्रम्इतिशीघ्रसाम्यनिष्क्रियोः॥अभ्रंरेवेतिरेफे
ग्रस्थानेइतियुक्तार्थैवरमितिहिईषदुत्कर्षेदुष्टनिकृष्टार्थेवत्यादितिहठार्थे॥शुइतिपूजायां॥शुनासीरः॥क्ष्मेतिक्षांतौ॥अर्वागित्यञ्चतौ
ने॥शुदिशुक्लपक्षेवदिकृष्णपक्षेइतिस्वरादिः॥तद्धितश्चासर्वविभक्तिः॥तद्धितांतःशब्दोव्ययंस्यात्॥यस्मात्सर्वादिवचनत्रयपात्मिकाविभक्ति
र्नोत्पद्यतेकिंत्वेकेवचनम्॥ततःतत्रतद्धितइतिकिम्॥एकःद्वौवहवः असर्वविभक्तिरितिकिम्॥औपगवः॥ननुगोदोवरणाइत्यादावति॥
व्याप्तिः नचलुब्योगाप्रख्यानात् योगप्रमाणेचतदभावेदर्शनेस्यादितिपठतःसूत्रकृतोमतेनैतत्तद्धितांताइतिवाच्यम्एवमपिपंचैवपंचका
शकुनयः उभयोपणिःपचैतिकल्पंपचतिरूपमित्यादावतिव्याप्तेः दुर्वारत्वादितिचेत्॥अत्राहवार्त्तिककारःसिद्धंतुपाठात्॥तसिलादयः
प्राक्पाशपः शस्प्रभृतयः॥प्राक्समासांतेभ्यःसांतःकृत्वोर्थः॥तसिवतीनानाज्ञाविति॥नचइवेप्रतिरूपकावित्यधिकारेप्रत्नपूर्वविश्वेमा
त्याल्लुंदसिइतिविधानात्तदंतस्योपसंग्रहइतिवाच्यम्॥प्रकारवचनेथालितिप्रकरणएवप्रत्नादिभ्यइवेत्याल्लुंदसि॥प्रकारवचनेइ
दमस्थमुरितिपठितुंशक्यत्वात्स्वरादिगणेआस्थालाविधिपाठेनसिद्धत्वाच्च॥मान्तइति॥आम्अमित्येतस्यार्थः॥तसिप्रतियोगेपंचम्यास्त
सिः॥नैनैकदिक्तनसिभ्येतिह्यवपिगृह्यतेस्यादेतत्॥सूत्रमतेकथमुक्तिसंभवः यावताकर्मणिद्वितीयाद्योक्तयोर्द्विवचनैकवचनेइत्यादौ
नांस्वादिवाक्यैनैकवाक्यतापत्तेःव्ययेभ्यःस्वादीनांप्रातिरेवनास्ति॥अव्ययादाप्सुपइतिज्ञापकेननुसर्वविभक्तयः उच्यंते। अव्ययेभ्यः
भ्यः सप्तानामपिविभक्तीनांत्रीण्यपिवचनानितथासप्तानामपिएकवचनान्येव अथवाप्रथमायाएववचनत्रयम्॥यद्वाप्रथमायाएकवचन

मेवेतिपक्षश्चतुर्थंयद्यपिग्रंथेषुलभ्यतेतथापिप्रथमैकवचनमात्रमेवेतिचतुर्थपक्षएवसोदरसमः॥तमेवगृहीत्वासूत्रस्याप्युक्तिसंभवोस्यः
ष्टः इतरस्तुपक्षस्त्रिक्रमभ्युच्चयवादमात्रेणोपन्यस्यतेनतुतात्त्विकम्॥तथाहि॥यदिकर्मणिद्वितीयैवअभिहितेप्रथमैव॥एकत्वेएकवचनमि
वेत्यादिरर्थनियमः॥यदिवाद्वितीयाकर्मण्येवेत्यादिःप्रकृतार्थापेक्षोविभक्तिनियमः॥यदिवाएकवाक्यत्वेसामान्यापेक्षवचनविभक्तिनियमे
पिवाअव्ययादाप्सुपइतिसामान्यापेक्षज्ञापकाद्विभक्तिमिद्विस्तदाअविशेषात्सप्तानामपिविभक्तीनांत्रीण्यपिवचनानीतिपक्षोलभ्यते य
दानुद्वित्वेद्विवचनमितिसूत्रयित्वाएकवचनमित्येवपृथक्सूत्र्यते॥तदन्यथानुपपत्त्याचकर्मण्येवद्वितीयानकरणादौद्वित्वबहुत्वयोरेवद्विवच
नबहुवचनेनत्वेकस्यदित्यादित्रयेणसजातीयापेक्षोनियमःततश्चाव्ययेभ्यःसकलविभक्तिप्राप्तावेकवचनमित्यनेननियमःक्रियतेत्यत्रैक
वचनंचान्यच्चप्राप्नोतितत्रैकवचनमेवेतियदिवासामान्यापेक्षनियमाश्रयणाद्व्ययादप्राप्तावेकवचनमितिसूत्रंक्रियतेतत्रचऊप्राप्नोतुप
दिकादित्यनेनैकवाक्यतानतथाचऊप्रावादिभ्यःकर्मादिष्वेकवचनंसिद्धमेवेति॥एतत्सूत्रबलाद्व्ययेभ्यएवभवतितिङंतात्तुनभवति।एकवच
नमित्यस्याप्राप्तप्रापणार्थत्वेपिऊप्सूत्रेणैकवाक्यत्वात्॥प्रदेशांतरेपाठसामर्थ्याच्चस्वार्थत्रेणापिऊप्सूत्रंविधायकमिति द्वित्वेद्विव
चनमित्यादेर्नियामकत्वंसंगच्छते॥तदाव्ययेभ्यःसर्वाण्येकवचनानीति॥द्वितीयःपक्षोलभ्यते॥यदातुद्वितीयाकर्मण्येवेत्यादिःसा
मान्यापेक्षःप्रत्ययनियमः॥अव्ययेभ्यस्तुप्रथमैवप्रथमाप्रातिपदिकार्थएवेतिनियमेनहिकर्माद्याधिक्यस्थलएवसानिवार्यतेऽधिक्यो
रितितुयथान्यासमेवतत्रचैकवचनंसंख्यांतरेइतिसजातीयापेक्षप्रत्ययनियमपक्षस्तदानिःसंख्येभ्योव्ययेभ्यःप्रथमायाःवचनत्रय
मपिभवतीतितृतीयःपक्षोलभ्यतेत्रिष्वप्यमीषुपक्षेषुपचतिकृत्संपचतीरूपमित्यादौदोषः॥तत्रहिप्रथमैकवचनमात्रमिष्यतेउक्तपक्ष

त्रयेष्यधिकं प्राप्नोति॥ तस्मान्न द्वितीयपक्षश्रीत्यासकलैकवचनानिप्राप्नुयैकवचनमित्येकत्वस्यविवक्षितत्वात् प्रथमातिक्रमेकारणाभावात् प्रथमैकवचनमेवकर्त्तव्यमितिसिद्धांतः एवंचसत्यपिसूत्रस्योक्तिसंभवेपचतिरूपमित्यादावतिव्याप्तिभयात् परिगणनमेवकर्त्तव्यमूरुवंनकर्त्तव्यमितिस्थितम्॥ रुद्योमांतएजेतश्वतदंतमव्ययसंज्ञंस्यात्॥ स्वादुंकारंभुंक्ते॥ वक्षेरायः॥ तुमर्थेसेसेनइति वचेःसेपत्ययेरूपं॥ नन्वेवंकारयांचकारेत्यामंतस्यनप्राप्नोति॥ अत्रातिङ्ग्रहणंतहींहरुदंतत्वादुत्पन्नानामपिसुपामामइतिलुग् भविष्यति॥ तत्रहिलेरितिनानुवर्त्तते॥ नचैवंतरवादेरपिलुग्प्रसक्तिः॥ अपरिसमाप्तार्थतयातरवाद्युत्पत्तेरेवाभावात्॥ अपरिसमाप्तार्थत्वंचसंख्याकर्त्रादिविषयकोत्थिताकांक्षत्वं अतएवानुप्रयोगःप्रार्थ्यते॥ आमंतार्थगतप्रकर्षादिप्रतीतिस्तुअनुप्रयोगादुत्पन्नेनतरवादिनाभविष्यति॥ अतएवसूत्रितंरुद्योनुप्रयुज्यतइति अनुशब्दोहिव्यवधिप्रतियोग्यपेक्षीतस्यचप्रयोगनिवृत्तयइतिवक्ष्यते॥ यद्वापूर्वसूत्रोक्तनिष्कर्षरीत्या आमंतात् सोरेवोत्पत्तौहलन्ताद्यालोपोभविष्यति अस्तुवाकृदंतंयन्मेजंतेभ्रुतिवाक्यार्थः॥ आमंतेहिप्रत्ययलक्षणेनकृदंतंश्रूयतेचमान्तं॥ नचैवंप्रतामोप्रतामःलवमाचक्षणोणोलोपित्यादावतिप्रसंगइतिवाच्यम् स्वादिषुप्रशान्शब्दस्यपाठेनधातोःप्रत्ययलक्षणेनकृदंतत्वमुपजीव्याव्ययसंज्ञानभवतीतिज्ञापितत्वात्॥ नचमोनोधातोरितिनत्वेकृतेनेतन्मांतमितिकथंज्ञापकेतिवाच्यंनत्वस्यासिद्धत्वात्॥ नचशान्तेजनइत्यस्यार्थांतररूक्तिः त्वेशानयतीत्यादिप्रयोगसिध्यर्थंचुरादित्वस्वीकारेणनित्यसनंतत्वाभावात्तस्यैवायंस्वादिषुपाठइतिवाच्यम्॥ अनभिधानात्तस्मात्क्विपोनुत्पत्तेः॥ अत्रचज्ञापकत्ववर्णनपरंभाष्यमेवप्रमाणं॥ अव्ययमित्यन्वर्थसंज्ञाबलादसत्वार्थस्यसाम्यवाचिनएवप्रशान्शब्द

स्यतत्रग्रहणंनतुशांतिमहाचकस्यतेनप्रशामोप्रशामइत्युदाहरणंनविरुध्यते॥स्वस्यादीनांतुसत्ववाचिनामपिपाठसामर्थ्याद्व्यर्थत्वेमि
तिविशेषः॥अंतग्रहणसामर्थ्यान्नित्ययोगेबहुव्रीहिराश्रीयते॥तेनौपदेशिकएजन्गृह्यतेनेह आधयेचिकीर्षवोकुंभकारेभ्यः॥वस्तुतस्त्व
तग्रहणंव्यर्थं॥लक्षणप्रतिपदोक्तपरिभाषयेतिप्रसंगभंगात्॥ननुवर्णग्रहणेङ्ग्रेपरिभाषानप्रवर्त्ततेअन्यथैचोयवापावंइत्यादावतिप्रसं
गादितिचेन्न॥एवमपिवहिरंभपरिभाषयासन्निपातलक्षणोविधिरनिमित्तंतद्धिघातस्येतिपरिभाषयावेष्टसिद्धेः॥अयंमत्रार्थः॥सन्निपा
तः॥संश्लेषःतन्निमित्तोयोविधिःसतद्धिघातस्यानिमित्तं॥तंसन्निपातंयोविहंतिसतद्धिघातस्तस्येत्यर्थः।एवंचसुप्सन्निपातलक्षणस्य
घेर्डितीतिगुणस्यहुश्चुस्त्रुभ्यइत्यस्यदृत्वेदित्येत्वस्यवाव्ययसंज्ञांप्रतिनिमित्तत्वंनेत्यवधेयम्॥तथापरिभाषायाः प्रयोजनांतराण्यपिसंतिदि
ङ्मात्रंतूच्यतेश्रीपंकुलंतस्मैश्रीपायेत्यत्रानोलोपोनभवति॥तथाअगव्यीत्॥अनाव्यीत्यस्यहलङ्इतिलोपोन॥ तथाति जरंकुलं॥अतिजि
रेणअतिजरैःअतिजरादित्यत्रअम्ङ्नञैस्भ्यात्ङ्त्येतेषुअकारमुपजीव्यकृतेषुसत्सु जरसादेशोनभवतीत्यादि॥ अनित्याचेयंपरिपरि
भाषाकष्टायक्रमणेनयासयोरित्यादिज्ञापकात्॥तेनाग्निमानित्यत्रहस्वनुड्भ्यांमतुविनि अंतोदात्तादुड्स्तोनात् परस्यमतुपउदात्तत्वेकृते
शेषनिघातेनप्रकृतेरनुदात्तत्वंभवत्येवेतिदिक्गौर्ग्लौर्नौरित्यत्रनेदसूत्रंप्रवर्त्तते ॥उणादीनामव्युत्पन्नत्वात्॥व्युत्पत्तिपक्षेपित्त्वेपाच्छ्वयः
मित्युणादिसूत्रेणडौडोप्रत्ययांताभ्यांतएवाव्ययमितिनियमस्यकृतत्वात्॥क्ना नोसुनकसुनः॥एतदंतमव्ययंस्यात्॥कृत्वा पुरासूर्य्यो
स्योदेतोः।पुरावत्सानामयाकर्त्तोः॥भावलक्षणेस्थेण् कृत्वदिचरिहुतमिलनिभ्यस्तोसुन्॥पुराक्रूरस्यविस्पोविरप्शिन्॥पुराजत्रुभ्यः आम
आतरः॥सपितदोःकसुन्निति कसुन्॥ अव्ययीभावश्च॥ अयमव्ययसंज्ञःस्यात्॥विषयपरिगणनंकर्त्तव्यम्॥सुकिमुरवस्वरोपचारयो ९८

निवृत्तौचेति। उपाग्नि प्रत्यग्नि अव्ययादाप्सुपइतिसुपोलुक्॥ उपाग्नि मुख, प्रत्यग्नि मुखः॥ मुखंस्वांगमित्युत्तरपदांतोदात्तत्वेप्राप्तेनाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यइतिप्रतिषेधः॥ तथाचबहुव्रीहौप्रकृत्यैतिपूर्वपदप्रकृतिस्वरएवभवति॥ पूर्वपदंचसमासस्वरेणांतोदात्तम्॥ निमित्तस्थानिकस्यसकारस्योपचारइतिप्राचांसंज्ञा॥ तन्निवृत्तौयथा॥ उपपयःकारः उपपयःकामः इहांतःकृतमीतिप्राप्तंसत्वंमन व्यपस्येतिपर्युदस्यते॥ इहमुखस्वरनिवृत्तिरेवमुख्यंप्रयोजनम्॥ लुकृतुनाव्ययीभावादतइतिविशेषप्रतिषेधात्सिद्धः उपचारनिवृत्तिरपिनप्रयोजनेनम्॥ अतःकृकमीत्यत्रानुत्तरपदस्थस्येत्यनुवृत्त्यैवतत्सिद्धेः॥ परिगणनंकिम्॥ उपाग्र्यधीयान॥ परांगवड्गावेनषष्ठमांत्रितस्यचेत्यादुदात्तत्वंयथास्यात्॥ तत्रह्यव्ययानांप्रतिषेधउपसंख्यातः उच्चैरधीयानेत्यादौमाभूदिति॥ नथोपाग्निकमित्यादौअव्ययसर्वनाम्नामित्यकच्न॥ उपकुंभमन्यःरिव त्यनव्ययस्येत्यनुवर्तमानेःकृद्ग्रहणेतिमुम्प्रतिषेधेन॥ उपकुंभीभूतः॥ अस्यचाविद्यमानस्योपसंख्यानिकःप्रतिषेधोनभवति॥ तन्नास्तित्वेसूत्रंनकर्त्तव्यम्॥ लुकउपचारनिवृत्तेश्चान्यथोपपत्तेरुक्तत्वात्॥ मुखस्वरनिवृत्तिःपरमवशिष्यते॥ तत्रकेचिदाहुःमुखस्वरोत्रेष्यतएव॥ यदिचावत्प्रयोजनंस्यात्तत्रैवापंब्रूयान्नाव्ययीभावाच्चेतिइनिभाष्यस्वरसादिति॥ अन्येतुअनव्ययमव्ययंभवतीत्यन्वर्थसंज्ञाविज्ञानादेवमुखस्वरनिवृत्तिर्भविष्यतीतिस्यादेतत्॥ स्वरादित्वेनैवसिद्धत्वान्नह्यतश्चेत्यादिचतुःसूत्रीव्यर्था॥ तत्रहिनमिलादिस्नह्यतएधाच्यर्यंतइत्यादिनाछ्यर्थाश्चेत्यनेनआसिमौणादिकंवर्जयित्वातद्धितश्चासर्वविभक्तिरित्यस्यार्थःसंगृह्यते॥ कृन्मकारसंध्यक्षरांतइत्यनेनकृन्मेजंतइत्यस्यार्थःसंगृह्यते॥ क्तातोसुनकसुनोव्ययीभवश्चेतिसूत्रद्वयंनुस्वरूपेणैवपठ्यतइति॥ अत्राहुः॥ पुनर्वचनमनित्यत्वज्ञापनार्थं॥ तेनप्रागुक्तंलुड्मुखस्वरोपचारादितिपरिगणनंलभ्यते॥ नलोकाव्ययेत्यत्राव्ययप्रतिषेधे

तोसुन्कसुनोरप्रतिषेधइतिवक्ष्यमाणंचलभ्यतइति। वस्कनस्कमास्कचनुःसूत्री॥ अव्ययीभावश्चेतिनुगणेपि मास्कउक्तरीत्यान्वर्थसंज्ञै
वसिद्धेः तोसुन्कसुनोरप्रतिषेधइत्येवलाघवात्पञ्चतामितियुक्तःपंथाः॥ शिसर्वनामस्थानम्॥ शिइत्येतत्सर्वनामस्थानसंज्ञंस्यात्॥
वारीणिसर्वनामस्थानेचासंबुद्धावितिदीर्घः॥ यदितुप्रदेशेष्वेवशौचेत्याद्युच्येतनर्हिमुटिनस्यात्॥ अथशिसुटोरित्युच्येतनर्हिनपुंसकसु
टेपियहणंस्यात्॥ शिग्रहणंतुशसर्थंस्यात्॥ नस्मात्संज्ञातावत्प्रणेयामहासंज्ञाकरणंतुपूर्वाचार्यानुरोधात्॥ स्फडनपुंसकस्य॥ सुडिति
पत्याहारः॥ नपुंसकभिन्नस्यस्वादिपुंवद्वचनानिउक्तसंज्ञानिस्युः॥ राजा॥ राजानौ॥ राजानइत्यादि॥ प्राग्वद्दीर्घः॥ अनपुंसकस्येतिकिम्॥ सामः
नी॥ विभाषाङिश्योरित्यत्रलोकाभावेदीर्घोनभवति॥ अनपुंसकस्येतिपर्युदासस्तेनास्यसूत्रस्यस्त्रीपुंसयोरेवप्रवृत्तिरितिनपुंसकेनविधिर्ना
पिप्रतिषेधः॥ तेयद्वनानिसंनीत्यत्रपूर्वसूत्रेणप्राप्तासंज्ञाभवत्येवप्रसज्यप्रतिषेधेनसापिनिषिध्येतयद्यप्यनंतरस्यविधिर्भवतिप्रतिषेधो
वेतिसमाधानंशक्यतेनथापिअसमर्थसमासोवाक्यभेदश्चेतिगौरवंस्यादेव॥ यद्वासुट्स्त्रीपुंसयोरितिवक्तव्येऽनपुंसकस्येतिसूत्रंयतः
प्रसज्यप्रतिषेधएवंसंमतः॥ गौरवंचप्रामाणिकं॥ एतेनहिकेचिन्नञ्समासाअसामर्थ्येपिसाधवइतिज्ञाप्यते॥ तेनाश्राद्धभोजीब्राह्मण
इत्यादिसिद्धंभवति॥ नवेतिविभाषा॥ इतिशब्दःकाकाक्षिन्यायेनोभाभ्यांसंबध्यते॥ सचपदार्थविपर्यासकृत्॥ तेनार्थएवेहसंज्ञींसंज्ञाच
॥निषेधौविकल्पयोर्विकल्पसंज्ञास्यात्॥ नचतयोरपदार्थतयानन्वयप्रसंगः॥ एतत्सूत्रारंभसामर्थ्यादेवविधिवाक्येषुविकल्पंकश्चि
पदस्यलाक्षणिकत्वात्॥ उभयत्रविभाषार्थंचेदंसूत्रं॥ प्राप्तविभाषायामप्राप्तविभाषायांचनास्योपयोगः॥ तथाहि॥ विभाषोपपदेनप्रतीय
मानेइतिप्राप्तविभाषा॥ नञ्स्वरितञ्जिनइत्यादिनानित्यमात्मनेपदेप्राप्तेविभाषाऽक्त्वापक्षेतन्निवृत्तिमात्रंक्रियतेपक्षेभवतीतित्वनुवादः

॥ तथाविभाषोर्णोरित्यप्राप्तविभाषा ॥ और्णवीत्यत्रपरत्वात् सार्वधातुकमपिदितिनित्यङित्वाभ्युपगमात् ॥ तत्रऊर्णवितेत्यादावभावांशस्य स्थितत्वाद्भावांशमात्रपरता ॥ विभाषाश्वेरित्युभयत्रविभाषायंतुयदिविधिमुखेनप्रवृत्तिस्तर्हिपित्स्वेवविकल्पःस्यात् ॥ कित्सुतुयजादित्वान्नित्यमेवस्यात् ॥ अथप्रतिषेधमुखेनप्रवृत्तिस्तर्हिकित्स्वेवविकल्पःस्यान्नतुपित्सु ॥ नचपित्सुविधिमुखेनकित्सुनिषेधमुखेनेत्युभयथापिप्रवृत्तिरस्त्विति वाच्यम् ॥ वैरूप्यलक्षणवाक्यभेदापत्तेःसंज्ञाकरणेतुसतिश्रुतक्रमानुरोधेननेतिनिषेधःप्रथमंकित्सुप्रवर्त्ततेततःकिदकिद्रूपेसर्वस्मिन्लिटिएकरूप्यंप्रापितेसतिपक्षेभवतीत्येकरूप्येणविधिमुखेनैवविकल्पःप्रवर्तते ॥ आकृतौपदार्थसमुदायेसकृल्लक्षणंप्रवर्त्ततइतिन्यायेनेदंसूत्रमारभ्यते ॥ यदातुप्रतिलक्ष्यंविभाषाश्वेरित्येतद्विद्यते ॥ तदाकचिद्विधिमुखेनकचिन्निषेधमुखेनप्रवृत्तेःसंभवान्नेदंसूत्रमारंभणीयम् ॥ तथाचवार्तिकं ॥ अशिष्योवाविदितत्वादिति ॥ वक्ष्यतस्त्वाकृतिपक्षेपिप्रदेशोश्वेवनवाश्वेरित्यादिघटिस्त्वेदंसूत्रंमत्याख्यातुंशक्यंतयुक्तंचैतत् ॥ अन्यथान्यार्थमप्यारब्धंसंज्ञाविभाषोर्णोरित्यत्रप्रवर्त्तेत ॥ प्रतिषेधाश्चबलीयांसोभवंतीतिऔर्णवीत्यत्रापिसार्वधातुकमपिदित्यस्यनिषेधस्ततोविकल्पश्चस्यात् ॥ नन्वारभ्यमाणेसूत्रेनवेत्यखंडतयातस्यार्थोनिषेधएवसंज्ञीकिंनस्यादितिचेन्न ॥ तथासतिनबहुवीह्यावित्यनेनैवसिद्धौविभाषाद्विकसमासदित्यस्यवैयर्थ्यापत्तेः ॥ इतीतिकिम् ॥ द्युसंज्ञावत्स्वरूपमितिकथनाच्छब्दस्यसंज्ञामाभूत् ॥ तथाहिसतिविभाषाश्वेरित्यस्यनवाशब्दःश्रूयतेरादेशइत्यर्थःस्यात् इतिशब्देतुसत्यर्थःसंज्ञीतिलभ्यते ॥ तथाहि ॥ लोकेत्यर्थप्रधानःशब्दःगौरित्ययमाहेत्यादौतुशब्दस्वरूपपरःसंपद्यते ॥ व्याकरणेतुस्वंरूपमितिपरिभाषणात्स्वरूपपरत्वंऔर्णवीत्यादिशब्दसमभिव्याहारेत्वर्थपरतेतिविशेषः ॥ अर्थस्यैवसंज्ञात्वमपिनतुविभाषाशब्दस्येत्युक्तं ॥ तेनह्रस्वोन्यतरस्यामित्यादावपिवै

रूप्योद्धारो बोध्यः॥ एतत्प्रसंगेनत्रिविधा अपिविभाषाः प्रायेणभाष्येविवेचिताः॥ तत्राप्राप्तविभाषामध्येग्रोयङि. अचिविभाषेतिपठित्वा॥ अत्रवदंति॥ अप्राप्तविभाषेयमितिसत्यंकिंतुत्रिसंशयादुत्पन्नम्यप्राप्तेः प्राप्तेउभयत्रवेत्येवंरूपकोटित्रयप्रकारकसंशयविषयी भूतानामेवव्युत्पाद्यमानत्वाद्यापिकोटित्रयस्योक्तिसंभवोवक्तव्यः॥ सचदुर्वचः॥ तथाहि॥ निजेगिल्यतइत्यत्रग्रो यङीतिनित्यंलुप्त्वंविभाषाप्राप्तस्तत्रप्राप्तिरेवनास्तिगिलतिगिरतिइत्यादौतुविभाषा॥ग्रो यङीत्यस्यतुप्राप्तिरेवनास्तितत्कुतःप्राप्तविभाषापक्षः॥ अथोच्येत॥ अचिविभाषेत्यत्रयङीत्यनुवर्त्ययङ्निमित्तस्यरेफस्याचिअनंतरेबालत्वमितिव्याख्यानादस्त्येवोक्तिसंभवइतितन्न॥ निजेगिरयअच्इतिस्थितेहिग्रोयङीतिप्राप्नोति॥ नचास्यामवस्थायांविभाषायाः प्राप्तिः॥ अचूपरत्वाभावात्॥ अथब्रूषेविभाषारेफस्यार्थ्याद्यङ्लुकः पूर्वंग्रोयङीतिनभवतीतिएवमप्युभयत्रविभाषात्वंदुर्लभमेव। गिरतिगिलतीत्यादौविभाषायाश्चरितार्थत्वेनयङ्लुकःप्रागेवग्रो यङीत्यस्यप्रवृत्तेरुभयोरसमानकालत्वात्॥ नचलुप्त्वस्यासिद्धतयाततः प्रागेवलुगितिवाच्यंअंतर्भूतयङपेक्षत्वेनांतरंगलुप्त्वंप्रतिबहिर्भूतस्यूमित्यणपेक्षत्वेनबहिरंगस्यलुकोसिद्धत्वात् पूर्वाभावेनपूर्वत्रासिद्धमित्यस्याप्रवृत्तेरिति॥ अत्रोच्यते॥ प्राप्तिविभाषात्वेतावत्संमनंतरोक्तरीत्यैवोक्तिसंभवः॥ उभयत्रविभाषात्वेत्वित्थं॥ अंतरंगानपीतिन्यायेनलुप्त्वात्पूर्वंलुक्॥ नचलुङ्निमित्तमजेवदुर्लभः॥ तस्यार्थीपेक्षत्वेनबहिरंगतयासिद्धत्वात्पूर्वाभावेपूर्वत्रासिद्धमित्यस्याप्रवृत्तेः॥ तथाचाचः पूर्वमेवलुप्त्वेस्यादितिवाच्यम्॥ कृतितुग्विधिग्रहणेनहिबहिरंगपरिभाषायाअनित्यत्वज्ञापनात्॥ धर्मिग्राहकप्रमाणेनलुकइवतदुपजीव्यानांसमासादीनामपिप्राबल्यसिद्धेश्च॥ ननुकृतेः चितन्निमित्तेलुकिसतिनिजेगिरअच्इतिस्थितेग्रोयङीतिनप्राप्नोतियङ्परत्वाभावात्प्रत्य

यलक्षणंतुनलुप्तमेतिनिषिद्धं॥ नत्रत्यंगस्येत्यनेनांगाधिकारोननिर्दिश्यतइतिवक्ष्यते॥ नचस्थानिवद्भावः॥ लुकालुप्तंनस्थानिवदितिनिषेधात्॥ अङ्ग्रहणलाघवाच्च॥ नथाचकथमुभयत्रविभाषेतिचेन्न॥ नथातुलोपसूत्रप्रत्याख्यानपक्षेपृथगलोपाश्रयणेनस्थानिवद्भावसंभवात्॥ नचपूर्वत्रासिद्धेनस्थानिवदितिनिषेधः॥ तस्यदोषःसंयोगादिलोपलक्षणत्वेष्विति सापवादत्वात्॥ यद्यप्यनिविभाषेत्यस्यपूर्वत्रासिद्धमितिग्रौपदीतिप्रत्यसिद्धत्वाद्दिप्रतिषेधासंभवः॥ तथाप्यसत्यामपियङीत्यस्यनिवृत्तावुपायत्रविभाषात्वंनसंभवति॥ नथाप्यधुनेतिवद्भाषवार्थमसुनेत्येववक्तव्येनसुन इत्युक्तेर्योगविभागार्थतयानयोगेयोगोसिद्धः किंतुप्रकरणेप्रकरणमितिचासिद्धत्वंनभविष्यतीत्याशयेनोभयत्रविभाषात्वेऽपिसंभवोबोद्धव्यः सिद्धांतेतुविभाषायाअसिद्धत्वादेवनित्यलत्वंसमुदायलोपकार्यादिनातुमतेअजपेक्षयांतरंगत्वान्नित्यलत्वमितिव्यवस्थितविभाषेतिवासमर्थयितव्यं॥ ॥ इतिश्रीशब्दकौस्तुभेप्रथमस्याध्यायस्यप्रथमेपादेषष्ठमाह्निकम्॥ ॥ ॥श्रीगणेशायनमः॥ इग्यणःसंप्रसारणं॥ यणःस्थानेइक्भवतीत्येवंरूपोवाक्यार्थः यण्स्थानिकइक्रूपोवर्णोऽत्रेत्युभयमप्यिसंप्रसारणसंज्ञंस्यात्॥ तत्रष्यङःसंप्रसारणंइत्यादिषुविधिप्रदेशेषुवाक्यार्थस्यग्रहणंसंप्रसारणाच्चेत्याद्यनुवादप्रदेशेषुवर्णस्येतिविवेकः॥ पूर्वसूत्रादितिशब्दानुवृत्तेर्वाक्यार्थस्यसंज्ञित्वंइतिलभ्यते॥ तत्रत्याख्यानपक्षेतुवाक्यमेवसंज्ञि॥ नचएवंतर्हिविधेयंस्यादितिवाच्यम्॥ वादऊढंसंप्रसारणमितिसामानाधिकरण्यबलेनतदुपस्थापितार्थस्यैवविधेयत्वनिर्णयात्॥ नचएवमपिष्यङःसंप्रसारणमित्यादौदोषतादवस्थ्यं॥ सामान्यापेक्षज्ञापकाश्रयणात्॥ नन्वेवमपितथापिवाक्यतदर्थयोरन्यतरस्यसंज्ञित्वेअस्तुवर्णस्यतुकथंइतिचेत्॥ नत्रारब्त्येकशेषाणामन्यतमाश्रयणेनार्थद्वयाभ्युपगमादित्येवेहि। अत्रचविधेयानुवाद्यसमर्पकवि

भक्त्या सूत्रेनिर्देशएवलिंगं॥ आहच॥ विभक्तिविशेषनिर्देशस्तज्ञापकउभयसंज्ञात्वस्येति॥ उभयोःसंज्ञेतिषष्ठीतत्पुरुषः॥ भर्तृहरिश्चाह॥ संप्रसारणसंज्ञायांलिंगाभ्यांवर्णवाक्ययोः॥ प्रविभागस्तथासूत्रएकस्मिन्नेवजायते॥ तथाद्विर्वचनेचीतितंत्रोपायादिलक्षणः॥ एकशेषेण निर्देशोभाष्यएवसमर्थित इति। तंत्रंचशब्दनंत्रमर्थतंत्रंवेतिमतभेदेनव्यवस्थाबोद्व्या॥ अर्थभेदाच्छब्दभेदेआद्यःपक्षःशब्दैक्येहितीयः॥ आद्येपिव्यंजकद्वतिमात्रभेदेव्यंग्यैक्येआवृत्तिरेवेत्यादिबोध्यं। एवंचतंत्रत्वमेकरूप्येणभवेत्तुल्योपकारतः। उपकारान्यथात्वेतुभवेदावृत्तिलक्षणमितिमीमांसकमर्याद्यानुरोधोवैयाकरणेनकर्त्तव्यः। तस्याभाष्यादिसकलवैयाकरणग्रंथविरुद्धत्वात् मूलयुक्तिशून्यतया दुरुपपादत्वाच्चेतिदिक्। अत्रहावाक्यार्थएवसंज्ञी अनुवादेतुतन्निवृत्तोवर्णोलक्ष्यते। संप्रसारणाज्ज्ञातःसंप्रसारमिति। अथवावर्णएव संज्ञी। विधिप्रदेशेषुतुसूत्रशाटकवद्भाविसंज्ञाश्रयणीयेति। सर्वेष्येतेपक्षाभाष्येस्थिताः॥ स्यादेतत्॥ अदुहितरामित्यत्रलकारस्ययणःस्थानेउत्तमपुरुषैकवचनमिट्॥ तस्यचसंप्रसारणसंज्ञायांसत्यांहलइतिदीर्घःस्यात्॥ तरपप्रतिरूढंतस्यागत्वादिति। अत्राहुः॥ संख्याज्ञानुदेशाद्यकारस्थानिकस्यैवइकारस्यसंज्ञा। नतुलकारस्थानिकस्येति। अत्रेदमवधेयं। वाक्यार्थःसंज्ञीतिपक्षेतस्योद्देश्यविधेयसंसर्गरूपत्वेयत्रयथासंख्यपरिभाषोपस्थितौयणःस्थानेइक्स्याद्यथासंख्यमित्यवांतरवाक्यार्थः सोयंसंप्रसारणसंज्ञःस्यादितिमहावाक्यार्थः। नचावांतरवाक्यार्थेगृहीत्वायातिवातिद्रातीत्यादावतिप्रसंगः। तस्यसंज्ञासंबंधमात्रफलत्वात्। अन्यथाष्यडःसंप्रसारणमित्यादेर्वैयर्थ्यापत्तेः अतोनोक्तदोषः। अदुहीत्यादेस्तज्ज्ञत्वाभावाच्च। उभयसंज्ञात्वपक्षेपि उपस्थितत्वाद्यथासंख्यप्रवृत्तएववर्णःसंज्ञीति॥ अतोअदुहितरामित्यत्रनातिप्रसंगः॥ इदंचकर्मकर्त्तरिरूपमितिहरदत्तः। उपलक्षणंचैतत्। केवलेकर्तर्यपिसंभवात्॥ वर्णएवसंज्ञीतिपक्षेयथासं

रव्यंदुर्लभं॥ अनुवादेपरिभाषाणामनुपस्थानस्योपपादित्वात्॥ नचैवंस्थानेयोगोऽप्यस्तिन्यक्षेनल भ्येतेतिवाच्यम्॥ षष्ठीस्थानेयोगेत्यत्रानु
वर्त्तमानंतत्सूत्रव्याख्येयत्वात्॥ उक्तंहिद्वकोगुणवृद्धीतिसूत्रे॥ सिद्धंतुषष्ठ्यधिकारेवचनात्इति॥ इहैववामिह्रावलोकन्यायेनस्थाग्रह
णापकर्षोस्तु॥ यथासंख्यंतुदुर्लभमित्युक्तं॥ कथंतर्हि अदुहितरामित्यत्रनातिप्रसंगइतिचेत्॥ तंत्राहृत्याद्याश्रयणेनसंप्रसारणस्येत्यत्रत
ज्ज्ञावितग्रहणात्॥ यद्वा॥ कार्यकालपक्षेयणःस्थानेसंप्रसारणमिग्भवतीतिवाक्यार्थादनुवादतैवनास्तितत्रपरिभाषोपस्थितौसत्यांय
थासंख्यपरत्वएवसंज्ञी॥ सएवसंप्र—सारणस्येत्यादौउपतिष्ठते॥ अथवास्थानक्रमेणसंबोधोलौकिकन्यायसिद्धत्वादनुवादेसिद्धल
भः॥ यथासंख्यसूत्रपरंनप्रवर्त्ततामितिदिक्॥ युभ्यामित्यत्रहलइतिदीर्घेन॥ दिवउत्इतितपरकरणात्॥ अतएवद्युलोकइत्यत्रसंप्र
सारणस्येतिदीर्घेन॥ ननुएवंभाव्यमानोप्युकारादेशःसवर्णान्नृह्णातीत्यर्थंज्ञापकतयाकथंअस्योपन्यासइतिचेत्न॥ तस्यवाक्यार्थः
संज्ञीतिपक्षेणोक्त्वात्तत्रसंप्रसारणास्येत्यत्रतज्ज्ञावितग्रहणाद्वा॥ पक्षांतरेतुऋतउत्इतिज्ञापकंवोह्यं॥ ननुएवंअक्षद्युवौअक्षद्युवः
इत्यादौऊठःसंप्रसारणसंज्ञायांसंप्रसारणाच्चेतिपूर्वरूपंस्यादितिचेन्न॥ संप्रसारणपूर्वत्वेसमानांगग्रहणस्यवार्तिककृताकृतत्वात्॥
तत्प्रत्याख्यानपक्षेतुवारणादांगबलीयइत्युवङ्भविष्यति॥ वाक्यार्थःसंज्ञीत्यादिपक्षांतरेतुपूर्वरूपप्राप्तिरेवनास्ति॥ द्यूनोजीनइत्यादौ
तुहलइतिसूत्रसामर्थ्यात्संप्रसारणनिर्वृत्तस्यादेशेपिदीर्घप्रवृत्तिः॥ वर्णसंज्ञापक्षेपिअल्विधौस्थानिवद्भावासंभवेनहलइतिसूत्रारंभसा
मर्थ्यात्संप्रसारणस्यादेशेकार्यप्रवृत्तेर्वाच्यत्वादितिदिक्॥ आद्यंतौटकितौ॥ दित्कितौयस्योक्तौतस्यक्रमादाद्यंतावयवौस्तः॥ भवित॥ या
पयति॥ उरस्तादपवादादितिन्यायेनस्थानेयोगत्वस्यापमपवादः॥ प्रत्ययःपरश्चेत्यनेनपरत्वाद्ह्यते॥ तेनचरेष्टःगापोष्टक्वीहिशाल्योर्ढक्

भक्त्यासूत्रेनिर्देशएवलिंगं॥आहच॥विभक्तिविशेषनिर्देशस्तज्ज्ञापकउभयसंज्ञात्वस्येति॥उभयोःसंज्ञेतिषष्ठीतत्पुरुषः॥भर्तृहरिश्चाह॥
संप्रसारणसंज्ञायांलिंगाभ्यांवर्णवाक्ययोः॥प्रविभागस्तथासूत्रएकस्मिन्नेकजायते॥तथाहिवर्चनेचीतितंत्रोपायादिलक्षणः॥एकशेषेण
निर्देशोभाष्यएवसमर्थित इति।तंत्रंचशब्दंतंत्रमर्थंतंत्रंवेतिमतभेदेनव्यवस्थाबोद्व्या॥अर्थभेदाच्छब्दभेदेआद्यःपक्षःशब्दैक्येहिती
यः॥आद्येपिव्यंजकइतिमात्रभेदेव्यंग्यैक्येआवृत्तिरेवेत्यादिबोध्यं।एवंचतंत्रत्वमेकरूप्येणभवेत्तुल्योपकारतः।उपकारान्यथात्वेतुभवे
दावृत्तिलक्षणमितिमीमांसकमर्यादानुरोधेवैयाकरणेनैवकर्त्तव्यः।तस्याभाष्यादिसकलवैयाकरणग्रंथविरुद्धत्वात् मूलयुक्तिशून्यतया
दुरुपपादत्वाच्चेतिदिक्॥यद्वाहवाक्यार्थएवसंज्ञी अनुवादेतुतन्निवृत्तौवर्णोलक्ष्यते।संप्रसारणाज्ज्ञातःसंप्रसारमिति। अथवावर्णएव
संज्ञी।विधिप्रदेशेषुतुसूत्रशाटकवद्व्यविसंज्ञाश्रयणीयेति।सर्वेप्येतेपक्षाभाष्येस्थिताः॥स्यादेतत्॥अदुहितरामित्यत्रलकारस्ययणःस्था
नेउत्तमपुरुषैकवचनमिट्॥तस्यचसंप्रसारणसंज्ञायांसत्यांहलइतिदीर्घःस्यात्॥तरपंप्रतिलडंतस्यागत्वादिति।अत्राहुः॥संख्याज्ञानुदे
शाद्यकारस्यानिकस्यैवइकारस्यसंज्ञा।नतुलकारस्यानिकस्येति।अत्रेदमवधेयं। वाक्यार्थःसंज्ञीतिपक्षेतस्योद्देश्यविधेयसंसर्गरूपमंगीते
त्रयथासंख्यपरिभाषोपस्थितौयणःस्थानेइक्स्याद्यथासंख्यमित्यवांतरवाक्यार्थः सोयंसंप्रसारणसंज्ञःस्यादितिमहावाक्यार्थः।नचावां
तरवाक्यार्थेगृहीत्वापातिवातिद्रातीत्यादावतिप्रसंगः।तस्यसंज्ञासंबंधमात्रफलत्वात्।अन्यथाष्यडःसंप्रसारणमित्यादेर्वैयर्थ्यापत्तेः अतोनोक्तदोषः।अदुहीत्यादेस्तज्ज्ञत्वाभावाच्च।उभयसंज्ञात्वपक्षेपि उपस्थितत्वाद्यथासंख्यप्रवृत्तएववर्णःसंज्ञीति॥अतोअदुहि
तरामित्यत्रनातिप्रसंगः॥इदंचकर्मकर्त्तरिरूपमितिहरदत्तः।।उपलक्षणंचैतत्।केवलेकर्तर्यपिसंभवात्॥वर्णएवसंज्ञीतिपक्षेयथासं॰

रव्यं दुर्लभं॥ अनुवादेपरिभाषाणामनुपस्थानस्योपपादित्वात्॥ नचैवंस्थानेयोगोऽप्यस्मिन्यक्षेनलभ्येतेतिवाच्यम्॥ षष्ठीस्थानेयोगेत्यत्रानुवर्त्यमानत्सूत्रव्याख्येयत्वात्॥ उक्तंहिदृकोगुणवृद्धीतिसूत्रे॥ सिद्धंतुषष्ठ्यधिकारेवचनात्इति॥ इहैववासिद्धावलोकन्यायेनस्थाग्रहणापकर्षोस्तु॥ यथासंख्यंतुदुर्लभमित्युक्तं॥ कथंतर्हि अदुहितरामित्यत्रनातिप्रसंगइतिचेत्॥ तंत्रादत्याद्याश्रयणेनसंप्रसारणस्येत्यत्रतज्ज्ञावितग्रहणात्॥ यद्वा॥ कार्यकालएक्षेयणःस्थानेसंप्रसारणमिग्भवतीतिवाक्यार्थादनुवादतेवनास्तितत्रपरिभाषोपस्थितौसत्यांयथासंख्यप्रवृत्तएवसंज्ञी॥ सएवसंप्र—सारणस्येत्यादौउपतिष्ठते॥ अथवास्थानक्रमेणसंबोधोलौकिकन्यायसिद्धत्वादनुवादेसमुल्भः॥ यथासंख्यसूत्रपरंनप्रवर्त्तनामितिदिक्॥ द्युभ्यामित्यत्रहलइतिदीर्घेन॥ दिवउत्इतितपरकरणात्॥ अतएवद्युलोकइत्यत्रसंप्रसारणस्येतिदीर्घेन॥ ननुएवंभाव्यमानोप्युकारादेशःसवर्णान्गृह्णातीत्यर्थज्ञापकतयाकथंअस्योपन्यासइतिचेत्न॥ तस्यवाक्यार्थःसंज्ञीतिपक्षेणोक्त्वात्तत्संप्रसारणास्येत्यत्रतज्ज्ञावितग्रहणाद्वा॥ पक्षांतरेतुऋतउत्इतिज्ञापकंवोह्यव्यं॥ ननुएवंअक्षद्युवीअक्षद्युवइत्यादौऊठःसंप्रसारणसंज्ञायांसंप्रसारणाच्चेतिपूर्वरूपंस्यादितिचेन्न॥ संप्रसारणपूर्वत्वेसमानांगग्रहणस्यवार्तिककृताकृतत्वात्॥ तत्प्रत्याख्यानपक्षेतुवारणादांगबलीयइत्युवङ्भविष्यति॥ वाक्यार्थःसंज्ञीत्यादिपक्षांतरेतुपूर्वरूपप्राप्तिरेवनास्ति॥ द्यूतोजीनइत्यादौतुहलइतिसूत्रसामर्थ्यात्संप्रसारणनिर्वृत्तस्यादेशेपिदीर्घप्रवृत्तिः॥ वर्णसंज्ञापक्षेपिअल्विधौस्थानिवद्भावासंभवेनहलइतिसूत्रारंभसामर्थ्यात्संप्रसारणस्यादेशेकार्यप्रवृत्तेर्वाच्यत्वादितिदिक्॥ आद्यंतौटकितौ॥ टित्कितौयस्योक्तौतस्यक्रमादाद्यंताववयवौस्तः॥ भवित॥ यायपयति॥ उरस्तादपवादादितिन्यायेनस्थानेयोगत्वस्यापमपवादः॥ प्रत्ययःपरश्चेत्यनेनपरत्वाद्ध्यते॥ तेनचरेष्टगापोष्टक्वीहिशाल्योढक्

इत्यादयः परएवभवंति॥परेणपरिभाषाप्रकरणेनसाहचर्यात्परिभाषेयं॥भाष्येतुसंज्ञापक्षोपिस्थापितः॥तथाहि॥टकितावितिकर्मधा-
रयः॥इत्संज्ञकौटकारककारौआद्यंतयोःसंज्ञेस्तः॥तथाच॥इदितिबहुव्रीहिः॥इदादिर्यस्येतिविग्रहः॥तथाचस्थानेंतरतमपरिभा-
षयातव्यस्यइनव्यादेशेसिद्धमिष्टं॥एवंपापयतीत्यत्रयातेर्पीप्आदेशःप्रकृत्यस्येतिव्यानाद्॥नचैवमाद्यंतौटकौइत्येवास्तुइतिवाच्यं
॥आलजाटचौठस्येकइत्यादावपिटकयोराद्यंतसंज्ञात्वप्रसंगात्॥इत्संज्ञकत्वेनतुदेशविशेषोलभ्यते॥तेनइत्संज्ञकस्ययोदेशःतत्रा
वस्थितौटकौसंज्ञेस्तः॥नंचाटचष्टकारइकादेशस्यककारश्चनष्टेतिनोक्तदोषः॥नन्वस्मिन्यसेलुङ्लङ्लृङ्क्षुइत्यादिनाभूइत्यादेशःस्या
त्सचोदात्तःप्रसज्येत॥वैषदोषः॥अंःइउदात्तश्चयस्येतित्रिपदबहुव्रीह्याश्रयणात्॥विशेषणस्यापिउदात्तस्यसौत्रःपरनिपातःतेनउदा
त्ताकारादिरादेशइतिसिद्धंनचैवमपिआडजादीनामित्यत्रदोषतादवस्थ्यं॥अनुवृत्तेनोदात्तशब्देनसहश्रूयमाणस्यबहुव्रीह्यसंभवात्
इतिवाच्यं॥आडजादीनामितिसूत्रस्यप्रत्याख्यास्यमानत्वात्।वक्ष्यतिहिअजादीनामटासिद्धमित्यादि॥मिदचोंत्यात्परःसन्निविष्टोअंत्य
मध्येअंत्योयोचृतस्मात्परोमित्स्यात्सचपूर्वान्तःस्थानेयोगस्यपरश्चेतिपरत्वस्यचापवादः॥वनानि॥यशांसि॥रुणद्धि॥ननुपूर्वयोगव
दयमपिपुरस्तादपवादन्यायेनस्थानियोगमात्रस्यापवादोस्तुनतुप्रत्ययःपरश्चेत्यस्यापीतिचेत्॥बाध्यसामान्यचिंतायामाश्रित्यस्वविषयेश
संसर्वबाध्यतइतिइहाभ्युपगमात्॥अन्यथाश्रमोमित्करणंअनर्थकंस्यात्॥नचश्रवणार्थएवश्रमोमकारइतिवाच्यं॥तृणद्धीतिनिर्देशात्
॥अचइतिजात्यभिप्रायेणैकवचनं॥निर्द्धारणेषष्ठी॥नचअंत्यादित्यनेनसामानाधिकरण्यादचइतिपंचम्येवास्तामितिवाच्यं॥शेमुचादीना ण्म-
मित्यादौअंत्यस्याचोसंभवेनैतत्परिभाषायाअप्रवृत्तौअलोंत्यपरिभाषाप्रसंगात्॥तथाचमित्करणवैयर्थापत्तेःपूर्वसूत्रेआद्यंतावितिसमा १०२

सनिर्देशोपि दृहभंतग्रहणमात्रमनुवर्त्तते॥एकदेशएवस्वरितत्वप्रतिज्ञानात्।तेनमित्यूवौतः॥यदितुअभक्तःस्यात्तदाताप्रिंडानामित्या
दौशेश्छंदसिबहुलमितिशेर्लोपेकृतेनलोपोनस्यात्॥प्रातिपदिकांतत्वाभावात्॥तथावहंलिहइत्यत्रवहाभ्रेलिहइतिखशिअरुर्द्विषद
जंतस्येतिमुमिमोनुस्वारइत्यनुस्वारोनस्यात्॥अपदांतत्वात्॥यदितुआदियहणमनुवर्त्तयेत्तदाखरिणेइत्यादौघेर्ङितीति
गुणःस्यात्॥वहंस्निहइत्यनुस्वारोनस्यात्॥अतिशयिनःसखायेषांतान्यतिसखीनिब्राह्मणकुलानीत्यत्रसख्युरसबुद्धाविनिणित्वप्रयु
क्तावृद्धिःप्राप्नोति॥साहिगौणत्वेपीष्यते॥अस्थ्याद्यनङुत्॥एतच्चदृहसूत्रेभाष्यकैयटयोःस्फुटं॥तस्मात्यूवौतपक्षएवस्थितः॥अभक्ष्यन्ति
कं॥अंत्यात्पूर्वीमसजेरनुषंगसंयोगादिलोपार्थं॥मग्नःमग्नवान्॥ओदितश्चेतिनिष्ठानत्वंतस्यासिद्धत्वात्कुत्वं॥मस्जिनशोर्झलीतिनुम्
सचपदांताद्यःपरःस्यात्तदाअनिदितामित्यनुषंगलोपोनस्यात्॥उपधाभूतस्यनकारस्यानुषंगइतिप्राचांसंज्ञा॥अथस्कोरितिसलोपेकृते
नकारउपधात्वाल्लुप्यनामितिचेत्न॥नस्लोपं प्रतिस्कोरितिलोपस्यासिद्धत्वात्॥बहूनांसमवायेसमुदायस्येवसंयोगसंज्ञेतिपक्षेसलोपस्यो
प्रसेश्च।तथाचमङ्क्तामङ्क्तव्यंइत्याद्यपिप्रयोजनंबोध्यम्॥भर्जिमर्च्योश्च॥अंत्यात्पूर्वोमित् इत्यनुवर्त्तते॥भृजीभर्जने॥अस्माद्दोणादि
केअचिकृतेऊमागमः॥भर्ज्जूजा॥मर्चश्च्व्यर्थेचुरादिकः॥अस्मादचइत्यौणादिकःइप्रत्ययःईमागमः॥निपातनान्सिद्धंभरूजाश
ब्दोहिअंगुल्यादिषुपठ्यतेमरीचिशब्दोबाह्वादिषु॥उणादिषुनुमृकणिभ्यामीचिरितिईचिप्रत्ययंकृत्वामरीचिशब्दोव्युत्पादितः॥नदु
पायंतरंबोध्यं॥एचइग्घ्रस्वादेशे॥आदिर्ञमानेषुहस्वेषुमध्येएचइगेवस्यात्॥हेशब्दमतिक्रांतंकुलं अतिहिकुलं॥चित्रगुः अतिरि
अतिनु।यदत्रवक्तव्यंनदेओड्सूत्रएवोक्तं॥षष्ठीस्थानेयोगा॥अनेकसंबंधपरतयासंभाव्यमानाषष्ठीस्थानप्रयुक्तसंबंधपरेतिबोध्यम्

अस्तेर्भूः॥अस्तेःसमीपोअनंतरोवेतिसंशयेतत्स्थानेउच्चारणीयइत्यर्थः॥स्थानंप्रसंगःदर्भाणांस्थानेशरैःप्रस्तरितव्यमितिवत्॥तथाचैगुः
च्चारणेप्रसक्तेयणुच्चारणीयः॥इत्याद्यर्थपर्यवसानेसामीप्यादयःसंबंधाअर्थाद्यावृत्ताः॥योगःसंबंधः॥सबहुविधोस्त्यस्यादितियोगा॥
अर्शआदित्वान्मत्वर्थीयोच्॥सचभूम्नि॥अन्यथाविशेषणवैयर्थ्यापत्तेः॥तेनानेकसंबंधपरतयासंभाव्यमानेत्यर्थोलभ्यते॥अयोगेति
वाछेदः॥अनिश्चितयोगविशेषइत्यर्थः॥योगेत्ययोगेतिवाकिं॥ऊदुपधायागोहः॥शासइदङ्हलोरित्यादौगोहःशासइत्यत्रमाभूत्॥स
न्निहितत्वापिस्थानेयोगत्वे॥गोहिशासोःस्थानेधातुमात्रस्योपधायाश्चऊदितौस्यातामितिदिक्॥यद्वा॥स्थानेयोगेयस्येतिबहुव्रीहिः
॥अतएवनिपा[illegible]तनात्समस्याअलुक्॥यद्वा॥स्थानेनयोगोस्यादितिविग्रहः॥निपातनादेत्वं॥नचअनयोःपक्षयोगेहिःशासइत्या
दौअतिप्रसंगः॥परिभाषाणामनियमेनियंतुंप्रवृत्तेः॥युक्तंचैतत्॥आकांक्षापूर्वकत्वात्संबंधस्येहचोपधासन्निधानेनावयवषष्ठीत्वेनि
र्णीतेआकांक्षाविच्छेदात्॥लोकेपिहिपंथानंपृच्छन्तंप्रतिअमुष्मिन्नवकाशेदक्षिणोग्रहीतव्यः॥अमुष्मिन्नुत्तरइत्यादौउपदिष्टेमध्येच
मार्गद्वैधात्संशयःतत्रैवतदुपतिष्ठते॥नत्वसंदिग्धेतिर्यक्पथेपीतिदिक्॥भाष्यकारास्त्वाहुः॥अस्तेर्भूरित्यादौअनेकसंबंधप्रसंगेपिसैरि
ष्यानुरोधादन्तरंगत्वात्स्थानिवदादेशइतिज्ञापकाच्चस्थानेयोगनैवव्याख्यास्यते॥तस्मान्नायमेतस्यसूत्रस्यसूत्रार्थः॥किंतुषष्ठ्यंतमु
च्चार्यमाणमेवस्थानेनयुज्येतेनतुप्रतीयमानंइतिसूत्रार्थः॥तदेतदुच्यतेनिर्दिश्यमानस्यादेशाभवंतीति॥तेनपादःपदित्यस्यायमर्थः पा
दशब्दांतंयदंगंतदवयवस्यपाच्छब्दस्यसर्वस्यपदादेशइति॥अलोंत्यस्यादेःपरस्येतितुयोगौआरंभसामर्थ्यादस्यबाधकौ॥अनेकाल्शि
त्सर्वस्येत्यनेनतुसहाविरोधादस्यसमुच्चयेनप्रवृत्तिरिति॥एवंस्थितेतेत्राद्याश्रयणेनप्रागुक्तोपिसूत्रार्थःसुवचः॥फलंतुस्फुटप्रति प

न्तिरितिदिक्॥स्थानेनंतरतमः॥प्राप्यमाणानांमध्येसदृशतमआदेशःस्यात्॥सादृश्यंचचतुर्धा॥स्थानतोऽर्थतोगुणतःप्रमाणतश्चेति॥
स्थानतोयथा॥सुध्युपास्यः॥मध्वरिः॥धात्रंशःलाकृतिः॥यत्तुयथासंख्यसूत्रेणेवेहान्यथासिद्धिरित्युक्तंभाष्यादौ॥तदभ्युच्चयमात्रं॥
अर्थतःसाम्यविवक्षायांयथासंख्यालाभात्॥इकोहिषट्षष्टिःयणस्तुसमेतिवैषम्यात्॥अथैकशब्दाद्यणशब्दाच्चप्रथमंचतुर्णांचतुर्णांमुप
स्थितेरस्त्येवसाम्यमितिचेन्नार्हिसुध्युपास्येतिदीर्घस्यकथंयणादेशः॥इकारेणग्रहणादितिचेन्नहितृतीयेनऋकारेणचतुर्थेनऌकारेणपर
स्परस्यग्रहणाल्लाकृतौरेफप्रसंगः॥धात्रंशेचलकारप्रसंगः॥यवौचसानुनासिकनिरनुनासिकौनव्यतिषेयातामितिदिक्॥देत्यारिःश्रीप्र
दत्याद्यपीहोदाहरणं॥अर्थतोयथा॥वातंड्यायुवतिः॥वतंडशब्दादृतंडाच्चेत्यपत्येयञ्॥तस्यलुक्स्त्रियामितिलुक्॥शार्ङ्गरवाद्यित्वान्ङीष्
न्॥वतंडीचासौयुवतिश्चेतिविग्रहेपोटायुवतीत्यादिनासमासः॥पुंवत्कर्मधारयेत्यतिदिश्यमानःपुंशब्दोवतंडापत्यवाचिनोवतंडीशब्द
स्यतदपत्यवाचीवातंड्यशब्दोभवति॥गुणतोयथा॥पाकस्त्यागःचजोःकुघिण्ण्यतोरितिचकारस्याल्पप्राणस्याघोषस्यतादृशएवककार
जकारस्यतुघोषस्याल्पप्राणस्यनादवतः स्थानेतादृगेवगकारः॥प्रमाणतोयथा॥अमुंअमूअमून्॥अदसोसेरित्यनेनह्रस्वस्यह्रस्वोदी
र्घस्यदीर्घउकारः॥इहेस्थानइत्यनुवर्तमानेपुनःस्थानेग्रहणादन्योपिवाक्यार्थःसंमतः॥तालव्यादिरूपेस्थानेयोंतरतमस्तत्प्रयुक्तान्तर्यदा
नितियावत्॥सप्राप्यमाणानांमध्येस्यादिति॥तदुक्तं॥यत्रानेकविधमान्तर्यंतत्रस्थानन्तआंतर्यवलीयइति॥तेनचेतास्तोताइत्यादौ
प्रमाणतआंतर्यवानपिअकारोनभवति॥वाक्यभेदेत्वतमग्रहणमेवलिंगं॥एकस्मिन्नेववाक्यार्थेसंमतेहिस्थानेंतरइत्येवब्रूयात्॥
सिद्धांतेतुवाग्वरिःइत्यादौसोष्मणःसोष्माणइतिद्वितीयाःप्रसक्ताः॥नादवतोनादवंतइतितृतीयाःप्रसक्ताःतमग्रहणात्तुचतुर्थाभवंति

॥नेहसोष्माणोनादवंतश्च॥ऊष्माऊष्मत्वंवर्णधर्मतत्सहिताःसोष्माणः॥तथाचवक्ष्यतिनांप्रातिशाख्यं॥वर्गेवर्गेचप्रथमावघोषेषुपूर्वौ
सोष्माणावनुनासिकोन्त्यः इति॥शादयऊष्माणःसस्थानेनहितीयाहकारेणचतुर्थाइतिशिक्षा॥इहत्रीणिवाक्यानिऊष्मशब्दश्चधर्मिवचन
॥शषसहाऊष्माणइतिप्रथमवाक्यार्थः॥सस्थानेनेति॥इत्थंभूतलक्षणेतृतीयाहशषसाः॥क्रमेणवक्ष्ठथानांहितीयानांसस्थानाः॥
यथाहादयउष्माणस्तथैवखादयोपीत्यर्थः॥फकारस्यतुयद्यपिसस्थानऊष्मानास्तितथापितस्यविशिष्यैवऊष्मत्वंबोध्यम्॥हकारे
णत्रतुर्थाइति॥यथाहकारऊष्माएवंनेपीत्यर्थः॥नन्वेवमिष्टउपइत्यादौ अंतर्यादर्धमात्रस्यणःस्थानेअर्द्धमात्रःइक्स्यात्॥द
ध्यत्र॥सुध्युपास्यइत्यादौतुमात्रिकहिमात्रिकयोरिकोस्तथाविधएवयणस्यादितिचेन्न।अर्द्धमात्रस्येकोमात्रिकहिमात्रिकव्यंजनस्य
चलोकवेदयोरप्रसिद्धत्वात्॥पोस्तिसएवभविष्यति॥इहभाष्येअंतरतमइतिसप्तम्यंतपाठोप्युपन्यस्यदूषितः॥तथाहि॥अंतरतमउ
रणंपरइतिसंहितयानावत्सूत्रकृदपाठीत्॥पदकारास्तुव्याख्यातारः॥तत्रसप्तम्यंतमपिशक्यंछेत्तुं॥षष्ठीतिचानुवर्त्तते॥अंतरतमस्येत्य
निनिषष्ठीउपसंहर्त्तव्येतिसूत्रार्थः॥एवंचाकःसवर्णेदीर्घइतिअत्रविधेयस्यदीर्घस्यांतरतमेस्थानिनिअकइतिषष्ठ्याउपसंहारात्सिद्धमि
ष्टम्॥तथावांतोपिप्रत्ययइत्यत्रएचइत्यनुवृत्तायाःषष्ठ्यावांतादेशस्यांतरतमयोरेदौतोरुपसंहारात्सिद्धम्॥ अन्यथाएजमात्रस्यवांता
देशः॥अत्रेदंदूषणं॥इकोयणचीतियण्ग्रहणानामेवस्यान्नतुदीर्घाणां॥अर्द्धमात्रस्यहिमात्रिकःसन्निकृष्टइतिषष्ठ्याउपसंहारात्॥त
थाइकोगुणवृद्धीअचोञ्णितिइतिषष्ठ्योर्गुणवृद्धोः अंतरतमेष्वेवदृश्यंतइत्युपसंहारात्॥नेतालवितात्रायकोत्रावकइत्यादावेवस्यात्
॥चेतास्तोतात्रायकः स्तावकइत्यादौतुनस्यादितिदिक्॥तदेवंसप्तम्यंतपक्षस्यदुष्टत्वात्सुथमांतपक्षएवयुक्तइतिस्थितं॥स्यादेतत्॥

एवंसतिएच्मात्रस्यवांतादेशः स्यादितिचेत्॥ अत्राहुः। पूर्वसूत्रेतावद्यथासंख्यंप्रवृत्तं॥ अंतरतमपरिभाषावा॥ अर्थोधिकारश्चेहाश्रीयते॥या दृशोवांतादेशःपूर्वदृष्टः ओकारस्थानिकोऽव् औकारस्थानिकश्चावृतादृशोपिप्रत्ययेभवतीतिसूत्रार्थः॥यद्वा॥वांतइतिनकरिष्यते॥ नचैवंचे यंनेयंदृत्यादावतिप्रसंगः॥ स्नभ्यजभ्याविति योगोविभज्यतेकंठतालव्यस्यचेड्वतिस्निभ्योरेवेतिनियमपरतयाव्याख्यानात्। स्निभ्योःशक्यार्थ वेतिद्वितीयसूत्रार्थः॥तेनाहोद्यर्थेतयोरपिनेतिवोध्यम्॥ नन्चेवमपिशार्ङ्गरवादिगणपठितेननृरपोर्हृद्भ्येतिसूत्रेणनरशब्दस्यनारीतिरूपं नसिद्ध्येत्॥तथाहि॥नरशब्दस्यङीनसंनियोगेनविधीयमानाहृद्भिरलोत्यस्येत्यस्यस्यात्॥ तथाचयस्येतिचेतिलोपेनत स्यानिवृत्तौहृद्भि वचनंव्यर्थंस्यात्॥ नचनृशब्दार्थेनतदितिवाच्यम्॥एवंहिसतिनुर्हृद्भ्येत्येवंब्रूयात्॥नचनरशब्देपिपरत्वाद्यस्येतिलोपेकृतेहृद्भिर्भवंतीनाना र्थिकेतिवाच्यं॥प्रत्ययसन्नियोगशिष्टत्वेनहृद्भेरंतरंगत्वात्॥ननुवचनसामर्थ्याद्ध्यालोपोबाध्यतांआहोस्वित् अंतरंगंपरिभाषांबाधित्वा परत्वाद्यस्येतिलोपेकृतेहृद्भिर्भवतु॥इतिसंशयेपरिभाषाबाधएवन्यायः तदुक्तम्॥ अंगगुणविरोधेचतादर्थ्यादिति॥किंच॥वाहऊठित्यत्रस्त्री पिनत्वेनअनुमेयायाःपरिभाषायाबाधेनोपपत्तौसाक्षाच्छ्रुतस्ययस्येतिलोपस्यबाधोनुचितः॥तथाचलोपेकृतेहृद्भिरितिसिद्धंनारीतिरूपंइतिचे त्॥सत्यंसिद्धंकिंतुसप्तम्यंतपक्षएव॥तत्रहिप्रकृतितोंतरतमनिवृत्तिरितिहृद्यांतरतमेस्थानिनिषष्ठ्याउपसंहारात्॥ अजाद्यस्यहृद्भि वति॥प्रथमांतपक्षेतुआदेशतोंतरतमनिवृत्तिरिति अलोंत्यस्येतिवचनाद्वेफस्यस्यात्॥तस्मात्सिद्धंतेनारीतिरूपंनरशब्दस्यहृद्भि ध्यंदृनिपूर्वःपसः॥अत्राहुः॥नरशब्दपाठस्यप्रत्याख्यानमेवभाष्यकृतोऽभिप्रेतंसप्तम्यंतपक्षनिराकरणभाष्येणतथैवअनुमानात्॥नचैवं न रशब्दाज्ज्ञातिलक्षणेङीपिसतिनरीतिरूपंस्यादितिवाच्यम्॥दृष्टापत्तेः॥तथाचप्रयुज्यतेकिंनरीणांनगरीणामिति॥यद्वा॥नरशब्दस्यनिपात

पुल्लिंगत्वमेवास्तु॥तथाचकानिप्रसंगः॥उक्तप्रयोगस्तुपुंयोगलक्षणेङीषि भविष्यति॥यथान्यासेपितस्यदुर्वारत्वात्॥अथवानृनरयोरि
त्यत्रानङनिवर्त्तते॥अजाद्यतष्टाविति सूत्रात्॥तच्चानुवृत्तिसामर्थ्यात्स्वस्यापरिणतंनरशब्देनसहवैयधिकरण्येनसंबध्यते॥ननुनृशब्दे
न॥असंभवात्॥तस्मात्सिद्धंनारीति॥अत्रेदंवक्तव्यं॥प्रत्याख्यातंनामनरशब्दः॥नृनरयोरितिपठतः सूत्रकृतोमतेनुकथंउक्तिसंभवः॥नच
नरीत्येवेष्टमितिवाच्यं॥तद्धिविधायकसूत्रमध्येनरशब्दपाठस्यैवकल्पापत्तेः॥अनङित्यनुवृत्यासमर्थेनमपिक्लिष्टं॥एकदेशानुवृत्तिर्विभक्तिवि
परिणामाद्याश्रयणात्॥किंचनृनरयोरितिगणपाठेपठ्यतेनत्वष्टाध्याय्यां॥गणेचअतइतिनपठितं॥तथाशार्ङरवाद्यञइत्यादिशब्देन
णसूत्रमपिदूरमागमय्यतत्रअतइत्यस्यान्वयोवाच्यः सचक्लिष्टतरइतिस्पष्टमेव॥तस्मादित्थंसमाधेयं॥नञ्इतिरांतेलुप्ताकारानुकरणं
स्यअनरः॥नुश्चनरस्येतिहूहः॥चाहृणेपाठाच्चङीन्॥यद्वास्थानेतरतमइत्यत्रतंत्रेणद्वेधाछेदःसूत्रकृतःसंमतः भाष्योक्तरीत्यालौकिकन्या
याश्रयणेनसूत्रप्रत्याख्यानपक्षेपिहिप्रकृतिनआदेशतश्चेत्युभयथाप्यंनरतमनिवृत्तिरस्त्येव॥सूत्रकृतोमतेवा चनिकीसा॥भाष्यकृत
स्तुन्यायसिद्धेत्यन्यदेतत्॥तथाच॥वांतोषि॥नृनरयोरित्यादिसर्वंसुस्थमेव॥अतएवचतुर्थेस्थानितः अंतरतमनिवृत्तिमाश्रित्यनारीतिरू
पंसाधयन्हरदत्तोपिनविरुध्येत॥इकोयणचीत्यादावतिप्रसंगः॥परमवशिष्यते॥सचल्वादिभ्यःष्वादीनांह्रस्वइत्यादिज्ञापकेनवाचनिक्या
न्यायमूलिकायावा स्थानितोंतरतमनिवृत्तिरनित्यतामाश्रित्यपरिहर्त्तव्यइतिदिक्॥सूत्रप्रत्याख्यानप्रकारस्तूच्यते॥सभायामास्यतामित्यु
क्तेहिपंडिताःपंडितैःसहसमासतेशूराःशूरैः॥कवयःकविभिःननुसंकरेण॥किंबहुनागवांसंघंप्रतिगोधावति॥अंगोष्ठानामित्यादिव्यवस्थिति
र्गस्यापिदृश्यते॥तस्मात्यथमवाक्यार्थस्यलोकतएवलाभान्नेतदर्थंसूत्रमारंभणीयम्॥एवंस्थानतोंतर्यबलीयइत्यपिलोकतएवसि

ङ्॥ तथाहि॥ भूयः सहचरितयोरश्वयोर्गवोर्वासजातीयानरसंबलनेसत्यपिरूक्षत्वपांडुत्वादिगुणसदृशानपिहित्वास्थानसाम्यपुरस्कारेणै
वपरस्परापेक्षादृश्यते॥ तदेवंलोकतःसिद्धेकिंवचनेनेति॥ उरण्रपरः। ऋवर्णस्यस्थानेयोऽणप्रसंगावस्थायामेवरप्रत्याहारपरस्स्यात्॥ ऋक्
रिणसावर्ण्यात्त्रिंशतउपस्थानेसतिस्थानेंतरतमपरिभाषयारश्रुतिमनःस्थानेरपरोलश्रुतेस्तुलपरइतिविवेक्तव्यं॥ कृष्णर्द्धिःतवल्कोरःऋ
लृस्थानेयोऽण्इतिग्रंथस्तुयथासंख्यभ्रमापादकःअसंगतश्च॥ शब्दतःसाम्येनाभिमतानिर्वाहात्॥ नहिसूत्रेशब्दद्वयमस्ति॥ अर्थतस्तुन
तरांसाम्यं॥ अथात्रनयथासंख्यमभिमतंतर्हिकिंवृत्तिमध्येहयोरेवविशिष्योल्लेखनेन॥ आचआचरलोऋलोःस्थानमितिविग्रहेउश्चउल्चऋ
लोरितिविग्रहेवाद्वंद्वस्यदुर्लभत्वाच्च॥ सहिविरूपाणामपिसमानार्थानामितिएकशेषेणबाध्यते॥ चित्रगुशब्दस्यचित्रगवीपरनायामिवसोधु
त्वनिर्वाहार्थंलक्षणामाश्रित्यलक्षितलक्षणयाशक्यार्थेपर्यवसानमितिकथंचिन्निर्वाहस्तुग्रंथेश्रद्धालुभिरास्थेयइतिदिक्॥ अत्रपक्षचतुष्ट
यंसंभाव्यते॥ उःस्थानेरपरोऽण्स्यादितिरपरत्वविशिष्टेऽण्विधीयतइतिप्रथमःपक्षः॥ उःस्थानेअणामनणांचप्रसंगेअणेवेतिनियमः॥ सं
चरपरइतिवाक्यभेदेनरपरत्वंविधीयतइतिद्वितीयःपक्षः॥ उःस्थानेयोणद्त्यनूद्यतस्यरपरत्वंविधीयतइतितृतीयः॥ प्रसंगावस्थायामेवर
परत्वंविधीयतेइतिचतुर्थः॥ तत्राद्येपक्षेनाप्राप्तेषुउदात्तादिषुविधीयमानोणतेषांबाधकःस्यात्॥ तैरनवेरुद्वस्यविषयस्याऽऽभात्॥ एवंत
द्भावचनव्यक्तिः॥ षष्ठीनिर्दिष्टमात्रस्यभवन्नादेशोंतरतमःस्यात्॥ ऋवर्णस्यतुअण्रपरइति॥ ततश्चउदात्तानुदात्तस्वरितानुनासिकेषुदोषः
॥ तथाहि॥ रुतिरित्यत्रक्तिन्नित्यादिर्नित्यमितिप्राप्तंऋकारंबाधित्वाऽण्रपरःस्यात्॥ तथाप्रकृतंप्रकृतंइत्यत्रगतिरनंतरइतिपूर्वपदप्रकृतिस्वरे
नेशेषनिघातंउदात्तानुदात्तस्येतिस्वरितंचबाधेत॥ तथाकृःपाहिइत्यत्रकृपेइतिज्ञापकात्पूर्वसवर्णदीर्घसंभवेपिअनुनासिकंबाधित्वाऽ

ण्परः स्यात्॥ किंच॥ कर्त्ताकारकदित्यत्रगुणवृद्धीबाधित्वाण्भवन्नकारएवेतिनियमाभावात् कदाचिदिकारउकारश्चस्यात्॥ अपिच॥ त्वेःमीप्रति पदोक्तारत्वोत्वारयत्रऋतइच्छतोरुदोष्यपूर्वस्येतितेषुरपरत्वंनस्यात्॥ द्वितीयेतुगुणवृद्ध्योर्नदोषः॥ अणनणोःप्रसक्तावणेवेतिनियमेनकर्त्ताकार कइत्यादिसिद्धेः॥ ननुह्रस्वेस्थानिनिसर्वावृद्धिरनंतरतमा॥ तारकइत्यादौदीर्घेतुसर्वोपिप्रमाणतोंसरतमेति अविशेषादुभयत्रापिसुकरवृद्धि प्रसंगेनियमोस्कगुणस्कृकर्त्तइत्यादौमात्रिकएवप्राप्तः॥ तरितेत्यादौद्विमात्रस्यतुद्विमात्रएडेवप्राप्तः॥ तथाचअणनणोःप्रसंगाभावेननियमाप्र वृत्तौदीर्घेषेडेवस्यात्॥ ह्रस्वेषुअकारोभवन्नपिरपरोनस्यात्॥ योहिप्रथमवाक्येनाणेवेतिनियम्यते॥ तस्यैवद्वितीयेनरपरत्वंविधीयते॥ तथा चगुणदोषोस्त्येवेतिचेत्॥ चजोःकुघिण्यतोरित्यादौसावकाशायाःस्थानेंतरपरिभाषायाः वृद्धिविधौचरितार्थयाप्युरण्रपरइत्यनयागुणप्रमे यत्वेननाध्यत्वात्॥ तस्माद्वितीयपक्षेगुणवृद्ध्योर्नकश्चिद्दोषइतिस्थितम्॥ उदात्तादिषुदोषस्तुस्यादेव॥ तथाप्रतिपदोक्तेषुइत्यादिषुअपि ॥ तृतीयेतुउदात्तादिषुनदोषः॥ तत्तद्विधिभिरंतरतमपरिभाषासंस्कृतैर्ऋवर्णस्यैवविधानात्॥ किरतीत्यादौअपिनदोषः॥ गुणवृद्ध्योस्तुदोषए व॥ तथाहि॥ आंतर्यतोमात्रिकस्यमात्रिकेगुणेरपरत्वेचकर्त्तेत्याद्यपिसिद्ध्यति॥ तथापितरितेत्यादौएडेवस्यान्नथा अविशेषाद्वृद्धित्रयेपिप्रवृ त्तेआकारस्याण्त्वाद्परत्वेकृतेकारकस्तारकइत्यादियद्यपिसिद्ध्यति तथापिकायकस्तावकइत्याद्यनिष्टमप्यापद्यते॥ यत्तु पूर्वसूत्रेभाष्यका रैरिमंपक्षमाश्रित्यसमाहितं अनोंतर्यमेवैतयोरांतर्यमिति॥ यच्चतत्रैववार्त्तिककारैरुक्तंसंप्रयोगोवानष्टाश्वदग्धरथवत्तदिति॥ तदुभयमपिपा स्पिकंबोध्यम्॥ तथाहि॥ पदात्रऋत्वजात्यवच्छिन्नस्यकोंतरतमइतिपरीक्षते॥ अत्वजात्यवच्छिन्नश्चकस्येतितदाअनुरूपप्रतिबंधेरहित्येनैव धर्मेणैतयोरांतर्यं॥ नहिआंतर्यंचतुर्दैतिमुनित्रयोक्तिरस्तिप्रत्युतसोष्मणःसोष्माणइतिभाष्यात्तृतीयेश्वअनियमएवलभ्यते॥ एवंनष्टाश्वदग्ध

र्थन्यायेपिजात्यवच्छेदेनपरीक्षायामेव॥व्यक्तिपुरस्कारेणपरीक्षायांतूक्तरीत्यादुष्टोयंपक्षः॥तथाचात्रसूत्रेवार्त्तिकं॥यउस्थानेणसपर
इतिचेद्गुणवृद्धोरवर्णाप्रतिपत्तिरिति॥किंचास्मिन्पक्षेकरेफपरत्वंक्वालकारपरत्वंइतिव्यवस्थापिदुरुपपादास्यात्॥स्वतंत्रःकर्त्तेतिनिर्दे
शान्नविनियोग्योयऊचिविभाषाइत्यारंभाच्चनविकल्पइतिसमर्थनेपिप्रतिपत्तिगौरवंस्यादेव॥रेफस्यपूर्वांततांसाधयितुमार्यंत्रावितस्मि
न्नात्समासैकदेशभूतमंतग्रहणमनुवर्त्यतस्यरपरइतिअन्यपदार्थविशेषणीभूतेनरेफान्वयश्चवाच्यइतिमहान्क्लेशः॥चेन्नार्थपक्षेतुनैतद्दूषणं
व्यतइतिवस्यामः॥तस्मान्निर्दोषत्वाच्चतुर्थपक्षएवआश्रितः॥सचेत्थमुपपादनीयः॥स्थानेशब्दहयमिहानुवर्त्ततेनत्वेकमुःस्थानेणेइत्यनु
वादेपिस्थानसंबंधलाभाय॥द्वितीयंतुप्रसंगावस्थायामेवरपरोभवतीतिकालविधानार्थं॥स्थानेतरतमसूत्रेस्थानशब्दस्यतालव्यादिपरत्वेपि
शब्दाधिकाराश्रयणात्तद्ग्रहप्रसंगपरत्वंबोध्यम्॥एवंचगुणवृद्धोःप्राप्यवस्थायामेवाणोरपरःसंपन्नइतिप्रमाणतोंतरतमावेडैःचोवाधित्वा
स्थानतोंतरतमोणेवभवतीतिनकश्चिद्दोषः॥एवंउदात्तादिविधिष्वपिअंतरतमत्वादकारोननुअइउऋऌइत्यवधेयं॥नचैवंकर्त्तेत्यादावनेक
ल्त्वात्सर्वादेशप्रसंगः॥आनुपूर्व्येणसिद्धत्वात्॥तथाहि॥ऋस्थानित्वमुपजीव्यप्रवृत्तंरपरत्वंसर्वादेशतोनापादयति॥उपजीव्यविरोधात्॥
तथाचपूर्वसूत्रेवार्त्तिकं॥सर्वादेशप्रसंगस्त्वनेकाल्त्वात्॥नह्यनेकाल्त्वस्यतदाश्रयत्वादवर्णादेशस्यविधानइति॥अणयङ्णंकिं॥रीङ्ऋ
तिङादीनांरपरत्वंमाभूत्॥मात्रीपतिस्त्रियते॥तथाढकिलोपोपिरपरःस्यात्एवंचसूत्रंवैयर्थ्यान्नोसामर्थ्यात्अल्लोंत्यविधिंबाधित्वासर्वा
देशःस्यात्॥तथाहोतापोतारौइत्यत्रानङोपिरपरत्वेसंयोगांतलोपेचकृतेतस्यासिद्धत्वान्नलोपोनस्यादितिदिक्॥अथयोरिङादिष्वण्स
रपरःकुतोनेतिचेत्॥अनादेशत्वात्॥आदेशत्वेहिसमुदायेवितिश्रांतं॥नचैवंकृष्णर्द्धिरित्यादेरपरत्वंनस्यात्पूर्वपरसमुदायस्यस्थानित्वा

दितिवाच्यम्॥ पूर्वपरयोरितिद्विवचननिर्देशेनसहितयोरवयवयोरेवस्थानिलावगमात्॥ अतएवद्वयोःस्थानिनोर्भिन्नादिषुनत्ववद्देहोवादे
शौमाभूतामितिनत्रएकग्रहणंकृतं॥ तस्मादकारस्यापिस्थानित्वंअस्त्येव॥तदुक्तं॥योर्द्वयोःस्थानेभवतिलभतेःसौभन्यतरतोप्यपदेश
मिति॥ तस्मादेकादेशेपिरपरत्वंभवतीतिस्थितम्॥ स्यादेतत्॥उक्तरीत्याऋतउदित्युकारादेशस्यापिरपरत्वस्यात्॥ तथाचविभक्तिसकार
स्यरुत्वेकृतेपूर्वस्परोरितिलोपेदुलोपइतिदीर्घेणमातृःपितॄरितिप्राप्नोतिइतिचेत्॥मैवं॥रुत्वस्यासिद्धत्वेनरात्सस्येतिसकारेलोपेरेफ
स्यविसर्गेणरूपसिद्धेः॥ नन्वेवंमातुःकायमित्यत्रषत्वंस्यात्॥ इदुदुपधस्यचाप्रत्ययस्येतिसूत्रात्॥ नचायंप्रत्ययविसर्जनीयएवेतिवाच्यं॥
अकारस्यप्रत्ययावयवत्वेप्यप्रत्ययनयातदादेशस्यसकतरामतथात्वात्॥इतिचेत्॥उच्यते॥ ऋतउदित्येकादेशस्यपरादियहणेनग्र
हणादस्तिनावत्सांनस्यप्रत्ययसंज्ञासकारेलुप्तेत्वबशिष्टस्यैवप्रत्ययसंज्ञा॥एकदेशविकृतस्योपसंख्यानात्॥ स्थानिवदादेशइत्यऋदे
शग्रहणाद्वा॥ अतएवयङोयकारेलुप्तेअकारस्यप्रत्ययसंज्ञेत्युक्तं॥तथाचाप्रत्ययस्येतिषत्वनिषेधःसिद्धः॥ नचैवंप्रत्ययावयवस्थानि
कत्वेपिप्रत्ययस्थानिकत्वाभावात्षत्वंस्यादेवेतिवाच्यं॥अप्रत्ययस्येत्यनुवादेपरिभाषानुपस्थानेनस्थानेयोगस्यदुर्लभत्वात्॥अवय
वावयविभावस्यषष्ठ्यर्थत्वस्यसंभवात्॥ नन्वप्रत्ययस्येतिपर्युदासः तथाचर्वीतत्वेनैकादेशग्रहणात्षत्वंस्यादेव॥किंच॥ प्रसज्यप्रतिषे
धपक्षेपिसंभवतिसामानाधिकरण्येवैयधिकरण्यस्यान्याय्यत्वात् अप्रत्ययोयोविसर्गस्तस्यषत्वंस्यादितिवाक्यार्थः॥ तथाचाग्निःकरोति
इत्यादौस्थानिवद्भावेनविसर्गस्यप्रत्ययत्वान्नाभूत्षत्वं॥मातुःकार्यइत्यादौतुस्यादेवेतिचेत्॥इहेदंतत्वं॥कस्कादिषुभ्रातुष्पुत्रशब्द
स्यपाठोज्ञापकः॥एकादेशशास्त्रेणनिवृत्तात्सरस्यषत्वंनस्यादिति॥ यद्वाप्रसज्यप्रषधवैयधिकरण्यान्वयावेवज्ञाप्येते॥ यत्तुभाष्यंलुप्य

नंप्रत्ययौरात्सस्येति॥ यच्चैकेयरकृतेव्याख्यानं॥ उत्वेकृतेअवशिष्टःसकार एवप्रत्ययसंज्ञः॥सचलुप्तइतिनदुभयमपिचिंत्यम्॥इह
सिद्धंतुप्रसंगेरपरत्वादितिपक्षेपद्यप्यारादिरूपेणविधानादभक्तत्वादिशंकैवनास्तितथापिसंप्रयोगोवेतिपूर्वसूत्रोक्तरीत्यानतीयप्र
क्षमाश्रित्यभाष्येपक्षत्रयंचिंतितं॥तत्राभक्तत्वपक्षेपरादित्वपक्षेचवव्रेइत्यादौउरदत्वेरपरत्वेचकृतेहलादिशेषेणैरेफोननिवर्त्तेन॥अथ
सावयवस्यानादेर्हलएवतेननिवर्त्तनात्॥तस्मादंत्यग्रहणमनुवर्त्यपूर्वांतपक्षएवस्थापितइतिसंक्षेपः॥अलोंत्यस्य॥स्थानषष्ठीनिर्दिष्टस्य
पदुच्यतेतत्तदंत्यस्यालःस्थानेबोध्यम्॥त्यदादीनामः॥सः॥यः॥स्थानषष्ठीतिकिं॥आर्द्धधातुकस्येट्॥तच्चुकारात्सूर्योमाभूत्॥इदंच
षष्ठीस्थानेयोगेतिसूत्रस्यानुवृत्तेर्लभ्यते॥अलइतिकिंपदस्येत्यधिकृत्यविधीयमानंवसुस्मिंस्तिदंतंपरम्॥आनड्ड्यामित्यादावंत्यस्यप
दस्यमाभूत्॥एतेनअलइतिजसंतमाश्रित्यालात्मकाआदेशाअंत्यस्यस्युरितिव्याचक्षाणाःपरास्ताः॥अंत्यस्यपदस्यापिप्रसंगात्॥किंचै
वंलाघवार्थमलंत्यस्येत्येवसूत्रयेत्॥अपिच॥अरुर्मनश्चक्षुश्चेतोरहोरजसोलोपःपादशतस्यसंख्यादेरितिलोपोढकिलोपश्चसर्वादेशः
स्यात्॥ततश्चविरजीकरोतिइत्यादिनसिध्येत्॥यत्तुअलइतिजसंतमितिपक्षेअनेकाल्शित्सर्वस्येतिसूत्रेअनेकालग्रहणंनकर्त्तव्यमिति
लाघवोपवर्णनंतदपिन॥षष्ठीतिपक्षेपिडिच्चेत्यत्रडिदेवानेकालंअंत्यस्यस्यात्॥ननुअडिदयमाद्ययणेनानेकालग्रहणप्रत्याख्यानसंभवात्॥वस्तुतस्तुपक्षद्वयेपिअनेकालग्रहणंकर्त्तव्यमेव॥अन्यथा अतोभिसऐसित्यादिपंचमीनिर्देशेषुअनेकालेप्योदेशःपरस्यादेःस्यात्॥सतिअनेकालग्रहणेपरत्वात्सर्वादेशः॥अतएवतत्तस्मादित्युत्तरंस्यादेरितिनसूत्रितम्॥तथाहि॥अलोंत्यस्येत्यस्यह्यवयवादौ॥आदेःपरस्य॥अनेकालशित्सर्वस्येति॥तत्रप्रथमस्यावकाशः॥ईदासः॥बहोर्लोपइति॥आसीनःभूयात्॥द्वितीयस्यावकाशः॥

अस्तेर्भूरित्यादिः॥ अतोभिसइत्यादेः परत्वात्सर्वादेशत्वेसिद्धेभामैरित्यादिः॥ नचादेः परस्येत्यत्रालइतिजसंतमनुवर्त्त्यणमैरित्यादिर्सा
ध्रनीयमितिवाच्यम्॥ तथासतिभूयान्भूमेत्याद्यसिध्यप्रसक्तेः॥ तदेवकार्यस्यात्येत्यनुसंहारोव्याख्यातः॥ डिच्चेत्याद्यग्रि मसंदर्भानुगुण्
त्वात्॥ यद्वा॥ षष्ठ्याएवायमनुसंहारः॥ यास्थानेयोगाषष्ठीसांत्यस्यालोबोध्येति॥ अत्रपक्षेडिच्चेत्यस्यायमर्थः॥ यत्रडिःसदेशोविधीयतेत
त्रयाषष्ठीसाअंत्यस्यालइतिएवमग्रेपि॥ डिच्च॥ डिदनेकाल्त्वमपिअंत्यस्यस्यात्॥ दध्ना॥ दध्ने॥ अनन्यार्थडित्वेषुअनंडादिषुचरितार्थः
मितंतातडिःपरेणानेकालशित्सर्वस्येत्यनेनबाध्यते॥ ननूत्सर्गापवादयोरयुक्तोविप्रतिषेधइतिचेत्॥ सत्यं॥ सर्वादेशेपितातडिःगुणवृद्धि
प्रतिषेधरूपंप्रयोजनंसंभाव्यते॥ तावतात्रकिंचिद्दिलेबेनप्रवृत्तोयमपवादोप्यस्मिन्विषयेउत्सर्गेणसमकक्षतामापन्नइतियुक्तोविप्रति
षेधः॥ यद्वा॥ एरुरित्यस्यानंतरंनित्योस्तादिनिवक्तव्येडित्करणंगुणवृद्धिप्रतिषेधार्थमेवेतिविप्रतिषेधोपपत्तिः॥ अस्तुवाविनापिविप्रति
षेधंसर्वादेशः॥ प्रदर्शितस्यगुणवृद्धिप्रतिषेधार्थत्वस्यसर्वादेशता मंतरेणानुपपत्तेः॥ आदेःपरस्य॥ परस्ययद्धिधीयतेतदादेरलो
बोध्यम्॥ ईदासः॥ अत्रतस्मादित्युत्तरस्येत्युपतिष्ठते॥ तेनादेरीकारः॥ आसीनः॥ अनेकाल्शित्सर्वस्य॥ अनेकाल्आदेशःशिच्चस
र्वस्यस्यात्॥ अस्तेर्भूः॥ भविना॥ इदमइश्॥ इतः॥ डिच्चेतिनियमात्सिद्धेनेकाल्ग्रहणंअपवादविप्रतिषेधार्थमित्युक्तं॥ यत्तुवृत्तिकारैर्ज
श्शसोःशिरितिशित्उदाहरणंदत्तं॥ तच्चिंत्यं॥ सर्वादेशतांविनात्रशित्त्वस्येवालाभात्॥ सर्वादेशतायाश्चानुपूर्व्यादनेकाल्त्वेनैवणल्
ङादेशादिषिवसिद्धत्वात्॥ तथाहि॥ णल्ङाशिप्रभृतयोयदासर्वादेशास्तदाप्रत्ययसंज्ञाः॥ ततःप्रत्ययादित्वप्रयुक्तादित्संज्ञा॥ ततोलोपः राम
॥ ततएकाल्त्वसत्यपिनसर्वादेशत्वस्मृतिः॥ उपजीव्यविरोधापत्तेः॥ अतएवहिकर्तेत्यादौनसर्वादेशतेत्युक्ताशकारेणानुबंधेनदृश्य १०८

भृतीनां अनेकाल्त्वादेवसिद्धे शिद्ग्रहणं नानुबंधकृतमनेकाल्त्वं इतिज्ञापनार्थं ॥ नेनद्विवउत् अर्वणस्त्रसावित्यादेर्नसर्वादेशताइतिचो-
ध्यं ॥ ननुकथंज्ञापकता ॥ घ्वसोरेद्धावभ्यासलोपश्चेत्येतदर्थतयाशिद्ग्रहणस्यचरितार्थत्वात् ॥ तत्रहिलोपशइतिद्विद्यते ॥ संज्ञापांचरुवृं-
शित्वंतत्रानुपयुक्तंसत्संज्ञिनिफलति ॥ ङमुटिष्टित्ववदितिसिद्धांतइतिचेत् ॥ सत्यं। अनेकांताअनुबंधाइतिपक्षेनानुबंधकृतमनेका-
ल्त्वमित्यस्यप्रयोजनाभावात्तद्भिप्रायकोलोपशितिद्धेदइतिसिद्धांतः। अनेकांताइतिपक्षेतूक्तरीत्याज्ञापकमावश्यकं ॥ घ्वसोरित्यत्र
तुल्लोपइत्येवद्धेदः। लोपोपीतिप्रकृतेपुनर्लोपग्रहणसामर्थ्यात्सर्वादेशः ॥ वार्त्तिकमतेतुनानर्थकेलोंत्यविधिरित्येवसिद्धं ॥ नचानभ्या
सविकारेष्वितिपर्युदासस्यायंविषयः ॥ लोपस्यविकारत्वाभावात् ॥ रूपांतरापत्तिर्हिविकारः ॥ यथाभृञ्जामित् ॥ अर्त्तिपिपर्त्योश्चेत्यादि-
॥ अतएवपस्यशायांलोपेविकारात्पृथगुपन्यासः ॥ लोपागमवर्णविकारन्तोहिवेदंपरिपालयिष्यतीति ॥ उक्तंचपृषोदरादीनि इतिसूत्रे
केयटेन ॥ द्यौचापरोवर्णविकारनाशाविति ॥ वस्तुतस्तूपदेशावस्थायामेवांतरंगतयाइत्संज्ञा ॥ अतएवउच्चरितप्रध्वंसिनोनुबंधाःस्म
र्यमाणाःसंतएवकार्यनिर्वाहयंतीतिसिद्धांतः ॥ इदंचोत्तरसूत्रेकेयटेस्फुटं ॥ तथाचद्विवउस् अर्वणस्त्रइत्यादेरेकाल्त्वात् एकांतपक्षे-
पिनसर्वादेशताप्रसज्यते ॥ एवंचनानुबंधकृतमनेकाल्त्वं इतिज्ञापनंव्यर्थं ॥ शिद्ग्रहणंचसुतरां ॥ इदमइशइदंकिमोरीशकी इतिइशीशीस्तुच्य-
कारोच्चारणसामर्थ्यात्सर्वादेशतायाः प्राङ्नलोपः ॥ यत्तुकृतेपिसर्वादेशेप्रयोजनाभावात्शकारस्येत्संज्ञानस्यात् इतिहरदत्तेनोक्तं। तन्न। लोपस्ये
वप्रयोजनत्वात् ॥ नचैवंउच्चारणवैयर्थ्यंसर्वादेशत्वसंपादनंकृतार्थत्वादितिदिक्। तस्मादिहसूत्रभाष्यकृताभिप्रायश्चिंत्यः। इहचानेकाल्शिदिति
परिभाषांत्यस्यादेरितिचानुवर्त्त्य अनुसंहारहृयनिषेधमवस्थितिशक्यमकर्त्तुं ॥ इतिश्रीशब्दकौस्तुभेप्रथमाध्यायस्यप्रथमेपादेसप्तम्यान्हिकं ॥

॥श्रीगणेशायनमः॥स्थानिवदादेशोनल्विधौ॥आदेशःस्थानेनवत्कार्यंलभतेप्रवर्त्तयतिच॥तृतीयांताद्दृतिना स्थानिना तुल्यंवर्त्तत इति वाक्यार्थलाभात्॥यद्रूपवैकल्पादुपदेशाप्रवृत्तौसत्यामनिदेशोमृग्यतेतच्चेद्रूपंस्थान्यन्योऽसाधारणंनभवेत्॥आवधिषीष्ट॥अत्रह्यतेर्विधीयमानं आत्मनेपदमतिदेशाद्धेरपिभवति॥आङोयमहनइत्यत्रहि अल्लोपाश्रीयते॥रामायेत्यादौसुपिचेतिदीर्घेकर्त्तव्येयद्यपि यत्रादोइत्यलोपाश्रीयतेतथापिनतत्रतद्धिरहप्रत्युक्तासुपिचेत्यस्याप्रवृत्तिः॥यादेशस्ययञादित्वात्॥सुप्त्वैकल्पात्तुउपदेशास्त्वा प्रवृत्तिः॥सुप्त्वंचेहयद्यपिएइत्यस्मिन्नलिवर्त्ततेतथापिनतद्लोःसाधारणं॥भ्यामादौसमुदायेविश्रुतेः॥इदंचकायेकालपक्षाश्रयेणोक्तं॥यथोदेशपक्षेतुसुप्त्वंज्ञाप्यापिशास्त्रीयत्वात्सैवाऽनिदिश्यते॥तत्रउपदेशेनैवदीर्घइति नकिंचित्कष्टं॥एतेनाऽदितामऽदितमित्यादाविडागमोपिव्याख्यातः॥तत्रापिसार्वधातुकसंज्ञातिदेशसंभवादितिदिक्॥अत्रधात्वंगकृत्तद्धितान्ययसुप्तिङन्तपदादेशाःप्रयोजनमितिवृत्तिकृतः॥उदाहरणादिकृच्चेयं॥नतुपरिगणनमितिभ्रमितव्यं॥च्लेःसिजित्यादीनांअसंग्रहापत्तेः॥क्रमेणोदाहरणानि॥अस्तेर्भूः॥आर्द्धधातुकेविवक्षिते॥अतएवांगात्पृथक्धातूपादानं॥धातुत्वात्धातुप्रत्ययाः॥भव्यं॥केन काभ्यांवैः॥अंगत्वादिनादेशदीर्घसंभावः॥कृत्॥प्रकृत्य॥कृत्वाद्रुस्वस्यपितिकृतीतितुक्॥अद्यतनं॥तद्धितत्वान्नदंतत्वप्रयुक्तापानिपदिकसंज्ञा॥कदश्वः॥स्थानिवद्भावेनाव्ययत्वादव्ययपूर्वपदप्रकृतिस्वरइत्याहुः॥तच्चिंत्यं॥स्थानेंतरतमपरिभाषयागतार्थत्वात्॥अधोधइतितूदाहरणम्॥आष्टमिकहित्वस्यस्थानेहिवैचनरूपत्वात्संभाव्यते॥किंतुतत्रापिफलंदुर्वचं॥तस्मादधोधःकामइत्युदाहार्यं॥अतःकृकमीतिप्राप्तस्यसत्वस्याव्ययत्वात्पर्युदासः॥यत्तुवृत्तौप्रस्तुत्येत्यव्ययादेशोदाहरणं॥तच्चिन्त्यम्। क्वामात्रस्यानव्ययत्वात्॥तदंतविधेः सर्वैकवा

क्यतयासिद्धेतितत्त्वात्॥ नचजहत्स्वार्थायांवृत्तौ ह्रक आनर्थक्यात्सर्वैसर्वपदादेशाइत्यभिप्रायेणेदमितिवाच्यं॥ह्रस्वस्यपितिकृतीतिकृ
गभावापत्तेरितिदिक्॥सुपः॥रामायं॥तिङः॥अपचतां॥तिङंतत्वात्पदत्वं॥वःनः॥पदत्वाद्वुत्वादि॥नन्वेवमधोधइत्यस्यापिपदादेशस्य
देवगतार्थत्वेनेतिचेत्सत्यं॥गोबलीवर्दन्यायेनान्ययग्रहणादितिदिक्॥दृहकाभ्यामित्यादावादेशःकार्यलभतेकेनकैरित्यादौतुपरस्यैव
र्तयतीतिविवेकः॥ननुवत्करणंमास्तु॥स्थान्यादेशइत्येतावतापिअसंयोगाल्लिट्किदित्यादाविववत्यर्थलाभात्॥यदाहुः॥एत्रपरशब्दः
मपुज्यमानोविनापिवतिंवत्यर्थंगमयतीति॥नचस्थानीआदेशंप्रतिपद्यतइत्येववाक्यार्थः किंनस्यादितिवाच्यं॥तत्तदादेशविधाय
कैरेवगतार्थत्वात्॥नचादेशस्यानिरूप्यमाणत्वेनविकल्पइतिवाच्यम्॥वालिटीत्यारभात्॥नचचस्मिंडः स्यात्र
आदेशःस्थानीत्रिवत्रनहूयमाण्यात्सर्वत्रविकल्यापत्तौलिट्येवेतिनियमार्थंतत्स्यादितिवाच्यम्॥एवमपिविभाषाल्लुङ्लृङोरित्या
द्यप्राप्तविभाषासुवाग्रहणवैफल्यापत्तेः॥अस्तिभूभ्यांहूपहूयसिद्धावस्तेर्भूरित्यस्यवैयर्थ्यापत्तेश्च।अत्राहुः।वत्करणाभावेस्थानीआ
देशस्यसंज्ञास्यात्॥प्रायेणह्यस्मिन्नादेसंज्ञासूत्राण्येवारभ्यंते॥ननश्च आडोयमहनइत्यात्मनेपदंवधेरवस्यान्नतुहंतेः॥नन्वसंयो
गमितिहेतेरपिग्रहणं॥अशब्दसंज्ञेतिनिषेधात्॥नचस्थानिसंज्ञात्वेसिद्धेधर्मिणमित्यादिन्यायेनबाधः॥अनेकशक्तेःशब्दस्यसंज्ञिनि
विनियोगइतिपक्षेसंज्ञायाएवादेशकोटिनिवेशात्॥नन्वेवमाडोवधियमइत्येवब्रूयात् इतिवाच्यम्॥वधहिंसायामितिभौवादिक
स्यापिग्रहणापत्तेः॥नचाडोवधयमइतिपठ्यते॥अक्षरस्यविवक्षितत्वाच्चनभौवादिकेतिप्रसंगइतिवाच्यम्॥सकलहंत्यादेशसंज्ञा
हार्थमाडोनयमहनइत्यस्यैववाच्यत्वात्॥तथाचावधिष्टवेज्जघ्नेइत्यत्रात्मनेपदंसिद्धं॥तथाहि॥हेतेर्लिटिलसामान्यापेक्षस्यादेशस्य

गत्वात्तिवादिषुकृतेषुपरत्वनित्यत्वाभ्यांशेषात्कर्त्तरीतिबाधित्वालिटिधातोरितिहिःप्रयोगेऽभ्यासस्यचुत्वेऽभ्यासात्परस्यघत्वेएकदे
शविकारसंभवेनसमुदायस्यसमुदायादेशत्वाद्धित्यादेशत्वंततोवधिनासहतुल्ययोगक्षेमत्वेनेतिदिक्॥ अस्तुवास्थानिन आदेशःस
ज्ञा॥तथाप्यनिष्टंतुल्यमेव॥तथाहि॥ अस्यतिवक्तीत्यत्रख्याति पदेनचक्षिङेवगृह्यत॥कृत्रिमत्वात्॥तथाचसमचक्षिष्टेत्यत्राङ्स्यात्
अख्यातेत्यत्रचनस्यात्॥नचैवंचक्षिङइत्येवब्रूयात्॥अनुबंधनिर्देशेनापियङ्लुग्वारणसंभवादिहवाच्यम्॥एवमपिगांङ्कुटादिसू
त्रेगाङइङ्गाङोर्ग्रहणापत्तेः॥ इङित्यवचनसामर्थ्याच्चुभेयगतिःस्यात्॥गमेरिड्परस्मैपदेषित्यत्रतुइणिङिकामेवग्रहणंस्यात्॥
तस्मात्कर्त्तव्यमेवृवृत्करणं॥नन्वेवंवत्करणाभावाधीनलाघवानुरोधात्संज्ञाप्रकरणादन्यत्रैवस्थानिवद्भावप्रकरणंक्रियतामिति चेन्न॥
तथासति आदेश्यग्रहणंविनावीक्त्यार्थंनिर्वाहेबहुगौरवापत्तेः॥सिद्धांतेतुआदेशग्रहणमतिरिच्यमानं आनुमानिकसंग्रहार्थंभवतीति
तद्धलेनैकदेशविकृतेस्योपसंख्यानंइतिवार्त्तिकंप्रत्याख्यास्यते॥ अपिच॥काममतिदिश्यतांवेति वक्ष्यमाणमपिवत्करणायत्नमितिर
दिक्॥ स्यादेतत्॥ यदिसंज्ञाप्रकरणेवत्करणंविनाअतिदेशालाभस्तर्हिकित्ङिन्तइत्यादौकागतिरितिचेत्॥उच्यते॥किदितिनसंज्ञा
॥नक्ङासेङितिज्ञापकात्॥नहिन्कःकित्संज्ञाप्राप्तायानिषिध्येत।ननुमृङमृधेतिप्राप्तासानिषिध्यतां॥ वचनंह्यसार्थक्यायचविकल्पो
ऽस्तुइतिचेत्न॥मृङ्मृदित्यत्रैववाग्रहणस्यसंभवात्॥किंचैवंनिष्ठाशीङित्यादिव्यर्थंस्यात्॥नहिशीङादिभ्योनिष्ठायाःकेनचित्संज्ञा
ज्ञाप्राप्ता॥एवंङिदित्यपिअतिदेशः॥कित्साहचर्यात्॥किंच॥ङिदित्यस्यसंज्ञात्वेग्रहिज्यादिसूत्रेऽस्यैवग्रहणंस्यात्॥कृत्रिमत्वात्॥ राम॰
॥तथानवशइतिसूत्रंव्यर्थंस्यात्॥वावशयतेइत्यत्रसंप्रसारणाप्राप्तेः॥॥किंच॥कुतिचेत्यत्रास्याग्रहणंस्यात्॥संज्ञास्वरूपानुच्चारे ११०

णात्॥तथाचगाङ्कुरादीत्यत्रकुरादिग्रहणंव्यर्थंस्यात्॥बहुगणेत्यत्रतुसंख्येतिदेशः॥अन्यथादिघुभादिवदेकाक्षरायाएवसंज्ञायाःकर्त्तव्यतापत्तेः॥किंकिनोलिङ्वेत्यादितुनसंज्ञाप्रकरणंतेनलिङ्इतिअतिदेशोनिर्बाधइतिदिक्॥अथादेशग्रहणंकिमर्थं॥स्थानिवदित्येतदेवसंबंधिशब्दमहिम्नातल्लाभात्॥यथापित्वदधीतेइत्युक्तेपुत्रइतिगम्यतेइतिचेत्॥सत्यं॥द्विविधआदेशः॥अस्तेर्भूरित्यादिःप्रत्यक्षः॥तेस्कीरित्यादिचआनुमानिकः॥नत्रहिइकारेणेकारांतःस्थान्यनुमीयते॥उकारेणचोकारांतआदेशः॥तथाचतेस्तुरितिफलितोर्थः॥नत्रासतिआदेशग्रहणेप्रत्यस्यैवग्रहणंस्यान्नानुमानिकस्य॥आदेशग्रहणसामर्थ्यात्तूभयपरिग्रहः॥तेनपचतुइत्यादेस्तिङंतत्वात्पदसंज्ञासिध्यति॥ननुएरुरित्यादियथाश्रुतमस्तु॥एकदेशविकृतस्यानन्यत्वाच्चपदत्वंभविष्यतीतिचेन्न॥अर्थवत्येवस्थान्यादेशिभावविधातेर्वाच्यत्वात्तस्यैवप्रत्ययस्यभवात्तीतिथहि॥षष्ठीस्थानेयोगेत्युक्तं॥स्थानंचप्रसंगः॥सचार्थवतःअर्थप्रत्यायनार्थशब्दप्रयोगात्॥यद्यपिच्लेःसिजादावसंभवीदं॥तथापिसतिसंभवेअर्थप्रयुक्तप्रसंगएवग्राह्यइतिआदेशग्रहणेनैवज्ञाप्यते॥उक्तंच॥सर्वेसर्वपदादेशादासीपुत्रस्यपाणिनेः॥एकदेशविकारेहिनित्यत्वंनोपपद्यते॥पदमिहार्थवत्॥पद्यतेऽनेनेतिव्युत्पत्तेः॥यद्यपिसर्वविकारेषुतरांनित्यत्वानुपपत्तिः॥तथापिइहविकारएवनास्तीतितात्पर्यं॥तथाचवार्त्तिकं॥कार्यविपरिणामादेति॥कार्यंइहज्ञानंतस्यापितावत्त्वात्॥तथाचज्ञाननिष्ठउत्पत्तिविनाशादिकंविषयेआरोप्यतेइतिभावः॥नन्वेवंबुद्धिकृतपरिणाममात्रस्यस्थान्यादेशिभावत्वेअपवादेष्वुत्सर्गकृतंस्यात्॥तथाहिगाङ्कुटादिसूत्रंनादिअण्णंनत्वप्रयुक्तोङीपस्यात्॥अत्राहवार्त्तिककारः॥सिद्धंतुषष्ठीनिर्दिष्टस्यस्थानिवद्भावनादिति॥षष्ठीस्थानेयोगेत्यनुवृत्तेरितिभावः॥नचापवादःषष्ठीनिर्दिष्टस्यस्थानेविधीयते॥नाभिनिश्चेत्यादेतुषष्ठ्यःस्थानेयोगमात्रेण॥त्रिश्चवणरवणेत्यादौत्रिशब्दो

नराणि पत्यपविषयाणि बोध्यानि ॥ विश्ववःशब्दात्तु पत्ययो न भवति । अनभिधानादिति भावः । तथाचविदुराऋदृतिसूत्रे भाष्यं ॥ बालवाक्यविदूरंचे
प्रकृत्यंतरमेव वा ॥ नवैतत्रेतिचेद्रूपान्नित्वरीवदुपाचरेदिति ॥ अस्मिंश्चपक्षेषष्ठीनिर्दिष्टस्यस्थानेऽादेशाविधीयंतेऽदृतिरुद्धिसूत्रस्थभाष्येण
यास्नुतमेवनिर्बाधं ॥ यत्तुस्थान्यर्थाभिधानसमर्थस्यैवादेशतेतिएवंपरतयाकैयटेनभंक्त्याव्याख्यातं । तदत्रस्यपक्षांतराभिप्रायेणेत्यदोषः ॥
अथवाऽयनः शित्करणंज्ञापकं ॥ अपवादेऽउत्सर्गकृतंनेति ॥ शूषपित्वनिवृत्त्यर्थंतदितिवाच्यम् ॥ दित्वादेवतत्सिद्धेः ॥ नित्वंह्यायुदात्तार्थं
शनःपित्वेतुपित्वादनुदात्तत्वेलसार्वधातुकानुदात्तेनचधातुस्वरेणैवसिद्धेकिंनित्वेन ॥ नचानेकासुविशेषः ॥ दिवादीनदभावात् ॥ नन्वेवं
त्तेनदृत्यस्तीतिचेन्न ॥ वाशब्दस्यविकल्पार्थत्वात् ॥ नचभ्वादिपाठेनसिद्धेस्तद्धेय्यर्थ्ये ॥ भ्वादिपाठस्यदृध्नुः स्यसनोरित्यार्धधातुकगणकार्ये
उपक्षीणत्वात् । नित्वंवैनतेयवदृत्यस्यानासारामशलांन्यविस्तेतिभट्टिप्रयोगानुपपत्तिरितिचेन्न ॥ नंचवाशब्दस्येवार्थंतथाकामयं
मानेवनतुतथा ॥ किंतुछलनार्थमागतेत्यर्थात् ॥ अत्रकैयटः ॥ नाच्छील्यादिविषयेचानशिश्यनोनित्वंप्रकृतेरायुदात्तार्थंस्यादिति ॥ तन्नहिल
सार्वधातुकाभावादनुदात्तापास्यावितदृत्यंतोदात्तत्वमेवप्राप्तंदृष्टंच ॥ तत्रानिष्टार्थमेवकिंनित्वंनस्यादितितस्याशयः ॥ नत्वेतद्युक्तं ॥ अ
न्यत्रविकरणेभ्यइतिपर्युदासाच्छ्यन्स्वरस्यदुर्बलत्वात् । नचनित्वसामर्थ्यात्तद्बाधः ॥ लसार्वधातुकेचरितार्थत्वात् ॥ तत्रस्थानिवद्भावल
ब्धेनपित्वेनगतार्थतेतिचेन्न ॥ इहनित्वेनानिदेशपर्युदासयोरन्यतरस्मिन्नवश्यंबाध्येतिदेशबाधस्यैवन्याय्यत्वात् ॥ पूर्वान्बाधंतेनोत्तरा
नितिन्यायाच्च ॥ यत्तुकैश्चिच्चानशंतस्यआयुदात्तत्वमिष्टमित्येवंपरतयाकैयटग्रंथंव्याख्यायविकरणेभ्योन्यत्रेतिपर्युदासस्तुयत्रविकृ
रणःस्वरभाक्तद्विषयः ॥ इहतुविकरणांतमेवस्वरभाक् ॥ सौवर्यःसम्नम्यस्तरंतसम्नम्यइतिसिद्धांतादित्युक्तं । तदेतन्निर्मूलं । पुंसंज्ञासूत्रेण

स्येमत्वसूत्रस्थेनचभाष्येणविरुद्धंचेत्युपेक्ष्यं॥किंच॥आतोनुपसर्गेकइतिकापवादस्यगापोष्टगितिटकः कित्करणंज्ञापकं॥नापवादेउत्सर्ग
कृतेभवतीति॥अनल्विधावितिकिं॥तेननस्नात्नस्यनस्मिंश्चविधौमाभूत्॥तत्रालाविधौयथा।व्यूढोरस्केन॥भत्रसोपदादाविति विसर्ज
नीयस्यस्थानेविहितस्यसकारस्यस्थानिवत्वाद्विसर्जनीयस्यअदस्तूपदेशादङ्व्यवायेइतिणत्वंप्राप्तं॥अलः परस्यविधौयथा॥द्यौर्ज
याःसः॥अत्रहल्ङ्यादिलोपोनभवति॥अलोविधौयथा॥दिवउत्॥सुकामः॥लोपोव्योर्वलीतिलोपोन भवति॥उत्त्वविधानंतु अहर्विस
लयुइत्यादौचरितार्थं॥अलिविधौयथा॥यजेन्नः इष्टः॥कइष्टइत्यत्रसंप्रसारणस्यस्थानिवत्वात्कोयष्टेत्यादाविवहशिचेत्युत्त्वंनभवति
॥सइष्टइत्यत्रएतन्नदोःसुलोपोन भवति॥अनलइत्युक्तेपिसंबंधसामान्येषष्ठ्याप्रागुक्तानेकविभक्त्यर्थसंग्रहोयद्यपिसंभवति तथापि
विधिशब्दोपादानमप्राप्तस्यैवाप्यलोऽश्रयणेनिषेधार्थं॥तेनप्रपञ्चेत्यादिसिद्धं॥अत्रहिवत्वादेरितिअप्राधान्येनालाश्रितः नतुप्राधा
न्येन॥स्योदर्शनं॥स्थान्यनुबंधकार्याण्यपिनहिनिषिध्येरन्॥तथाचप्रदीव्येत्यत्रस्थानिवद्भावेनकित्त्वंनलभ्येतेतिचेत्॥न॥अनेकांता
अनुबंधादितिपक्षेअनुबंधानांस्थान्यलत्वाभावात्॥एकांतपक्षेप्यंतरंगेणलोपेनादेशसंबंधात्प्रागेवानुबंधानामपहारात्॥नन्यपीत्ति
लिंगाच्चं॥यत्तुसेर्ह्यपिचेतिज्ञापकंउच्यते॥तत्रासिद्धं॥अपिचैवंनसामर्थ्यात्स्थानेंतरतमपरिभाषयाप्राप्तंअनुदात्तत्वंभवतिइत्यस्या
पिसुवचनत्वात्॥यद्यपिसामान्यातिदेशेविशेषानतिदेशइतिसिद्धांतः॥उपस्थितसामान्यप्रयुक्तधर्मस्तद्व्याप्यकसामान्यधर्मस्त
द्विध्याकांक्षापूरणेसतिअनुपस्थितस्यविशेषस्यग्रहणेप्रमाणाभावात्॥अतएवब्राह्मणवदस्यांस्त्रियेवर्त्तितव्यंदध्युक्तेमाठरादिविशे
षकार्यंनातिदिश्यते॥अतएवचाशंसायांभूतवच्चेत्यत्रभूतसामान्येविहितयोर्लुङ्निष्ठयोरेवातिदेशोनतुभूतविशेषेविहितयोर्लङ्लिटोरि

पीतिसिद्धांतः॥ तथापीहसूत्रेनल्पपीतिलिंगाद्धिशेषोप्यतिदिश्यते॥ किंतिपरतोविहितमित्तंनिषेद्धुंहिनल्पपीत्यारभ्यते॥ किंत्वंचक्त्वा
शेषधर्मः॥ सेट्केतदभावात्॥ तेनप्रदीप्येत्यादिसिद्धं॥ तस्मान्नल्पपीत्येवसूत्रेविशेषातिदेशेअनल्विधेकार्यातिदेशेचेत्युभयत्रापिज्ञापके
तिस्थितम्॥ यत्तुप्राञ्चः॥ अनल्विधावितिनिषेधेविशेषातिदेशज्ञापकइति॥ तच्चिंत्यं॥ व्यूह्येरस्तनकइष्टइत्यादौविसर्गत्वेसिद्धे
स्यचङ्ग्रापकीभूतयोरदित्वहश्त्वयोर्निषेधेनचरितार्थत्वात्॥ यदपित्कादेशेऽत्वपत्ययत्वाद्यतिदेशेऽभ्युपेत्यकइष्टइत्यादौहश्त्वाति
शेषातिदेशेनप्राप्नोतीतिमिश्रैरुक्तं॥ तत्रविसर्गत्वयणत्वयोरदित्वहश्त्वेकथंविशेषधर्माविति विपश्चितएवविसंकुर्वंतु॥ यद्यपितस्था
नापन्नस्तद्धर्मलभतेइतिन्यायसिद्धं अतएवव्रीहिस्थानापन्नेषुनीवारेषुवचनंविनैववीहिधर्माअवघातादयःक्रियंते॥ तथार्पितेषांप्रकृ
तापूर्वसाधनत्वप्रयुक्ततत्प्रयुक्तेनीवारादौअनुष्ठानं॥ आडोयमहनइतिहंतेरात्मनेपदंतुनहिंसाद्योभिधानप्रयुक्तेनैवधौभवेत्
॥ किंतुस्वरूपमितिवचनात्स्वरूपविशेषप्रयुक्तं॥ अतएवा॥ तृणेढीत्यादौनभवति॥ तस्माद्युक्तएवातिदेशारंभः॥ स्यादेतत्॥ मा
भून्न्यायेनगतार्थता॥ ज्ञापकात्तुभविष्यति॥ तथाहि॥ युष्मदस्मदोरनादेशेइतिसूत्रेअनादेशग्रहणंज्ञापयति॥ आदेशःस्थानिवत्स्यादि
ति॥ अदोजग्धिरितिसूत्रेतिकितीत्येवसिद्धेल्यब्ग्रहणमनल्विधावितीमंज्ञापयति॥ अप्राधान्येनाप्यलाश्रयेणनिषेधइत्यंशेच
॥ तथाचकिंसूत्रेणेति॥ उच्यते॥ उत्तरार्थंतावत्स्थानिवदादेशइतिकर्त्तव्यमेव॥ तस्यैवयोगविभागमात्रेणोपपत्तौसत्यांआर्थीपत्तिर्कल्प
चनंनकल्प्यं॥ एवस्थितेअनल्विधावित्यपमप्येशःस्पष्टप्रतिपत्त्यर्थंक्रियते॥ उत्तरसूत्रेहितीयविधिग्रहणस्यानुवृत्त्यर्थंच॥ तस्मा
जनंतुतत्रैववक्ष्यते॥ एतदेवचसकलमभिसंधायोक्तंभगवता॥ आरभ्यमाणेप्यस्मिन्सूत्रेइति॥ स्यादेतत्॥ अस्तुसूत्रारंभः॥

तथापिकार्यातिदेशएवायमितिकुतः॥प्रकारांतराणामपिसंभवात्॥तथाहि॥अतिदेशः॥षोढा॥निमित्तव्यपदेशतादात्म्यशास्त्रकार्यरू
तिदेशभेदात्॥तत्रनिमित्तमशक्यमतिदेष्टुम्॥ब्राह्मण्यवत्॥नहिब्राह्मणस्याग्रभोजनादौनिमित्तभूतंब्राह्मण्यंवचनशतेनापिक्षत्रियेतिदेष्टुंश
क्यते॥पूर्ववत्सनइत्यत्रापिप्रकृतिगतंनिमित्तंडित्वादिनसन्नंतेतिदिश्यते॥किंतुप्रकृतिगतमेवतत्सनाव्यवधानेसत्यपिआत्मनेपदंप्रत्ययं ये
तीत्येतावन्मात्रमतिदिश्यते॥एतावतैवचनिमित्तातिदेशोयमितिव्यवहारः॥नचायंकार्यातिदेशएवास्तामितिवाच्यं॥विक्रंसतेप्रविक्रंसतेइत्या
दौइष्टप्रसंगात्॥निमित्तातिदेशपक्षेतुअनुपसर्गःक्रमेरेवेहसनाव्यवहितोप्यात्मनेपदंप्रवर्त्तयतीतिस्तुक्रमोरनात्मनेपदनि
मित्तेइतिनियमादिणनभवति॥निमित्तेहिनत्रफलोपहितमेवगृह्यतेननुस्वरूपयोग्यमात्रमितिवक्ष्यामः॥सिद्धेत्वात्मनेपदेनसमानपदस्थ
स्येदृप्रतिषेधादितिवार्त्तिकंतीत्यातुदृह्यापिकार्यातिदेशतासुवचा॥न्याय्याचेतिनत्रैववक्ष्यते॥व्यपदेशातिदेशस्तुआद्यंतवदेकस्मिन्निति॥ए
कस्मिन्नपि आदिरंतइतिचव्यपदेशोतिदिष्टतत्तत्सूत्रैरेवकार्याणीतिभावः॥तथाचप्राञ्चः॥ आद्यंतवद्व्यपदेशोनिमित्तपूर्ववत्सनइति॥ए
तच्चनिर्मूलंइतितस्मिन्नेवसूत्रेहरदत्तः॥तस्यायंभावः॥कार्यातिदेशएवतत्रयुक्तः॥सर्वातिदेशनांकार्यार्थतयाकार्यस्यैवप्राधान्यात्॥अतए
वकार्यातिदेशाभ्युपगमेयत्रबाधकावतारःतत्रैवप्रकारांतरात्सूत्रणं॥नचाद्यंतवत्सूत्रेतदस्तिप्रत्युतव्यपदेशातिदेशपक्षएवबाधकं॥तथाहिः
कुरुतेकुर्वेइत्यादावंत्यव्यपदेशआदिव्यपदेशश्चास्तु॥तथाप्यंत्योजादिर्यस्येत्येवंरूपस्यबहुव्रीह्याश्रयस्याभावाट्टिसंज्ञायाअभावेटेरसंभवस्यत
॥कुर्वातेइत्यादौदृष्टस्यटेरित्वाख्यस्यकार्यस्यातिदेशेतुसंकस्मिद्दोषइति॥तादात्म्यातिदेशस्तुभिन्नयोरभेदातिदेशः॥सचामंत्रितेपरांगवत्स
रदतिप्रथा॥तेनयत्तेदिवोदुहितर्मर्त्तभोजनंइत्यादावामंत्रितस्यचेतिआद्यमिकसूत्रेणपदात्परस्यामंत्रितस्यनिघातोदित्येदुहितरिति

समुदाये प्रवर्त्तते॥ शास्त्रातिदेशस्तु कर्मवत्कर्मणेत्यत्र पाक्षिकं वक्ष्यते॥ कार्यातिदेशो गोतोणिदित्यादिः॥ रूपातिदेशस्तु हिर्वचनेचित्तंज्वक्रोष्टुरित्यादिः॥ तदिहकार्यातिदेश एवेत्यत्र किंविनिगमकमिति चेत्॥ उच्यते॥ कार्यस्य प्राधान्यात्तदतिदेशएवायं॥ अतिदेशांतरे बाधकत्वाच्च। तथाहि निमित्तव्यपदेशातिदेशौतावत्पाक्षिकावित्युक्तं॥ शास्त्रातिदेशोप्येवं॥ तादात्म्यातिदेशस्तु हयोःसहावस्थितयोस्स्यात्॥ सुबामन्त्रितेपरेति॥ इट्तुस्थानी आदेशेनापहृतः इतिनदसंभवः॥ रूपातिदेशे तु अर्द्देशविधानंव्यर्थंस्यात्॥ नचवचनहर्यमाण्याद्विकल्पः॥ विभाषानुनासिकेतिविकल्पारंभात्॥ तस्मात्कार्यातिदेशएवायमितिस्थितं॥ यत्तुन्यासकारेणोक्तं॥ व्यपदेशातिदेशस्संज्ञावसेपर्यवसन्नः॥ सचवत्करणसामर्थ्यादेवनभविष्यतीति॥ तत्रेदंवक्तव्यं॥ अस्तीहसंज्ञापक्षाद्दोषभ्यं॥ तथाहि॥ आङोयमहनइत्यादौवधेरवग्रहणंम्यान्नतुहंनेः॥ तेनकेनकस्मादित्यादौ अंगकार्यादीनिनस्युरितिसंज्ञापक्षेदोषद्वयं॥ नचेदंव्यपदेशातिदेशोस्ति॥ स्वंरूपमितिवचनाद्धिहंतेर्हंतिरेवसंज्ञा॥ नच्यपदेशस्यवधावप्यतिदेशेत्युभाभ्यामात्मनेपदंलभ्यते। नतुहंतेरेव॥ एवंस्थानिनिष्ठानांधात्वंगादिव्यपदेशानां आदेशेतिदेशात्धात्वंगादिकार्याण्यपिसुलभान्येव॥ तस्मात्साधान्यात्कार्यातिदेशोयमित्येवनत्वं॥ अत्रवार्तिककाराः॥ तस्यदोषइत्युपक्रम्यतयादेशउभयप्रतिषेधः॥ ङ्याब्ग्रहणेः दीर्घः अहिभुरवोरीट्प्रतिषेधइत्यादिपेदुः॥ तत्रोभयशब्देयथानातिप्रसंगस्तथासर्वादिगणव्याख्यावसरेएवोपपादितं॥ ङ्याब्ग्रहणेपिडीईआआबिति दीर्घप्रश्लेषादतिखट्वेनातिरवद्वेइत्यादौनातिप्रसंगः॥ नचैवमप्यतिखट्वायेत्यत्रदोषतादवस्थ्यं॥ उपसर्जनस्त्रीप्रत्ययेतदादिनियमसत्त्वात्॥ नचैवंम्श्लेषवर्णनवैयर्थ्यं॥ अतिरवद्वइत्यादावंगाधिकारविरहेणवयवाट्टाबंतात्परत्वमाश्रित्यहल्ङ्यादिलोपप्राप्तेः॥ नहितत्रविहितनविशेषणाश्रयणंयुक्तं॥ यःसःइत्यादावतिव्याप्तेर्यासेत्यागतत्वापेक्षेतत्वं॥ अत्रवार्तिककारः॥ तस्यदोषइत्युपक्रम्यतयादेशउभयप्रतिषेधः॥ ङ्याब्ग्रहणेः दीर्घः अहिभुरवोरीट्प्रतिषेधइत्यादिपेदुः॥ तत्रोभयशब्देयथानातिप्रसंगस्तथासर्वादिगणव्याख्यावसरेएवोपपादितं॥ ङ्याब्ग्रहणेपिडीईआआबिति दीर्घप्रश्लेषादतिखट्वेनातिरवद्वेइत्यादौनातिप्रसंगः॥ नचैवमप्यतिखट्वायेत्यत्रदोषतादवस्थ्यं॥ उपसर्जनस्त्रीप्रत्ययेतदादिनियमसत्त्वात्॥ नचैवंम्श्लेषवर्णनवैयर्थ्यं॥ अतिरवद्वइत्यादावंगाधिकारविरहेणवयवाट्टाबंतात्परत्वमाश्रित्यहल्ङ्यादिलोपप्राप्तेः॥ नहितत्रविहितनविशेषणाश्रयणंयुक्तं॥ यःसःइत्यादावतिव्याप्तेर्यासेत्यागतत्वापेक्षेतत्वं॥

त्यत्याख्यानायवर्ण्यनइत्यन्यदेतत्॥ युक्तंचैतत्॥ वार्तिकमतेअतिरङ्घायेत्यादावंगाधिकारबलेनकथंचिन्निर्वाहेपि जरसे नसे मृते इत्यादौ
वतिप्रसंगस्यदुर्वारत्वात्॥ मुन्नामिच्छन्नुतीरित्यादौसुलोपापत्तेश्चेतिदिक्॥ अस्तुवाआकारांतरमपिप्रश्लिष्यतत्सामर्थ्यान्मध्येहस्वत्वमाप्
न्नस्यपरिहारइतिदिक्॥ आहिभुवोरितिवार्तिकंतुइत्थंभाष्यकाराःप्रत्याचख्युः॥ आस्येत्यत्रआहेः स्थानिवद्भावेनघुत्वेपिघुवईप्नभवति
॥आहस्थइतिज्ञापकात्॥ तेनहिझलादौपरेथस्त्वंविधीयते॥ नचकृतेपीदिभूतपूर्वगत्याझलादित्वात्थकारोस्तइतिवाच्यं॥एवंहिसतिआथ
मेवविदध्यात्तलाघवात्॥तिबादीनांपंचानामपिझलादितयाणलादीनामपिभूतपूर्वगत्याझलादित्वात्॥तस्मादाहस्थइतिज्ञापकादाहेरिङ्घि
धौस्थानिवद्भावोनेतिस्थितं॥अस्तेर्भूरितिविहितस्यभुवोपिस्थानिवत्वनिषेधोनवक्तव्यः॥अस्तिसिचोपृक्तइतिहिसकारकनिर्देशेनसकारांतो
देवास्तेःपरस्यैङ्घिधानात्इति॥स्यादेतत्॥ असस्इतिसकारनिर्देशोधातुत्वाभावात्स्तिबेवानुपपन्नः॥पदमध्यप्रविष्टेनसंकारेणसिचोविशेष
णासंभवेसिजाश्रयस्यईटःप्रसंगश्च॥नचास्तेःसांतत्वेनविशेषणसामर्थ्यात्सिचःप्रयुक्तोपीणेनिवाच्यम्॥तथापिस्वतंत्रस्यभवतेरतिप्रसंग
स्यदुर्वारत्वात्॥ तथाचार्थभेदाभावेपिस्वतंत्रास्वतंत्राभ्यांभूभ्यांअभूवीत्अभूदितिरूपद्वयापत्तिः॥यत्तुएतद्दोषोपन्यासपूर्वकंमाधवाचार्यैरु
क्तं॥सिचोत्पाचकत्वाद्हुत्विष्यत्वेनाभ्यर्हितत्वाच्चपूर्वंनिपातेकर्त्तव्येस्तिसिचइतिवचनात्तंत्रादिभावविद्यमानसिचइत्यप्यर्थोलभ्यते॥अत
एवस्तिप्रयोगेपिसार्थकः॥अन्यथासिजस्भ्यामित्येवब्रूयात्॥नचैवमसतावस्यतौचातिप्रसंगः॥विकरणव्यवधानेनताभ्यांपरस्यापृक्तसा
र्वधातुकस्यासंभवादिति॥नचिंत्यं॥एवमपिस्तिप्रत्ययासमाधानेनहिसकारोनिर्देशइतिभाष्यस्यनिर्वाहात्॥प्रत्ययेनसिच्यसस्यसिचस्॥स
माहारद्वंद्वेलुप्तपंचमीकंवा॥अयस्मयादित्वेनभत्वान्नकृत्वजेत्वे॥अस्तिचतत्सिजस्चेतिकर्मधारयः॥तेनलुप्तात्सिचोभूभावेनापहृतादं

स्तेश्चपरस्यनेतिकल्पनापिप्रयुक्ता॥उक्तरीत्यारूपसिद्धावपिभाष्यानिर्वाहात्॥तस्मादिहभगवतोभिप्रायांतरमेववक्तव्यमिति॥अत्रोच्यते॥
अस्तिसिचमसृस्रइतिछेदः॥सांतादस्तेःनतुकृतभूभावात्॥सांतात्सिचःभूयमाणादितियावत्॥तथाचसिचइत्यस्यानंतरंसकारःप्रश्लिष्यते न
तुस्तिपःप्राक्॥येनमाधवोक्तःस्तिपूप्रत्ययानुपपत्तिरूपोदोषःस्यात्॥अतएवसिचोःपृक्तइतिहिसकारकोनिर्देशइत्युक्तंभाष्ये॥अन्यथाह्यस्तीति
निर्देशइत्येवब्रूयात्॥ननुएवमस्तिसिचोपृक्तइतिसंहिताकथंनिर्वहतीतिचेत्॥इत्थं॥संयोगांतस्यलोपइतिहितीयःसकारोलुप्यते॥ननुलुप्तवि
भक्तिकंसइतिपदं॥नचैतत्संयोगांतं॥नथाचसंयोगांतंयत्पदंतस्यविधीयमानोलोपः कथमिहस्यादितिचेत्न॥संयोगांतस्यपदांतस्यलोपः
स्यादित्यव्याख्यानात्॥संयोगेतिहिलुप्तषष्ठीकंपृथक्पदं॥संयोगस्यपदस्येत्युभयंचांतस्यविशेषणं॥एषएवचसूत्रकृतोप्याशयः॥यदिह्यअ
यंबहुव्रीहिःपदंत्वान्यपदार्थइतिवृत्तिकारकृतंव्याख्यानंसंमतंस्यान्नहिअंतग्रहणंनकुर्यात्॥संयोगेनपदविशेषणादेवतदंतलाभात्॥अपिच॥
सरूपसूत्रेपृथक्सर्वेभ्योविभक्तावेकशेषइतिपक्षेरुक्षस्सइतिप्रसज्येतेत्याशंक्यसंयोगांतलोपात्सिद्धंइतिभाष्यग्रंथःप्रकृतव्याख्यानए
वानुकूलः॥यत्तुतत्रकैयटोवक्ष्यति॥वस्तुतस्संयोगांतस्यलोपाद्धलङ्यादिलोपादिति॥तत्तुमूलस्वरसविरुद्धं॥अत्रव्याचक्षतइत्युपक्रमा
दपरितोषग्रस्तंच॥अतएवहलंत्यसूत्रेअन्योन्याश्रयोद्धारार्थंअंत्यलकारस्येत्संज्ञायांणलोलित्वंस्वरार्थंक्रियमाणंज्ञापकमितिप्रक्रम्यननु
लकारःश्रवणार्थएवेत्याशंक्यअपृक्तहलितिहलग्रहणंणल्व्यावृत्तयेक्रियमाणंणलोपृक्तंज्ञापयतीतिवक्ष्यति॥तस्यह्ययमाशयः॥भे
त्तेत्यादेशोडादेशोहलग्रहणस्यव्यावर्त्योनसंभवति॥सुतिसीतिप्रत्ययैःप्रकृतेरास्पेणहलंतायाःप्रकृतेःपरेषांस्वादीनांलोपः॥नचडादेशं
प्रतिनासंताप्रकृतिरिति॥एवंचेहापिरुक्षस्सइत्यस्यप्रकृतित्वाभावात्कथंहलङ्यादिलोपः॥अस्तिसिचोपृक्तइतिहिसकारकोनिर्देशइति

प्रकृतग्रंथोपि उक्तव्याख्यानमनुकूलएव॥ ननुसूत्रेरीत्यासंयोगांतलोपः तथापितस्यासिद्धत्वाद्रोरुत्वंदुर्लभमितिचेन्न॥संयोगांतलोपोरो
रुत्वेइतिवार्त्तिकेनासिद्धत्वनिषेधात्॥हरिवोमेदिनंत्वाइत्यादिवत्॥सिचोपृक्तइतिप्रकृतनिर्देशएवचवार्त्तिकोक्तार्थेज्ञापकोवोध्यः अथवाभ
स्कृत्तिकारोक्तएवसंयोगांतस्यलोपइतिसूत्रस्यार्थः॥अंतग्रहणंप्रत्येकंसंयोगसंज्ञेतिपक्षेसंयोगावंतौयस्येतिहित्वावगतयेस्क॥संयोगसे
ज्ञासूत्रेभाष्यकैयटपोस्तथैवाभिधानात्॥प्रकृतेनुमास्कसंयोगांतलोपः॥किंतुहयोःसकारयोःरुत्वेहतेअतोरोरित्यनेनएकएवउकारोभविष्य
तिविधेयविशेषणस्यएकत्वस्यपश्चैकत्ववद्विवक्षितत्वात्॥रोरितिजातिपरनिर्देशेनातःपरत्वस्यपूर्वत्वस्यचसंभवात्॥जातिपरत्वेप्रकृतिनि
र्देशएवप्रमाणमस्क॥नचपरत्वाद्भशिचेतिप्रथमस्यैवरोरुःस्यात्इतिवाच्यं॥रुत्वस्यासिद्धत्वयाहशपरत्वाभावात्॥नचाश्रयात्सिद्धत्वमि
तिवाच्यम्॥स्थान्यंशेतश्चात्वेणिनिमित्तीभूतहशंशेतदसंभवात्॥एषएवचहिसकारकनिर्देशवदतोभाष्यकारस्याशयः॥ननुसंयोगांतलोप
इति॥अतएवनुदविदेतिसूत्रेभुषःकइत्यादिबहुयोगविच्छिन्नस्यनकारस्यकथमनुवृत्तिरित्याशंक्यान्यतरस्यान्नध्याख्येतिसंहितापाठेनन
कारांतरश्लेषइत्युक्तं भाष्येहलोरमामितिलोपइतिहितस्याशयः॥पूर्वोक्तरीत्यानुसंयोगांतलोपेनैवसिद्धौसंहितापाठपर्यंतंनोपन्यस्येत्॥
संहितायामपिहिहलोपमामितिलोपस्यबहिरंगत्वत्रिपादीस्थत्वाभ्यामसिद्धत्वात्संयोगांतलोपेनैवभाव्यं॥संयोगांतलोपेगुणःप्रतिषेधोनेत्या
श्लेलोपाद्बहिरंगलक्षणत्वाद्धेतिवार्त्तिकोक्तपक्षत्रयेप्रथमचरमयोस्तस्यदुर्वारत्वात्॥तस्मात्सप्तदशेप्रत्येकंवासंयोगसंज्ञेतिपक्षद्वयानुरोधे
नद्रहसमाधानद्वयंव्यवस्थितंइतिभाष्यार्थः॥पूर्वोक्तरीत्यासिचइतिसमाहारमाश्रित्यतदुपरिसद्वदितिछेदइतिपक्षेतुअस्तिग्रहणप्रत्याख्या
नपरतयापीदंभाष्यंयोजयितुंशक्यमितिदिक्॥एतेनसंयोगांतस्यलोपइतिसूत्रेअंतग्रहणेशक्यमकर्त्तुंइतिपदमंजरीग्रन्थोक्ता॥प

स्सहृ्येपिप्रयोजनस्योक्तत्वात्॥विद्यमानेयत्सिचस्इतिपक्षेवायोज्या॥यत्तुसिचःपरत्वादीट्प्राप्तेरिड्विधिर्नेट्प्रतिषेधइतिवार्त्तिकबलात्
त्निषेधइतिकैश्चिदुक्तं॥तन्न॥तस्यदोषइत्युपक्रमात्स्थानिवद्भावप्रतिषेधपरेणोक्तवार्त्तिकेनास्तेःपरत्वमुपजीव्यप्रवृत्तस्येटोनिरुद्धावपि
सिच्प्रयुक्तस्यानिवार्यत्वात्॥अस्थादगादित्यादौउक्तदोषतादवस्थ्याच्च॥तस्मात्त्यागुक्तेष्वेवान्यतमःपंथाःशरणमित्यलंबहुना॥वध्यादे
शेऽड्विधित्वप्रतिषेधइड्विधिश्चेतिवार्त्तिकंतरं॥अस्यार्थः॥हंतेर्णुलिङृतेबहुलंतण्यन्नवधकगात्रविचस्पणाजिराद्यर्थमितिवार्त्तिकेनसंज्ञाछंद
सोर्वधादेशःसचहलंतइतिमत्वाऽड्विरापद्यते॥हनस्तोर्विण्णलोरितितकारश्च॥तयोःकर्त्तव्ययोःस्थानिवद्भावःप्रतिषेध्यः॥तथाआवधिषी
ष्टेत्यादौस्थानिवद्भावेनांगतयाएकाचइतीण्निषेधःप्राप्तः॥तस्मिन्नपिकर्त्तव्येस्थानिवद्भावेनांगतानेतिवाच्यम्॥तदेतदिड्विधिश्चेत्येनेनार्थादु
क्तं॥एतदपिभाष्येप्रत्याख्यातं॥तथाहि॥वधादेशस्तावदर्दंतः॥अन्यथावधीदित्यत्रातोहलादेरितिवृद्धिप्रसंगात्॥एतच्चोत्तरसूत्रेभाष्येस्प
ष्टं॥वधकदंतिनुनाथंण्वुल्॥किंतुहनोवधश्चेत्यौणादिकसूत्रेणकुन्प्रत्ययः॥तथाचेहवृद्धित्वयोःप्रसंगएवनास्ति॥आवधिषीष्टेत्यादौड्वि
ण्निषेधोपिनभवति॥वध्यादेशेआद्युदात्तनिपातनसामर्थ्यात्॥नचैवंसतिशिष्टेनतेनयदावधिषीष्टेत्यादौप्रत्ययस्वरोबाध्येतेतिवाच्यं॥आ-
र्द्धधातुकीयानामादेशानांप्रत्ययविवक्षामात्रेणप्रवृत्त्याप्रत्ययस्वरस्यैवसनिशिष्टत्वादिति॥स्यादेतत्॥इड्विधिश्चेत्यंशेपूर्वपक्षएवशिंथिलः
॥तथाहि॥उपदेशेऽनुदात्तादिण्निषिध्यते॥नचवधिस्तथा॥स्थानिवद्भावेनायंतथेतिचेन्न॥अल्विधौस्थानिवद्भावविरहात्॥सत्यं॥नेहस्था
निवद्भावंब्रूमः॥किंतुहंत्युपदेशएववधेरुपदेशः॥ऋत्वुपदेशइवकर्त्ताकर्त्तुमित्यादौकरित्यादीनां॥स्थानिवद्भावस्तुअंगसंज्ञार्थमृग्यतइ राम
त्युक्तमेव॥नन्चेवमपिपरिहारग्रंथोऽसंगतएव॥यदिहिप्रागेवप्रत्ययोत्पत्तेर्वधादेशाभ्युपगमस्तर्हिवधभावात्सीयुटिचिण्वद्भावोविप्रति ११५

षेधेनेतिस्यसिच्सूत्रीयंवार्तिकंविरुध्यते॥ अंतरंगबहिरंगयोर्विप्रतिषेधायोगात्॥ तथाचकर्मणिसियुटिवधिषीष्टेत्येकमेवरूपंस्यात्॥ इष्य
तेतुघानिषीष्टेतिहितीयमपि॥ अत्रोच्यते॥ वार्तिकमतेआर्द्धधातुकेइत्यस्यविषयसप्तमीत्वेपिलिङिलुङीत्यादीनांपरसप्तमीत्वाभ्युपगमेन
विप्रतिषेधःसंभवत्येव॥ अतएवेहाद्युदात्तनिपातनासंभवादिङिधिष्वेत्युपसंख्यातं॥ भाष्यकाराणांत्वयमाशयः॥ आर्द्धधातुकइत्यिवल्लिङि
दित्यादिरपिविषयसप्तमीएव॥ तथाचाद्युदात्तनिपातनेनैवोपपत्तौइङिधिष्वेतिनकर्त्तव्यमेव॥ घानिषीष्टेतिकथंसिध्येदितिपरमवशिष्यते॥
तत्रेदमुत्तरं॥ प्रतिपदविधेर्वलीयस्त्वाच्चिण्वद्भावइति॥ एतच्चस्यसिच्सूत्रेकैयटेनस्पष्टमुक्तं॥ तस्माद्वार्तिकमतेविप्रतिषेधाच्चिण्वद्भावः॥ भा
ष्यमतेतुप्रतिपदोक्तत्वादितिविवेकः॥ एतेनैकाचउपदेशइत्सूत्रेप्यार्द्धधातुकीयाःसामान्येनभवंतीत्यादिभाष्यग्रंथाव्याख्याताः॥ यत्तुत
त्रकैयटेनोक्तंविप्रतिषेधेउपपत्तिरिच्छेत्येति॥ तन्नुप्रागुक्तोपपत्तिरेवस्मर्त्तव्येत्येवंपरं॥ स्यादेतत्॥ प्रतिपदविधित्वमिहकिंविवक्षितं॥ अनवका
शत्वंवासाक्षादुपादानमात्रंवा॥ नाद्यः॥ स्यसिच्सूत्रेहन्ग्रहणस्यप्रघानिष्यतइत्यादौलब्धावकाशत्वात्॥ तंत्रत्यस्यसीयुट्ग्रहणस्यानुकूल्यं
षिषीष्टेत्यादौकृतार्थत्वात्॥ नचाजंतादीनांचतुर्णांस्यादिचनुष्कसंबंधेअस्वरितत्वाच्चयथासंख्याभावेहंतेःसीयुटीतियोंशस्तस्यानर्थक्यमेव॥
अंतरंगत्वाद्विवधभावेकृतेतस्यस्थानिवत्वेनहंतिग्रहणात्सीयुटिचिण्वदिटिकृतेण्यलोपाविपडितिपूर्वविप्रतिषेधेनाल्लोपेप्रतिवधिषीष्टेत्येव
रूपंस्यादितिवाच्यं॥ अंतरंगेणवधिनापहारेन्याय्येसतिअसंभवादेवहंतेःसीयुटासमंसंबंधायोगात्॥ संभवेव्यभिचारेचस्याद्विशेषणंमर्थ
वदितिन्यायात्॥ अतएवभस्त्रादिसूत्रेआनस्थानेइत्येतत्स्वशब्दस्यैवविशेषणंनतुभस्त्रादीनामितिवक्ष्यते॥ तथानित्यंक्रीडाजीविकयो
रित्यत्रक्रीडायांतृचोःसंभवादकेनैवतदन्वयइतिवक्ष्यते॥ नोत्यः॥ वधादेशेपिहनोवधलिङीतिसार्वधातुकादुपादानस्याविशिष्टत्वात्॥ अंतरं

गत्वस्याधिकत्वाच्चेतिचेत्॥ अत्रोच्यते॥ क्विण्वदिट्चेतिचकारस्यानुक्तसमुच्चयार्थत्वेनव्याख्यान्नङ्नेरपिपरस्यसीयुटस्त्रिण्वङ्गावोविधीय
ते॥ तस्यचानर्थकत्वमेवप्रतिपदविधित्वं॥ अनुक्तसमुच्चयार्थत्वंचास्य भाष्यकारएववक्ष्यति॥ चंभगवान्कृतवांस्कृतदर्थमिति॥ अतएवहि
आभात्सूत्रप्रत्याख्यानपक्षेकृतेपीटिणिलोपःसिद्ध्यति॥ सूत्रारंभेपरंइट्चासिङ्स्तेनमेलुप्यतेणिरितिवक्ष्यमाणंबोध्यम्॥ यद्वालिङीतिसा
मान्यंसीयुटीतिविशेषः॥ हंतेरितित्युभयत्राविशिष्टं॥ तथाचापवादत्वमेवक्विण्वदिट इतिनास्त्यसंभवः॥ येनहंतिःसियुटानान्विधात्॥
तथाचैकेयूटोक्तंप्रतिपदविधित्वमपिसम्यगेव॥ युक्तंचैतत्॥ यदिह्यसंभवःतर्हिचेनापिअसंभविनोविधानायोगेनप्रागुक्तपक्षस्यदुर्बलत्वात्त
॥ अथवावक्ष्यमाणनिष्कर्षरीत्यांतरंगबलीयइत्यस्यासिद्धंबहिरंगमित्यनेनप्रत्याख्यानात्तस्यचकृतितुग्ग्रहणेनानित्यत्वाल्लुप्तस्यानुरोधेने
हस्त्यागाद्युक्तोविप्रतिषेधः॥ अथवालिङीतिपरसप्तम्येवास्तु॥ परत्वाच्चक्विण्वदिट्॥ आद्युदात्तनिपातनंतुमास्तु॥ नचैवंवधिषीष्टेत्यत्रेणनि
षेधापत्तिः कर्त्तेत्यादाविवेतिवाच्यं॥ वधेर्हिंहावुपदेशौ॥ हंत्युपदेशोवध्युपदेशश्चेतिएकाचइतिसूत्रेभाष्येएवस्पष्टं॥ तथाचवध्युपदेशेऽने
कत्वादिण्निषेधोनभविष्यति॥ एकेतिविशेषणसामर्थ्याद्धिअनेकाच्कोपदेशोव्यावर्त्यते॥ नन्वचइत्युक्तेऽजेतस्यैवस्यात्त॥ मैवं॥ पचादी
नामनुदात्तत्वस्यवैयर्थ्यापत्तेः॥ अतएकत्वविवक्षयाअचइत्यस्यएकोचतहतइत्यर्थलब्धेएकग्रहणसामर्थ्यादुक्तार्थलाभः॥ नचयत्रैका
ज्ग्रहणमितिपरिभाषाप्रवृत्तयेएकग्रहणमितियुक्तं॥ शब्दविशेषंअनादृत्यएकाचइत्यर्थमेवाश्रित्यपरिभाषाप्रवृत्तेःसुवचत्वात्॥ नचैव
मिहेवविशेषणसामर्थ्यक्येक्ष्मिपाशपेत्यादिपरिभाषाज्ञापकत्वंनस्यादितिवाच्यं॥ शीङः सार्वधातुकेगुणः दीङोयुड्चीत्यादिसानुबंधनि
र्देशानामेवतज्ज्ञापकत्वसंभवात्॥ तदेवंसर्वथापिवधेःपरस्येड स्त्येवेतिस्थितं॥ अतएवानिङ्कारिकासुव्याघ्रभूतिनाअदंतपर्युदासःकृ

तः ॥ अदंतमूदंतमृतांचरङ्कृत्वात्यादिना ॥ यत्तुकौमुद्यांभावकर्मलकारव्युत्पादनावसरेघानिषीष्टेत्युदाहृत्यषस्येवधादेशइत्युक्तंतन्नूक्त
रीत्याभाष्यमतेवार्त्तिकमतेवाऽभयथापिनिर्बाधमेव ॥ एवंस्थितेषस्येवधादेशइतिभतीकमुपादायइदंतुसिद्धांतविरुद्धंभाष्यादौवधादेशानभ्यु
पगमादितिवदन्प्रमादकारः प्रत्युतस्वस्यैवकलंकमाविरकरोत् ॥ यदपितेनस्वकीयभ्रमबीजभूतंवार्त्तिकमुदाहृतंहनिणिडादेशप्रतिषेधश्चै
तिनैतल्लिडिप्राप्तस्यनिषेधपरंकिंतुस्यादिष्वपिविष्वदित्यतिदेशेनप्राप्तस्य ॥ अतएवांगाधिकारात् अंगस्यैवातिदेशो ननुहनिणिडादेशा
नां ॥ अनेकाल्त्वादितिअंगाधिकारबलेनैवभाष्येतद्वार्त्तिकंप्रत्याख्यातं ॥ यद्यप्येतत्सिद्धांतग्रंथेष्वविवादमेवतथाप्यधस्येवाधलग्नस्येति न्या
येनप्रसादग्रंथंदृष्ट्वाबालामाभ्राम्येयुरित्येतदर्थमस्माभिःस्फुटीकृतं ॥ प्रकृतमनुसरामः ॥ आकारांतान्नुकृषुकृप्रतिषेधः ॥ लोडादेशेणाभा
वजभावधित्वहिलोपेत्वप्रतिषेधः ॥ त्रयादेशेस्तेनप्रतिषेधः ॥ आमविधौच ॥ स्वरेचवस्वादेशे ॥ एतान्यपिपंचवार्त्तिकानिप्रत्याख्यातानि ॥ त
थाहि ॥ विलापयतिभापयतिइत्यत्रनुकृषुकोनभविष्यतः ॥ लीङ्भीङ्इतिईकारश्लेषात् ॥ ह्रस्वश्लेषाद्वा ॥ तथा ॥ शिष्टात्हतान्भितोत्व
कृतात्स्तात् ॥ इत्यत्रपरत्वात्तानडेरुने ॥ शाहोहंतेर्जः ॥ हुझल्भ्योहेर्धिः ॥ उतश्चप्रत्ययादसंयोगपूर्वात् ॥ घ्वसोरद्धीत्येतेविधयोऽ
द्यपिप्रयुज्यंतितानडादिस्थानिवद्भावेनहियङादेशेनयङादेशात् ॥ तथापिसकृद्गतौविप्रतिषेधेयद्बाधितंतद्बाधितमेवेतिन्यायान्नभवंति ॥ एवं
पुष्णीतादित्यत्रहलंतत्वंशानजितिनभवति ॥ उभयोर्नित्ययोःपरत्वात्तानङ्प्रवृत्तेः ॥ तथासिसृणामित्यत्रपरत्वान्निसृभावेनबाधितस्ये
त्यदितिनयादेशोपिबाधितएव ॥ एवंचनस्त्रिष्ठतीत्यत्रपरेणचतस्तृभावेनचतुरनडुहोरित्याम्बाध्यते ॥ तथा ॥ अशासंच्छाविदुषीसखि
न्यहन्मित्यत्रविदेःशतुर्वसुरित्यस्यादेशस्यशत्रुग्रहणेनयङ्ग्रहणाच्चनुरनुमोनद्यजादीतिसूत्रेणांतोदात्तात्परत्वंउपजीव्यमानं

नद्याउदात्तत्वंयस्येवंविदुषोग्निहोत्रंजुह्वतिइत्यत्रविदुषइत्यत्रषष्ठ्याउदात्तत्वंचनभवति ॥अनुमइतिनिषेधात्॥नथाहि॥अविद्यमानउम्यर स्येतिबहुव्रीहिः॥उमितिचसनाशंसेत्युकारात्प्रभृतिआनुमोमकारात्प्रत्याहारः॥तनादिकृञ्भ्यइत्युकारात्प्रभृतिवा॥तत्रचवसुःसंप्रसारणंचा नर्भूतं॥नन्वेवंहितीयपक्षेलुनता॥अल्लोपंप्रथमाजानतीगात्इत्यादावपिनिषेधापत्तिः॥तनादिकृञ्भ्यइत्युपक्रमेत्राप्रत्ययस्यापितत्रांतभ्रा दितिचेत्॥न॥शानरिपरेष्वाप्रवृत्तावपिशानुरनुमकत्वानपायात्॥नुमागमग्रहणपक्षेपिहिशनुरेवतद्ग्राहित्यविशेषणंनतुशत्रनस्य॥संज्ञता मुचतेइत्यादावपिनिषेधापत्तेः॥इदंतुवार्त्तिकंमिद्घातेपिस्थितं॥गोःपूर्वणित्वात्स्वरेषुप्रतिषेधइति॥चित्रंवयमित्यत्रहिसर्वत्रविभाषागोरितिपूर्वरूपं प्राप्तं॥नोनःसादमितिपाठस्यइकोगुणवृद्धीइतिसूत्रेषष्ठभाष्येचस्थितत्वेनतद्रीत्यासर्वत्रेतिसूत्रस्यापिपूर्वविधायकत्वौचित्यात्॥कैयटस्तु अकलसूत्रेह्रस्वम्प्रतिचकारेणप्रकृत्येत्यनुरुध्यतदितिदर्शनात्प्रकृत्यांनःपादमितिपाठमनुसृत्यवार्तिकस्थंपूर्वपदंतत्रापिपूर्वकप्रकृतिभावोप लक्षणमितिसूचितवान्॥नचसर्वत्रविभाषेत्यत्रएङःइत्यनुवर्त्त्यात्प्रतिषेधःप्रवचः॥हेचित्रगोअग्रमित्यत्रएवमप्यतिप्रसंगात्॥न त्वत्रस्थान्यत्रआश्रयणं॥स्वतएवएङंतत्वात्॥चित्रगुरित्यत्रगोतोणिदितिणित्वंप्राप्तं॥चित्रगुंचित्रगूनित्यत्रतुआगोतोम्शसोरितिषाष्ठवा र्त्तिकेनाआत्वंप्राप्तं॥अत्रणित्वात्प्रत्ययग्रहणंतुशक्यमकर्त्तुं॥गोतइतिनपरकरणसामर्थ्यादेवणित्वात्वाप्रवृत्तेः॥औत्तोम्शइतिपाठस्यैवस्यापि ण्यमाणत्वाच्च॥अचिनवमित्यादावतिप्रसंगस्यशक्यासाहचर्येणापिवारणसंभवात्॥स्वर॥बहुगुमान्॥इहह्रस्वनुड्भ्यांमतुवित्युदात्तः तायानगोश्वन्निनिषेधःप्राप्तः॥तस्माद्गोःपूर्वस्वरयोरितिपठनीयमितिस्थितं॥एवंचनगोश्वन्नितिसूत्रेवृत्तौयत्पठ्यतेबहुगुनाबहुगुभ्यांद त्यादावंतोदात्तनाट्टुनरपदादन्यतरस्यामितिप्राप्तंप्रतिषिध्यतेइति॥तच्चिंत्यं॥भाष्यवार्तिकविरुद्धत्वात्॥अचःपरस्मिन्पूर्वविधौ॥परनिमि

तो अचि आदेशः स्थानिवत्स्यात्स्थानिभूतादचः पूर्वत्वेनयोदृष्टस्तस्यतस्माद्धूनिमित्तभूताद्धिधौकर्तव्ये ॥ वक्ष्य ॥ इहउरदित्यत्वस्यस्थानिवद्भावेननसंप्रसारणइतिनिषेधादूकारस्यनसंप्रसारणं ॥ नचपूर्वसूत्रेणगनार्थता ॥ अल्विधित्वात् ॥ नचपरनिमित्तत्वमसिद्धमितिवाच्यं ॥ अंगाधिकारस्थप्रत्ययनिमित्तकत्वात् ॥ नचप्राग्भ्यासविकारेभ्योंगाधिकारइतिवाच्यं ॥ आसप्तमाध्यायसमाप्तेरितिपक्षस्यसिद्धांतयिष्यमाणत्वात् ॥ पूर्वस्माद्धिधौयथा ॥ तन्वंति ॥ तन्वते ॥ इहयणादेशस्यस्थानिवद्भावान्नेट् ॥ तत्रहितन्इत्यंतंनिमित्तं ॥ तच्चउकारात्पूर्वमिति ॥ अचइतिकिं ॥ विभ्रः ॥ प्रभ्रः ॥ द्यूत्वा ॥ स्यूत्वा ॥ अभिगत्य ॥ तथाहि ॥ विभ्रःप्रभ्रइत्यत्रऋकारस्यशकारःपरनिमित्तकः तस्यस्थानिवद्भावाच्छेचेतितुक्प्राप्तः ॥ अचइतिवचनान्नभवति ॥ स्यादेतत् ॥ इहांतरंगत्वात्पूर्वमेवतुकाभाव्यं ॥ नचवार्णादांगंबलीयइतिशकारःस्यादितिवाच्यं ॥ यत्रह्येकमेवनिमित्तीकृत्ययुगपदंगवार्णयोःप्राप्तिस्तत्रवार्णादांगंबलीयः ॥ यथाकरोतेर्लिटिणलिकृअइतिस्थितेगोरित्यत्रसावकाशामचोञ्णितीतिवृद्धिंबाधित्वांतरंगत्वात्संप्रसारणंवृद्धिरेवबाधते ॥ प्रभ्रइत्यत्रतुशस्यनङ्निमित्तं ॥ तुकस्तुच्छः ॥ भिन्नकालाचानयोःप्राप्तिः ॥ ननुयत्रैकस्मिन्विषयेयुगपच्चप्राप्तिस्तत्रैवंपरीभाषेत्यत्रकिंप्रमाणमितिचेत् ॥ धर्मिग्राहकमेवेतिग्रहाण ॥ तथाहि ॥ अभ्यासस्यासवर्णेइतिसूत्रेअसवर्णग्रहणमस्याःपरिभाषायाःज्ञापकं ॥ एतच्चषष्ठेप्रथमाह्निकांतेभाष्येस्थितं ॥ तद्धिईषतुःऊषतुरित्यादिवारणायनोपयुज्यते ॥ अंतरंगेणसवर्णदीर्घेणतत्रयङ्वङोर्बाधात् ॥ तौहिअंगसंज्ञामभ्यासमपेक्षमाणौबहिरंगौ ॥ नचैवमप्यपवादत्वान्नावेवस्यातांइतिवाच्यं ॥ येननाप्राप्तिन्यायेनतयोर्यणंप्रत्येवापवादत्वात् ॥ नन्वियेषेत्यादौप्रवृत्तस्यापिगुणस्यइयायेत्यत्रप्रवृत्तायांद्वेश्वद्धिर्वचनेचीतिरूपानिदेशेनापहारोद्धित्वेचक्लृप्तेसवर्णदीर्घस्यापिप्राप्त्यासोपियेननाप्राप्तिन्यायेनइयङुवङ्भ्यांबाध्येतेतिचेत् ॥ तर्हिकृतेप्यसवर्णग्रहणेनिर्विषयतापत्तिः ॥ असवर्णग्रहणसामर्थ्यात्पुनर्गुणवृद्धीसवर्णदीर्घंबा

धित्वास्यातामितिचेत्॥ न॥ दृयर्न्नीत्यादौचरितार्थत्वात्॥ ननेवंसतिअसवर्णग्रहणंविनापिवेननाप्राप्तिन्यायेनदृयर्न्नीतियणोबाधनेसिद्धेत्नकुर्यादितिचेत्॥ तर्हिसामर्थ्यादियेषेत्यादौगुणादिप्रवृत्तिरितिफलितोर्थः॥ नथाचपुनरपिअसवर्णग्रहणंव्यर्थमेव॥ अर्न्नेभ्येतिसूत्रयित्वाभ्योरिति चानुवर्त्त्यअर्न्नेरिकारस्यलाघवादियडिविधयेअभ्यासस्येत्युक्तिसामर्थ्येनापिदृयेषेत्यादेःसुसाधत्वात्॥ नन्वर्न्नेरितिस्थितिपानिर्देशोअरियर्न्नीतियड्लुकीयड्नस्यादितिचेत्॥ नहीत्येवोच्यतां॥ इणोयणितिसाहचर्याच्चधातुग्रहणंभविष्यति॥ अंगेनउर्विशेषणाद्वा॥ तेनअर्त्तारमतिकर्त्तेरित्यर्न्नृभिरित्यादौनातिप्रसंगः॥ नन्वेवमपिदृयेषेत्यत्रेवईषदुरित्यत्रापिदृयड्स्यादितिचेत्॥ न॥ अंतरंगेणदीर्घेणबाधदृत्युक्तत्वात्॥ नचैवमपियेषेत्यत्रापितुल्यमितिवाच्यं॥ तत्रगुणसंभावनायांविनाशोन्मुखेननिमित्तेनदीर्घाप्रवर्त्तनात्॥ वक्ष्यतेहिसमर्थानांप्रथमादितिसूत्रेसमर्थग्रहणमकृतव्यूहाःपाणिनीयाइतिपरिभाषांज्ञापयतीति॥ अतएवसौत्थितिवैक्षमाणिरित्यत्रभाविन्याआदिवृद्ध्याअंतरंगस्यापिसवर्णदीर्घस्यनिमित्तविघातादप्रवृत्तिर्माभूदितिसातुत्थितिर्वायीक्षमाणिरित्य निष्टरूपंवारयितुंसमर्थग्रहणं॥ परिनिष्ठितत्वंचनत्रसमर्थशब्दस्यार्थः॥ कृतमपिनिवर्त्तयंतीतिवाज्ञाप्यतां॥ फलंतुतुल्यमेव॥ गौरवंपरमधिकंइतिदिक्॥ ततश्चदृयेषेत्यादौगुणेकृतेसवर्णदीर्घाप्राप्तौपणिप्राप्तेतस्यैवेयड्पवादः॥ ईषदुरित्यादौअंतरंगत्वान्नसवर्णदीर्घेणबाध्यतइतिअसवर्णग्रहणंअनर्थकंसत्ज्ञापकमेवोक्तपरिभाषायाः॥ ननुगुणेनकृतेनिमित्तविघातःअचःपरस्मिन्निति स्थानिवत्त्वेनसवर्णदीर्घप्राप्तेस्तदवस्थत्वादितिचेन्न। दीर्घस्यपूर्वपरविधित्वेननस्मिन्कर्त्तव्येस्थानिवत्त्वाभावात्॥ पूर्वस्यैवविधौसः॥ ननुपूर्वपरयोरितिविधिग्रहणाव्यावर्त्त्यनिरूपणावसरेउपपादयिष्यमाणत्वात्॥ सवर्णेयोविधिःसोपिसवर्णस्यविधिरितिनकर्त्तव्येप्युपदांतेतिनिषेधाच्च॥ एतेनासवर्णग्रहणेकृतेस्थानिवद्भावेनेयेषेत्यत्रेयड्नस्यात्॥ नचासवर्णग्रहणसामर्थ्योच्छ्रोतासवर्णमा

श्रितेति यङ्लुबन्तेताप्रतीतिचत्ववादितिवाच्यं॥ तथासतिपरिभाषाज्ञापनासंभवात्॥ इयर्तीत्येकप्रयोजनायहिउश्चेतिवक्तव्येऽभ्यासस्येतिवचन
सामर्थ्यादभ्रंलिहंतावियङुवङौणलीवअनुसिदीर्घमपिअविशेषाद्ध्येयानामितिनद्यारत्यैवासवर्णग्रहणस्यचरितार्थत्वादितिप्रत्युक्तं॥सवर्णेपरेन
भवतीतिप्रसज्यप्रतिषेधाश्रयणात्॥तत्रचोक्तरीत्यास्थानिवद्भावेप्रतिषिद्धेइयेषेत्यादौयणएवश्रास्थानदृपवादत्वेननिर्णीतयोरियङुवङोरं
तरंगेणदीर्घेणईषतुरित्यादौबाधसंभवात्॥साचज्ञाप्यमानासमानाश्रयेयुगपत्प्राप्तौचेत्येवंरूपविशेषविषयैवलक्ष्यानुरोधेनेतिश्रद्धाभावः॥
अतएवस्योनङितिमिवेरीणादिकेनप्रत्ययेवलोपापवादेऊठिचकृतेसिऊनङितिस्थितेनेतरंगत्वाद्यण् नत्वंगोप्युपधागुणः॥व्याश्रयत्वात्॥
नचोठंबाधित्वापरत्वाद्गुणःशंक्यः॥लघुभूनामिग्लक्षणामुपधामंगंचापेक्षमाणस्यगुणस्यबह्वपेक्षत्वेनबहिरंगत्वात्।एतच्चयेनविधिरि
तिसूत्रेकैयटेस्पष्टं॥वृत्तिकारोप्येवं॥प्रकृतमनुसरामः॥उक्तरीत्यानुकिकृतेशादेशः॥तथाचविश्रप्रश्नयोस्तकृञ्योयेनैवेतिनिर्दिष्टौय
त्वांतरमास्थेयं॥अचइत्यस्यप्रत्युदाहरणांतरंचेतिचेत्॥सत्यं॥अस्त्येवयत्वांतरं॥च्छ्वोरितिसनुकृनिर्देशस्यषष्ठभाष्यादेस्थितत्वात्॥स्थि
देतत्॥अकृतव्यूहाःपाणिनीयाःकृतेचानिवर्तयंतीतिपरिभाषाभ्यांविश्रप्रश्नयोःसिद्धौकिंसनुकृनिर्देशेन॥नचोक्तपरिभाषयोरनित्यत्वज्ञाप
नेनतत्कल्पे॥तेनचारक्षीत्तेतिसिद्धं॥अन्यथायस्यहलइतिभावितंलोपमालोच्यप्रागेवात्वंनक्रियते॥कृतेवानिवर्त्येनत्वकृत्तिकोऽनित्यत्व
कानित्यादौचाकृत्वनश्रूयेतेतिवाच्यं॥अदोजग्धिरितिसूत्रेत्यब्ग्रहणस्यप्रत्ययोत्तरपदयोरितिसूत्रेउत्तरपदग्रहणस्यचक्रमेणल्यबलुको
रंतरंगबाधकनाज्ञापनार्थंनयासिद्धांतग्रंथेषुप्रसिद्धस्यैवोक्तपरिभाषाहयानित्यत्वज्ञापकत्वसंभवात्॥अथनिर्युक्तिकःसिद्धांतप्रवादेनश्रद्धे
यःल्यबुत्तरपदयोरप्राप्तिविघ्यर्थत्वादकृतव्यूहपरिभाषावशात् अप्राप्तेःस्पष्टत्वादितिचेत्॥तर्हिमाभूत्ल्यबुत्तरपदग्रहावपि। अकृत

व्यूहपरिभाषयाऽनित्यत्वेऽकृतिप्रत्यापत्तिवचसएवज्ञापकत्वसंभवात्॥ मास्तुवातदपि॥केणः तोविलोपइत्यादिनिर्देशकरणेऽवश्यकरणात्
॥नथाहि॥कइसउइतिद्वयोःपदांतरप्रयुक्तेयणादेशेकृतेआद्गुणस्यनिमित्तविघातादकृतव्यूहाइतिन्यायेनगुणोनस्यात्॥नचासिद्धंबहि
रंगेअंतरंगबलीयइतिपरिभाषाभ्यांनिरस्तारः॥ इइइदमित्यादौकृतेपिदीर्घेनिमित्तविघातेनतत्रपचावेदंइत्यादौचसावकाशयोर्द्वयोरपि
परिभाषयोर्यैननाप्राप्तिन्यायेनाकृतव्यूहपरिभाषाबाध्यत्वात्॥ अन्यथोपेयुषोजग्मुषइत्याद्यसिनसिध्येत्॥एवंविश्नइत्यत्रगुणंनिषेद्धुंक्रियमाणंच
ङेर्ङिःत्वमेवाकृतव्यूहपरिभाषांज्ञापयेत्॥समर्थानामितिचमास्तु॥अतएवसमर्थःपदविधिरितिसूत्रेः कर्त्तव्यंचक्रियतेसमर्थानांप्रथमादितिभा
ष्यंसंगच्छते॥तस्मात्प्रत्यापत्तिसमर्थत्वेत्यबुत्तरपदग्रहाः॥सतुकृत्वंचपंचापिनकार्यीणीत्यवस्थितं॥अत्रोच्यते॥वार्णादांगंबलीयइतिपरिभा
षायाअनित्यत्वंज्ञापयितुंसतुकृग्रहः॥तथाहि॥समानाश्रयेइतिप्राच्योंयंथाननुसृत्यप्रागुक्तंनतुस्रोदृसमं॥व्याश्रयेष्वपिबहुधातत्स्वीकारात्॥त
थाचैकेयतेनासिद्धवत्सूत्रेश्नइत्यत्रवार्णादांगबलीयस्त्वात्पूर्वैकादेशंबाधित्वाःस्रोपउक्तः॥नचतत्रोभयोरकारांशेसमानाश्रयत्वंअस्त्येवेतिवा
च्यं॥विश्वःस्योनइत्यत्रापिह्रस्वकारेकारांशसाम्येनव्याश्रयत्वोपन्यासविरोधात्॥किंच॥अंगस्य॥आद्धीनद्योः॥शीङोरुट्॥अचःपरस्मिन्॥ऐनविधि
॥उपेयिवाननाश्वान्॥अडजादीनां॥अजादेर्द्वितीयस्य॥अदसऔसुलोपश्च॥सार्वधातुकमपित्॥उपसर्गादसमासेऽपिणोपदेशस्य॥तुह्योस्तातङाशिष्यन्यतरस्यां॥
इत्यादिसूत्रेषुकैयटहरदत्तादिसकलग्रंथाःसमानाश्रयतांक्वचिदादृत्यक्वचिदनादृत्यप्रवृत्ताइतिस्पष्टमेवसिद्धांतपरिशीलनशालिनां॥षाष्ठंभाष्ये
प्रथमान्हिकांतेवार्णादांगमितिपरिभाषायाःप्रयोजनान्यपिव्याश्रयसाधारणान्येव॥तस्माद्बहिरंगपरिभाषाःकृतव्यूहपरिभाषयोरिववार्णादांगमि
त्यस्याअपिअनित्यत्वमेवशरणं॥तच्चसतुकृग्रहेणज्ञाप्यते॥नचपरस्मिन्पूर्वविधावपिस्थानिवद्भावेनतुकंवारयितुंसः॥अन्यार्थतयाःवश्य

कर्त्तव्येनाचरित्यनेनगतार्थत्वात्॥एवंचान्यार्थनिरूप्यमाणंसतुकृग्रहणं अकृतव्यूहादित्यस्याप्यनित्यताकामंज्ञापयतु॥प्रकृतसूत्रेविभ्रडितिप्रत्युदाहरणंतुयथाश्रुतमेवेत्या॥एवंस्थितेनडोडित्वस्यगुणनिषेधेचरितार्थत्वात् अकृतव्यूहपरिभाषायांज्ञापकांतरमास्थेयं॥तच्चप्रत्ययवचनंउत्तरपदग्रहणंसमर्थग्रहणंवा॥तेभ्योलघुत्वात्स्वरूपग्रहणमेवेतिनुनिष्कर्षः॥आचारक्विबंतार्थप्रत्ययग्रहणंनवममादिबाधनार्थंअप्राप्तावेध्यर्थंचोत्तरपदग्रहणमितिहिस्थास्थिमपर्यंतानुवृत्तिरेवज्ञापिकेतिहरदत्तोत्प्रेक्षातुअंतरंगस्यापवादबाध्यत्वाद्युक्तेतिसत्तमेवस्थिते॥एवंचपामादयंतर्गणसूत्रेविभ्वगित्युत्तरपदलोपश्चाकृतसंधेरित्यत्राकृतसंधिग्रहणमप्यनावश्यकं॥वीक्षमाणादिभ्यःकृतसंधिभ्यएवनद्धितादितिसृष्टीकरणार्थंवास्तु॥एवंस्त्रियाःपुंवदितिसूत्रेनत्वेषापरिभाषामर्षत्राश्रीयतेइतिकैयटःसमीचीनएव॥आभात्सूत्रस्थकैयटस्तुनिमित्तापायपरिभाषामाश्यासंमतेत्येवंरूपआपाततः॥क्ङोःस्थूलसूत्रेनहीदंचनंनापिन्यायइत्येवंरूपोहरदत्तग्रंथोप्यापातनएव॥समर्थानामितिसूत्रेपरिभाषापरिष्कारस्यस्वयमेवकृतत्वात्॥अथवाउक्तपरिभाषयोर्मध्येकृतव्यूहपरिभाषैवलाघवादादर्तव्यानतुकृतमपीति॥गौरवादित्येवंप्रतयाकथंचित्ग्रंथोनेयः॥फलंतुनिर्विवादं॥रूपकांतराणामपिसुलभत्वात्॥तद्यथा॥चावितिसूत्रंदीर्घविधिदिहज्ञापकं॥अंतरंगेहियणिकृतेप्रतीचइत्यादौकथंदीर्घस्यविषयलाभः॥लौकिकन्यायोषीहसुवचः॥लोकेहिनिमित्तमुभयविधमपिदृष्टं॥कार्यस्यस्थितौनियामकंतदनियामकंच॥आद्यंयथान्यायनयेपेक्षाबुद्धिर्जन्यशेनहित्वनाशाभ्युपगमात्॥तथावेदांतनयेप्रारब्धस्यविरोधेपस्थितिनियामकत्वंउपाधेःस्फटिकलौहित्यादिस्थितिनियामकत्वंचप्रसिद्धमेव॥हितीयंतुदंडादि॥तन्नाशेपिघटनाशादर्शनात्॥एवंस्थितेलक्ष्यानुरोधेनेहापिद्वैविध्यंकथंनभवेत्॥तथाचन्यायलक्षणांतरेणनिमित्तेविनश्यतेनाशावनित्यइत्यस्यक्वचिदाश्रयणंक्वचिन्नेत्येवंरूपेसिद्धांतेलौकिकद्विविधव्यवहारउपष्टंभकत्वेनोदाहृतःकैयटादिभिः॥वालिसुग्रीवयोर्युध्यमा

नयोर्भ॥ वतावालिनिहतेपिनसुग्रीवस्यवालितःप्रावल्यंव्यवहरंति॥ भगवत्सहायैःपांडवैर्जीयेरुव्येपिगोडवानांप्राबल्यंव्यवहरंतिचेतीतिदिक्॥स्यादेतत्॥यदि ङ्ङौ तिसतुक्कनिर्देशस्तर्हिराल्लोपेनस्यैवानुवृत्तिःस्यात्॥तथाचहूःहौहरइत्यत्रलोपोनस्यात्॥वितुक्कत्वात्॥नचानुवृत्तिसामर्थ्यात्तुकंविनैवतत्रगृह्यतां॥गोधोहिंसायांइत्यत्रानङित्यनुवृत्तेपिअवर्णइवेतिवाच्यम्॥ वकारमात्रान्वयस्यापिसुवचत्वात्॥यत्तुसतुक्कवितुक्कौहावश्रीङ्निर्दिश्येतेइति।तन्न॥समाहारद्वंद्वेरेकवचनापत्तेः इतरेतरयोगेबहुवचनापत्तेः॥ङकारयोःसमासंकृत्वावकारेणेतरेतरयोगंहंकरिष्यामइतिचेत्॥नासिमाहारेऽचप्रसंगात्॥यथासंख्यासंभवापत्तेश्च॥अत्रोच्यते॥ङकारवकारयोःसमाहारंद्वंद्वंकृत्वेङकारांतरस्यद्वंद्वांतरमस्तु॥आदेशेपिशदूयप्रश्लेषःतथाचांतरतम्याद्यथासंख्यन्यायाच्चेष्टसिद्धं॥अस्तुवासतुक्कस्यैवनिर्देशः॥राल्लोपेतुसामर्थ्यात्केवलस्यान्वयः॥नध्यारभ्यतिनत्वनिषेधाल्लिंगाच्च॥मूर्न्नइत्यत्रहिङ्ङलोपंविनानत्वप्राप्तिरेवनसंभवति॥एवंमूर्न्नौघनःद्वमूर्निस्पर्शयोःश्यइत्यादिनिर्देशाअपिसंगच्छंतेइतिदिक्॥अस्मिन्पक्षेअचइत्यस्यप्रत्युदाहरणंतुघूत्वास्यूत्तेति॥अत्रहिऊठःस्थानिकत्वाद्यण्नस्यात्॥ननुस्वाश्रयमचत्वंभविष्यति॥अतिदेशानांस्वाश्रयकार्यानिवर्त्तकत्वादितिचेत्॥न॥विधिग्रहणप्रयोजनकथनावसरेऽहसूत्रेस्वाश्रयनिवृत्तेःसिद्धांतयिष्यमाणत्वात्॥नन्वेवमपियोश्रयण्विधावाश्रीयतेअचनासावादेशः॥यस्यादेशःऊडिति समुदायःनासौयण्विधौनिमित्तमितिचेत्॥न॥अनुबंधानामनेकांतत्वेप्युच्चरितप्रध्वंसितयाऽकारस्यैवादेशत्वात्॥वनिनिर्देशाद्भावोपिअतिदिश्यतेइतिवक्ष्यमाणत्वाच्च॥एवमभिगत्येत्यपिप्रत्युदाहरणं॥अत्रत्यनुनासिकलोपःपरनिमित्तकःतस्यस्थानिवद्भावाद्धस्वस्यपितिकृतीतितुङ्नप्राप्नोति॥अथपरस्मिन्निति किमर्थं॥युक्जानिः॥अत्रजायायानिङःस्थानिवद्भावाद्यलोपोनप्राप्नोतिस्वाश्रयनिवृत्तिरभावानिदेशस्यवस्यतइतिन्युक्तमेव॥किंच॥व्याघ्रस्येवपादावस्यव्याघ्रपाद्पादस्यलोपोऽहस्यादिभ्यःइत्यपरनिमित्तको

लोपः नतोगर्गादित्याद्यञ्॥वैयाघ्रपद्यः॥लोपस्यस्थानि वद्भावात्सदःपदितिपद्भावोनस्यात्॥वचनसामर्थ्याद्भविष्यतिइतिचेत्पादौ
नेत्यादौअतिप्रसंगः॥किंच॥पादशतस्येतिलोपवचनसामर्थ्यात्स्थानिवद्भावाप्रवृत्तौसत्यांहिपदिकेत्यादौपद्भाववचनंचरितार्थं
मितिकृतस्यसामर्थ्ये॥परस्मिन्निितिकृतेतुवैयाघ्रपद्यइत्यादौपद्भावस्यचरितार्थतयापादेनेत्यादौएकादेशस्यस्थानिवद्भावात्पद्भावोने
ति स्थितं॥नन्वेकादेशोनाचःकिंत्वचोःतत्कथंस्थानिवत्वमितिचेत् न॥वर्णनिर्देशेजातिग्रहणात्॥अतएवश्रायसौ॥गौमतौ॥चातुरौ॥
आनडुहोदित्यादिसिध्यति॥श्रेयसोपत्यमित्यण्॥देविकाशिंशपादित्यवाडुदीर्घसत्रश्रेयसामित्याकारादेशः॥ननश्चतुर्भ्योष्यणंतेभ्य
औमत्यपेरकादेशस्यादिवत्वात्प्राप्तौनुमामौनभवतः॥तथाउदवाहे॥उदकंवहतीतिकर्मण्यण्॥संज्ञायामुदभावः॥ततोऽत्रैएकादेश
स्यादिवत्वाद्धत्वेसतिप्राप्तोषाहऊण्नभवति॥॥पूर्वविधाविितिकिं॥नैधेयः॥निपूर्वाद्धान्नउपसर्गेघोःकिः॥आतोलोपः॥ह्यचः॥दृतस्त्रानि
त्रः॥इतिठक्॥आकारलोपस्यस्थानिवत्वेतुसतिञ्यङ्कत्वव्यपदेशेनद्यङ्कत्वेविरुद्धत्वाद्धाध्येत॥नहित्रिपुंत्रोहिपुत्रव्यपदेशंलभते॥नन्वे
वमपिविधिग्रहणंमास्तु॥पूर्वस्येतिषष्ठ्याकार्यंकर्त्तव्येइत्यर्थस्यासंशब्दत्वादितिचेत्॥न॥पूर्वस्यविधिः॥पूर्वस्माद्धिधिरितिसमास
द्वयलाभार्थंविधिग्रहणात्॥पंचमीसमासेउदाहरणंतुनन्वंतीत्युक्तमेव॥स्यादेतत्॥यदिपंचमीसमासोपीष्टस्तर्हिविगण्येत्यादिसिध्यति॥ल्यपिलघुपूर्वादित्यत्रदेशेकर्त्तव्येअल्लोपस्यस्थानिवद्भावात्॥नचारंभसामर्थ्यं॥अनुगमय्येत्यादौमित्संज्ञाचरितार्थत्वात्॥
अत्रोच्यते॥पूर्वस्माद्धिधौस्थानिवत्वमनित्यं॥निष्ठायांसेटीतिज्ञापकात्॥तथाहि॥तत्रसेटीतिपदंनानुवर्तनिष्ट्यार्थं॥णिजन्तात्त
संभवात्॥ननमंज्ञपितःपशुरित्यत्रयस्यविभाषेतिङ्णिनिषेधःसंभवत्येव॥सनीवंतेतिविकल्पितेट्कृत्वादितिचेत्॥न॥यस्यविभाषेत्यत्रे

कात्वइत्यनुवृत्तेः॥ अन्यथादरिद्रितइतीण्नस्यात्तस्मात्कालावधारणार्थमेङ्ग्रहणं॥ इतिकृतेणिलोपोनतुतत्रः प्रागिति॥ अन्यथाकाण्चिमित्या
दौणिलोपेकृतेएकाचउपदेशइतीण्निषेधःस्यादितिसेटीतिवदतोभावः॥ पूर्वस्माद्धौस्थानिवत्त्वेतुनप्राप्तएवनिषेधः॥ णिच्चाव्यवधानात्॥ त
स्मात्सेदग्रहणमनित्यमज्ञापयतीतिस्थितम्॥ तथाचाष्टमेअन्तइतिसूत्रेहरदत्तः॥ अनित्यःपूर्वस्माद्धौस्थानिवद्भावः॥ निष्ठायांसेटीतिसेड
ग्रहणात्॥ एतच्चस्थानिवद्भावप्रकरणएवव्याख्यातमिति॥ यद्यपीहप्रकरणेस्वयंनव्याख्यातंतथापिन्यासकारादिभिर्व्याख्यातमिति॥ इत्यलं
यस्यार्थः लेखकप्रमादाद्ग्रंथभ्रंशोवाकल्प्यः॥ एतेनओःपुयणितिसूत्रेयदत्रवक्तव्यंतद्विवचनेचीत्यत्रैवोक्तमितिअपिहरदत्तग्रंथोव्याख्यातः
॥ तथाचवस्वेकाचूसूत्रेकैय्यटः॥ पूर्वस्मादपिविधावित्येतदनित्यमिति॥ माधवाचार्यस्तु॥ परिव्रढय्यगतइत्यत्रासिद्धतामुद्भाव्यव्याश्र
यत्वात्तांपरित्यत्यपूर्वस्माद्धीत्यनिवत्त्वमाशंक्यप्रबेभिदित्यप्रस्तुतन्यायेत्यादिभाष्योदाहरणबलेनसमाद्धुः॥ यद्वा॥ ल्यपिलघुपूर्वादि
त्यनेनसामर्थ्यादन्यपदार्थस्यवर्णस्यापेक्षायांवर्णग्रहणेजातियहणाद्व्यवधानेपिनदोषइति॥ केचित्तुपंचमीसमासदृहमास्तु॥ प्रयोजना
भावात्॥ तथाहि॥ बेभिदिना॥ माथितिकः॥ अपीपचन्इतिप्रयोजनत्रयंभाष्येउक्तं॥ तत्रबेभिदितेतितावत्अन्यथासिद्धं॥ एकाचउपदेश
इत्यत्रविहितविशेषणाश्रयणात्॥ माथितिकेपिमथितंपण्यमस्येतिविग्रहेतद्धितस्यपण्यमितिठकितस्येकादेशेपस्येतिचेत्यलोपेकृतेइ
सुसुक्तांतादितिकादेशोनभविष्यति॥ अनल्विधावितिनिषेधेनस्थानिवद्भावासंभवात्॥ ठस्येकइत्यत्रस्थान्यादेशयोरकारस्यउच्चारणा
र्थतयावर्णमात्रस्थानित्वात्॥ अस्तुवास्थान्यादेश्नयोरकारस्यविवक्षा॥ नचैवमनल्विधित्वात्कादेशप्रसंगः॥ सन्निपातपरिभाषयासमाधा
नात्॥ नचापीपचन्नित्युदाहरणं॥ इहहिअंतेरकारस्यचडकारस्यचांतोगुणइतिपररूपत्वेतस्यपरंत्रत्यादिवद्भावात् स्त्रियहणेनग्रहणे

सतिसिजभ्यस्तेतिजुस्प्राप्तः णिलोपस्यैकादेशस्यवास्थानिवद्भावान्नभवतीतिवाच्यं॥ वेत्तेहिलङ्ग्रहणेवानंतरोझिः संभवतीतितत्साहचर्यादभ्यस्ताद्पिलङ.एवझेर्जुस्विधानात्॥ नचैसचासाहचर्यात्लुङोपिग्रहणमस्त्वितिवाच्यं॥ विप्रतिषेधेपरमितिपरसाहचर्यस्यबलीयस्त्वादिति॥ अतएवभवतेर्यङ्लुङंतालुङि.अबोभूवन्नितिमाधवः॥ पंचमीसमासप्रयोजननयाअपीपचन्नित्युदाहरतोभगवतस्तुनेहसाहचर्यंनियामकतयासंमतं॥ रुत्वोर्थग्रहणाद्ज्ञापकात्साहचर्यंनसर्वत्राश्रीयतइत्युक्तं दीधीवेवीटामितिसूत्रे॥ तस्माद्यङ्लुकिभुवोलुङिजुसेवोचितः॥ आतइतिनियमस्यसिचःपरत्वमाश्रित्ययोजुस्प्राप्तःतन्मात्रपरतायामाधवेनैवोक्तत्वात् अभ्यस्ताश्रयस्यजुसोदुर्वारत्वात्॥ यदितुलाघवादात्त इतिनियमः सामान्यापेक्षस्तदाजुसभावेऽभ्यस्तादित्यत्॥ तथाचावोभूवुरवोभूवदितिपक्षभेदेनरूपंलभ्यते॥ नित्यत्वेनबुकोगुणबाधकत्वात्॥ माधवोदात्ततमवोभूवन्नितितुचिंत्यमेव॥ अंत्यादेशस्यदुर्लभत्वात्॥ अपीपचन्नित्येनत्सिद्धेचपंचमीसमासआश्रयणीयः॥ विगणय्येत्यादौअतिप्रसंगस्यतुपूर्वोक्तएवोद्धाराःस्मर्तव्याः इतियुक्तमन्यथाः॥ ननुपंचमीसमासोमास्कृदंतिवदेवामतेतन्वंतीत्यत्रेदृस्यादितिकुतोनोज्ञापितमितिचेत्॥ न॥ बहिरंगस्ययणीसिद्धत्वात्॥ नचनोजानंतर्यइतिनिषेधः॥ अनंतरेकार्यविधौयत्रचिआनंतर्यइतिकैयटेनाभ्युपगमात्॥ कथंतर्हिपंचमीसमासोदाहरणंपाणिनीयमितिचेत्॥ हरदत्तमतेनेत्यवेहि॥ महियद्यंतरंगेबहिरंगेवाअचोरानंतर्यमितिव्याख्यात्॥ नन्वेवंनपदांतसूत्रेद्ध्यत्रेतिवृत्तिमुपादायस्थानिवद्भावप्रतिषेधसामर्थ्याद्बहिरंगपरिभाषेनप्रवर्त्तेतेइतिमिश्रोक्तिर्विरुध्यते॥ बहिरंगेयणिअचोरांश्रयणेननाजानंतर्यइतिनिषेधादेवपरिभाषायाअप्रवृत्तेः॥ किंच॥ संयोगांतस्यलोपइतिसूत्रेअसिद्धंबहिरंगमितिपरिभाषामाश्रित्यक्रियमाणंयणःप्रतिषेधइतिवार्त्तिकस्यप्रत्याख्यानमपिविरुध्येत॥ अपिच्चाणिणि

तिसूत्रेउरण्परइतिपरेणचेत्कर्त्तव्यमित्यत्रेफद्वयंश्रूयेतेत्युक्तंतदपिविरुध्येत॥ रोरीतिलोपसंभवात्॥असिद्धपरिभाषायाश्चोक्तत्वात्॥ षेधात्॥किंच॥नधातुलोपसूत्रेप्रेङ्मित्यत्रभाष्येणसंयोगांतस्येत्यत्रयणइत्यस्यप्रत्याख्यानभाष्येणापिविरोधः॥किंच॥एतेएइत्यत्र पचावेदमित्यादौअतिप्रसंगमाशंक्यबहिरंगतयास्वकृतंसमाधानमपिभज्येतेतिदिक्॥ तस्माद्धरदत्तकृताव्याख्यापूर्वापरस्वयं ष्येणचविरुद्धेतिचेत्॥सत्यं॥अतएवेमांव्याख्यांनधातुलोपसूत्रएवानुपादेयामवोचाम॥ केणइत्यादिज्ञापकान्नाजानंतर्यइत्यस्यानि त्यनाम्नीत्यवाक्यंचित्समर्थनीयं॥स्यादेतत्॥कैयटमतेपिअचोरितिहित्वंविवक्षितंनव॥आद्येमूलभूतज्ञापकविरोधः॥नहिको सिच्कोस्येत्यादावनंतरेषत्वविधावचोराश्रयणं॥द्वितीयेतुमूलभूतंज्ञापकंसंभवेत्॥यदीणग्रहणंपूर्वेणस्यात्॥तत्तुपरेणेवेतिस्थितं॥ अथपरेणेणग्रहणेहलोपिकेसिद्धंतर्भवंतुनाम॥ अजानंतर्यंतुनगतमित्याशयः॥ तर्ह्यस्त्वकथंचिज्ज्ञापकनिर्वाहः॥ अयजइंद्रंरसइंद्रं इत्यादौपरत्वात्सवर्णदीर्घस्तुदुर्वारएव॥नह्यत्रासिद्धंबहिरंगमितिप्राप्नोति॥नाजानंतर्यइतिनिषेधात्॥नन्वंतरंगंबलवदितिपरिभाषांत रेणेदंसिद्ध्यति॥तथाचविप्रतिषेधसूत्रेअंतरंगंचेत्युपक्रम्यइण्डिःशीनामाक्रुणःसवर्णदीर्घादितिप्रयोजनंपठितमितिचेत्॥सत्यंपठितं॥ किंतुबहूनमप्रयोजनानिपठित्वाअसिद्धपरिभाषयैवगतार्थत्वान्नेयंकर्त्तव्येत्युपसंहृतं॥एतेनप्रकृतसूत्रेपद्व्यामृद्येत्युदाहरणदूषण प्रस्तावेःसिद्धपरिभाषांभाष्यकारैरुदाहृतामंतरंगंबलीयइत्येतदुपलक्षणतयाव्याचक्षाणोपिकैयटःप्रत्युक्तः॥विप्रतिषेधसूत्रस्थंभा ष्यविरोधात्॥तस्मादिहसिद्धंततत्वेअन्यदेववक्तव्यंइति॥उच्यते॥अंतरंगपरिभाषायानिरपवादत्वादसिद्धपरिभाषायास्तुनाजानंत र्यइतिसापवादत्वादुभयोरावश्यकता॥विप्रतिषेधसूत्रस्थंभाष्यंतुअभ्युच्चयपरमेवेतिभागवृत्तिकाराः॥कैयटलघुविवरणादयोप्येवं

॥ वृद्धिरेचि पदान्तस्य ॥ नाजानंतर्यदृतिपरिभाषाभ्यास्क ॥ तज्ज्ञापकन्यायसंमतंनेनासिद्धपरिभाषायाअनित्यत्वमेवज्ञाप्यतेइत्याहुः अस्मिंश्चपक्षेविप्रतिषेधसूत्रस्थंनाजानंतर्यइतिभाष्यमपिअनित्यत्वपरतयाभंक्ष्यतेनेयं ॥ अन्यथाहितत्रैवांतरंगंबलीयइत्यस्यप्रत्याख्यानंविरुध्येत ॥ अतएववृत्तौनलोपः सुप्स्वरेत्यत्रवृत्रहभ्यामित्यत्रनलोपस्यासिद्धत्वात् ॥ ह्रस्वस्येतितुकृत्येत्युपक्रम्यसंनिपातबहिरंगपरिभाषाभ्यांगनार्थतामाशंक्यपरिभाषाद्वयस्याप्यनित्यतांज्ञापयितुंतुकृग्रहणमित्युक्तं ॥ अतएवतत्रभिश्चैरप्युक्तं ॥ बहिरंगपरिभाषायाअनित्यत्वात् यासेत्यत्रबहिरंगमपित्यदाद्यत्वमंतरंगेटापिनासिद्धमिति ॥ तथाचप्रतिदीव्नइत्यादिसिद्ध्येप्यसिद्धपरिभाषायाअनित्यत्वंस्वीकृतं ॥ अतएवचास्द्यूरित्यत्रयलोपेकार्येऊठ्नासिद्धइतिदिक् ॥ एतदपवादस्त्राङ्गतव्यूहादित्यादिः ॥ उत्सर्गापवादयोर्ह्यो रप्यनित्यत्वेस्थितेलस्यानुरोधएवव्यवस्थाहेतुरितिसर्वमुस्थं ॥ स्यादेतत् ॥ पूर्वस्येतिसंबंधसामान्येषष्ठी ॥ संबंधश्चद्विविधः ॥ कार्यित्वेननिमित्तत्वेनवा ॥ एवंचविधिग्रहणंविनैवसमासद्वयस्यफलंलब्धंविधिग्रहणेसत्यपिहिपूर्वस्यनिमित्तत्वेनाश्रिताद्तिव्यारब्धेयमेव ॥ अन्यथाहेगैरित्यत्रगकारात्परस्यविधौवृद्धेःस्थानिवद्भावादेङ्ह्रस्वादितिसंबुद्धिलोपःस्यात् ॥ सत्यं ॥ विधिग्रहणंयोगविभागार्थं ॥ तेनपूर्वस्यविधौस्थानिवदेवेतिनियमात्त्वाश्रयंव्यावर्त्यते ॥ यद्वा ॥ मास्कयोगविभागः ॥ विधिग्रहणसामर्थ्याद्विधिमात्रेस्थानिवद्भावोभविष्यति ॥ शास्त्रीयेशास्त्रीयेच ॥ तेनपटयतीत्यादौवृध्यभावोशास्त्रीयोपिसिध्यति ॥ नन्वेवमपिपूर्वेसूत्रेवविधिग्रहणमनुवर्तयिष्यते ॥ सत्यं ॥ पुनर्विधिग्रहणात्द्वितीयोनियमःक्रियते ॥ पूर्वस्यैववविधौस्थानिवन्नतुपूर्वपरयोर्विधाविति ॥ तेनदेयनुरित्यिसिध्यति ॥ अन्यथाहिदृणोतुसिद्विर्वचनेचीनियणादेशास्यस्थानिरूपानिदेशाद्वित्वेकृतेह्रस्वकालेयणोपहारात्पुनःप्रवृत्तिर्वेत्याश्रयत्वेनवार्णादांगबलीयइत्य

स्मिन्नप्रवृत्तेवर्णमात्राश्रयत्वेनांतरंगत्वात्सवर्णदीर्घस्यात्॥ नचाकृतव्यूहादृनियणिति वाच्यम्॥ निमित्तविघातानाभावात्॥ कृतेपियणिस्थानिवत्वे नसवर्णदीर्घशास्तेः॥ ततश्चसवर्णदीर्घकृतेनादिर्ञिटुडवश्चेत्यनेनाभ्यासग्रहणेनग्रहात्अभ्यासह्रस्वत्वेदीर्घदृणः किनीतिदीर्घत्वेकृतेदीर्घविधानसामर्थ्यादिणो यणभावेईअ ुरितिस्यात्॥ सिद्धांतेतुपूर्वपरयोर्विधौस्थानिवत्वाभावान्निमित्तविघातेनाकृतव्यूहपरिभाषयेणो यणिसिद्धरूपंग्रह्य॥ स्थानिवदितिवतिवलेनाभावोप्यतिदिश्यते॥ उत्तरसूत्रेहिर्वचनादिग्रहणाल्लिंगात्॥ विधिग्रहणंतुपूर्वस्यैवनतुपूर्वपरयोरितिएतदर्थमितिदिक्॥ ह्रस्वस्यान्यादेशनिमित्तानांत्रयाणांसन्निधानाविशेषेपिस्थान्यपेक्षमेवपूर्वत्वंगृह्यतेननुआदेशापेक्षंनिमित्तापेक्षंवा॥ वैयाकरणदृत्यत्रआयादेशापत्तेः॥ तदुक्तं॥ अचःपूर्वत्वविज्ञानादैचोःसिद्धमिति॥ नन्वेवंसमाद्येत्यत्रजग्ध्यादेशप्रसंगः॥ ष्णक्ङीषावितिपूर्वविप्रतिषेधेनणिलोपेकृते ततःप्रत्ययलक्षणेनङीसत्यामिकदेशविकृतस्यानन्यतयाऽदिग्रहणेनग्रहणात्॥ एवंघात्यादित्यत्रवधादेशप्रसंगइतिचेत्॥ न॥ आदिघात्योरपिस्थानिह्यराऽनादिष्टादचःपूर्वत्वात्॥ ननुस्थानिनःपूर्वत्वेपिआदेशस्यकिमायातं॥ नह्यनादिष्टादचःपूर्वत्वेनामशास्त्रीयंकार्यं॥ यत्स्थानिवदादेशइतिपूर्वसूत्रेणानिदिश्येतेतिचेत्॥ न॥ अनादिष्टादचःपूर्वत्वमुपजीव्यअचःपरस्मिन्नितिशास्त्रेप्रवर्तयिष्यतेस्थानिवदादेशइत्यस्यप्रवृत्तिसेभवात्॥ तथाचाचःपरस्मिन्नितिअतिदेशएवशास्त्रीयंकार्यंतच्चपूर्वसूत्रेणातिदिश्यतइतिफलितोर्थः॥ अतएवनपदांतसूत्रेसवर्णग्रहणंकृतं॥ अन्यथाम्रसोरल्लोपेकृतेपम्भ्याङ्भवन्ननुस्वारोनानादिष्टादचःपूर्वइतितस्यविधौस्थानिवद्भावविरहात्सवर्णग्रहणंव्यर्थमेवस्यात्॥ नन्वेवंसत्रियकंडूनिरितिनसिध्यति॥ तथाहि॥ कंडूयतेःक्विचिअल्लोपयलोपयोःकृतयोरल्लोपस्यस्थानिवत्वेनोवङिःकृतेऊकारस्यानादिष्टादचःपूर्वस्यस्थानेजातस्योवङःस्थानिवदादेशइतिस्थानिवद्भावेनानादिष्टादचःपूर्वत्वादचःपरस्मिन्नितिस्थानिवत्वेनाकारेण

व्यवायादङ्भावेनस्थानिवत्वादेवलोपोव्योर्वलीतिवलोपाभावेनहलिचेतिदीर्घेकृतेकंडूयतिरितिप्राप्नोति॥यत्तुयःस्थानिद्वारापूर्वउवङ्नत
स्योदकस्यतर्हिवकारस्ययस्यचोठ्वकारस्यनसंस्थानिद्वारापूर्वइति॥तन्न॥तेस्कुरितिवत्कंडूइत्यस्यकंडुवूइतिआदेशात्॥तस्यचकंडु
ऊइत्यादेशेकर्त्तव्येस्थानिवद्भावावश्यंभावात्॥उक्तंहि॥सर्वेसर्वपदादेशाइति॥अन्यथानिरोद्यद्यात्यादित्यादावपिस्थानिवद्भावोनस्यात्
मूलशैथिल्यापत्तेरिति॥अत्रोच्यते॥अनादिष्टादचःपूर्वतायाःस्थानिद्वारकत्वमनित्यं॥नपदांतसूत्रे कंडूतिरितिभाष्योदाहरणाज्ज्ञाप
कात्॥ओःसुपसर्गेकइतिसूत्रेकविधौसर्वत्रप्रसारणिभ्योऽइतिवार्त्तिकस्यतत्प्रघट्टकभाष्यस्यचपर्यालोचनयाप्येवमेवलभ्यते॥तथाचत
त्रभाष्यं॥यैरनादिष्टादचःपूर्वैस्तत्कार्येस्थानिवत्वंहीति॥स्थानिद्वारकेतुपूर्वत्वेगृह्यमाणेसंपूर्णःप्रघट्टकएवासंगतःस्यादितितत्रैवस्फुटी
करिष्यते॥तत्रकैयटस्त्वापातेतत्॥एतेनतितउमाचष्टेतित्तापयतीति हरदत्तग्रंथोपिव्याख्यातःतत्रहिणोदिलोपेकृतेतस्यस्थानिवत्वादचो
ञ्णितीतिवृध्यभावेपिअतउपधायाइतिवृद्धौआकारेकृतेतस्यस्थानिद्वाराउकारात्पूर्वत्वेनपुगिकेथावकारलोपस्यस्थानिवत्वात्युङ्नप्रा
प्नोति॥नचयस्यपुगःआकारांतस्यनासौपूर्वःपश्चपूर्वआकारोनतस्यपुगितिवाच्यम्॥एकदेशविकृतस्यानन्यतयासर्वेसर्वपदादेशाइत्यु
क्तौस्कचाकारांतस्यापिपूर्वत्वानपायात्॥तस्मात्स्थानिद्वारकंपूर्वत्वमनित्यमित्येवहरदत्तस्यशरणं॥अत्रकेचित्॥तितापयतीत्यस्यापा
ध्वेव॥तथाहि॥तितउणिचइतिस्थितेटिलोपश्चप्राप्नोत्यतउपधायाइतिवृद्धिश्च॥उभयोर्नित्ययोःपरत्वाद्वृद्धिः॥ततष्टिलोपेकृतेस्वरएवाना
दिष्टादचःपूर्वमादंतंभवतुस्थानिद्वारेतिपुङ्नप्राप्नोति॥तस्माद्ढपिणिचोगुणेकृतेण्विवृद्धावाद्यादेशेतिनायतीतिभवति॥नचतितापयिषति
तिस्थितेअंतरंगत्वादाद्गुणेशाप्यादेशेतिनयतीतिस्यादितिवाच्यं॥शापेहिगुणेसतिवृद्धिरचीतिबाधेनाङ्गुणस्यनिमित्तविघातस्योन्मत्त्व

मानतयाकृतव्यूहपरिभाषयापूर्वमंतरंगस्यापिआदुणस्याप्रवृत्तेः॥अकृतव्यूहपरिभाषाह्यंतरंगपरिभाषाया अपवादइत्युक्तं॥नन्वपिगुणस्याचःपरस्मिन्निनिस्थानिवत्वादादुणस्यननिमित्तविघातइतिवाच्यं॥पूर्वस्यैवविधौस्थानिवद्भावोननुपूर्वपरयोर्विधावित्युक्तत्वात्॥तत्स्मात्तितायतीत्येवसाधु॥ननुतितयतितितापयतीतिवा॥चङिःतुतिताणिचूचङ्निपूइतिस्थितेननोतेर्डउःसन्वच्चेतिव्युत्पत्तिपक्षेऽभ्यासस्येतिहित्वनिषेधेटिलोपस्यचङ्परनिर्ह्रासेस्थानिवत्वनिषेधात्हस्वाभावेणिलोपेतस्यस्थानिवत्त्वारसिद्धत्वाद्ह्रस्वोतोलोपाभावेस्पर्वविधिंप्रतिस्थानिवत्वनिषेधात्सवर्णदीर्घेतितादितिभवतिनत्वतितापदितिं॥अत्रेदंवक्तव्यं॥परत्वाद्वृद्धिरित्यसंगतेर्नित्यत्वेनटिलोपात्॥नचवृद्धिर्नित्याअचःपरस्मिन्निति कार्यातिदेशेनवृद्धिप्राप्तावपिलक्षणांतरेणप्राप्नुवन्ननित्यइतिन्यायेनानित्यत्वात्॥एवंचहरदत्तोक्तिःसुष्ठ्वेव॥किंतुअनित्यत्वेपिस्थानिद्वारकंपूर्वत्वमिहनेष्यतेइत्यस्मिन्नर्थेप्रमाणंचिंत्यं॥तदेवंस्थानिद्वारकंवास्वतोवाउभयथाप्यचःपूर्वत्वमिहगृह्यतेइतिस्थितं॥विधीयतेइतिविधिरितिकर्मणिकिप्रत्ययः॥पूर्वस्येतिशेषेषष्ठी॥अनुवादेपरिभाषानुपस्थानात्॥पुगाद्यागमेपिविधेयेस्थानिवद्भावः॥अचइत्यत्रतुआदेशइतिसमभिव्याहारात्योग्यतावलात्स्थानिसंबंधलाभः॥षष्ठीस्थानेयोगेस्यमःपूर्वसूत्रेऽनुवर्त्तितस्यस्थानेयग्रहणस्येहाप्यनुवृत्तेर्वेतिप्रसिद्धःपंथाः॥न्यासकारस्तुनिमित्तापेक्षमादेशापेक्षंवापूर्वत्वमित्यपिपक्षोभाष्येउपन्यस्तत्वात्त्वीचकार॥वैयाकरणादीनांतुबहिरंगयोरैचोरसिद्धत्वान्नदोषइत्याह॥इदंचनाजानंतर्यपरिभाषापाबहिरंगपरिभाषायाएववाअनित्यतेतिप्रागुक्तमुपरुभ्यसमर्थनीयं॥अस्मिन्पक्षेविधिरितिभावेकिःषष्ठीतुअनभिहितत्वात्कर्मणीत्यपिसुस्थमेव॥किंतुनिमित्तापेक्षयापूर्वत्वेत्यदाद्यत्वस्य स्थानिवत्त्वेनद्व्यभित्यादौदीर्घोनस्यात्॥ईद्यतीतित्वस्यस्थानिवत्वादिगंतलक्षणोगुणोनस्यात्॥देयमिति॥तथागुणवृद्ध्योःस्थानिवत्वा

ह्लवनंलाषकृदित्यवावौनस्यातां॥हूपोरेकस्यदेयमृणेकिरतौवनेइत्यादिनिर्देशोपष्ठंभेनानित्यताश्रयणंतुक्लिष्टमितिदिक्॥पूर्वत्वंचनाव्यधानगमकिंतुव्यवहितसाधारणं॥तस्मिन्निति निर्दिष्टइतिसूत्रेनिर्दिष्टग्रहणाल्लिंगात्॥चडुपरनिङ्गासेनिषेधारंभाच्च॥तेनपटयतिरअवधीदित्यादौस्थानिवद्भावःसिध्यतिवधादेशोत्यदंतः॥स्यादेतत्॥पटयतीत्यत्रांतवन्निनीविभक्तिमाश्रित्यपरत्वाज्ज्ञस्त्वंप्राप्नोति॥नच स्थानिवद्भावः॥जश्त्वविधौतत्प्रतिषेधात्॥सत्यं॥कर्मसमर्पकात्प्रातिपदिकादेवणिजुत्पत्तिर्नतुसुबंतादितिवक्ष्यमाणत्वात्॥सुबंताण्णिजितिपक्षेपिइष्टवदित्यतिदिष्टयाभसंज्ञयापदसंज्ञायावाधात्॥पटुमित्यस्यैवहिभसंज्ञाप्रवृत्तेर्निरवयवत्वात्॥तत्रचाप्रवृत्तावयवांतरावयवेकदेशविकृतेलभ्येत॥स्त्रग्विणमाचष्टेस्त्रजयतीत्यादौहिप्रातिपदिकाण्णिजुत्पत्तिरितिपक्षेप्येषैवगतिरितिवक्ष्यामः॥अवधीदित्युदाहरणंतुभाष्यमतेआर्द्धधातुकीयाःसामान्येनभवंतीतिपूर्वसूत्रेएवोपपादितत्वेनार्द्धधातुकोपदेशेयद्गकारांतंतस्यलोपइतिलोपसंभवात्॥वार्त्तिकमतेतुलिङीतिपरसप्तमीत्युक्तं॥तथाचअत्यदित्यादाविवातोलोपोनप्राप्नोति॥अतएवेह्लंतएषायमादेशइतितन्मतं॥रदिस्कृनभवति॥वध्यादेशेरदिहितत्वप्रतिषेधइतिपूर्वसूत्रस्थेवार्त्तिकात्॥एवमस्वङ्कोबहुस्वङ्कइत्यादौकेणआपोन्यतरस्यामितिह्रस्वस्यस्थानिवद्भावात्ह्रस्वानेत्यात्पूर्वमितिखकारस्योदात्तोनभवति॥किंतु॥कपिपूर्वमित्युत्तरपदादातोदात्तत्वमेवभवति॥अन्वितीकंबहुन्वितीकइत्यादौतुन्वितेःक्रपीतिदीर्घस्यस्थानिवद्भावाच्छिशब्देकारस्योदात्तता भवति॥नचोभयत्रापिस्वरविधौनस्थानिवदितिनिषेधःवाच्यः॥लोपाजादेशमात्रविधयःसइतिवक्ष्यमाणत्वात्॥एवंपरंब्रह्मेतिबहुभिरृत्तिकारैरुदात्तत्वात्मूर्द्धाभिषिक्तमितिभाष्येव्यवस्थानमप्युदाहरणंसाध्वेव॥अरुर्द्विषदजंतस्यमुमित्यत्रन्यूङ्क्षयणेनप्रथमंपूर्वयणादेशयोगात्॥नचैवंकर्त्रर्हऋत्यादावुदात्तयणइतिविभक्तेरुदात्तत्वंनस्यादिति

वाच्यम्॥स्वरविधौव्यंजनस्याविद्यमानवद्भावेनपूर्वयणमेवाश्रित्यतत्समाधानात्॥नचपूर्वस्मादपिविधौस्थानिवद्भावाद्यणमेव नि-
निवाच्यं॥रेफस्यादिष्टत्वाच्चःपूर्वत्वात्स्थानिद्वारकस्यपूर्वत्वस्यानित्यत्वात्॥निष्ठायांसेटीतिसेट्ग्रहणेनपूर्वस्माद्विधौस्थानिवद्भावस्यनि-
त्यत्वाच्च॥तस्मान्मूर्द्धाभिषिक्तमुदाहरणमितिपक्षोनातीवदुःष्यति॥अतएवह्याश्रीयमाणास्वमेवप्रकृतौस्थानिवत्त्वमितिपक्षेअकुर्व्याश्ना-
मलुन्याशंव्यत्यजन्याशांराज्याशामित्यत्रक्रमेणयेचेत्युलोपईहल्यघोरितीत्वंयेविभाषायोहलीत्यात्वंचप्राप्नोतीतिभाष्यवार्त्तिकयोरुक्तं-
॥यत्तुअंतरंगंबलवदितिवाअभिह्वयतिभाषांवाआश्रित्यपह्वयमृद्येत्युदाहरणनिराकरणपरंभाष्यंतन्नुअकृतव्यूहवचसोःनित्यनाभिप्रायेण
कथंचिन्नेयमितिदिक्॥नपदांतहिवचनेवरेयलोपस्वरसवर्णानुस्वारदीर्घेजश्चर्विधिषु॥पदांतादिषुविधीयमानेषुपूर्वेणग्रासःस्थानिवद्भावो न
स्यात्॥पदान्ते॥कानिसंति॥कौस्तः॥इहयणादेशयोःकर्त्तव्ययोःभ्रसोरल्लोपोनस्थानिवत्॥नचानादिश्चरःपूर्वत्वविरहादेवनस्थानिवद्वि
तिवाच्यं॥वाक्यादपोहत्यपदानिसंस्क्रियंतेइतिपक्षेःनादिश्चरःपूर्वत्वस्यसत्वात्॥नहिपदांतरनिरपेक्षमेवपदमिहशास्त्रेसंस्कार्यमितिनियम
॥युष्मद्युपपदइत्याद्यनुशासनस्यासंगतिप्रसंगात्॥एतच्चांगसंज्ञासूत्रेकैयटेनध्वनितं॥केवलपदसंस्कारपक्षेअदर्शीत्यादौअचइतिलो
पोनस्थानिवदित्युदाहार्यं॥विधिशब्दश्चेहनकर्मसाधनः॥तथात्वेहिकर्मधारयोवास्यात्शेषषष्ठ्यंतेनसहतत्पुरुषोवा॥नाद्यः॥विधिशब्द
स्यक्रियाशब्दतयापूर्वनिपातप्रसंगात्॥नांत्यःपदांतस्यकस्मिंश्चित्कर्त्तव्येनस्थानिवदितिपर्यवसानेनवृक्षवदित्यत्रवलोपापत्तेः॥हेहनिर्मृदे
वृद्धिर्विचन्द्रादिषुअनन्वयापत्तेश्च॥तस्माद्भावसाधनएव॥अंतरंगत्वाच्च॥अतएवकर्मषष्ठ्यंतेनसमासः॥मुकीतटीत्यादौपदसंज्ञायांकृते
व्यायामस्थानिलोपस्थानिवद्वचनादिस्यादिभिःसूत्रेणपदस्यांतोविधीयतेयेननिषेधःस्यात्॥किंतुसंज्ञामात्रं॥तत्रापियथोद्देशपक्षः॥ज

स्त्वादिकार्यकालत्वेपूर्वत्रासिद्धेचेतिनिषेधापत्तेः॥एकदेशविकृतस्यानन्यत्वाद्धेनस्वानित्यत्रऋः प्राप्तः॥बहिरंगस्यासिद्धत्वान्नेतिवक्ष्यते॥
भाष्येतुषदसंज्ञायाःपदांतत्वंस्वीकृत्यपदेअंतइतिभसंज्ञापिपदकार्यमितिचहेधासमाहितं॥तत्रांत्येषडिकेवचनसामर्थ्यादितिबोध्यम्॥अ
च्चिकषडिकौनुपंचमेवक्ष्येते॥द्विर्वचने॥सुध्युपास्यः॥स्थानिवद्भावनिषेधसामर्थ्यादेवबहिरंगपरिभाषापिहेहनप्रवर्त्तते॥नाज्ञानेतर्यङ्क्तिनिषे
धाद्वा॥वरेइतिनिपातनादलुक्कृद्वद्भ्व॥वरेयोजादेशःसनस्थानिवत्॥यायावरः॥यातेर्नित्यकौटिल्येइतियङ्पश्चयङ्इतिवरच्॥तन्निमित्त
कोअतोलोपस्तस्यचआतोलोपदृष्टिचेत्यालोपेकर्त्तव्येनस्थानिवत्॥नन्विहपरनिमित्तकमेवनास्ति॥आर्द्धधातुकइतिविकल्पस्यभ्युपगमात्
॥अतएवहिअचोयदितिसूत्रेज्ग्रहणंकृतं॥अन्यथाहलंताण्यतोविशेषविहिततयापरिशेषादचएवयङ्विष्यतिकिंतेन।विषयसप्तम्यांतुदि
त्त्यधित्स्यंइत्यादावजंतभूतपूर्वादपियत्सिद्ध्येअज्ग्रहणमितियतोनावइत्याद्युदात्तस्सिध्यति॥सत्यं॥वरेग्रहणेनपरसप्तमीपक्षेज्ञाप्यते
॥नथाचानुदात्तेनञ्हलादेरितिसूत्रेआदिग्रहणंकृतं॥इलंतादितिमाविज्ञायोतिं॥अस्तिचहलंतेविशेषणस्यव्यावर्त्यं॥जुगुप्सनोमीमां
संनइति॥विषयसप्तमीत्वेत्विहापिअतोलोपेहलंतत्वाद्युचोभाव्यमेवेतिहलंतविशेषणवैयर्थ्यात्मासमर्थ्यादेवादिपरिग्रहसिद्धौहल्ग्रहणंव्यर्थ
त्॥एवंचयातेर्यङंतात्किंचिदतोलोपेयलोपविधिंप्रतिस्थानिवत्त्वनिषेधाद्यलोपेचयायातीतिस्थितेयङ्कारलोपस्यस्थानिवत्त्वात्आतोलो
पदृष्टिश्चेत्याकारलोपेपुनर्यलोपेयातिरितिभविष्यति॥नचपुनराकारयकारयोर्लोपेसतिक्तिच्प्रत्ययमात्रंश्रूयतेतिवाच्यं॥आलोपस्यस्थानिवत्त्वा
द्य॥चिण्वेलुग्न्यायेनासिद्धत्वाद्वा॥यलोपेउदाहरणांतरमपि॥तद्यथा॥कंडूयतेर्क्तिच्॥कंडूतिः॥क्तिन्नितिकाशिकयाःप्रमादः॥अत्र
[illegible]हेआवादिकल्पंवहुलग्रहणेवाशरणीकरणार्हं॥भाष्यकारेणैवकंडयेत्येवंभवितव्यमितिवा

दनाएतस्यापशब्दतोज्ञेः॥ तस्मादपंक्तिजेवतनतोल्लोपपल्लोपोअल्लोपस्यस्थानिवत्त्वादुवङ्॥ ननस्फ्लोःभूडित्यूठ्॥ नचोव्यस्थानिवत्त्वादादि दा
दचःपूर्वत्वात्॥ अनएकऊठःपुनरुवङ्नभवति॥ सर्वेसर्वपदादेशइत्यचित्स्थानिहारकंपूर्वत्वंप्रत्यपीहवक्तुंशक्यतेभाष्यमतेलोलुवःणोपुव्व इ
त्यादौयथा॥ तथापिस्थानिहारकंपूर्वत्वंक्वाचित्कमेवेतिपूर्वसूत्रेणवोक्तं॥ तथातिष्ठतेर्यङंतात्तिङ्यअल्लोपयलोपयोस्तेथीतीतिस्थितेअल्लोपस्य
स्थानिवत्त्वाद्यङ्यलोपः॥ तेष्ठितिः॥ तथापेपीयतेःक्तिचिअल्लोपयलोपयोरेरनेकाचइतियणियल्लोपेकृतेपिरिभवति॥ शोतनूकरणे॥ यङंतात्ति
चिअल्लोपयलोपाल्लोपेषुपूर्ववत्रापिरिहेतिस्थानिवत्त्वनिषेधश्छशांषइतिषत्वेकृतेशाष्टिरितिभवति॥ एवंचेचीयतेश्चेक्तिरितिदिक्॥ तदेवंवरेण
कापेतिनकंनिमित्तंकिंतुहेइतिस्थितं॥ केचित्तुवरईइतिईकारंपरिलुप्यईकारेपरतोविधौनस्थानिवदितिव्याचख्युः॥ तेनामलक्याःफलमामल
कं॥ नित्यंवृद्धशरादिभ्यः इतिमयट्॥ फलेलुक्॥ ततोलुक्तद्धितलुकीतिङीषोलुक्॥ सञ्चयस्येतिलोपेनस्थानिवत्॥ पूर्वोक्तव्याख्यानेतुलु
कालुप्तंनस्थानिवदितिवचनंकरिष्यते॥ तत्रचलुप्तमितिननपुंसकेभावेक्तः लुङ्नस्थानिवदितिफलितोर्थः। स्वरेचिकीर्षकः॥ सनोअतो
लोपोलीनीतिककारेकारस्योदात्तत्वेकर्त्तव्येनस्थानिवत्॥ नचलितीत्यस्यारभसामर्थ्यात्ककारेइत्यादेरसावकाशत्वात्॥ भाष्येतुआकर्षि
कइत्युदात्तं॥ तदापानतः॥ षत्वलोलित्वसामर्थ्यात्स्थानिवद्भावकृतव्यवधानेसत्यपिलित्स्वरस्यसुवचत्वात्॥ घ्नंतीत्यादौकुत्ववत्॥ स
वर्णानुस्वारपोशिशण्ढिअसोरल्लोपोत्रनस्थानिवत्॥ अनुस्वारस्यानादिश्चदचः पूर्वत्वंतुस्थानिहारेत्युक्तं॥ यद्यपिसवर्णग्रहणमात्रेणानु
स्वारोप्याक्षेपंशक्यतेतथापिविशेषापेक्षंज्ञापकंइत्यपिसंभाव्येत॥ तथाचयत्रनपरसवर्णप्रसंगः शिवेत्तीत्यादौतत्रस्थानिवद्भावनिषेधेनुमनु
स्वारग्रहणं॥ अचःपरस्मिन्नितिसूत्रेउक्तरीत्याअभ्यासस्यासवर्णइत्यादिषुसवर्णइतिनिषेधस्यलब्धावकाशतयाशिढीत्यादेरपि अभि

ङ्यापश्चेत्यनिदिक्॥दीर्घे॥प्रतिदीव्ना॥इहहलिचेतिदीर्घोऽल्लोपोनस्थानिवत्॥यत्तुकाशिकायामुक्तं॥उपधायांचेतिदीर्घइतिनत्वामादिकं॥तथा
चउपधार्थाचेत्यत्रोक्तं॥प्रतिदीव्नेत्यत्रहलिचेतिदीर्घइति॥यद्वा॥आचारक्विबन्तात्क्विपीतिक्विपिसमाधेयं॥नन्वेवमनुनासिकस्यक्विझलोरिति
दीर्घःस्यात्॥सत्यं॥अकृतव्यूहपरिभाषयाभाविनमल्लोपमालोच्यांतरंगोपिदीर्घोनकरिष्यते॥जग्मुषइत्यत्रइडाममनकारादेशाविवेतिबोध्य
म्॥ननुस्थानिवत्वाभावेप्यसिद्धंबहिरंगइत्यल्लोपस्यासिद्धत्वाद्दीर्घोनस्यादितिचेत्॥न॥कृतित्विधिग्रहणेनबहिरंगपरिभाषायाअनित्यत्व
स्यज्ञापनत्वात्॥यथोद्देशपक्षेषष्ठीपरिभाषांप्रतिदीर्घस्यासिद्धत्वंतरंगाभावेनपरिभाषायाअप्रवृत्तेश्च॥जशि॥सञ्छ्मे॥वाञ्छंतेहरी॥
नश्छि॥अदन्धिः॥अदेःक्तिनिवहुलंछंदसीतिघस्लादेशः॥घसिभसेत्यादिनासिचोलोपः॥झलोझलीतिसकारलोपः॥धिसकारेसिचो
लोपइत्यस्यभाष्यकृताअनाश्रयणात्॥वार्त्तिकमतेत्वाट्टसोर्वर्णलोपः॥झषस्तथोरितिधत्वं॥नत्वतस्मिन्कर्त्तव्येपूर्वस्मादपीतिस्थानिव
द्भावः॥पंचमीसमासस्यानित्यनायापूर्वसूत्रेणवोपपादितत्वात्॥घस्यझलांजशितिजस्त्वेकर्त्तव्येउपधालोपोनस्थानिवत्॥समानाग्धिः
सग्धिः॥संहस्यसः संज्ञायांइतिसूत्रात्सइति अनुवर्त्तमानेसमानस्यछंदस्यमूर्द्धप्रभृत्युदर्केषुबह्वृचसूत्रेणसमानस्यसभावःव्यामिति भ
सेर्लोट्॥तसस्तां॥शपःश्लुः॥अंतरंगत्वाद्धित्वमभ्यासकार्यं॥ततोघसिभसोरित्युपधालोपोदिप्राग्वत्॥चरि॥जक्षतुः॥जक्षुः॥घसेर्ह्यदनुसउपसर्गस्य॥गमहनेत्युपधालोपः॥खरिचेतिचर्त्वंतिनस्थानिवत्॥अत्रवार्त्तिकं॥स्वरदीर्घयलोपेषुलोपाज्जादेशोनस्थानिवदिति॥
तेनान्यःस्थानिवदेव॥पंचभिररत्निभिःक्रीताःपञ्चारत्नयः वेदेतुपंचारत्न्यः॥जसादिषुछंदसिवचनंप्राङ्णौचङ्युपधायाइतिगुणाभावे
अस्यसमिकलादिनासेत्यादिनापूर्वपदप्रकृतिस्वरइत्याहुः॥यद्यपिअसिद्धबहिरंगमित्यनेनापीदंसिध्यतितथापिअकृत

दनाएतस्यापशब्दतोज्ञेः॥ तस्मादपंक्तिजेवनतोल्लोपपल्लोपोअल्लोपस्यस्थानिवत्वादुवङ्॥ नतस्थ्लोः भूडित्यूठ्॥ नचोत्वविस्थानिवत्वांशादि दा
दचःपूर्वत्वात्॥ अनएकऊठःपुनरुवङ्नभवति॥ सर्वसर्वपदादेशइत्याश्रित्यस्थानिद्वारकंपूर्वत्वंग्रथ्यतेहवक्तुंशक्यतेभाष्यमतेलोलुवःपोपुव इ
त्यादौयथा॥ तथापिस्थानिद्वारकंपूर्वत्वत्क्वाचित्कमेवेतिपूर्वसूत्रेणवोक्तं॥ तथातिष्ठतेर्यङंतात्तिङ्अल्लोपयलोपयोस्तेथीतीतिस्थितेअल्लोपस्य
स्थानिवत्त्वाद्यङ्यलोपः॥ तेष्ठितिः॥ तथापेपीयतेःक्विचिअल्लोपयलोपयोरेरनेकाचइतियणियल्लोपेकृतेपिरिभवति॥ शोतनूकरणे॥ यङंतात्तिङ्
क्विचिअल्लोपयलोपाल्लोपेषुपूर्ववन्निमित्तेचेतिस्थानिवत्वनिषेधश्छशांषइतिषत्वेकृतेशाष्टिरितिभवति॥ एवंचेचीयतेश्चेक्तिरितिदिक्॥ तदेवंवरेण
कापेतिनकंनिमित्तंकिंतुहेइतिस्थितं॥ केचित्तुवरईइतिईकारंप्रश्लिष्यईकारेपरतोविधौनस्थानिवदितिव्याचख्युः॥ तेनामलक्याःफलमामल
कं॥ नित्यंवृद्धशरादिभ्यइतिमयट्॥ फलेलुक्॥ ततोलुक्चद्धितलुकीतिङीषोलुक्॥ सचयस्येतिलोपेनस्थानिवत्॥ पूर्वोक्तव्याख्यानेतुलु
कालुप्तनस्थानिवदितिवचनंकरिष्यते॥ तत्रचलुप्तमितिननपुंसकेभावेक्तः लुङ्नस्थानिवदितिफलितोर्थः। स्वरेचिकीर्षकः॥ सनोअतो
लोपोलीनीतिककारेकारस्योदात्तत्वेकर्त्तव्येनस्थानिवत्॥ नचलितीत्यस्यारभसामर्थ्यं। कारकइत्यादेरसावकाशत्वात्॥ भाष्येतुआकर्षि
कइत्युदाहृतं॥ तदापानतः॥ षलोलित्वसामर्थ्यात्॥ स्थानिवद्भावकृतव्यवधानेसत्यपिलित्स्वरस्यसुवचत्वात्॥ घ्नंतीत्यादौकुत्ववत्॥ स
वर्णानुस्वारयोश्शिष्ण्ढ।भसोरल्लोपोत्रनस्थानिवत्॥ अनुस्वारस्यानादिश्चदचः पूर्वत्वंतुस्थानिद्वारेत्युक्तं॥ यद्यपिसवर्णग्रहणमात्रेणानु
स्वारोप्याक्षेपंसुशक्यतेतथापिविशेषापेक्षंज्ञापकंइत्यपिसंभाव्येत॥ तथाचयत्रनपरसवर्णप्रसंगः शिवेत्तीत्यादौतत्रस्थानिवद्भावेनिषेद्धुमनु
स्वारग्रहणं॥ अचःपरस्मिन्नितिसूत्रेउक्तरीत्याअभ्यासस्यासवर्णइत्यादिषुसवर्णइतिनिषेधस्यलब्धावकाशतयाशिढीत्यादेरपि असि

ङ्याप्नेभ्येतिदिक्॥दीर्घे॥प्रतिदीङ्ग्रा॥दृहहलिचेतिदीर्घोऽल्लोपोनस्थानिवत्॥यत्तुकाशिकायामुक्तं॥उपधायांचेतिदीर्घइतिनत्वमादिकं॥तथा
चउपधायांचेत्यत्रोक्तं॥प्रतिदीङ्ग्रेत्यत्रहलिचेतिदीर्घइति॥यद्वा॥आचारक्विबन्तात्क्विबिति क्विपिसमाधेयं॥नन्वेवमनुनासिकस्यक्विझलोरिति
दीर्घस्त्यादेः॥सत्यं॥अकृतव्यूहपरिभाषयाभाविनमल्लोपमालोच्यांतरंगेपिदीर्घोनकरिष्यते॥जग्मुषइत्यत्रइडागमनकारादेशाविवेतिबोध्य
म्॥ननुस्थानिवत्वाभावेप्यसिद्धंबहिरंगइत्यल्लोपस्यासिद्धत्वादीर्घोनस्यादितिचेत्॥न॥कृतित्वग्विधिग्रहणेनबहिरंगपरिभाषायाअनित्यत्व
स्यज्ञापनत्वात्॥यथोद्देशपक्षेषष्ठीपरिभाषांप्रतिदीर्घस्यासिद्धत्वेनांतरंगाभावेनपरिभाषायाअप्रवृत्तेश्च॥जशि॥सग्धिस्थे॥चम्पांतेहरी॥
तथाहि॥अदन्तंधिः॥अदेःक्तिनिवहुलंछंदसीतिघस्लादेशः॥घसिभसोर्हलिचेत्युपधालोपः॥झलोझलीतिसकारलोपः॥धिसकारेसिचो
लोपइत्यस्यभाष्यकृताअनाश्रयणात्॥वार्त्तिकमतेछांदसोवर्णलोपः॥झषस्तथोरितिधत्वं॥नन्वतस्मिन्कर्त्तव्येपूर्वस्मादपीतिस्थानिव
द्भावः॥पंचमीसमासस्यानित्यनायापूर्वसूत्रएवोपपादितत्वात्॥घस्यझलांजशितिजस्त्वेकर्त्तव्येउपधालोपोनस्थानिवत्॥समानाग्धिः
सग्धिः॥सहस्यसः संज्ञायांइतिसस्यसइति अनुवर्त्तमानेसमानस्यछंदस्यमूर्ध्वप्रभृत्युदर्केषुबहुव्रीहिसूत्रेणसमानस्यसभावःवक्ष्यमितिभ
सेर्लोट्॥तसस्तां॥झपः झुः॥अंतरंगत्वाद्बहिरंगमभ्यासकार्यं॥ततोघसिभसोरित्युपधालोपोदिग्राग्वत्॥चरि॥जक्षतुः॥जक्षुः॥घसेर्ल
ङ्अनुसउसन्च॥गमहनेत्युपधालोपः॥खरिचेतिचर्त्वंझलांजशितिनस्थानिवत्॥अत्रवार्त्तिकं॥स्वरदीर्घयलोपेषुलोपाज्जादेशोनस्थानिवदिति॥
तेनान्यःस्थानिवद्भवेत्॥पंचभिररत्निभिःक्रीताःपंचारत्नयः वेदेतुपंचारत्न्यः॥जसादिषुछंदसिवचनंप्रकृत्यैकाचउपधायाइतिगुणाभाव
[illegible]

व्यूहपरिभाषामाश्रित्योच्यं॥अचिनीकोअवहकदित्यत्रहस्वांतंस्यात्पूर्वमित्यस्यक्रमेणप्रवृत्त्याप्रवृत्तीफलमितिनुपूर्वसूत्रेएवोक्तं॥नचत
त्रबहिरंगपरिभाषायाःप्रसंगोस्ति॥क्रियोर्गिर्योःव्युत्पत्तिपक्षेहलिचेतिदीर्घःप्राप्तः॥यणःस्थानिवद्भावान्न भवति॥अचइत्यधिकारेकृञेः
किच्चकृगृभृवृकुटिभिदिछिदिभ्यश्चेतिङःसचकित्॥स्तुहरदन्तेनन्यासकृताचकृग्रोरिच्छेत्युपन्यस्तंतत्कृचि टुणादिरत्नोअन्वेषणी
यं॥वाय्वोःइहयलोपोन॥अस्मिंस्त्रुवार्त्तिकेस्वरग्रहणम्चत्रमावश्यकं॥क्रियोर्गिर्योरितितुउत्पायांचेतिसूत्रेवृत्तिकारोक्तरीत्याउणादी
नामव्युत्पत्तिपक्षालंबेनापिसिद्धं॥वय्वोरितितुबहिरंगस्यासिद्धत्वात्॥किलुगुपधात्वचङ्परनिर्ह्रीसकृत्वेषूपसंख्यानं॥पूर्वत्रासि
द्धेच॥तस्यदोषःसंयोगादिलोपलत्वणत्वेषु॥अस्यार्थः॥कौविधिंप्रतिनस्थानिवत्॥लवमाचक्षाणोलौः॥अत्रणिचियष्टिलोपोयश्च
कौणिलोपस्तदुभयंक्ङोःस्फूर्डितिवकारस्यकिनिमित्तेऊठिकर्त्तव्येनस्थानिवत्एत्येधत्यूट्स्वितिवृद्धिः॥तथापिपठिषिब्राह्मणकुलानीतिदी
र्घोवेवीटामितिसूत्रेयदुदात्तंतदपिकौविधिंप्रतीतिव्याख्यानेएवसंगच्छते॥कौलुप्तंप्रतिनस्थानिवदितिव्याख्यायांतुलौःपिपठिषीत्युभयम
पिनसिद्ध्येत्॥णिचिटिलोपस्यस्थानिवद्भावेऊठोसंभवात्॥पिपठिषतेरप्रत्ययेअतोलोपेनपुंसकबहुवचनेशेाश्चसुलुक्षणेनुमिकर्त्तव्येअतोलोप
स्यस्थानिवत्वनिषेधेननुम्प्रसंगाच्च॥एतच्चदीधीवेवीटामितिसूत्रेकंङ्वादिसूत्रेचमिश्रग्रंथेस्फुटं॥कैयटोपिदीधीवेवीटामित्यत्रकौविधिंप्र
तीत्यर्थोव्यवस्थितोननुकौलुप्तंनस्थानिवदितीत्याह॥अत्रव्यवस्थितइतिवदताकौलुप्तंनस्थानिवदितिपक्षोपिक्वचिदाश्रीयतएवनियमःप
रंनास्तीतिसूचितं॥लुप्तमितिनपुंसकेभावेक्तः॥एवंचसख्युर्नोमान्पदःत्वंअहंइतिसिद्धं॥तथाहि॥ख्यत्यात्परस्येतिसूत्रेभाष्यं॥सखीपतेःसख्युःलुनीपतेर्लूनुरि
ति॥नत्रसखीपतेःङिपिअल्लोपेयलोपेअल्लोपस्यस्थानिवद्भात्परत्वात्ङिलोपंबाधित्वाइकोयणचीतियण्स्यात्॥ततोयलोपेसख्वोलूनइतिस्यात्॥अवस्त्र

कौलुप्तंनस्थानिवत्इतिनत्रयणंपरिजहारकैयटः॥नथाउगिदचामितिसूत्रेअधातुभूतपूर्वस्यापिनुमर्थंअधातुग्रहणंदत्युत्कागोमत्यनेरप्रत्ययेगोमानित्युदात्तंभाष्ये॥तत्राप्यलोपस्यस्थानिवत्त्वात्सर्वनामस्थानपरत्वंनास्तीतिनुम् नस्यात्॥नचाधातुग्रहणसामर्थ्यात्स्थानिवद्भावस्तव्यवायेसत्यपिनुम्स्यादितिवाच्यं॥आचारक्विबंतात्क्विचेतिक्विपिचरितार्थत्वात्॥नस्मात्कौलुप्तंनत्येवशरणं॥नन्वुगोमत्यतेर्गोमनतेर्वाऽभयथापिगोमानितिनसिध्यति।अत्वसंतस्येतिदीर्घविधौअधातोरितिविशेषणात्॥सत्यं॥तत्रधातुग्रहणमसंतस्यैवविशेषणंनत्वत्वंतस्यापीतिवक्ष्यमाणत्वान्नदोषः॥तथायेनविधिस्तदंतस्येतिसूत्रेकेवलोपिपाच्छब्दोस्ति॥पादयतेःपात्॥पदइतिभाष्यं॥अत्रापिस्थानिवद्भावाद्यवधानेनपद्भावोनस्यात्॥कौलुप्तंनेतिसिध्यति॥अतएवपादस्यपादहस्त्यादिभ्यइतिनसूत्रितं॥प्रतिपदोक्तस्यास्यैवपदादेशोमाभूत्॥किंतुक्विबंतस्यापियथास्यादिति॥एवंचपादस्यलोपइतिगुरुनिर्देशंकुर्वतासूत्रकृतैवकौलुप्तंनस्थानिवदितिज्ञापितं॥नच्वक्वाचित्कंइतितुप्रकृतसूत्रस्थस्यनेवंविज्ञायतेकौलुप्तंनेतिभाष्यस्यार्थः॥विशब्दग्रहाद्धलन्त्याद्व्यत्यात्सूत्रादिभाष्याच्चेनिन्यवस्थिशब्दंप्रयुंजानेनकैयटेनध्वनितं॥युष्मानाच्छेषुष्मयति॥ततःक्विपिण्णौसौत्वाहोसौइतिकर्तव्येणिलोपोनस्थानिवत्॥तदुक्तं॥स्थानिवत्त्वंचणेरत्रकौलुप्तत्वात्नविद्यतेइति॥स्थानिवत्त्वमिति॥लोपस्येतिशेषः॥णेःकौलुप्तत्वादित्यन्वयः॥अस्तुतर्हिकौलुप्तमित्यपिनित्यमेव॥तावतापिलवमाचक्षाणोल्लोरित्यस्यसिद्धिरितिचेन्न॥पिपीठिषीत्यस्यसिद्धिप्रसंगात्॥देवयतेर्दुपूरितुइहकैयटेनयदुदात्तंकौलुप्तमेवनिमित्तमिसिध्यतीति॥तस्यायमाशयः॥यद्यपिइहकौविधिप्रत्यूढसिद्धः॥तथापितस्यस्थानिहणाअनादिष्टादचःपूर्वत्वेनणिलोपस्यस्थानिवद्भावाद्चोञ्णितीतिवृद्धिप्रसंगः॥तस्मात्कौलुप्तमनेत्येवशरणं॥यत्तुलोपोव्योरितिसूत्रेकंडूयतेःक्यबंतात्प्रत्ययेकंडूयतीतिव्युत्पादयन्कैयटआह॥अलोपस्यस्थानिवद्भावेण॥

स्यऊठ् ॥ नचऊठिकर्त्तव्येस्थानिवत्त्वेनप्रतिबंधःस्याद्विनिवाच्यं॥ वेकारस्यादिशादचःपूर्वत्वादिति॥ तनुस्थानिह्रस्वकपूर्वतमनित्यत्वाश्रित्व
॥ तद्दीर्घत्वातुदपूरित्यपिसुसाधमेव॥ ननूभयथापिदपूरित्यत्रप्रत्ययलक्षणेनवृद्धिःस्यादेवेतिचेन्न॥ बहिरंगस्यऊठोवृद्धिंप्रत्यसिद्धत्वात्॥ए
वंचस्थानिवद्भावेसत्यपिनकात्रिस्थितिः॥ बहिरंगत्वेनैवसर्वत्रसाधनात्॥ तस्माद्दपूरितिपक्षहयेपिसिद्धतीत्येवतत्वं॥ननुवेकदेशविकृतस्यान
न्यत्वादिवौत्यादितिचेन्न॥ निरनुबंधपरिभाषयाअधातुग्रहणानुवृत्तेर्वाभस्यधूरित्यत्रनौदितिदिवौत्सूत्रेभाष्येएवस्थित्वात्॥ यद्यपि
उगिदचामितिसूत्रेअधातुपूर्वीदित्यर्थस्तथापीहशब्दाधिकारइतिभावः॥ एतेनहलिचेतिदीर्घः दीव्यतीतिनामधातुप्रकरणेकौमुदीप्रसादो
प्यनुकौ॥ दिवेर्डिविरितिन्यासोहितसूत्रेणडिविरितिवदन्यधावोपिदिव्यतीतिह्रस्वमेवोपजगाम॥ प्रकृतमनुसरामः॥ द्विवचनादौतु ओःसुपी
तिसूत्रेण॥ द्यद्योदद्इत्यादिरूपवत्॥ कंडूःकंडुवौकंडुवइत्यादि॥ वडेव॥ संयोगपूर्वकतयार्यणोऽप्राप्तेरितिदिक्॥ अत्रायंसंग्रहः॥ सरव्यु
र्गामान्पदस्त्वंचकौलुप्तस्यनिदर्शनं॥ अनित्यत्वेपिपठिष्यतेविधौलोहूयोर्दपूः॥ लुकालुप्तंनस्थानिवत्॥ आमलक्याःफलंआमलकं॥ फले
लुकःप्रत्याख्यानपक्षेतुपंचभिःपङ्क्तीभिःक्रीतःपंचपदुःइत्युदाहार्यं॥ तथापंचद्रोणोअग्नाव्यश्वदेवनास्यपंचेंद्रःपंचाग्निर्ग्रीषासंनियु
क्तआनुकऐकारश्चश्रूयेन॥ नचसन्नियोगशिष्टन्यायेननिवृत्तिः॥ परतहिलुड्डिमिन्नायाङीष्निवृत्तेःपूर्वयोरानुगेकारयोर्निवृत्तौकर्त्त
व्यायामत्रःपरस्मिन्नितिस्थानिवत्त्वात्॥ येतुपूर्वोक्तरीत्यावरईइतीकारश्लेषंकुर्वंतिनेषामिहलुग्ग्रहणंनकार्यं॥ उपधात्वेकर्त्तव्येनस्थानिव
त्॥ तेनपरिखाशब्दाच्चानुरर्थिकेअणिकृतेवृद्धावैकांतरखोपधादितिपारिखशब्दात्खोपधलक्षणेढप्रत्ययेपारिखेयःसिध्यति॥ अन्यथाउ
पधासंज्ञाःपूर्वत्वेनतत्रकर्त्तव्यायामाल्लोपःस्थानिवत्स्यात्॥ ननुवेवष्टयतीत्यादौवृद्धिःस्यादितिचेन्न॥ यत्रोपधासंज्ञामुपजीव्यप्रत्ययोविधिस्त

नस्तत्रैवायंनिषेधइतिभाष्येस्थितत्वात्॥ अत्रचङुपरनिर्ह्रासग्रहणमेवज्ञापकं॥कथंतर्हिभाष्येयलोपेसौरीबलाकेत्युदाहरणंदत्वाउपधा
विधौवेत्येवमिङ्मित्युक्तमितिचेत्॥अनास्थावादमात्रंतदित्यवेहि॥तत्रहिनेनेकदिगित्यणंतान्डीपिअल्लोपहूयस्यापियलोपेकर्त्तव्येस्था
निवद्भावेनिषिद्धेसमानाश्रयस्याणोलोपस्याभीयत्वेनासिद्धतायांयलोपःसिद्ध्यतीतियलोपेनस्थानिवदित्यस्यैवसौरीत्युदाहरणं॥उप्धा
त्वंतत्रलोपेउपयोगिनतुप्रत्ययविधाविति स्थितम्॥चङुपरेणोयोह्रस्वःसचङुपरनिर्ह्रासःतत्रनस्थानिवत्॥वार्त्तिकंप्रयोजितवान्अवीवदत्
हीणांपरिवादकेन॥प्रथमणिचोलोपस्यस्थानिवत्वादनुपधाआकारइतिणेश्चङीत्युपधाह्रस्वोनप्राप्नोति॥णिसामान्यग्रहणाद्व्येतत्सिद्धम्॥
दृष्टंतूदाहरणं॥वारिआख्यत्॥अवीवरत्॥नचनाग्लोपीतिनिषेधःशक्यः॥परत्वाद्ध्रस्वोसत्यांटिलोपइत्यभ्युपगमेनाग्लोपित्वाभावात्॥अतः
एवह्रलकलेत्यदंतनिपातनंसार्थकं॥कुत्वेनस्थानिवत्॥अर्च्चयतेरौणादिकःकप्रत्ययः॥अर्कः॥पाचयतेःक्किच्॥पाक्किः॥चोःकुरितिकुत्वेणि
लोपेनस्थानिवत्॥इहसूत्रेजश्चर्ग्रहणंहूहाश्रयेणविध्यंतरोपसंग्रहार्थं॥नह्युत्पादनार्थंचक्किलुगित्यादिवार्त्तिकमिति नि
ष्कर्षः॥नचापिकचङुनिर्ह्रासोप्रधानग्रहणमावश्यकं॥लुकईकारप्रश्लेषेणगतार्थत्वात्लुत्वस्यपूर्ववन्निमित्तीयत्वाच्चेत्यवधेयं॥चजोरितिकुत्वेना
उदाहरणमन्वेषणीयं॥पूर्वत्रासिद्धेच॥नस्थानिवत्॥पाक्च्यतेः क्किच्॥पापक्किः॥यायज्यतेर्याष्टिः॥पाचयतेःपाक्किः॥याजयतेर्याष्टिः॥इत्त्व
लोपणिलोपौकुत्वषत्वयोर्नस्थानिवत्॥एवंलेहयतेर्लेट्टिः॥होहयतेर्हेग्धिः॥वेशयतेर्वेष्टिः॥दाशयतेर्दाष्टिरित्यादूह्यं॥न्यायसिद्धंचेदं॥अचःपर
स्मिन्नित्यनिदेशंप्रतित्रिपाद्यस्यासिद्धतायातस्मिन्कर्त्तव्येअतिदेशाभावेः॥नचैवंस्थानिवत्त्वस्याप्यप्रवृत्तौरामद्विविसर्गोनस्यादिति वा
च्यं॥प्रत्ययःपरश्चेत्यादिनिर्देशैर्भोभगोअघोइतिसूत्रेःशयहपूर्वेनचनस्यवृत्तेर्ज्ञापितत्वादित्यवधेयं॥एवंस्थितेद्विर्वचनसवर्णदीर्घगुणवृद्धि

जन्वेः सूत्रेनषष्ठ्या॥ किंतुनषदंतवरेयलोपस्वरेष्वित्येवपाठ्यंइतिभाष्यवार्तिकयोःस्थितं॥स्यादेतत्॥यदिदीर्घग्रहणंस्यज्ज्ञेनहिंसायामि
केदीर्घविधौस्थानिवद्भावःप्रसज्येत॥तथाचचिण्णमुलोरितिसूत्रेयङंनाण्णिजंताद्दाणिचितन्त्रिणिअशंशामिअशामिइतियदुदाहृतंतत्
नसिद्ध्येत्।नचदीर्घग्रहणसामर्थ्यात्स्थानिवद्भावबाधःक्रमेर्णिङ्सूत्रेहरदत्तायुक्तरीत्याचिण्णमुलोर्दीर्घइत्यत्रकैयटायुक्तरीत्याचाहींडीत्ये
तत्सिध्या अहेडीत्यस्यनिवृत्त्यानस्यचारितार्थत्वात्॥उच्यतेणित्वजात्येक्यंगृहीत्वाअशामीत्यसिद्धं॥अशंशामीतितुयङ्लुगंनाण्णिञ्चि
विष्यति॥नहियङ्यङ्लुकोःस्थानेऽन्यत्रकस्मिंश्चिद्विशेषोस्ति।येनयङ्येवसाधयितुंक्लिश्येत॥एवंन्नग्राहितंदित्याद्यपिसिद्धं॥पूर्वस्मादपिविधौस्था
निवद्भावेणिचाव्यवधानेसतियङ्हेर्दिर्दीर्घस्याप्रवृत्तेः॥सूत्रमतेनुविहितविशेषणाश्रयणाद्ग्राहितमित्यादौनदीर्घः॥अतएवयङंनात्त्र
त्रिजरीगृहितेत्यत्रनदीर्घः॥स्थानिवद्भावात्॥सूत्रमतेविहितविशेषणाच्चेतिस्थितं॥यङ्लुगंनीत्तुतज्जादाविवोदीर्घोभवत्येवेतिमाधवः।हि
प्रयोगोहिर्वचनंषाष्ठमितिसिद्धांतात्यङ्हेर्विहितत्वानपायात्॥यङ्लुकोऽनैमित्तिकतयाऽज्झलादेशनयालुकालुप्तत्वाच्चस्थानिवद्भावोपि
नास्तीतिमाधवस्याशयः॥वस्तुनस्तुयङ्लुक्यपिद्वोदीर्घोनिष्ठएव॥एकाचोद्वेप्रथमस्येतिसूत्रेभाष्यकैयटादिपर्यालोचनयातथैवनिर्णयात्
॥तथाचतत्रग्रहेरंगादितिभाष्यमुपादायकैयटआह॥तृचोहिजरीगृहीत्यंगंनतुग्रहिःविशेषणसामर्थ्याद्धिर्यथाश्रुतरूपाश्रयणमिति॥
यद्यपितत्रयङंतंप्रकम्येदमुक्तंतथापियुक्तिसाम्याद्यङ्लुडंतेपिनदीर्घइतिलक्ष्यते॥अतएवएकाचोद्वेइतिसूत्रेहरदत्तोपियङंतेदीर्घ
माशंक्याह॥एकाचउपदेशइत्यतोदीर्घविधावेकाज्ग्रहणमनुवर्त्ततइति॥नत्यत्रपक्षेयङ्लुकिदीर्घस्योक्तिसंभवोप्यस्ति॥नन्वेवंयङ्लो राम.
लिटीतिसूत्रेयङ्लोपेचोक्तमितिवार्तिकव्याख्यावसरेस्थानिवद्भावाद्ग्राहितविशेषणाश्रयणाद्धायङंतेदीर्घंपरिहरन् कैयटोविरुध्यते॥ १२९

यङ्लुगर्थं यथाश्रुतरूपाश्रयणस्यैकाज्ग्रहणानुवर्तनस्यवाआवश्यकतयातेनैवगतार्थत्वादितिचेन्न॥ग्रहोलिटीत्यत्रत्यग्रंथस्यउपायस्य
उपायांतरादूषकत्वादितिन्यायेनयङंतेउपायान्तराभिधानपरत्वात्॥अतएवतत्रकैयटआह॥ अन्यत्रास्यदोषस्यसम्यगुद्भूतत्वादिति॥
एवंहिवदन्नत्रत्य परिहारस्याव्यापकतांएकाच्सूत्रोक्तस्यैवावश्यकतांचाभिप्रैति॥नचयथाश्रुतरूपपक्षेगृहीतमित्यादिग्रंथसंगतिः॥अंगसंज्ञा
प्रवृत्तिवेलायांयथाश्रुतरूपस्यैवतत्रसत्वात्॥ग्राहितादोतुनैवं॥एकाचइतिसमाधानंतुणिज्भिन्नविषयकमेव।तस्मात्॥यङ्लुङंताण्णिजं
ताच्चयङंताच्चग्रहेरिटः॥द्विधात्रिधाचतुर्द्धाचदीर्घोनेतिव्यवस्थितं॥माधवग्रंथस्तुविहितविशेषणपक्षस्यमुख्यतांपक्षांतराणामभ्युच्चयतां
चपरिकल्प्यकथंचिन्नेयइतिप्रतिभातीतिदिक्॥तस्यदोषइत्यादेरयमर्थः॥तस्यपूर्वत्रासिद्धेचेत्यस्यस्थलत्रयेदोषः॥अतिप्रसक्तिः॥तस्मा
त्तत्रस्थानिवद्भावस्यप्रतिप्रसवः कर्त्तव्यइत्यर्थः॥ तेनचाक्मर्थेवास्यर्थेइत्यत्रस्कोरितिलोपान्न॥निगार्यते॥निगाल्यते॥ अचिविभाषेति
लत्वंसिद्ध्यति॥तथामाषवपनीत्यत्रणत्वंनभवति॥अल्लोपस्यस्थानिवत्त्वेननकारस्यसमासांतत्वाभावात्॥नचासत्यपिस्थानिवद्भावे
ङीबेवसमासांतोननुनकारइतिवाच्यं॥ङीबुत्पत्तेःप्रागेवसमासइतिद्वितीयेवक्ष्यमाणत्वात्॥एवंस्थितेतक्षयतेःक्विपिनक्॥रक्षयतेस्तु
रक्॥इत्यादिबोध्यम्॥ अत्रहिंसयोगादिलोपेकर्त्तव्येणिलोपस्यस्थानिवद्भावान्नतत्प्रवृत्तिः॥संयोगांतलोपेतुस्थानिवद्भावेनिषेधाद्भवि
ष्येवासौ॥गोरदइतितुशुद्धात्क्विपिबोध्यम्॥यत्तुअचःपरस्मिन्निितिसूत्रेदध्यत्रेतिभाष्यमुपादायकैयटेनोक्तं॥पूर्वत्रासिद्धेचेत्येतदत्रना
स्ति॥तस्यदोषइत्यत्रसंयोगादिलोपस्यसंयोगोपलक्षितलोपोपलक्षणत्वादिति॥तन्नवास्तवं॥किंतुतत्रेत्यपूर्वपक्षिणोभिप्रायवर्णनमा
त्रं॥अतएवनपदांतसूत्रशेषेतेनैवोक्तं॥स्कंदयतेःस्कन्॥तक्षयतेस्तगिति॥यत्तुसिद्धकांडेऽभ्युत्वंधुडित्वेइतिवार्त्तिकव्याख्यविस्मरेकैयटे

नोक्तम्॥ मधुगितीष्यते मधुडितिप्राप्नोतिइति॥ ननुसकारोपदेशसामर्थ्यादितिबोध्यम्॥ सनश्नोतनीत्यत्रशितुगित्यस्यापवादत्वासकारस्यरितार्थइतिचेन्नहिक्वौलुप्तमितिसमाधेयं॥ कुस्मनोस्नोवेत्यत्रकूरितिमाधवोदात्ततेसम्प्रोवतत्रसामर्थ्यविरहेणसंयोगादिलोपाप्रवृत्तेरितिदिक्॥ स्यादेतत्॥ दृहसंयोगादिग्रहणंमास्तु॥ नचैवंवाक्यार्थमित्यादौस्कोरितिलोपोप्राप्तिः॥ स्कोःसंयोगेत्यत्रझलोझलीत्यतोझलइत्यनुवर्तते॥ नचोपसर्जनस्यापिसंयोगेत्यस्यविशेषणम्॥ ननुप्रधानयोरपिस्कोः॥ अव्यभिचारात्॥ तंतम्प्रझलंतोयःसंयोगस्तदवयोःस्कोर्लोपःस्यादितिसूत्रार्थादर्वाहिरंगतयायणोसिद्धत्वाद्वा॥ अतएवहिदध्यत्रेत्यादौसंयोगांतलोपोनप्रवर्तते॥ तथाचाष्टमेवार्तिकं॥ नवाझलोलोपाद्बहिरंगलक्षणाद्धेति॥ नचैवमपिकाष्ठतक्॥ राष्ट्रक्रूइत्यादिनसिध्येद्धेतिवाच्यं॥ अनभिधानान्नत्रिकपस्यवदुर्लभत्वात्॥ अनभिधानंचकाष्ठशकेवनास्तीत्याष्टमिकभाष्यबलेनन्यायसाम्यान्निर्णीयतइति॥ अत्रोच्यते॥ कुस्मयतेःकूरित्यादिसिद्ध्यैसंयोगादीतिवाच्यमेव॥ किंच॥ नकूरक्॥ इत्याद्यर्थमपिवक्तव्यं॥ नचानभिधानं॥ प्रमाणाभावात्॥ कैयटादिरुदात्ततत्वाच्च॥ नचकाष्ठशकेवनास्तीतिभाष्यंतत्रप्रमाणं॥ न्यायैवैषम्यात्॥ तथाहि। काष्ठशकस्यातेत्यत्रझल्यरोपःसंयोगस्तदादेःककारस्यलोपमाशंक्यतदुक्तं॥ तेनयत्रकलोपप्रसक्तिस्तदभिप्रायकमनभिधानं॥ अतएवकांतेभ्यःक्विपनेत्येवंपरतयातत्व्याख्यातं॥ नचणिजंतेभ्यःक्विपिकलोपप्रसक्तिरस्तिणिलोपस्यस्थानिवद्भावात्॥ नचपूर्वत्रासिद्धेचेतिनन्निषेधःसंयोगादिलोपेप्रतिप्रसवस्यजागरूकत्वात्॥ तस्मात्संयोगादिग्रहणंकर्तव्यमेवेतिस्थितं॥ इदंत्ववधेयं॥ संयोगांतस्यलोपइत्यत्रनवाझलोपाद्बहिरंगलक्षणत्वाद्धेतिद्वेधासिद्धांतव्यवस्थापनात्॥ कूरितिसंयोगांतलोपोपिदुर्लभः॥ तेनकुस्मूइत्येवभवतिप्रथमपक्षेहितीयपक्षाभिप्रायेणतुमाधवः॥ ननवेवमपिलत्वग्रहणंव्यर्थं॥ निगाल्यतइत्यत्रस्य

पिणिलोपेप्रत्ययलक्षणेनलत्वसिद्धेः ॥नचवर्णाश्रयत्वं॥धातोःस्वरूपेनत्वस्यैवकार्यविज्ञानात्॥इदंचदांडिनायनादिसूत्रेभ्रौणहत्येनत्वनि
पातनेनज्ञापयिष्यते॥किंच॥अंतरंगत्वादपिलत्वंस्यात्वचमिति॥अत्रोच्यते॥तृणह इमित्यत्राचिनेत्यनुवर्तते॥हलीतिनिवृत्तं॥तथाचभत्र
णेडित्यादिसिद्ध्येप्रत्ययलक्षणंनारंभणीयं॥किंतुनियमार्थंतदारंभइति भाष्येस्थितं॥इतरव्यावृत्तिमात्रफलकं प्रत्ययलक्षणंसूत्रं वक्त
व्यं॥कार्यिणितुस्थानिवत्सूत्रेणनिर्वाह्याणि॥तत्रचप्रदीप्येतीण्निवृत्तेयेऽप्राधान्येनाप्यलाश्रयणेनिषेधःस्थितः॥तथाचाचिप्रत्ययेविधीय
मानंलत्वंस्थानिवद्भावंविनादुर्लभमेव॥यदप्यंतरंग त्वाल्लत्वंइत्युक्तंतदपिन॥अकृतव्यूहपरिभाषयालत्वाप्रवृत्तेः॥किंच॥उपसर्गस्य
घञ्यमनुष्येबहुलमितिसूत्रेषत्वंवक्ष्यते॥अयतिपरत्वंउपसर्गस्यविशेषणंरेफस्येति॥तत्राद्येपक्षेपल्ययतइत्यिसिध्यतिप्लायनइतितुनसिध्येत्॥ए
कादेशेकृतेव्यपवर्गाभावात्॥उभयतआश्रयेअंतादिवद्भावाभावाच्च॥तस्मान्नत्रस्थानिवद्भावेनैवव्यपवर्गोवक्तव्यः॥सचपूर्वत्रासिद्धेचेति
निषिद्धइतिलत्वेप्रतिप्रसवःसार्थकएव॥द्वितीयपक्षेतुपल्ययतइतिनस्यात्॥यकारेणव्यवधानात्॥प्लायतइत्यत्रैवपरंलत्वंस्यात्॥पूर्वत्रा
सिद्धेचेतिस्थानिवत्वनिषेधेनतत्रस्फायतिपरस्यविधानात्॥कृतेत्विहलत्वग्रहणेयेननाव्यवधानन्यायेनपल्ययतेइत्यत्रापिलत्वंसि
ध्यतिस्फुटंचेदंअष्टमेभाष्यएव॥तस्मादिहलत्वग्रहणंकर्तव्यमेवेतिस्थितम्॥णत्वग्रहणंतुज्ञ्यर्थं॥तथाहि॥माधवपनीतिन्यायेनबहिरंगप
रिभाषयापिसिद्धं॥नचग्रहिणोतिप्रमीणीनइत्यादिसिद्ध्येतदितिवाच्यं॥अचःपरस्मिन्निति सूत्रेवस्यप्रवृत्तिंविनापिएकदेशविकृतस्यान
न्यतयाहिनुमीनेत्यस्यप्रवृत्तिसंभवात्॥नचष्णांतायङ्गितिसूत्रेवर्णितरीत्याप्रियाष्ठइत्यादिसिद्ध्येणत्वग्रहणमितिवाच्यं॥कार्यकालपक्षे
बहिरंगेणापिभाषयैवतस्यापिसिद्धेः॥यत्तुदेशपक्षस्तुनग्रहीष्यते॥प्रत्याख्येयेननणत्वेनसहफलसाम्यार्थं॥एतेनप्रियाष्ठइतिणत्वंवाभ्युपगम

नोक्तम्॥ मधुगितीष्यते मधुडितिप्राप्नोतिइति॥ ननुसकारोपदेशसामर्थ्यादितिबोध्यम्॥ सनूश्नोतनीत्यत्रशितुगित्यस्यापवादत्वात्सकार-
स्यरितार्थइतिचेन्नहिक्वौलुप्तमिनिसमाधेयं॥ कुस्मनोस्नोवेत्यत्रकूरितिमाधवोदात्ततेसम्प्रोवतत्रसामर्थ्यविरहेणसंयोगादिलोपाप्रवृ-
त्तेरितिदिक्॥ स्यादेतत्॥ इहसंयोगादिग्रहणंमास्तु॥ नचैवंवाक्यार्थमित्यादौस्कोरितिलोपोमाभूदिति॥ स्कोःसंयोगेत्यत्रझलोझलीत्यतोझ-
लइत्यनुवर्तते॥ तच्चोपसर्जनस्यापिसंयोगेत्यस्यविशेषणम्॥ ननुप्रधानयोरपिस्कोः॥ अव्यभिचारात्॥ तत्रझलोयःसंयोगस्तदा-
द्योःस्कोर्लोपःस्यादितिसूत्रार्थोदुर्बहिरंगनयायणोसिद्ध्यत्वाद्वा॥ अतएवहिदध्यत्रेत्यादौसंयोगांतलोपोनप्रवर्तते॥ तथाचाष्टमेवार्तिकं॥
नवाझलोलोपाद्बहिरंगलक्षणाद्धेति॥ नचैवमपिकाष्ठतक्॥ राष्ट्रक्रूइत्यादिनसिध्येदेवेतिवाच्यं॥ अनभिधानान्तत्रक्विपस्यदुर्लभत्वात्
॥ अनभिधानंचकाष्ठशगेवनास्तीत्याष्टमिकभाष्यबलेनन्यायसाम्यान्निर्णीयतइति॥ अत्रोच्यते॥ कुस्मयतेःकूरित्यादिसिद्ध्यर्थंसंयोगा-
दीतिवाच्यमेव॥ किंच॥ नकूरक्॥ इत्याद्यर्थमपिवक्तव्यं॥ नचानभिधानं॥ प्रमाणाभावात्॥ कैयटादिरुदात्ततत्वाच्च॥ नचकाष्ठशगेवनास्ती-
तिभाष्यंतत्रप्रमाणं॥ न्यायैवैषम्यात्॥ तथाहि॥ काष्ठशकृस्थाते त्यत्रझल्यरोयःसंयोगस्तदादेःककारस्यलोपमाशंक्यतदुक्तं॥ तेनयत्रक-
लोपप्रसक्तिस्तदभिप्रायकमनभिधानं॥ अतएवकांतेभ्यःक्विपनेत्येवंपरतयातत्व्याख्यातं॥ नचणिजंतेभ्यःक्विपिकलोपप्रसक्तिरस्ति
॥णिलोपस्यस्थानिवद्भावात्॥ नचपूर्वत्रासिद्धेचेतिनन्निषेधःसंयोगादिलोपेप्रतिप्रसवस्यजागरूकत्वात्॥ तस्मात्संयोगादिग्रहणंकर्त्त-
व्यमेवेतिस्थितं॥ इदंत्ववधेयं॥ संयोगांतस्यलोपइत्यत्रनवाझलोपाद्बहिरंगलक्षणत्वाद्धेतिद्वेधासिद्धांतव्यवस्थापनात्॥ कूरितिसंयोगां
तलोपोपिदुर्लभः॥ तेनकुस्मूइत्येवभवतिप्रथमपक्षेहितीयपक्षाभिप्रायेणतुमाधवः॥ नन्वेवमपिलत्वग्रहणंव्यर्थं॥ मिगाल्यतइत्यत्रस्य

पिणिलोपेप्रत्ययलक्षणेनलत्वसिद्धेः ॥नचवर्णाश्रयत्वं॥धातोःस्वरूपेनत्वत्ययेकार्यविज्ञानात्॥इदंचदांडिनायनादिसूत्रेभ्रौणहत्येनत्वनि
पातनेनज्ञापयिष्यते॥किंच॥अंतरंगत्वादपिलत्वंस्यात्वचमिति॥अत्रोच्यते॥तृणह इमित्यत्राचिनेत्यनुवर्तते॥हलीतिनिवृत्तं॥तथाचभत्र
णेडित्यादिसिद्ध्येप्रत्ययलक्षणंनारंभणीयं॥किंतुनियमार्थंतदारभ्यइति भाष्येस्थितं॥इतरव्यावृत्तिमात्रफलकं प्रत्ययलक्षणंसूत्रं वक्त
व्यं कार्यार्थंतु स्थानिवत्सूत्रेणनिर्वाह्याणि॥तत्रचप्रदीप्येतीण्निवृत्तेयेऽप्राधान्येनाप्यलाश्रयणेनिषेधः स्थितः॥तथाचाचिप्रत्ययेविधीय
मानंलत्वंस्थानिवद्भावंविनादुर्लभमेव॥यदप्यंतरंग त्वाल्लत्वंइत्युक्तंतदपिन॥अकृतव्यूहपरिभाषयालत्वाप्रवृत्तेः॥किंच॥उपसर्गस्य
घञ्यमनुष्येबहुलमितिसूत्रेपक्षद्वयंवक्ष्यते॥अयतिपरत्वंउपसर्गस्यविशेषणंरेफस्येति॥तत्राद्येपक्षेपल्ययतइतिसिध्यतिप्लायनइतितुनसिध्येत्॥ए
कादेशकृतेव्यपवर्गाभावात्॥उभयतआश्रयेअंतादिवद्भावाभावाच्च॥तस्मान्नत्रस्थानिवद्भावेनैवव्यपवर्गोवक्तव्यः॥सचपूर्वत्रासिद्धेचेति
निषिद्धइतिलत्वेप्रतिप्रसवःसार्थकएव॥द्वितीयपक्षेतुपल्ययतइतिनस्यात्॥यकारेणव्यवधानात्॥प्लायतइत्यत्रैवपरंलत्वंस्यात्॥पूर्वत्रा
सिद्धेचेतिस्थानिवत्वनिषेधेननत्रेफस्यायतिपरस्याविघातात्॥कृतेत्विहलत्वग्रहणेयेननाव्यवधानन्यायेनपल्ययतेइत्यत्रापिलत्वंसि
ध्यतिस्फुटंचेदंअष्टमेभाष्यएव॥नस्यादिहलत्वग्रहणंकर्तव्यमेवेतिस्थितम्॥णत्वग्रहणंतुज्ञ्यर्थं॥तथाहि॥माषवपनीतिन्यायबहिरंगप
रिभाषयापिसिद्धं॥नचग्रहिणोतिप्रमीणीनइत्यादिसिद्ध्येतदितिवाच्यं॥अचःपरस्मिन्निति सूत्रेवस्यप्रवृत्तिंविनापिएकदेशविकृतस्यान
न्यतयाहिनुमीनेत्यस्यप्रवृत्तिसंभवात्॥नचष्णांतायङ्गितिसूत्रेवर्णितरीत्याप्रियाष्ठइत्यादिसिद्ध्येणत्वग्रहणमितिवाच्यं॥कार्यकालपक्षे
बहिरंगपरिभाषयैवतस्यापिसिद्धेः॥यद्वोदेशपक्षस्तुनग्रहीष्यते॥प्रत्याख्येयेननणत्वेनसहफलसाम्यार्थं॥एतेनप्रियाष्ठइतिणत्वंस्युपगम

पूः पदमङ्गेरीग्रंथोप्यपास्तः ॥ बहिरंगपरिभाषयाअनित्यत्वेपीहृतदृवृत्तौप्रमाणाभावात्॥ तस्मादिहणत्वयहणंकर्त्तव्यमिति स्थितम् ॥ प्रत्युतणत्वेस्थानिवत्त्वाभ्युपगमेबाधकमप्यस्ति॥ तथाहि॥ अनितेरंतइतिसूत्रेऽनइतियोगंविभज्य हेमणइतिसूत्रसिद्धयेपदांतस्येतिनिषेधंबाधित्वा तुंअंतइतिसूत्रेणपदांतस्यानितेर्णत्वंविधीयतइत्येकाव्याख्या। अंतशब्दंसमीपपर्यायमाश्रित्यनितेरनसमीपस्थोयानितेर्नकारस्तस्यणत्वेनिमित्तमसमीपस्थस्यानितेर्योनकारस्तस्यणत्वमितिचयोगविभागंविनापिव्याख्यानद्वयंभाष्येस्थितं॥ तत्रप्रथमपक्षेआणितीत्यादौएकेनाकारेणव्यवधानेपिवचनसामर्थ्याण्णत्वंप्रवर्त्ततेहिनीयपक्षेतुएकादेशस्यादिवद्भावाद्वेफादव्यवहितस्यानितेःसंभवात्यवर्त्तने॥ पर्यनितीत्यत्रतुवर्णद्वयेनैकेनचव्यवायात्सहयेपिणत्वंनप्रवर्त्ततेइतिस्पष्टमष्टमे॥ यदिचेहणत्वयहणंक्रियेतनतर्हिपर्यनितीतिवत्राणितीत्यत्रापिद्वयेनैकेन वावर्णेनयथासंभवंव्यवधाणण्त्वंनस्यात्॥ नचवचनसामर्थ्यात्स्यानिवद्भावकृतंव्यवधानमाश्रियिष्यतेवृत्रघइतिकुत्वइवेतिवाच्यं। निरणिनिदुरश्णितिइत्यत्रचरितार्थत्वात्। नचैवंनिर्दुरोरनितेनित्येवब्रूयात्॥ नत्वनितेरंतइतिसामान्यलक्षणंप्रणयेत् इतिवाच्यं॥ आरत्तिमाश्रित्यहेप्राणित्यत्रणत्वस्यप्रतिप्रसवार्थंनिर्दुरोरित्यपेक्षयाअंतइत्युक्तावक्षरलाघवानुरोधाच्चसामान्यलक्षणप्रणयनसंभवात्॥ तस्मादाष्टमिकभाष्यपर्यालोचनेनेहणत्वयहणंनकर्त्तव्यइतिनिर्णीयते॥ अतएवव्यूढोरस्केनेत्यत्रणत्वंन॥ अन्यथाविसर्गस्यास्त्वेनतदादेशस्यसस्यस्थानिवद्भावाण्णत्वंस्यात्॥ इहणत्वयहणस्यप्रयोजनाभावात्तूक्तएव॥ ततश्च॥ तस्यदोषःसंयोगादिलोपलत्वयोरित्येववाच्यम्॥ वस्कतस्कनवाच्यं॥ पूर्वेनासिद्धेचेतिहि असिद्धत्वादेवन्यायसिद्धंइत्युक्तं॥ तच्चासिद्धत्वमनित्यं॥ अधुनेतिवदमुनेतिवाच्येनमुनइत्युक्तेर्नेतियोगविभागात्॥ नुदीतिवाच्येनामीतिलिंगाच्च ॥ अनश्वइत्यादेरंगस्येत्यनेनव्यावर्त्तोसत्यामपिअक्षण्वतइत्यादौहिदीर्घवारणायतुहिनामीत्युक्तं ॥ रुधादिभ्यःश्नम्॥ १११

श्नोम्नलोपइतिसूत्रद्वयेभाष्येचैवदाद्यालोचनेनारंभसामर्थ्यात्संनिपातपरिभाषायाश्चवासिद्धत्वस्याप्यविशेषाद्धाधेयास्तेनामीत्युक्तिरिति
चेत्॥न॥कृतितुग्ग्रहणादिनासंनिपातपरिभाषायाअनित्यत्वज्ञापनात्सामर्थ्याद्धाधइतिपक्षेप्यक्षण्वंतइत्यादौउभयबाधेगौरवाच्च॥तस्मादनि
त्यत्वज्ञापनार्थमेवतत्॥तेनसिद्धंकांडमपिसंगृहीतंभवति॥एतेनरामोरामेभ्यइत्यादौरुत्वस्यासिद्धत्वाद्रोरुकारस्येत्संज्ञालोपौकथंस्यातामित्येत
त्परिसमाहितं॥प्रत्ययःपरश्चेत्यादिलिंगाच्च॥यत्तुअनुनासिकनिर्देशसामर्थ्यादित्संज्ञालोपौप्रत्यसिद्धत्वेनेति॥तन्न॥तरुंमूलमित्यादौहशिच्वे
त्यस्यव्यावृत्तयेअतोरोरित्यत्रसानुनासिकस्यैवनिर्देशाभ्युपगमेनचारितार्थ्यात्॥रामइत्यादावपिसानुनासिकश्रवणस्यापाद्यमानतयाचारिता
र्थ्यस्याप्यापत्तेरिति॥तेनसयोगादिलोपलत्वयोरसिद्धताविरहात्स्थानिवत्वंभविष्यतीतिसकलेष्टसिद्धिः॥ ॥द्विर्वचनेचि॥ ॥रूपातिदेशोयं
॥द्वित्वनिमित्तेऽचियोजादेशःसःस्थानिवद्रूपंलभतेद्वित्वेकर्त्तव्येचक्रतुः॥चक्रुः॥द्वित्वनिमित्तत्वेनाज्विशेषणादिह॥दुद्यूषति॥सुस्यूषति॥न
स्यूहद्वित्वनिमित्तं॥ ॥तच्चैवंचक्रतुरित्यणोपिस्थानिवज्ज्ञापकोनस्यात्॥अतुसोद्वित्वनिमित्तत्वेपिअकारस्यातथात्वात्॥सूत्रंतुचकेद्
त्यादौसावकाशमिति॥सत्यं॥इहनिमित्तशब्देनसाक्षाद्वासमुदायघटकतयावाद्वित्वप्रयोजकत्वमाश्रीयतेनतुसाक्षादेवेत्याग्रहःसस्यानुरोधा
त्॥किंच॥निमित्तशब्दोनास्त्येव॥किंतुलक्षणयावाद्विरुच्यतेस्मिन्नितिद्विर्वचनमितिव्युत्पत्त्यावाद्विर्वचनमस्त्यस्मिन्निति अर्शआद्यचावाद्विर्व
चननिमित्तंलभ्यं॥तच्चप्रकारत्रयं॥साक्षात्परंपरासाधारणेप्रयोजकेसुवचं॥एतच्चठस्येकइतिसूत्रेकैयटेस्पष्टं॥अतएवऊर्णोतेःसनिसनी
वंनेतीट्पक्षेविभाषोर्णोरितिडित्वविरहेऊर्णुनविषतीतिसिद्धं॥सनंतस्यद्वित्वविधानेपिसनोद्वित्वंप्रयोजकत्वेनतस्मिन्गुणावादेशयोर्द्वित्वेकर्त्त
व्येस्थानिवज्ज्ञापनात्॥तदुक्तं॥तज्ज्ञापभावितान्नात्रेणेहनिमित्तत्वमिति॥वस्तुतस्तुद्विर्वचनाक्षिप्तःप्रत्ययोअचीत्यनेनविशेष्यते॥परस्मिन्नितिअनु

र्वर्त्तते॥ अ सीषांमध्येदेवदत्तात्परमानयेत्युक्तेयथासजातीयेनमनुष्येणाव्यवहितःपरआनीयते॥ तथेहापिप्रत्ययांतरेणाव्यवहितःप्रयोगःप्रत्य
ते॥ तेनहित्वनिमित्तेअजादौप्रत्ययेप्रत्ययांतरेणाव्यवहितेसतियोजादेशःसस्थानिवत्स्यात् इतिसूत्रार्थः॥ एवंचचक्रतुरित्यादौनकाप्यनुपप
त्तिः॥ वक्ष्यमाणज्ञापकबलेननिचाव्यवहितेप्रकृत्तावपिदिद्वनीयिषतीत्यादौअनेकप्रत्ययव्यवधानात्प्रवृत्तिः॥ अपीप्यदित्यत्रवर्णव्यव
धानेपिप्रत्ययांतराभावात्प्रवृत्तिः॥ अनुवादेपरिभाषानुपस्थानेपिनिर्दिष्टपरिभाषाकर्त्तव्यस्यनिर्वाहश्चेतिबोध्यम्॥ अतएवेहपरस्मिन्नित्यनु
वर्त्ततइतिन्यासकारः॥ नथाहिप्रत्ययेचेनेहप्रत्ययाक्षेपंवदन्निभिन्नेनव्यवहितेज्ञापकस्याप्रवृत्तिंब्रुवन्केयटोपिएतदभिप्रैति॥ ऊर्णुनविषती
त्यादिसिद्ध्यर्थंतुतद्भावभावितामात्रेणनिमित्ततेतिस्वीक्रियतेएवेत्यवधेयं॥ नन्वेवमरिरिषतीतिनसिद्ध्येत्॥ ऋधातोःसनिस्मिपूङ्रंज्व
रंसनिद्तिदिक्तेदसश्चब्द्निमित्तकस्यगुणस्यस्थानिवद्भावेअजादेर्द्वितीयस्येतिइसोहित्वप्रसंगात्॥ इष्यतेतुरिसशब्दस्यहित्वं
॥ अत्रोच्यते॥ नहिकार्यीनिमित्ततयाश्रीयतेइतिदीधीवेवीटामित्यत्रोपपादितत्वान्नेहइसशब्दोनिमित्तं॥ अतोनस्थानिवद्भावः॥ नचैवंसनेन
स्यकार्यित्वादूर्णुनविषतीत्यपिनस्यादितिवाच्यम्। मत्वर्थीयेननिनाकार्येमनुभवतएवकार्यित्वलाभात्॥ तत्रतुद्वितीयएकाचोहित्वरूपंका
र्यमनुभवति॥ नतुसन्। अरिरिषतिइत्यत्रतुरिसशब्दस्यैवकार्यभाक्त्वमितिवैषम्यात्॥ नन्वेवंअचीत्यस्यजघीयतेदेधीयतेइतिव्याव
र्त्त्यनसंगच्छते॥ घीय्धीय्इतिद्वितीयाजवधिकस्यैकाचःकार्यितयायडोपिहित्वनिमित्तत्वाभावात् इतिचेत्॥ सत्यं॥ अधिजगेइत्येवान्
ग्रहणव्या वर्त्त्यमस्तु॥ तत्रहिगाङ्लिटीतिद्वित्वकारकनिर्देशमाश्रित्यलावस्थायामेवगाङ्गदेशइतिभाष्यएवस्थिते॥ इदंचवार्त्तिकम् तम
तमनुसृत्योक्तं॥ तत्रलिटिलिङीत्यादीगंपरसप्तमीत्वाभ्युपगमात्॥ भाष्यमतेतुआर्द्धधातुकीयाःसामान्येनभवंतीत्यभ्युपगमाल्लिटीत्या

द्येणिविषयसप्तम्यण्वेत्युक्तंस्थानिवत्सूत्रे।तन्मतेतुअचीत्यस्यजग्लेइत्यादिव्यावर्त्यम्बोध्यम्॥तथाहि॥आदेचइतिसूत्रेःशीतिपरसप्त
मीतिपक्षेशिदितिकर्मधारयाश्रयणात्यस्मिन्विधिस्तदादावल्ग्रहणइत्यस्यप्रवृत्त्याआदिशितान्यस्मिन्परेविधीयमानत्वंलावस्थ्यांकि
यते॥अतोनस्थानिवत्॥नचअंतरंगत्वान्निबद्दिषुणशिचकृतेआत्वंस्यान्नथाचस्थानिवत्त्वंदुर्वारइतिवाच्यं॥नसंप्रसारणेसंप्रसारणंह्लिटि
वयोपइतिहिलकारकनिर्देशमाश्रित्यनंचतत्रानुपयुक्तत्वादिहानुवर्त्यह्लिटितुलावस्थायामेवेतिआत्वविधौव्याख्यानात्।कथंतर्हिजेघीयते
रेधीयतेइतिभाष्यवृत्त्यादिषुप्रत्युदात्तमितिचेत्॥प्रातिशाख्यरीत्येत्यवेहि॥तथाहि॥अनुस्वारोव्यंजनेचास्वरागंदृत्युक्तास्वरांतरेव्यंजना
न्युच्चरन्तीतितत्रसूत्रितं॥एवंचनेनिजत्यनेनिजुरित्यादौएकाचूकस्यधातोःसंपूर्णस्यहिर्वचनादभ्यस्ताश्रयमङ्गावजुसादिसिध्यतु॥ह्य
स्केतुमध्यवर्तिनांहलांउच्चारणत्वात्स्थमाजंतमेवहिरुच्यतां॥यथादरिद्रातीदृइति॥जागर्तीजाइति॥नचैतावताकश्चिद्रूपेनिष्टमापद्यतेयेन
प्रातिशाख्यपरिभाषामुपेक्ष्यनटभार्यावच्छंजनानिइतिचाश्रित्यदरजागृइत्यादिहिरुच्येत॥अतएवचतुरस्थयतावाद्यैरलोपश्चेतिसं
मच्छतेइनिदिक्॥यदातुषष्ठभाष्यवार्त्तिकरीत्याहितीयाजवधिकएकाचूगृह्यते॥गाङ्लिटीतिचविषयसप्तम्याश्रीयते॥अनैमित्तिकमा
त्वंशितितुप्रतिषेधइतिकाअशितीतिविषयसप्तमीवाआश्रीयतेतदाजेग्रीयतेधिजगेजग्लेइतित्रिविधस्यापिव्यावर्त्यस्यासंभवादचीत्य
स्यफलंकिमितिविभावनीयंसूरिभिः॥स्यादेतत्॥भसेःकसौघसिभसोर्हलिइत्युपधालोपेकृतेहित्वंमाभूदित्येतदर्थमज्ग्रहणंभविष्यती
तिचेत्॥सत्यसतिवाहित्वेश्वानितिश्कतोविशेषाभावात्॥ननुदुर्वारोपिविशेषःसूस्मदृशंपतिर्दुर्वारइतिचेन्न॥रातिमियाणिवीरवच्छतुद्रु
त्यारायिवहित्वाभावसंभवात्॥वस्यतिहिषेह्लिटिधातेरितिसूत्रे॥अनभ्यासग्रहणनर्थक्यंचछंदसिवावचनादिति॥नचैवमपिपाप्सिक

हित्वं स्यादेवेतिवाच्यं॥ दृष्टानुविधानस्यैवछंदसिकर्त्तव्यत्वात्॥ अतएवहिउर्ऋन्नित्येवसिद्धे नित्यंछंदसिइतिसूत्रंनिष्फलमित्युक्तं॥ लोकेनुभाष्यमतेकसुर्दुरेभ्यउपधालोपश्चछांदसएवतदेवंजेघ्रीयतेधिजगेजग्लेइत्येतत्सिद्ध्येत्क्रियमाणं अज्ग्रहणमेवेहरूपातिदेशत्वेज्ञापकं॥ कार्यातिदेशपक्षेहिघ्रीगाग्लाइत्येषामेवभाव्यंहित्वेनेतिकिंतेन॥ तथाचवार्त्तिकं॥ अज्ग्रहणंतुज्ञापकंरूपस्यानिवङ्भावस्येति॥ देधीयतेशाशाय्यतेइत्यपिजेघ्रीयतेइत्यनेनसमानयोगक्षेममुदाहरणं॥ ईघ्राध्मोरितिईकारः॥ अयङ्यिक्ङितीति शौडोयङादेशः॥ अचीत्यस्यप्रत्याख्यातपक्षेतुलस्यानुरोधादेवशब्दाधिकारमाश्रित्येहरूपातिदेशोव्याख्येयः॥ पूर्वसूत्रादनइतिषष्ठ्यंतस्यानुवृत्तिरिहकिमर्थेतिचेत्॥ शुशुवानुमित्यादिसिद्ध्येदितिगृह्णाण॥ तथाहि॥ विभाषाश्वेरितिसूत्रंयद्यपिशुशावेत्यादौपित्सुसावकाशंतथापिशूनइत्यादौचरितार्थस्यवचिस्वपीत्यस्यबाधकमेव॥ परस्मात्॥ लिट्यभ्यासस्योभयेषामित्यस्यतुनबाधकं॥ श्वयत्यनभ्यासविषयकस्यविधेर्निरवकाशत्वात्॥ अतएव विभाषाश्वेरितिसूत्रेश्वेर्लिट्यभ्यासलक्षणप्रतिषेधइतिवार्त्तिकमारब्धं॥ लिट्यभ्यासस्येतिसूत्रेअश्वयतीनामितिपूरणीयमितितदाशयः॥ अन्यथाहिविहितप्रतिषिद्धतयाविकल्पात्शुश्वायशुश्वियतुरित्यनिष्टमपिपक्षेप्रसज्येत॥ एवंस्थितेहिर्वचनेचीत्यत्राचइत्यस्याननुवृत्तौशुशावेत्यत्रइच्छावादेशयोरिवसंप्रसारणस्यापिस्थानिवद्भावःस्यात्॥ तथाचशिशावशिशुवतुरित्याद्यनिष्टमापद्येत॥ नचसंप्रसारणंतदाश्रयंचबलवदितिनिबाद्यवस्थायामेवसंप्रसारणप्रवृत्तेरचीतिनास्तीतिवाच्यम्॥ एवमपिव्यतिशुशुवातेइत्यादौदोषश्चौव्यात्॥ नचविभाषाश्वेरितिलावस्थायामेवप्रवर्त्ततइतिवाच्यं॥ एवमपिईजातेईजाथेइत्यादौदोषतादवस्थ्यात्॥ लावस्थायांकित्त्वविधानेतत्र संप्रसारणाप्रवृत्तेः॥ नचकित्त्वमपिप्रवर्त्ततामितिवाच्यम्॥ अंतरंगेस्तिबादिभिर्बाधितत्वात्॥ किंचस्वापेश्चङीतिसंप्रसारणेअसूषुपत्

इत्यीष्यते ॥ स्थानिवद्भावेतुसतिनसंप्रसारणइतिनिषेधाद्भ्यासेउवर्णोनश्रूयेतेतिदिक् ॥ तंत्रावृत्त्यैकशेषाणामन्यतमाश्रयणादिहकालावधारणमपिक्रियते ॥ तथाचव्याख्यातं ॥ हित्वेकर्त्तव्येइति ॥ तेनचक्रतुरित्यादावुत्तरदलेपुनर्यथायथंयणादयोभवंत्येव ॥ अन्यथाप्रकृतिभावएवस्यात् ॥ निन्यतुरित्यत्रतुप्रथमप्रवृत्तस्यापिइयङोहित्वकालेऽपहारात्सुनःप्राप्तोऽप्ययमेकाचइतियणाबाध्यते ॥ यद्वा ॥ पूर्वमपीयङुनप्रवर्त्तते ॥ प्रकल्प्यचापवादविषयंतत्रउत्सर्गोभिनिविशतेइतिन्यायात् ॥ यद्वा ॥ आभीयत्वेनेयङोसिद्धत्वाद्यण्भविष्यति ॥ स्यादेतत् ॥ स्थानिवत्ग्रहणंनिवर्त्यनञेचानुवर्त्यहित्वनिमित्तेऽचिअचआदेशोनस्याद्धित्वेकार्यइत्येवव्याख्यायतां ॥ एवंहिसतिस्थानिवदितिवृद्ध्यधिकारेऽशोपिनभवतीति ॥ सत्यं ॥ अस्मिन्नपिपक्षेनञःस्वरितत्वंप्रतिज्ञातव्यं ॥ स्थानिवच्छब्दस्यतुकुतमेवत्वंदितिलाघवं ॥ अस्तुवाव्याख्याद्वयमपिफलेविशेषाभावादितिदिक् ॥ नन्वेवमपिणौस्थानिवद्वचनंकर्त्तव्यं ॥ नुनावयिषतिचुस्रावयिषतितुष्टावयिषतीत्यर्थे ॥ अत्राहुः ॥ ओःपुयण्ज्यपिषुवचनंज्ञापकंणौस्थानिवद्भावस्येति ॥ अस्यार्थः ॥ यौतेः पूङभ्यांसनीवंतेतिस्मिपूङ्रंज्वशमितिसूत्राभ्यांद्विरुक्तेष्वियविषतिपिपविषतेइत्यत्रहिर्वचनेचीतिस्थानिवद्भावाद्यकारपकारयोरवर्णपरयोःपरतोयद्यप्यभ्यासउकारोलुप्यते ॥ तस्यनेःकारादेशविधानेनओः पुयण्सूत्रेपकारयकारग्रहणंचरितार्थं ॥ तथाचवर्गग्रहणंप्रत्याहारग्रहणंजग्रहणंचज्ञापकंहित्वनिमित्तस्याचोणिचाव्यवधानेपिस्थानिवद्भावःप्रवर्त्ततइति ॥ तंविनाअवर्णपरेषुपुयण्ज्यपिषुपरेषुउवर्णांतस्याभ्यासस्यदुर्लभत्वात् ॥ येननाव्यवधानाच्चणिनैवैकेनहित्वनिमित्तस्याचोव्यवधानमाश्रीयते ॥ तेननिन्यवनीयिषतीत्यादौनस्थानिवत् ॥ ल्युट्क्यञ्भ्यांव्यवधानात् ॥ एवंणिजंताल्ल्युट्क्यञ्सनन्तेपिनस्थानिवत् ॥ निनावयिषतीत्यादि ॥ नहिणौकृतेस्थानिवदितिवचनंअस्तिकिंतुज्ञाप्यमानःस्थानिवद्भावोलाघवादेकेने

वन्यवधानंइत्युक्तंइहत्वनेकेनव्यवधानंस्पष्टमेव॥ यद्यप्यनूद्येशानादेशविशेषणत्वान्निर्दिष्टपरिभाषानोपतिष्ठते॥ तथापिअङ्गीत्यौपश्लेषिकसप्तमीबलादेवतदर्थःपर्यवस्यतिईषद्विप्रकृष्टलाभेचनात्यंतंविप्रकृष्टस्यग्रहणमितिबोध्यम्॥ वस्कतस्कपरस्मिन्नित्यनुवर्ततेइति सूत्रोपक्रमएवोक्तं॥ एवंचाबीभवत्॥अमीमवत्॥अरीरवत्॥अलीलवदित्यादिषुविभावयिषतीत्यादिषुचओःपुयणितीत्वंप्रवर्त्तते॥ ज्ञापनफलंतु यत्रओःपुयणित्यस्याप्राप्तिस्तत्रबोध्यम्॥ तद्यथा॥चुक्षावयिषति॥उडुरिवाचरतिउडवति॥उडवतेर्णौसिन्॥उडुडावयिषति॥चडि॥औडुडवत्॥तुतावयिषति॥अतूतुवत्॥सौत्रोयंतुरुस्तुशमीत्यत्रनिर्दिष्टः॥ऊर्णुनावयिषति॥और्णूनवत्॥चिस्फुरोर्णेदित्यात्वस्यस्थानिवद्भावात्पुस्फारयिषति॥अपुस्फरत्॥इत्यादिबोध्यम्॥ तुल्यजातीयापेक्षंचज्ञापकं॥ तेनअवर्णपरेहल्येवस्थानिवत्॥ तेनाचिकीर्त्तीदित्यादौनातिप्रसंगइतिभाष्येस्थितम्॥ यत्तुकाशिकायांपूर्वत्रासिद्धमितिसूत्रेवर्हेर्निष्ठानाण्णिचिचडि॥ओजदित्युदाहृत्यतिन्नंतस्तुओजिदृदित्युक्तं॥ तत्रेवन्यासेपिणौकृतस्यटिलोपस्यस्थानिवद्भावइतिव्याख्यातेतदुभयंभाष्यविरुद्धत्वादुपेक्ष्यं॥ अचिकीर्त्तीदित्यत्रसिद्धेअवर्णपरधात्वक्षरविषयकमेवज्ञापकमितिस्पष्टंभाष्ये॥ प्रकृतसूत्रप्रत्याख्यानपरेवार्त्तिकेअव्याप्तिरूपदोषोद्भावनपरेणओदौदादेशस्यचुटुतुशरादेरित्यादिभाष्येणाप्ययमर्थोलभ्यतेइत्यनुपदमेवस्फुटीकरिष्यते॥ अतएवशुष्किकाशुष्कजघाचक्षामिमानोजिढन्तथेतिवैयाघ्रपद्यवार्त्तिकेजिशब्दएवपठ्यते॥ जशब्दपाठस्तुक्वाचित्कःग्रामादिकएवेतिबोपदेवोदुर्गसिंहादिसंमतिप्रदर्शनपूर्वकंकामधेनौस्थाप्पिनवान्॥ वैयाघ्रपद्यवार्त्तिकंतुपूर्वत्रासिद्धमितिसूत्रस्यप्रयोजनसंग्रहपरंतच्चतस्मिन्नेवसूत्रेव्याख्यास्यामः॥ एवंचांकपदेलक्षणेचेत्यस्य चडि॥सणिक्नहिंत्वेनांचिकदित्येवरूपंनत्वांचकदिति॥ नचैवमदंतपाठवैयर्थ्यंस्यादितिवाच्यं॥तत्सामर्थ्यादल्लोपस्याप्रवृत्तौसत्यांहृदिपुकोऽच्

सत्तोरंकपयतीनिरूपाभ्युपगमात्॥ नचैवंसत्यंकपतीतिरूपंनस्यादितिवाच्यम्॥ सूचिसूत्रीत्यादिवार्त्तिकेसोसूच्यतेसोसूत्र्यतइत्यादिभाष्योदाहरणेनपस्येअल्लोपस्याभ्युपगमात्॥ सूचिसूत्र्यादयोत्यदंताः॥ अनएवानेकाचत्वेनषोपदेशत्वाभावान्नषत्वं॥ षोपदेशलक्षणेहिएकाच्त्वंविवक्षितंइतिमाधवीयेस्पष्टं॥ एतच्चसेगादिपर्युदासात्षकस्मिंदादिसाहचर्यात्सोसूच्यतेइत्यादिभाष्योदाहरणाच्चनिर्णीयतइतिवस्यते॥ एवंवाक्यशेषंसमर्थयिष्यामहेप्रार्थनाध्यवसायैःसंप्रश्नप्रार्थनेषुलिङ्इत्यादिप्रयोगाश्चेहमानं॥ तदेतत्सकलमभिसंधायअदंतत्वंसार्व्वत्रिकंन्यायवाअल्लोपइत्याहुः॥ उक्तंचकामधेनौ॥ अल्लोपित्वंस्थानिवत्त्वंचादंतत्वप्रयोजनं॥ यत्रत्वेतेनविधेयतेतत्राल्लोपविकल्पनमिति॥ कथयत्यादयभिप्रायेणपूर्वार्द्धंअन्यत्यादयभिप्रायंतूत्तरार्द्धमितिविवेकः॥ नन्वौन्चिकदित्यत्रदीर्घोलघोरितिप्राप्तेऽनल्लोपइतिनिषेधेनाकारश्चरितस्तर्हीतिचेन्नचिड्डपरणीयदंगंतस्यषोभ्यासइतिसूत्रार्थस्यवस्थापनात्॥ इहत्वंगावयवस्याभ्यासोनत्वंगस्य॥ एतच्चौर्णुधातौमाधवग्रंथेस्पष्टं॥ अतस्त्वऔदिटत्इत्यादौनदीर्घः॥ यत्तुदीर्घविधौहेलादेरितिविशेषणंकौमुद्यांदत्तंतन्निर्मूलं॥ और्णनवदित्यादेःसिद्धावपिसन्वल्लघुनीत्यत्रचड्डपेइत्यंगस्यविशेषणंलघोर्नेतिमतभेदेनेष्यमाणेअचिचकासदचचकासदितिरूपद्वयेप्यतिप्रसक्तंच॥ दीर्घविधौचड्डपरइत्यस्यलघुविशेषणतामाश्रित्यार्थसिद्धकथनंनदितिवास माधेयं। सिद्धांतेतुमाधवोक्तरीत्याऊर्णावयतेरिवचकासयतेरपिदीर्घाभावःस्पष्टएवेतिदिक्॥ एतच्चसूत्रंवार्त्तिककारःप्रत्याचख्यौ॥ तथाहि॥ षष्ठीत्वप्रकरणान्नेविप्रतिषेधःपठ्यते॥ हिर्वचनंयणायवायावाल्लोपोपधालोपणिलोपेकिकिनोरुत्वेभ्यइति॥ तथाचदध्यत्रेत्यादौसावकाशोयण्॥ चयनंचायकंलवनंलावकइत्यादौचायवावायवः॥ गोदःकंबदइत्यादावल्लोपः स्लेष्मघ्नइत्यादावुपधालोपः कारणाहारणेत्यादौणिलोपः॥ और्णोत्यादावुत्त्वंचेत्येतानिनवीनिभिदतुरित्यादौसावकाशोनहित्वेनपूर्वविप्र

तिषेधाल्लघ्वंनेतेनचक्रतुः चिचायलुलावचिचपिथलुलविथपपुतुःतस्थतुःजग्मतुःजघ्नतुःआटितत्ननुरिःजगुरिरित्यादिसिद्धंनन्वेवंनि
न्यतुरितिनस्यात्॥इयङ्इहअपरिगणितत्वादितिचेन्न॥एरनेकाचइतियणेहभाव्यमितिभागपीयङोप्रवृत्तेःप्रकल्प्यचेतिन्यायात्॥
तस्माद्विर्वचनेचीतिसूत्रंविनापिसर्वंसिद्धमिति॥भाष्यकारास्तुसूत्रंनेमर्थयंते॥तथाहि॥विप्रतिषेधस्तावद्युक्तः॥आल्लोपादीनांनित्यत्वात्
॥हित्वस्यानित्यत्वेनातुल्यबलत्वात्॥किंचपूर्वविप्रतिषेधेसर्वत्रवचनस्यारंभणीयत्वादिहतुसुतरांतयेतिक्लाघवं॥अपिच॥क्रियमाणम
पिवचनंयद्यंतरंगाणामपिबाधकंनहिनिरवकाशीयिषति इत्यादावभ्यासेउकारःश्रूयेत॥अथात्रांतरंगत्वादवादेशः॥वचत्रंतुनांतरंगाणां
बाधकंकिंतुनित्यानामेवेतिज्ञेयः॥एवमपिचुक्षावयिषतिइत्यादौवृद्ध्यावादेःप्रवर्तनात्अभ्यासेइत्वंस्यात्॥तथाचतद्बाधनायउत्त्वंविधे
यं॥तथाचत्वयाइत्यंन्यासःकर्त्तव्यः॥उत्परस्यातः॥तिच॥ओदौदादेशस्यचुदुतुशरादेरिति॥अभ्यासस्येतिवर्त्तते॥ओदौतोरादेशोऽभ्यास
संज्ञेऽंगेऽवयवेभ्यासश्चुदुतुशरादिस्तस्ययोकारस्तस्यउत्स्यादित्यर्थः। यथा॥चुक्षावयिषतिउड्डावयिषतितुनावयिषतिऊर्णुनावयिषति
शुशर्वयिषतिपुस्फारयिषतिइति॥अत्रचिस्फुरोर्णावित्यात्त्वं॥यद्यपीहरवयःशेषकृतेशरादित्वेनास्तितथाप्यभ्याससंज्ञाप्रवृत्तिकालेस्त्ये
वेत्यवधेयं॥ओदौदादेशस्येतिकिं॥चायृपूजायांचिचायिषतिखदस्थैर्येचिखदिषति॥चुदुइत्यादेःकिं॥विभावयिषति॥अतइतिकिंऋज्जं
अर्णंऋतुंअंशुंचाख्यत्॥आर्जिजत्॥आणिर्णत्॥आर्न्नितत्॥आंशिशदित्यत्रपरत्वाद्ह्रस्वासत्यांदिलोपेसणिच्कस्यहित्वेकृतेमाभूत्॥अ
भ्यासस्येतिकिं॥चुदुतुइत्यादितर्ह्यंगस्यातोवाविशेषणंस्यात्॥उभयथापिदोषः॥शीतंलुनातिशीतलूःसूर्यः॥तमाख्यातुमिच्छतिशिशी
तलयिषतीत्यत्रतकारादुत्तरस्यातउत्वसंगात्॥नन्वेवमप्योजढदांचकदित्यादावभ्यासेऽकारश्रवणार्थंयत्नांतरमास्थेयमेवेतिगौरवांत

रंवार्त्तिककारंप्रतिकुतोनापाद्दितमितिचेन्न॥ तत्रेकारएवेष्टइत्युक्त्वात्॥ सज्ञातीयापेक्षंहिसिद्धांतेपित्तापकं॥ अन्यथाअचिकीर्त्तदित्यत्राभ्यासेऽकारश्रवणापत्तेः। तस्माद्वार्त्तिककृतावचनद्वयमपिकर्त्तव्यंस्यादितिस्थितं॥ तथाओःपुयण्जीतितृतीयमपिकर्त्तव्यमेव॥ पिपविषतेयिपयविषतिजिजावयिषतीत्यत्रइत्वंयथास्यात्॥ तथाहि॥ पुयुइत्यनयोःसनिदृटिपरत्वात्नुणेकृतपूर्वेविप्रतिषेधेनावादेशात्सूर्वेदित्तस्मिन्नुत्वंवक्तव्यमेव॥ तथाजुचंक्रम्येत्यत्रनिर्दिष्टात्सौत्राज्जुधातोर्ण्यंतात्सनिजिजावयिषतीत्यत्रचुटुतुशरादेरित्युत्त्वेप्राप्तेतद्बाधनायइत्त्ववक्तव्यं॥ नचनत्रकारमेवपठिष्यामिनतुतुशब्दंइतिवाच्यं॥ गुङ्धुङ्ध्वनौ॥ आभ्यांणिजंताभ्यांचडि.सनिचअजूगवत्अजूघवत्॥ जुगावयिषतिजुघावयिषतीत्याद्यसिद्धिप्रसंगात्॥ किंच॥ दिदवनीयिषतिइत्यत्रचुटुतुशरादेरित्युत्त्वंस्यादितद्वारणायवचनांतरमास्थेयं॥ अथवासन्यनुबंधनिमित्तेनुणोयङ्लुकोरित्याद्यष्टसूत्र्याविछिन्नमपिसन्ग्रहणंमंडूकप्लुत्यानुवर्त्त्यसूत्रमनोक्तरीत्यायेननान्यवधानन्यायेननिर्ज्ञभिन्नेनव्यवधानेनउत्त्वंनेतिसमाधेयम्॥ एवमपिनुशब्दादाचोरकिंबनाद्धेतुमण्णौसत्यसतिवासन्॥ नत्रतितनविषतितिननावयिषतीत्यत्रापिउत्त्वंस्यात्॥ तद्ग्रहणायओदौदादेशस्येतिवार्त्तिकमन्यथैवव्याख्येयं॥ तद्यथा॥ अभ्यासस्येत्यवयवषष्ठी॥ ओदौदित्यादिस्तुसंबंधसामान्यषष्ठी॥ उभयमप्यनोविशेषणं॥ तदयमर्थः॥ अभ्यासस्यावयवभूतस्तथाओदौदादेशस्ययथायथंअवयवआदेशोवायोऽन्त्योभवतिइति॥ चुक्षावयतीत्यत्रयवः॥ पुस्कारयिषतीत्यादेशः॥ तथाचाद्ग्रहणमपिसार्थकं॥ अन्यथाआटिटदित्यादिसिद्धयेचडि.परेणोयदंगंतदवयवेलघौसन्वदतिदेशदार्जिजदित्यादौअतिप्रसंगविरहादनइतिव्यर्थंस्यादितिदिक्॥ तथाचसूत्रमतापेक्षयावार्त्तिकमत्रमहदेवगौरवमिति॥ स्यादेतत्॥ मास्तुप्रकृतसूत्रंमाचवार्त्तिकं॥ ओःपुयणित्येतदेवज्ञापयिष्यति॥ अन्यथागंनित्यंचबाधित्वाद्विर्वचनंस्यादिति॥ ततोहित्वकृतेयणाप्रयत्नं

दिकरिष्यते॥ मैवं॥ निनवनीयिषतिदिदवनीयिषतीत्याद्यसिद्धेः॥ किंच॥ सामान्यापेक्षंज्ञापकंविशेषापेक्षंवा॥ आद्येऽप्यचकीर्त्तीदितिनसिध्ये
त्॥ अंत्येचकनुरित्यादिनसिध्येत्॥ तस्मात्सूत्रंकर्त्तव्यमेव॥ तुस्म्वयिषतीत्यादिसिद्ध्येऽप्यूयणिति ज्ञापकमाश्रयणीयं॥ नच्चतुल्यज्ञ
तीयापेक्षमितिस्थितम्॥ अतएववामनोदात्तमौजढदित्यनङोष्यविरुद्धमितिबोधदेवोपपादितंप्राक्॥ वस्तुतस्तुवामनोक्तं
सम्यगेव॥ यतः॥ वोपदेवोमहाग्राहग्रस्तोवामनदिग्गजः॥ कीर्त्तेरेवप्रसंगेनमाधवेनविमोचितः॥ तथाहि॥ किंवामनोक्तोवार्त्तिकदूषणंभा
ष्यविरोधः॥ किंवासजातीयविषयज्ञापकतावर्णनभाष्यविरोधः॥ नाद्यः॥ नित्यानित्ययोर्विप्रतिषेधानुपपत्तिरितिदिदवनीयिषतीत्याद्य
सिद्धिरितिचदूषणं योभाष्येनुक्तंतयाभाष्यंदूषणांतराणामप्युपलक्षणमितिस्थितेऔजढदित्यभ्यासेऽकारादेशोपिविधेयः स्यादिति
वार्त्तिकदूषणांतरस्यापिदेयत्वात्॥ तदेवंवार्त्तिकंरचनीयं॥ ओदौदादेशस्यचुटुतुशरादेरभ्यासस्योत्सनि॥ ततोह्लोपवतोणिचोऽभ्यासेऽह्लोप
इतीत्स्योभ्यासस्यणिचोत्स्यात्॥ औजढत्॥ आंचकदिति॥ नहितीयः॥ यत्रहिरुक्तोअभ्यासस्योत्तरखंडस्यौजवर्णस्तत्रस्थानिवदे
तिहिभाष्यस्यफलितोर्थः॥ अस्तिचहतशब्दस्यहिरुक्तोप्रक्रियादशायांउत्तरत्रावर्णः॥ ननुपुनःप्रवृत्तेनदिलोपेनापहारान्नासौप्रयोगेसम
वैतिरितिचेत्॥ किंततः॥ नहिप्रयोगसमवायित्वंविशेषणंभाष्येदत्तं॥ एवंचनुनावयिषतीत्यादौहित्वप्रवृत्तिवेलायांअवर्णाभावेपिपश्चाज्ज्ञा
विनंतमाश्रित्ययथास्थानिवज्ज्ञावस्तथाहतशब्दस्यपश्चात्तहिरहेपि॥ अध्यजीगपत्इत्यत्रनुस्थानिवज्ज्ञावेसत्यजादितयाणिचएवहित्वं
स्यात्तथाचेनहित्वप्रवृत्तिवेलायांनापिपश्चादवर्णपरेत्यचिकीर्त्तेदित्यादाविवनस्थानिवज्ज्ञावः॥ एवंचोवर्णस्थानिकस्यैवस्थानिवज्ज्ञावइ
तिदुराग्रहोनिर्मूलएव॥ अतएवलोपः पिबतेरितिसूत्रेपीप्यदित्यत्रपिबत्तेर्णौयुक्तेचडि उपधालोपेचतस्य स्थानिवत्त्वात्पाय्शब्दस्यहि

रुक्तिरितिवृत्तिग्रंथोपिसंगच्छते॥एवंचांचकदित्येवसाधु॥नत्वांचिकदिति॥अंकापयतिआंचीकपदित्यादिनुदूरापास्तं॥अल्लोपस्यदुर्बारत्वात्अ
कारोच्चारणंत्वभ्यासेऽकारश्रुत्यादिनाचरितार्थं॥यदप्यग्लोपित्वंस्थानिवत्वंचेत्याद्युक्तं॥तदपिन॥चिंतेरितिकरणेनघुषिरविशब्देइत्येतत्सू
त्रभाष्येणचणिञ्चिकल्पस्यसुस्थतयाअल्लोपविकल्पस्यनिर्मूलत्वात्॥णिजभावपक्षेहिअनेकाचइत्यामप्रवृत्त्याधातोरंतोदात्तप्रवृत्त्याचा
कारःकृतार्थः॥अंक्यादित्यादौनलोपप्रातिपदिकांतेपिफलमितिदिक्॥नचैवमप्योजढदित्यभ्यासेऽकारःश्रूयेत॥पूर्वत्रासिद्धीयमद्विर्वचनेऽचीत्यु
क्तेरितिन्यायः॥उभौसाभ्यासस्येतितदनित्यताज्ञापनात्॥यत्तुपदद्विर्वचनविषयंनदितिवोपदेवः॥तन्न॥सुदिनिर्दुभ्यइतिसूत्रेषुपिभूतोहि
रुक्प्रतिवार्तिकेनतद्ग्राह्येणचसद्विरोधात्॥अतएवाभ्यासेऽकारंदुर्गगुप्तादयःआहुः॥एवंचवैय्याघ्रपद्यवार्तिकेऽजढदितिपाठस्य
श्रमादिकत्वकल्पनमेवश्रमादिकं॥जिघ्रब्दगाउस्तुक्तिनानिर्नाल्यः॥यत्तुअदंतेषुऊनधातौमाभवान्दूनिनदित्यभ्यासेदकारश्रवणेनदविस्रि
पिश्रमादप्युक्तं॥अन्यथाकृतसंशब्देइत्यत्रस्वोक्तेनसमंविरोधापत्तेः॥तस्मादूननदित्येवधातुवृत्तौसांप्रदायिकःपाठःएवंचभाष्यकाशि
कयोरविरोधएवेतिस्थितेसरस्वतीकंठाभरणादिग्रंथाअपिनिर्बाधाएवेत्यवधेयं॥यत्तुस्तौतिण्योरितिसूत्रेसिषेचयिषतीत्यत्रसिचेर्हेतुम
ण्णोगुणेसनिइटिगुणायादेशयोःकृतयोर्गुणस्यस्थानिवद्भावात्सिचृशब्दस्यहित्वंइतिन्यासकारेणोक्तंतत्तुउनरखंडेऽसंप्रदायाद्भाष्यं
विरुद्धं॥स्थानिवद्भावंविनाप्यभिमतरूपसिद्धेर्निष्फलंचेत्युक्तम्॥एतेनौजढदीप्यदित्यादिसिद्धयेसामान्यापेक्षतांवदन्अचिकीर्ष
दित्यादिसिद्धयेचानित्यतांशरणीकुर्वन्सीरदेवोप्यपास्तः॥॥॥॥इतिश्रीशब्दकौस्तुभेप्रथमस्याध्यायस्यप्रथमेपादेअष्टमा
ह्निकं समाप्तम्॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥श्रीगणेशायनमः॥ ॥अदर्शनंलोपः॥ स्थानेऽन्त्यनुवर्त्तते॥तदर्थश्चप्रसंगेइति॥प्रसक्तस्यानुच्चारणंलोपसंज्ञंस्यात्॥संज्ञाप्रदेशालोपोव्योर्वलीत्यादयः॥अर्थस्यैषासंज्ञाननुशब्दस्य॥महासंज्ञाकरणसामर्थ्यात्॥नचैवंप्रदेशेष्वेवलोपइतिलौकिकोर्थोग्रहीष्यते॥पशोअपत्यंदेवतेतिवत्॥तत्किंसंज्ञयेतिचेत्॥न॥प्रसक्तस्येत्येवंरूपविशेषलाभायसूत्रारंभात्॥अन्यथादधिमधित्यादौतुगागमप्रसंगात्॥अस्तिहितत्रकिंपोदर्शनं तच्चलोपइतिप्रत्ययलक्षणापत्तेः॥नन्वस्कृएवंवार्तिकमते॥भाष्यमतेतुप्रत्ययलक्षणसूत्रंनियमार्थं॥तत्कथंदध्यादौतुकृप्रसंगः॥स्थानिवत्सूत्रंतुननुकंप्रतिप्रवर्तयति॥षष्ठीग्रहणस्यतत्रानुवृत्तत्वात्॥अतएवग्रामणीरित्यादौअण्कार्येनभवति॥तथाचभाष्यरीत्यासंहितावसानपोर्लोकसिद्धत्वादितिवक्ष्यमाणन्यायेनेदंसूत्रंमास्त्वितिचेत्॥न॥घटंकरोतिग्रामेतिष्ठतिइत्यादौल्यब्लोपइतिपंचम्यापत्तेः॥अग्निमीलइत्यादौचादिलोपहेतिनिघातप्रतिषेधापत्तेश्च॥आरब्धेतुसूत्रेतत्रशास्त्रतोलोकतोवाल्यपश्चादीनांचाप्रसक्तत्वान्नोक्तदोषः॥ननुवार्त्तिकमतेप्रसक्तस्येत्युक्तेपिग्रामणीरित्यत्रवृद्धिःस्यात्॥कर्मण्यणःप्रसंगसत्वादितिचेत्॥न॥वासरूपन्यायेनपक्षेणःसंभवेपिकृत्यक्तेतेनाण्प्रसंगस्यबाधितत्वात्॥वैकल्पिकयोरेकानुष्ठानेतस्मिन्नयोगेइतरानुष्ठापकशास्त्राप्रामाण्यस्यशास्त्रसिद्धत्वात्॥॥प्रत्ययस्यलुक्श्लुलुपः॥ ॥अनेकसंज्ञाकरणसामर्थ्यात्तंत्रावृत्त्याद्याश्रित्यतज्ज्ञापितसंज्ञाइहविज्ञायंते॥लुक्श्लुलुपशब्दैरुक्तेप्रत्ययादर्शनंक्रमादेतत्संज्ञंस्यात्॥संज्ञाप्रदेशालुकृतद्धितलुकि॥जुहोत्यादिभ्यःश्लुःजनपदेलुपीति॥विधिप्रदेशेषुभाविसंज्ञाविज्ञानान्नान्योन्याश्रयः॥विशेषविहिताअप्येताःसंज्ञालोपसंज्ञांनबाधंते॥एकसंज्ञाधिकारादन्यत्रसंज्ञानांबाध्यबाधकभावोनास्तीतिकडारसूत्रेवक्ष्यमाणत्वात्॥प्रत्ययस्येतिशक्यमकर्त्तुं॥नचैवंलुकृतद्धितलुकीतिविधीयमानमदर्शनंस्त्रियोरित्यनुवृत्तेर्गौरशब्दस्यापिस्यात्इतिवाच्यम्॥

गोकृपसर्ज्जनस्येति योगं विभज्यस्त्रियाः लुकृतद्धितलुकीति सूत्रे स्त्रीग्रहणस्यैवानुवर्तनसंभवात्॥ अन्यथा प्रत्ययग्रहणेकृतेपि गमेर्डीर्लुक् स्यात्॥ कंसीयपरशव्ययोर्यञञोर्लुक्चेति लुग्ग्रहणमपि प्रकृतेर्नभविष्यति॥ ड्याप्प्रातिपदिकादित्यधिकारात्प्रातिपदिकात्परस्यलुग्विधानात्॥ कृतेपि हि प्रत्ययग्रहणेकमेः मः कंसः परान्मृणातिपरशुरिति उकारसकारयोर्लुक्प्राप्तएवमेवपरिहार्यः॥ नचैवंपञ्चजोरेवलुगस्तुविधानसामर्थ्यात्च यञञ्लुकोविकल्पः॥ वेत्यनुक्तिस्तुयञञ्भ्यांमुक्तऔत्सर्गिकस्यश्रवणंमा भूदित्येवमर्थमितिवाच्यं॥ यञञ्लुकोमेककालप्रतीतानामुद्दे श्यविधेयभावासंभवात्॥ ष्युङ्युलौतुद्वित्यत्रतुपकालननेष्यितिअनद्यतनेलङितिचज्ञापकाद्भाक्यभेदमाश्रित्य ष्युङ्युलोरप्यनद्यतनेलुङ्विधीयते॥ तस्मात्प्रत्ययनिवृत्तमेनावत्प्रत्ययग्रहणंनकर्त्तव्यं॥ स्थानिविशेषसमर्पणार्थमपिन॥ तथाहि॥ अत्रिभृगुकुत्सेत्यत्रनावत्यस्कादिभ्योगोत्रेइत्यतोगोत्रइत्यनुवर्त्तते॥ तेनात्र्यादिभ्योयोविहितस्तस्यलुक्सिद्धः॥ जनपदेलुवित्यत्रनुड्याप्प्रातिपदिकात्प्रत्ययइत्यनुवर्त्तते॥ जनपदेविहितस्यचा तुरर्थिकप्रत्ययस्यलुप्॥ लक्षणाल्लुगित्यत्रप्रकृतत्वाठुकएव॥ सर्वत्रापिइहप्रत्ययइत्यस्यषष्ठीकल्पयिष्यते॥ तस्मादित्युत्तरस्येति॥ स्यादेतत्॥ स र्वादेशार्थंप्रत्ययग्रहणं॥ तेनयञञोश्वसुपोधातुप्रातिपदिकयोरित्यादिषुयञञोनेकालप्रत्ययस्तत्रालोंत्यस्येनिनभवति॥ तथालुक्षणाल्लुगित्या दावादेःपरस्येतिनभवतीति॥ मैवं॥ ज्ञाप्तकादेवसर्वादेशत्वसिद्धेः॥ घोर्लोपोलेटिवेतिहिलोपेकृतेलुग्वादुहेतिलुग्ग्रहणंज्ञापयति॥ लुगादेयंःस र्वादेशाइति॥ अलोंत्यस्यत्वदर्शनंप्रकृतेनलोपेनापिसिद्धं॥ नचैवंपरीत्यापत्तिः॥ असंजातविरोधित्वेनलोपेलोंत्यपरिभाषायाःप्रवृत्तेः॥ सा मान्येनलुमहिषयंज्ञापकेनतुलुड्यात्रविषयमितिसर्वंसिद्धं॥ स्यादेतत्॥ आगस्त्यकौण्डिन्ययोरित्यत्रलुगणिञोरितिनोलुग्ग्रहणमनु वर्त्तते॥ नवा॥ आद्येस्थानिनोहौआदेशास्तुलुकासहत्रयः ३ द्वितीयेषम्याद्यथासंख्याभावेनैकैकस्यत्रयआदेशाःपर्यायेणस्युः॥ नतस्मात्रागस्ति

योपिकुंडिनाःस्युः॥कुंडिनाश्चागस्त्ययस्युः॥लुक्कृयमाणोस्त्रीपकात्सर्वादेशइतिउभयत्रापिविभक्तिमात्रंभूयेतु॥अथनिवृत्तंततोगस्त्य
कुंडिनाइत्यत्रनकश्चिद्दोषः॥किंतुअगस्तीनाछात्राआगस्तीयइत्यत्रप्राग्दीव्यतीयेअजादौप्रत्ययेविवक्षितेप्यगस्त्यादेशस्यनिषेधाभावात्
अनिवृत्तावद्वृद्धत्वाच्छोनस्यात्॥प्रत्ययग्रहणेसतिनुलुग्ग्रहणंनिवृत्तौआगस्यकौंडिन्ययोःप्रत्ययांशस्यलुग्भवति॥अवशिष्टभागयोर्यथासं
स्त्यंभगस्तिकुंडिनचौ॥तेनागस्तयःकुंडिनाइतिसिद्धं॥प्राग्दीव्यतीयेविवक्षितेतुगोत्रेलुगचीतिलुकिप्रतिषिद्धेनतत्संनियोगशिष्टत्वाद्गस्त्यादे
शेपिनिवृत्तेआगस्त्यशब्दाद्वृद्धाछेफनेसूर्यतिष्येतियलोपेचागस्तीयइतिसिद्ध्यति॥कौंडिन्येतुनास्तिविशेषः॥निवृत्तेपिकुंडिनजादेशेकौंडिन्य
शब्दादपिकण्वादिभ्योगोत्रइत्यणिकृतेआपत्यस्येतियलोपेकौंडिनाइत्येवभवितव्यं॥तस्मादागस्त्यकौंडिन्ययोरित्यत्रावश्यमनुवर्त्ययेलुग्ग्रहणं
॥ततश्चेहप्रत्ययग्रहणमपिकर्त्तव्यमेवेति॥नैवं॥आगस्त्यकौंडिन्ययोरित्यत्रयस्कादिभ्योगोत्रइतिगोत्रग्रहणंमनुवर्त्यंगोत्रेयोविहितस्तस्यलु
गिनिष्यास्त्यानेनापीष्टसिद्धेः॥तस्मादत्रप्रत्ययग्रहणंमास्मद्धेतिस्थितं॥॥स्यादेतत्॥॥एवंसतिलोपसंज्ञयासहलुगादिसंज्ञानांतुल्यत्वे
क्तिकत्वंस्यात्॥तद्भावितस्यसंज्ञेतिचेत्॥अविशेषाल्लोपेपितथास्यात्॥उच्यते॥असंज्ञातविरोधित्वाल्लोपसंज्ञातावदर्शनमात्रस्यभवति॥लु
गादिसंज्ञासुपरंअनेकसंज्ञाप्रणयनसामर्थ्यात्तद्भावितग्रहः॥तेनसंज्ञासंकरोनेत्युक्तं॥सतिनुसंकरेहंतीतिशबुकिस्नाविनिहित्वंस्यात्॥जुहो
तीत्यत्रश्लौसतिउतोवृद्धिर्लुकिहलीतिवृद्धिःस्यात्॥नचतत्राभ्यस्तस्येत्यनुवृत्तेर्योयोतिनोनोतीत्यादाविवृद्धिर्नभविष्यतीतिवाच्यंअसं
ज्ञासंकरपक्षेतदनुवृत्त्यसंभवात्॥अन्यथासूत्रस्यनिर्विषयतापत्तेः॥नचयौनिघौनिइत्यादिरवकाशः॥संज्ञासंकरेतत्रापिहित्वस्यदुर्वा
त्वात्॥लोपसंज्ञातुलुगादिसंज्ञानांव्यापिकेतिउक्तं॥तेनपंचेत्यादौप्रत्ययलक्षणंसिध्यतीतिदिक्॥भाष्यमतेतुयद्यपिस्थानिवत्सूत्रेणपं

चेत्यादिसिद्धं॥ नचापिसुदधब्राह्मणइत्यत्रवक्ष्यमाणरीत्याऽनुत्तरपदादावुदात्तत्वस्योपधादीर्घस्यचवारणायलोपेसतिप्रत्ययलक्षणंश्वेतिनियमो वक्तव्यःप्रवर्त्तनीयः॥ नचात्रनलुक्प्रत्ययसंज्ञाप्यादर्त्तव्येत्यवधेयं॥ ॥प्रत्ययलोपेप्रत्ययलक्षणं॥ ॥प्रत्ययलुप्तेपितदाश्रयंकार्यंस्यात्॥अ ल्विध्यर्थमिदमितिवार्त्तिकमतम्॥ नचाहि॥ अंतृणेडित्यत्रनिपोहलङ्यादिलोपेकृतेतृणहइमिनिसूत्रेणविधीयमानोहलादिपित्सार्वधातु कनिमित्तइमागमोस्माद्भवतिनाङ्भवतिस्थानिवत्सूत्रेणतुनसिध्यति॥ अल्विधित्वात्॥नन्वेवंप्रत्ययलक्षणमपिनस्यात्॥वर्णाश्रयेनास्तिप्रत्यय लक्षणमितिचेत्॥न॥ नह्येवंरूपंवचनमस्ति॥किंतुप्रकृतसूत्रेप्रत्ययलोपेतल्लक्षणमित्येवास्तु॥यद्वातल्लक्षणमित्यपिमास्तु॥स्थानिवदनु दृश्यैवेष्टसिद्धेः॥एवंसतिप्रत्ययलक्षणमित्युक्तेःफलंतत्रोच्यते॥पुनःप्रत्ययग्रहणसामर्थ्याद्यित्कार्यंप्रतिप्रत्ययस्यासाधारणंरूपंनिमि त्तमनयाश्रीयतेसुस्वतिङ्त्वादिनदेवभवतीतिलभ्यते॥ तेनगवेहितंगोहितमित्यत्वादेशोनभवति॥तद्धितावयवत्वमात्राश्रयणात्॥ नस्यच प्रत्ययाप्रत्ययसाधारण्यात्॥ अथात्रनलुमतेतिनिषेधः।तर्हिसुयशाइत्यत्रविसर्जनीयस्यसःस्यात्॥सुवृडित्योर्दीर्घत्वेचेतिचत्वेस्यादि ति दिक्॥ इमागमेतुहलादौसार्वधातुकइतिप्रत्ययग्रहणप्राधान्येनाश्रीयतेइतिवैषम्यं॥तस्माद्यत्रप्राधान्येप्रत्ययलक्षणंनास्तिप्रत्ययप्राधान्ये त्वस्तीतिविवेकः॥अनेनैवन्यायेननर्घालुलोपइत्यत्रधातुलोपइतिबहुव्रीहिणेवसिद्धेआर्द्धधातुकग्रहणसामर्थ्यान्नत्वेननिमित्ततालभ्यते॥ने नधिन्विकृण्व्योर्विचिलोपोव्योरितिवलोपस्यवत्निमित्तत्वान्नत्राऽऽर्द्धधातुकतयाविचेर्निमित्तत्वाभावाद्गुणोभवत्येव॥तेनसुधेसुधेनौ॥सुधेन ॥सुकः॥सुकर्णौ॥सुकर्णाः॥इत्यादिभवति॥पठंतिच॥सुधेसुधेवारिवधात्सुराणांसुकारणेलाघवतश्चरामः॥विशेषणेहेयइहादिकर्त्तुर्वदे दधीतीसहिकैयटीयइति॥नचनोनोर्त्तीत्यादिव्यावृत्त्याऽऽर्द्धधातुकग्रहणस्यसार्थक्यात्तत्रयंसामर्थ्यंनिमित्तंवाऽस्तु॥यङ्लुक्श्लुदसत्वात्

भाषाविषयत्वपक्षेतु आर्द्धधातुकग्रहणमावर्त्यसामर्थ्यमुपपादनीयं॥ नन्वेवमत्र कृतिचेत्यत्सूत्रस्थभाष्येणसहविरुद्धं॥ पूर्वस्मिन्योगेयदार्द्ध
धातुकग्रहणंतदनवकाशमिति तत्रोक्तत्वादितिचेत्॥ न॥ अनास्थयातथोक्तत्वादित्याहुः॥ तदुपेक्षेणात्रविज्ञेयमभिमतइत्येवकिंनस्यादि
तिचिंत्यं॥ क्विपितुऊङ्॥ तेनधिनूः॥ धिन्वौधिन्वः॥ कृणूः॥ कृण्वौ॥ कृण्वः इतिभवति॥ सुधीः॥ सुधिनौ॥ सुधिनः सुकीः॥ सुकृणौ॥ सुकृणइत्यादि
तुनभवत्येवेत्याहुः॥ यङ्लुकोभाष्यविरुद्धत्वे आर्द्धधातुकग्रहणस्यतोतौत्यत्रचारितार्थ्यादिहनौचमानाभावाद्गुण निषेधप्रवृत्त्यासुधी
सुधिनावित्येवास्तु॥ कृणौतेस्तुदीर्घसुकीः सुकीर्णौसुकीर्णइत्यादिभवत्वित्यपिचिंत्यं॥ नन्वेवंपरिवीरित्यत्रतुग्दीर्घौपर्यायेणस्यातां॥अत्ने
नैवोभयविधानेचौर्वापर्याभावेनविप्रतिषेधेपरमित्यस्याप्रवृत्तेः॥सत्यं॥शास्त्रातिदेशस्यव्यपदेशातिदेशस्यवाश्रयणाद्दोषः॥यद्वा॥सतिप्रत्ययेयत्कार्यं
भवितुमर्हतित्तदेवातिदिश्यतेइतिपरिवीर्येत्यादाविवपरिवीरित्यत्रापिदीर्घएवभवतिननुतुगितिकार्यातिदेशेप्यदोषः॥ भाष्यकारास्त्वा
हुः॥ तृणह्इमर्थेनावश्यंनेदंसूत्रं॥ स्थानिवत्सूत्रेणैवगतार्थत्वात्॥ नचाल्विधिरयं॥ हलीत्यस्यनिवर्त्तनात्॥ नचैवंतृणहानीत्यत्रापीम्
स्यादितिवाच्यं॥ नाभ्यस्तस्याचीत्यतोऽचिनेत्यनुवर्त्तनात्॥ नाप्याशीरित्यत्रशासइदङ्हलोरितीत्वार्थमिदं॥ आशासःक्वावुपसंख्या
नेनैवसिद्धेः॥ तर्हित्वयापिवाच्यम्॥ शासइदङ्हलोरित्यत्रशासिमात्रग्रहणमितिपक्षेनियमार्थंअशासःक्वावेवयथास्यात्॥ अशा
स्तेइत्यादौमाभूदिति॥ यस्माच्छासेरङ्विहितस्तस्यैवाङ्साहचर्यादित्वविधौग्रहणमितिपक्षेयथाआशास्तेइत्यादौनभवतितथाक्विप्व
श्निनस्यादितिविध्यर्थं॥ तस्मात्प्रत्ययलोपेसतिप्रत्ययलक्षणमेवेतिनियमार्थमिदंसूत्रं॥ प्रत्ययाप्रत्ययसाधारणंरूपमाश्रित्ययत्कार्यंवि
धीयतेतन्निवृत्तिःफलं॥ तेनशोभनादृषदोस्यप्रासादस्यसःसुदृषत्॥ अत्रसोर्मनसीअलोमोषसीइतिसूत्रेणसुशब्दात्परस्यमन्नेतस्यअ

संज्ञस्यचोत्तरपदस्यबहुव्रीहौविधीयमानमाद्युदात्तत्वेनभवति॥अत्रहिलुप्तेपिजसिस्थानिवद्भावेनासंज्ञमुत्तरपदमस्त्येव॥किंतुअस्इति
रूपंप्रत्ययाप्रत्ययसाधारणं॥अनिनस्मन्ग्रहणान्यर्थवताचानर्थकेनचतदंतविधिंप्रयोजयंतीतिवक्ष्यमाणत्वात्॥अतोनियमनाद्युदा
त्तव्यावृत्तिःसिद्धा॥नथाचनञ्सुभ्यामित्यंतोदात्तंपदंभवति॥इदंत्ववधेयं॥नकेवलंस्वरार्थमेवेदंसूत्रं॥किंतूक्तोदाहरणएवप्राप्नुवन्भ
त्वसंज्ञस्येत्युपधादीर्घोपिउक्तनियमेनैवव्याकर्त्तव्यः॥वार्त्तिकमतेतुउक्तस्वरस्यदीर्घव्यावृत्तेश्चासिद्धत्वेउपायांतरमन्वेषणीयमिति॥ननुयदि
नियमार्थंसूत्रंनहिपंचेत्यत्रप्रत्ययलक्षणेनपदत्वमितिवृत्तिः कथंयोज्या॥एवंसमासत्वात्सातिपदिकत्वेसुकमोरितीट्।उभयप्राप्तौकर्मणि
षष्ठी॥इत्यादयोपिनत्रतत्राभियुक्तयंत्राः कथंयोज्याइति॥अत्रोच्यते॥योस्माकंनियमविधिःसमीमांसकरीत्यापरिसंख्याविधिरिति
तावत्स्पष्टंविवरणादौ॥तत्रदोषत्रयंस्वार्थहानिःपरार्थपरिकल्पनाप्राप्तबाधश्चेति॥तच्चैवंन्यायगत्यासत्यतेइतिपक्षस्तत्रनियमविधेर्निषेध
एवार्थः॥प्रत्ययलक्षणशब्देनतद्विज्ञेयलस्यते॥भवतीत्यनेननुनभवतीति॥तथाचस्थानेंतरतमसूत्रेभाष्यं॥नानेनांतरतमानिवर्त्त्यंते अ
पितुअनंतरतमानिवर्त्त्यंतेइति॥अतएववार्त्तिककारोपिवक्ष्यति॥उभयप्राप्तौकर्मणीतिप्रतिषेधेकादिप्रयोगेप्रतिषेधइति॥अस्मिन्न
क्षेउभयप्राप्तावितिपरिशेषिताषष्ठीत्यादिक्रमेणव्याख्येयंनतुविहितेति॥यदितुदोषत्रयंनैवपरिहारार्थंप्रत्ययलक्षणसूत्रंयथाश्रु
तव्याख्यायामतएवज्ञापकात्स्थानिवत्सूत्रस्यप्रत्ययलोपेतरविषयकताकल्प्यतेसामान्यप्रस्तुत्यप्रवृत्तस्यशास्त्रस्यविशेषतात्पर्येहिलयापि
कल्प्यमेव॥अन्यथाविकल्पापत्तेः॥भाट्टमतेननौपशौकरोतीत्यत्रयथा॥पदेनुह्येतीत्यादिनिमंत्रणीयविधेरिवविशेषविधिनासामान्यवि
धेः संकोचसंभवाच्च॥नचैवंसामान्यस्यविशेषउपसंहारापत्तिः।सामान्यशास्त्रंप्रणयनेनेष्टापत्तेः।अतएवनकश्चिन्नियमेनायमेवंपर्यनुयुंक्ते

तेतिचतुर्द्धीकरणस्याम्नेयेउपसंहारोमीमांसायामभ्युपेतः॥ कल्पसूत्रकारस्तुत्रापव्युत्पाद्यानत्वाच्चभगवताकात्यायनेनसूत्रितं॥ अविशेषो
भौवेति॥एवंचसामान्यशास्त्रस्यविशेषेलक्षणायाउभयवाच्यत्वानत्वयैवोपपत्तौदोषत्रयंनसोढव्यमितिपक्षस्तदाउदात्ततयथा सम्यगेव॥नैय
यिकमतेतुनात्यर्थसंकोचस्थलेलक्षणानास्त्येवेतिनिर्विवादं॥विशेषधर्मप्रकारकबोधस्योद्देश्यतापामेवतद्भ्युपगमात्॥सामान्यप्रकारकस्यवि
शेषविशेष्यकस्यापिलक्षणंविनानिर्व्वाहइतिसुधीभिराकलनीयं॥ नलुमतांगस्य॥लुमतांशब्देनप्रत्ययलोपेसतिप्रत्ययलक्षणमंगस्यकार्यंन
स्यात्॥वार्त्तिकमतेपूर्वसूत्रमाप्तस्यायंनिषेधः॥भाष्यमतेतुस्थानिवत्सूत्रप्राप्तस्य॥नियमविधौनंतात्पर्यसंकोचकत्वमात्रंनतुनिषेधकतेतिप्रागुक्त
रीत्यातुभाष्यमतेपिपूर्वसूत्रेणप्राप्तस्यायंनिषेधइत्यवधेयं॥एवमग्रेपि।गर्गाः॥मृष्टः।जुहुतः॥इहयञ्शपोर्लुमतालुप्तयोरंगस्यगुणवृद्धीनभ
वतः।लुमतेतिकिं॥कार्यते॥हार्यते॥णेरणिटीतिणिलोपेकृतेणिजपेक्षावृद्धिर्भवत्येव॥अमार्ट्।हलड्यादिलोपेनित्यत्वात्कृतेपिवृद्धिः॥अंगस्येति
किं॥पेचे॥सप्त॥अत्रांगस्येतिस्वर्यते॥नेनांगाधिकारोगृह्यते॥स्वरितेनाधिकारइतिवचनाद्इतिवार्त्तिककाराः॥भाष्येतुइदंदूषितं॥तथाहि॥एवं
सतिउक्रमेत्यत्रानोहेरितिहेर्लुकिकृतेक्रमःपरस्मैपदेष्वितिदीर्घोनस्यात्॥तथाजिगमिषेत्यत्रगमेरिट्परस्मैपदेष्वितीण्नस्यात्॥तथाविवृ
त्सेत्यत्रनवृद्भ्यश्चेतुर्भ्यइतीण्निषेधोनस्यात्॥तस्मान्नलुमतेत्यत्रनांगाधिकारःप्रतिनिर्दिश्यते॥किंतुलुमतालुप्तेप्रत्ययेयदंतस्यांगंअनांगंच
सर्वंप्रतिषिध्यतइति॥नचैवमुक्तदोषतादवस्थ्यमितिवाच्यं॥उक्रमेत्यत्रलुप्तंपरस्मैपदं॥तदपेक्षयायदंगशबंतेनतस्यदीर्घोविधीयते॥किंतु
क्रमेः॥सतुशपंप्रतिअंगंनतुलुप्तंप्रतीतिनिषेधापवृत्तौप्रत्ययलक्षणेनदीर्घप्रवृत्तेः॥एवंजिगमिषेविवृत्सेत्यत्रापिइटोविधिप्रतिषेधौभवतएव॥तौहिलुमतालुप्तेपरस्मैपदेयदंगसंज्ञंतंतस्यनक्रियेतेकिंतुसकारादेःप्रत्ययस्य॥सचांगंनेतिस्पष्टमेव॥ स्यादेतत्॥पक्षद्वयेपिस्त्रित्यादि

र्निर्ज्यंकितः पथिमथोःसर्वनाम्नस्थाने इतित्रिसूत्र्याविधीयमानाः स्वराःलुकिकृतेपिप्राप्नुवंति॥तथाहि॥गर्गाः॥विदाः॥यत्रत्रोर्लुक्॥उष्ट्रग्रीवाः
गाड्वेप्रतिकृनाविनिकनोदेव पथादिभ्यश्चेतिलुप्॥ततोञ्चित्यादिदित्यद्युदात्तनाप्राप्नोति॥तथा अत्रेरपत्यानि अत्रयः॥इतश्चानिञ्इति
ढकोत्रिभृगुकुत्सेत्यादिनालुक्॥ततः किनस्तितस्यानउदात्तोभवतीत्यंतउदात्तनाप्राप्नोति॥साहिप्रत्ययग्रहणेनदंतग्रहणान्नद्विांतस्य
विधीयते॥नचसिद्धांतेपिफिट्स्वरेणांतोदात्ततयाभाव्यमेवेतिवाच्यम्॥राशदिभ्यांञिप्॥अदेस्त्रिनिश्चेत्युणादिसूत्रेणत्वदेश्चकारानुकृ
ष्टेञिप्प्रत्ययेतस्यपित्वेनानुदात्तत्वात्युद्दात्तोञिशब्दः॥तथाचप्रयुज्यते॥अत्रेरिवभृणुतंपूर्व्यस्तुतिं॥यथाभृणोरत्रेःकर्मणिकृण्वंतइति
तथाढकोलुक्यपिद्युदात्तएवप्रयुज्यते॥अत्रीणांस्तोममद्रिवः॥अत्रीणांभृणुतंहवमितित्व॥त्रिनप्रत्ययांतस्तुअंतोदात्तोनकारांतश्चेत्यन्व
देतत्॥सोपिप्रयुज्यते॥दूरेवायेअंतिवाकेचिदत्रिणइति॥तथापंथाः प्रियोयस्यपथिप्रियः पथिप्रियः॥सुप्रोथात्वितिस्तोर्लुकिपथिमथोः स
र्वनामस्थानेइत्यद्युदात्ततांप्राप्नोति॥नत्वेषासूत्रीअंगाधिकारस्थात्॥येननलुमतेतिनिषेधःप्रवर्त्तेत॥नाप्येतदस्तुतोंगस्यकार्यं॥सुप्तिङंतमि
तिपदसंज्ञावदुक्तस्वराणांप्रत्ययकार्यत्वात्॥नन्वस्तुकितइतितथा॥इतरत्तुदूयंञ्चितिसर्वनामस्थानेइतिसप्तमीनिर्देशाद्धस्तुतोंगस्यकार्यं
भवत्येवेतिचेत्॥न॥ञ्चितस्यादेरित्वाधिकारेणप्रत्ययांतस्यैवतद्विधानात्॥सौवर्य्यःसप्तर्षिनदंतसप्तम्यइतिसिद्धांतात्॥एतच्चभीर्हीभृ
हुमदजनधनदरिद्राजागरांप्रत्ययात्पूर्वपितीतिपूर्वग्रहणेनज्ञाप्यतेइतिनत्वेवमाष्येस्पष्टमेव॥अतएवोणोत्तमरितीत्युदात्तत्वमाहवनीयइ
त्यादौरिदंतस्योपोत्तमेनीशब्दस्यैकारेप्रवर्त्तेचञ्ज्यन्यतरस्यामितिचचङंतस्य॥नचैवंतनुस्यसीत्युदात्तसंज्ञंतस्यस्यात्तथाचषट्त्रिंश
च्चतुरःकल्पयंतइत्यादौचतुरइतिपदंमध्योदात्तमिष्यमाणंनसिद्ध्येदिति वाच्यम्॥प्रत्ययग्रहणसामर्थ्योत्तदंतसप्तमीत्वबाधात्॥न्

नरथाहि - उडिदंपदाद्यप्युभूरेद्युचतुर्भ्यइत्येवब्रूयात्॥तत्रहिअंसर्वनामस्थानग्रहणंनकर्त्तव्यंशसएवभविष्यति॥षड्भ्यश्चतुर्भ्योहलादिर्नित्यं
लादेःसिद्धंतेष्युदात्तविधानात्॥नचैवंस्वरविधिषष्ठ्येवनिर्दिश्यतामितिवाच्यम्॥रिनश्चखडःइत्याद्यपेक्षयारिनिचखडीत्युक्तावङ्मात्रालाघ
वंभवेनसप्तमीप्रयोगादिति॥अत्रोच्यते॥अंगाधिकारनिर्देशपक्षेतावदुक्तदोषपरिहारायवार्त्तिकमारभ्यते॥लुमनिप्रतिषेधेएकपदस्वरस्यो
पसंख्यानं।सर्वमंत्रितमिञ्लुक्स्वरान्नेत्यप्रयोजनंञ्नित्यादिरादिनित्यः॥पथिमथोःसर्वनामस्थानेलुगितिः॥अस्यार्थः॥लुमतिलुमत्संज्ञायाप्रति
षादितेऽदर्शनेयःप्रतिषेधःतस्मिन्नुएकपदाश्रयोयःस्वरस्तस्योपसंख्यानं॥प्रत्ययलक्षणेनकर्त्तव्येएकपदस्वरेनभवतीत्यर्थः॥पदहूपाश्र
पस्तुस्यादेव॥यथादधिनिष्ठतीत्यत्रपदस्यपदादित्यधिकृत्यविहितस्तिङुतिङःइतिनिघातः॥अत्रदधीत्यस्यपदसंज्ञार्थंप्रत्ययलक्षणमपे
क्ष्यते॥तथाइहनिष्ठत्यादौतिङंतत्वलाभायापि॥नन्वेवंसर्वस्यसुपीत्यादुदात्तत्वंनस्यात्॥तथा॥सर्पिरा गंछसप्तागच्छतेत्यत्रामंत्रितस्यचे
तिषाष्ठमाद्युदात्तत्वंनस्यात्॥तथामाहिहानांमाहिधानामित्यत्रादिःसिचोन्यतरस्यामित्यादुदात्तत्वंनस्यादित्यत आह॥सर्वेत्यादि।इदंस्व
रत्रयंविहायस्वरांतरेप्रतिषेधइत्यर्थः॥नचसर्वस्तोमइत्यत्रबहुव्रीहौप्रकृत्यापूर्वपदमितिपदद्वयस्वरोयमितिवाच्यं॥सर्वस्यसुपीतियदा
द्युदात्तत्वंतस्यैवत्यनेनप्रकृतिभावमात्रंकर्त्तव्यं॥तथाचतत्रापिरवश्योपपादयितव्येतिभावात्॥नचसर्पिःशब्दस्यामंत्रितस्वरंविनाप्या
द्युदात्ततालब्धुंशक्या।अर्चिश्रुचिहुस्पिडादिछदिभ्यइत्यौणादिकेइसिप्रत्ययेकृतेनोदात्तत्वात्॥अव्युत्पत्तिपक्षेपिफिट्स्वरेणतथा
त्वात्॥नचनद्विषयस्येत्यादुदात्तः॥अनिसंतस्येतिपर्युदासात्॥कथंतर्हिसर्पिःशब्दस्यघृतादित्वंकिमर्थंकल्पितमितिचिंत्यं॥ननुसप्त
शब्दःसप्यशूभ्योतुड्वेतिकनिनंतोव्युत्पादितः॥तथाचनित्त्वादाद्युदात्तः॥अव्युत्पत्तिपक्षेपितथैव॥त्रिःसंख्यायाइतिवचनादितिचेत्।

निनिष्कृष्टपक्षेपितुल्यं॥अतएवसंज्ञायामुपमानमितिसूत्रेभाष्यंकारैःपक्षद्वयंसाधारणंदर्शयित्वोक्तमुपन्यासार्तिकंयोजितं॥प्रकृतसूत्रभाष्यकैयटेनो
स्कनिष्कृष्टपक्षेउक्तदोषप्रसंगएवनास्तीतिलभ्यते॥तत्रेत्थमाशयमभियुक्तोवर्णयंति॥ज्ञापकंहिद्विधं॥सामान्यापेक्षंविशेषापेक्षंच॥तत्रय
दाभीह्रीत्यत्रपूर्वग्रहणेनयत्रसप्तम्यर्थपक्षेतदंतग्रहणपक्षेचफलभेदः तत्रैवसौवर्यःसप्तम्यास्तदंतेसप्तम्यइतिज्ञाप्यते॥यथाभीह्रीत्यत्रै
वपूर्वग्रहाभावेनदंतस्यकार्यित्वेप्रत्ययानांभ्यादीनामुदात्तइंग्लोत्यपरिभाषयाप्रत्ययोदात्तःस्यात्॥सप्तम्यर्थाश्रयणेतुभ्यमं
पहायभ्यादीनामेवोदात्तःस्यादितिस्पष्टः फलभेदः॥ तथापोत्तमरिति॥चस्यान्यतरस्यामित्यत्रापि॥ञ्नित्यादिर्नित्यंपथिमथोःसर्वनाम
स्थानइत्यादौतुनास्तिफलभेदः॥नदंतस्यहिकार्यित्वेपरुत्वादेरेवोदात्तत्वंञ्नित्यादिपूर्वस्यापिकार्यित्वेतथेवेति॥तथाचतत्रसौवर्यइत्यस्या
प्रवृत्त्यातदंताकार्यित्वादुक्तदोषस्याप्रसंगएवेति॥संज्ञायामुपमानमित्यत्रभाष्यकैयटाद्यैस्तुसामान्यापेक्षंज्ञापकमाश्रित्ययोजयि
तव्याइति॥ अत्रयइत्यत्रनुस्वरोनभवति॥लुकिकृतेकार्यिणोऽभावात्॥प्रत्ययलक्षणंहियदन्यस्यकार्यंतत्प्रत्ययलोपेपिभवति॥ननुप्रत्य
यस्यैवयेत्कार्यंतदपि॥नचप्रत्ययग्रहणपरिभाषयातदंतग्रहणंस्यादितिवाच्यं॥येनविधिरितिसूत्रेणैवतल्लाभस्यवक्ष्यमाणत्वात्॥विशेष
णविशेष्यभावेचकामचारात्॥नन्वेवमपिस्यादिनिवत्सूत्रेणस्यादेरुदात्ततेतिचेत्न॥लोपस्याभावरूपतयातदीयांतस्यतदुदात्तताया
त्॥अतएवहिअभूदित्यादौ लुप्तस्यसिचोनेट्त्वंनित्यभावस्यभावोवयवःसंभवति॥भाष्यमतेऽनल्विधाविनिषेधाच्च॥किंत्विजादीनांतुपेङ्
शीनीणिनिषेधोप्यस्तीतिदिक्॥वस्कनोयदंगमितिव्याख्यानाद्राजपुरुषइत्याद्यपिनिर्बाधं॥भसंज्ञापानिषेधेनाल्लोपाभावात्॥सुबंतत्वप्रयु
क्तपदसंज्ञयानलोपाच्च॥तथाअहर्दानीत्यत्रेफोपिसिद्धः॥सुपीतिप्रिषेधोहिवस्तुनोंगस्यकार्यमितिनेहप्रवर्त्तते॥ अंगाधिकारनिर्देशो

स्यस्वादिष्वितिप्राप्ताअवयवस्यनुमुबंतमितिप्राप्तापदसंज्ञानेननिषिद्धेतिपदसंज्ञाबाचावित्योर्दिसिद्धं॥ ननुवेवंसुवाकुसुराजेत्यादौकुत्वादिनस्या
त्॥सावपिसमुदायस्यावयवस्यचशातयोर्हयोरपिपदसंज्ञयोर्निषेधादितिचेन्नैवं॥ असर्वनामस्थानइत्यत्रोत्तरसूत्राद्यचीत्यपकृष्य यज्ञा
दौसर्वनामस्थानेउभयविधपदसंज्ञानिषेधात्॥ सौहिविधापिपदसंज्ञाभवत्येव॥ ननुवेवंश्रूयमाणेसौपूर्वस्यपदसंज्ञास्यात्इतिचेत्॥इष्टा
पत्तेः॥ ननुवेवमेचोऽप्रगृह्यस्यादूरूहूते पूर्वस्यार्द्धस्यादुत्तरस्येदुतौइतिसूत्रेभद्रंकरोषिगौरित्यत्रातिप्रसंगेबारणिंतुपदांतग्रहणंकर्त्तव्यमितिर
वार्त्तिककृतावक्ष्यमाणंविरुध्येत॥क्रियमाणेपिपदांतग्रहणेदोषतादवस्थ्यादितिचेत्॥ न॥ तत्रांतग्रहणमात्रंकृत्वावाक्यस्यटेरित्यतो व
क्ष्यग्रहणमनुवर्त्त्यैवाक्ष्यांतस्येतिव्याख्यानसंभवात्॥ नदेवंसमासचरमभागस्यपदसंज्ञायजादौक्वापिनास्तीतिस्थितम्॥ क्वचिन्निषेधा
त्क्वचित्तुभत्वेनबाधादितिविशेषः॥ननुवेवंदूरान्मुक्तमित्यादावलुङ्नस्यात्॥ होतापोतागृहपत्यत्रानङ्नस्यात्॥उत्तरपदेतद्धिधानादितिचेत्॥
न॥ उत्तरपदशब्दस्यसमासोत्तरावयवेरूढनयापदसंज्ञाविरहेपितत्प्रवृत्तेः॥ सर्वांतएवचेयंरूढिः॥तेनहोतृपोतृनेष्टृशातारइत्यत्रमध्यमानो
मुत्तरपदत्वाभावात्ततःपूर्वपदस्यानङ्नेतिदिक्॥ननुवेवंदधिसेचौदधिसेचइत्यत्रसात्यदाद्योरितिषत्वनिषेधोनस्यादितिचेत्॥न॥पदादादिः
पदादिः तस्यषत्वंनेतिव्याख्यानात्॥नचैवंगोषुहरिष्वित्यत्रापिनिषेधःस्यादितिवाच्यम्॥स्वादावितियापदसंज्ञातामुपजीव्यपदादेर्नेतिनिषे
धाप्रवृत्तेः॥ एतच्चसात्प्रतिषेधेनज्ञाप्यते॥उक्तंचभाष्यदादादेर्नेत्येवव्याख्यानंननुपदस्यादेरिति॥ तथासतिगतिकारकोपपदानांइतिसुबुत्पत्तेःप्रा
गेवसमासेदधिसेगित्यादौषत्वस्यदुर्वारतापत्तेः॥ननुवेवमपिबहुसेचौबहुसेचइत्यत्रषत्वंस्यादेव॥बहुचोऽपदत्वेनषत्वप्रतिषेधाप्राप्तेरि
तिचेत्॥सत्यं॥ वचनमेवेहकर्त्तव्यं॥बहुचःपूर्वस्यनेति॥ अत्रायंसूत्रन्यासः॥सानेःसःषत्वंनस्यात्॥ततःबहुचःपदाभ्यां॥अभ्यामुत्तरस्य

सम्प्रत्ययत्वंनस्यादादिग्रहणंनकर्त्तव्यं॥तस्मादित्युत्तरस्येत्येवसिद्धेः॥तदिदंबहुज्ग्रहणमादिग्रहणेननिमातव्यमिति॥वार्त्तिकेतुउत्तरपदत्वे
चापदादिविधाविति वचनेनैवपरमवाचेत्यादिसाधितं॥उत्तरस्यसमासोत्तरभागस्यपदत्वेकर्त्तव्येलुमतालुप्तेप्रत्ययलक्षणंनस्यात्॥अतो
नकुत्वादि॥पदादिविधौप्रत्ययलक्षणंस्यादेव॥ननषत्वनिषेधाद्धिसेचेत्यादिसिद्धिः॥अस्मिंश्चपक्षेप्राक्सुबुत्पत्तेःसमासोत्रनाभ्युपगंतव्यः
॥धनक्रीतेत्यादिसिद्धयेतत्स्यानित्यतायावस्थ्यमाणत्वात्॥कैपदत्वाह॥दभ्रःसेचाविनिविग्रहेषष्ठीतिसमासः नत्वयंसुपपदसमासः।सोप
पदात्तुविज्नास्ति॥अनभिधानात्॥अतोदधिषेचावित्यादिनभवत्येव॥अस्मिन्नपिपक्षेबहुच्पूर्वस्यचेतिवचनंकर्त्तव्यमेव॥कृतेहिबहुचिविशि
ष्टस्यार्थवत्त्वेनप्रातिपदिकत्वेसुपोलुकिचकृतेपुनर्विशिष्टात्सुबनरमुत्पद्यतेइत्यर्थवत्सूत्रेवक्ष्यते॥तत्रांतर्वर्तिनींविभक्तिमाश्रित्यप्रातिपद्
त्वंतत्कृत्वादौकर्त्तव्येमाभूत्॥षत्वनिषेधएवयथास्यादिति॥अत्रायंनिष्कर्षः।पूर्वसूत्रेएवस्थित्वाउत्तरपदत्वेचपदादिविधौ॥बहुच्पूर्वस्य
चेतिपाठ्यं॥पदादिविधावेवप्रत्ययलक्षणंभवतिनतुपदांतविधाविति नियमार्थंचेदंवचनहृयंइतिव्याख्येयं।एवंचनञ्नकर्त्तव्यइतिलाघ
वं॥अस्मिन्पक्षेसोपदत्वंनास्ति॥आगुक्कुसृष्टेरभावात्।तदेतत्सहृदयमभिप्रेत्यहलऊङ्यादिसूत्रेभाष्यकारैरुक्तं॥अथसावपिपदंभव
ति॥एवमप्युभयतःपाशारज्जुरिति॥ननुअंगाधिकारग्रहणपक्षेवस्कतोंगस्येतिपक्षेचाभूवेन्नित्यत्रजुसप्राप्नोतीतिचेत्॥सत्यं॥आनङृति
नियमान्नभवति॥ननुदेवदत्तंयाजयांचकारेत्यत्रलुकंबाधित्वापरत्वान्निबादिषुकृतेषुआमइतिवेणालुकिप्रत्ययलक्षणेनतिङंतत्वादा
मंतस्यनिघातःस्यात्ततःपरस्यचनस्यादितिचेन्न॥लावस्थायामेवयेननाप्राप्तिन्यायेननिबादीन्बाधित्वालुकःप्रवृत्तेः॥तदुक्तं॥आ
मिलिलोपात्तस्यचानिघातस्तस्माच्चनिघानइति॥ननुदेवदत्तोयुष्मत्युत्तरइत्यादौषष्ठ्यंतस्यविधीयमानायुष्मदस्मदोरादेशाःप्राप्नुवंतीतिचेत्

सत्यं॥स्यग्रहणान्नभवंति॥नचविभक्तौपरतःपूर्वभागमात्रस्यमाभूत्किंतुविभक्तिविशिष्टस्येत्येतदर्थंस्यग्रहणंस्यादितिवाच्यं॥षष्ठीचतु
र्थीद्वितीयानामितिनिर्देशेनापिगतार्थत्वात्सर्वस्यपदस्येत्यनुवृत्तेश्च॥तस्माद्विभक्तिलोपेकृतेमाभूदित्येतदर्थमेवस्यग्रहणं॥अवस्थानेहि
श्रूयमाणास्त्वेवभवंति॥यद्वा॥तिष्ठतिरक्षानौवर्त्ततेतेषथासमयेतिषुसुधीवेति॥समयंमाहासीरित्यर्थः॥तथाचापरित्यक्तविभक्तिकयोरि
त्युक्त्याश्रूयमाणविभक्तिकत्वंस्पष्टमेवलभ्यते॥इदंत्ववशिष्यते॥वस्कतोगस्येनिसिङ्गतेत्विणोलुगितितलोपेकृतेहनिणिङादेशस्त्र
स्युः॥अवधिभवतादस्युः॥अगायिभवतायामः॥अध्यगायिभवतानुवाकइति॥लुङिपरतोह्येतेविधीयंतेइतिचेत्॥मैवं॥लुङिःयदार्द्ध
धातुकंतत्रहनिणिङादेशविधानात्॥तस्माद्हस्तुतोंमस्येति पस्योनिर्दोषइतिस्थितं॥अचोंत्यादिटि॥अचइतिनिर्द्धारणेषष्ठी॥जातौएक
वचनं॥अचांमध्येयोंत्यस्तदादिशब्दरूपंटिसंज्ञंस्यात्॥टिप्रदेशाष्टितआत्मनेपदानांटेरित्यादयः॥पचते।पचेतेइत्यादि॥अंतेभवोंत्यः
॥दिगादित्वाद्यत्॥अंत्यआदिर्यस्येतिबहुव्रीहिः॥नित्यसापेक्षत्वात्समासः॥॥अलोंत्यात्पूर्वउपधा॥॥अंत्यादलःपूर्वोवर्णउपधा
संज्ञःस्यात्॥उपधागुणः।चेनति॥च्योतति॥वर्द्धतइत्यादि॥ननुपूर्वस्याविशेषितत्वाच्छासिधातोरपिइतिसमुदायस्यसंज्ञास्यादितिचेत्॥अ
स्तु॥नचैवं षाससदद्हलोरितीत्वंस्यादितिवाच्यं॥अलोंत्यपरिभाषयादृष्टसिद्धेः॥स्यादेतत्॥नानर्थकेलोंत्यविधिरनभ्यासविकारेष्वितिनि
षेधः प्राप्नोति॥इहचबिभर्तीत्यत्रभृञामित्अंत्यस्ययथास्यादित्येतदर्थमनभ्यासविकारेष्वित्युक्तं॥विकारोनामवर्णात्मकआदेशः॥
अनएबदेहीत्यत्रलोपःसर्वादेशश्चभवतीति॥अत्रोच्यते॥नतावदेषापरिभाषासूत्रकृतःसंमता॥तस्यलोपइतिसूत्रेत्रिटङानांसर्वेषा
र्थेतस्यग्रहणात्॥नापिभाष्यकारस्यसंमता॥एतत्सयोजनानामन्यथोपपत्तेर्भाष्येउक्तत्वात्॥तथाहि॥अव्यक्तानुकरणस्येतिनावदंत्यादे

शोन भवति॥ नाम्रेडितस्यांत्यस्यतुवेतिज्ञापकात्॥ इतरथात्वाम्रेडितस्यवेत्येवब्रूयात्॥ घ्वसोरेद्धावित्यत्रापिलोपोयीतिप्रकृतेपुनर्लोपग्रहण
सामर्थ्यात्सर्वादेशः॥ तथाचेत्यंसूत्रन्यासः॥ घोरभ्यासस्यलोपः॥ लोपशब्दांतरस्यानुवृत्यासर्वलोपःस्यात्॥ अस्तेश्चैत्॥ अस्तेर्घोश्चैड्भवति ह्या
धिति। अथवालोपशइति छेदः॥ संज्ञापांकृतौ नुबंधः संज्ञिनिफलतियथाऽऽमुटि॥ भाष्येतुह्शकारकौनिर्देशइत्युक्तं। तत्रलोपइतिभिन्नंपदम्।
शइत्यस्यउपदेशएवइत्संज्ञा॥ तत्फलंतुप्रयोगे॥ सर्वत्रानुबंधानांकाकादिवदनवयवीभूयैवव्यावर्त्तकत्वादितिभावः॥ अस्मिन्नपिपक्षेझलि
परेयः संयोगः तदादित्वाल्लोर्लोपेएकशकारकरणवपाठःसुवचः॥ स्पष्टार्थंअनुपधालोपिनइत्यादावकारस्येवेहापिसकारस्यलोपोमास्त्वितितु भा
ष्याशयः॥ आभ्यामित्यादौहलिलोपइतिसूत्रेणाकारस्येदमइदोविधीयमानोलोपोपितर्ह्येत्यस्यस्यादितिचेन्न॥ अनाप्यकइतिसूत्रादत्रि
त्यनुवर्त्यतस्यहलीतिसप्तम्याषष्ठींप्रकल्प्य अनएवलोपविधानात्॥ तथाचतत्रालोंत्यपरिभाषयानकारलोपेअतोगुणइतिपररूपेचकृते
आभ्यामेषामित्यादिसिद्धं॥ अत्रलोपोभ्यासस्येतिसूत्रेप्यत्राभ्यासत्वाश्रयेननुतदेकदेशेइतिव्याख्यानादत्रयग्रहणसामर्थ्यात्सर्वलोपः॥ यद्यपिस
नीत्यपेक्षितंददौदधौइत्यादिवारणाय॥ सादाविति चजिघ्रपियतीत्येतन्निवारणाय॥ प्रकृतयोपिस्मिपक्षतीत्यादिवारणाय॥ विषयोप्यपेक्षितः
सुचोः कर्मकस्यगुणोवेतिमुमुक्षतिमामित्यादिवारणायतथापीदंसर्वमनुरुत्त्येवसुलभमितिसर्वलोपार्थमेवात्रग्रहणंबोध्यम्॥ नन्वेवमपिवि
भाषाभवद्भगवद्दधवनापोच्चावस्येतिवार्त्तिकेनविधीयमानओकारोंत्यस्यस्यादितिचेन्न॥ वस्येतिसिद्धेअवस्येतिगुरुकरणसामर्थ्यात्सर्वादे
शसिद्धेः॥ नस्मान्नानर्थकइतिपरिभाषानिष्फलासूत्रभाष्यासंमताचेतिस्थितम्॥ एवंचशसेःशशब्दस्यापधात्वेपिशिष्टइत्यादिसिध्यति॥
संयोगोपधग्रहणंकृत्रर्थमित्यादिव्यवहाराभ्यास्मिन्पक्षेसंगच्छंतेइतिदिक्॥ यद्वा अवध्यवधिमद्भावः सजातीयानामेवेत्युत्सर्गः॥ ल्येक्त्व

मीषांब्राह्मणानामंत्यात्पूर्वमानयेत्युक्तेएकएवअंत्याद्व्यवहितंपूर्वआनीयतेनतुसमुदायः॥एवंचेह्यप्यलः अव्यवहितपूर्वोलेचसंज्ञीनतुस
मुदायः॥नवाव्यवहितोल्॥संयोगोपधव्यवहारस्तुभाक्तः॥अवयवधर्मस्यसमुदायेउपचारात्॥एवंस्थितेअलइतिजसंतमपिमुवचंप
जात्याख्यापामितिबहुवचनं॥पूर्वेइत्यपिजसंतं॥अंत्योप्यलेवसाजात्याल्लुभ्यते॥यद्वा॥अलइतिनिर्धारणेषष्ठी॥जातौचैकवचनं॥अलां
मध्येंत्यात्पूर्वइत्यर्थः॥तथाचेहालइतिजसूङःसिर्ङेस्त्वेतिपक्षत्रयमपिस्थितं॥तस्मिन्निनिनिर्दिष्टेपूर्वस्य॥सप्तमीनिर्देशेषुपूर्वस्थैवका
र्यंस्यात्तच्चनिर्दिष्टेऽव्यवहितोच्चारितेसतीत्यर्थः॥निशब्दोनैरंतर्यंदिशिरुच्चारणक्रियः॥निरंतरंदिष्टोनिर्दिष्टः॥नियमार्थमिदंसूत्रं॥तथाहि
॥इकोयणचीत्यत्राचीतियस्यचभावेनभावलक्षणमितिसप्तमी॥अश्रूयमाणक्रियत्वाच्चांतरंगस्यास्त्यर्थस्यलाभः॥तेनाचिसन्नियण्भवती
त्यर्थः॥यद्वागंगायांघोषइतिवदौपश्लेषिकेऽधिकरणेसप्तमी॥तत्रसत्त्वंपरस्येवपूर्वस्यापिसंभवति॥एवमुपश्लेषोपि॥तत्रयुगपदेकस्य
कार्यित्वनिमित्तत्वयोरसंभवाद्दध्युदकंमध्विदमित्यादौइकारोकारयोःपर्यायेणयण्प्राप्तः॥पूर्वस्यैवेतिनियम्यते॥तथा॥अग्निचिदत्रेतिव्य
वहितस्यापियण्प्राप्तःअनंतरस्यैवेतिनियम्यते॥ननुगवित्यत्रयमाहेत्यादौस्वरूपपदार्थकतामितिशब्दःकरोतितथाहृह्यपि॥एवंचत्
स्मिन्नणीत्यत्रैवेयंपरिभाषाप्रवर्त्तेत॥अस्तिहितत्रव्यवच्छेद्यं॥हेयोष्माकीणअस्मभ्यंदेहिहेअस्माकीनयुष्मभ्यंदद्यामिइत्यादौएव
ञण्भ्यांपरस्याप्यादेशप्रसंगसत्त्वात्॥सत्यं॥इतिकरणःपदार्थविपर्यासकृत्॥लोकेऽर्थपरतायाऔत्सर्गिकत्वात्तत्रशब्दपरतांकरोति॥
शास्त्रेतुविपरीतं॥किंच॥यदितस्मिन्नणीत्यत्रैवेयंप्रवर्त्ततर्हितत्रैवपूर्वग्रहणंकुर्यात्॥तस्मान्नेदंतस्मिन्नित्यनुकरणं॥किंतुअचिह्न
स्नीत्यादिसकलसंग्रहार्थंस्वतंत्रस्यसर्वनाम्नोयंनिर्देशः॥तस्यापत्यंतत्रभवइत्यादिवत्॥तस्मादित्युत्तरस्य॥पंचमीनिर्देशेषुउत्त

रस्यैवकार्यंस्यात्तच्चाव्यवहितोच्चारिते॥तिङ्ङतिङः॥अग्निमीले॥इहनभवति॥ईडेऽग्निं॥इहकारकविभक्तेरसंभवाद्दिग्योगलक्षणापंच
मी॥तत्रदिक्शब्दोऽध्याह्रियमाणोत्तरशब्दवत्पूर्वशब्दोप्यविशेषात् अध्याह्रियेत॥व्यवहितोपिचगृह्येन॥तथाचउत्तंस्याताइत्यत्राप्युदः
स्थास्तंभोरित्यस्यप्रसंगः॥तदेवंपूर्वसूत्रमेतत्सूत्रंचेतिहूयमपिनियमार्थमितिस्थितं॥तथाचवार्त्तिकं॥तस्मिंस्तस्मादितिपूर्वोक्तग्रोयोगं
विशेषान्नियमार्थंवचनंदध्युदकंपचत्योदनमिति॥इहापितस्मादितिस्वतंत्रस्यसर्वनाम्नोनिर्देशःप्राग्वत्॥नत्वनुकरणं॥तथाहि सतियद्य
पितस्मान्नुडहिहलइत्यत्रात आदेरितिदीर्घात्पूर्वस्यागस्यासंभवात्सयोजनाभावान्नैतत्परिभाषोपस्थितिस्तथापितस्माच्चसोनःपुंसित
स्यान्नुडचीतियोगहूपेस्यात्॥उच्चरतआनुपलभतेगौरनश्वइत्यादेर्व्यावर्त्यस्यतत्रसंभवादितिदिक्॥स्यादेतत्॥एतत्सूत्रंनियमार्थमस्त
॥पूर्वसूत्रमपिऔपश्लेषिकसप्तमीपक्षेनियामकमस्तु॥सत्सप्तमीपक्षेतुनियामकत्वमयुक्तं॥षाष्ठभाष्यैकयटविरोधात्॥तथाहि॥श्भा
न्नलोपइत्यत्रभाष्यं॥नैषापरसप्तमी॥कातर्हिसत्सप्तमीक्ङितिसतीति॥तथात्रैवैकयटः॥कथंपुनःसंभवत्यांपरसप्तम्यांसत्सप्तम्याश्रयितुं
युक्ता॥यद्येवंवाक्याध्याहाराद्दोषः।क्ङितिसतीत्येवहिविज्ञायमानेपौर्वापर्यानाश्रयणान्नास्तितस्मिन्नित्यस्याःपरिभाषायाउपस्थानं।
यदाह्यौपश्लेषिकेऽधिकरणेसप्तमीतदाकिंपूर्वस्यकार्यंअथपरस्यत्यनियमेनियमायपरिभाषोपस्थानमिति॥अत्रोच्यते॥षाष्ठग्रंथस्यप्र
कृतमात्रपरत्वादविरोधः॥तथाहि॥श्भान्नलोपइतिसूत्रेशकारवतोग्रहणंमास्तुनादित्येवास्तुङितिश्भेनंदनादावतिप्रसंगइत्युत्तरितं॥
अनिदितामित्यस्यानुकर्षणेतुहिनस्तीत्यत्रनस्यात्॥तत्रःक्ङितीत्यनुवर्त्यश्भमभेवक्ङितमाश्रित्यहिनस्तीत्यत्रलोपोस्तितिशंक्यते॥यदि
चास्यामवस्थायांतस्मिन्निति परिभाषोपतिष्ठेत——तदानंदमानादौचानशोङित्त्वाल्लोपःप्रवर्त्तेत॥श्भमशित्करणंचानर्थकंस्यात्॥नहिशित्वा

त्सार्वधातुकतयाङित्त्वमिममेवार्थमित्यहिनस्तीत्यत्रनलोपेक्रियमाणेसार्थकंनत्वन्यथा॥नन्वार्द्धधातुकसंज्ञानिवृत्त्यार्थंशित्वंसार्थकं॥नस्योहि
सत्यामनक्किभनक्किदित्यतोलोपःस्यात्॥रुणद्धिभिनद्धीत्यत्रगुणःस्यात्॥तृणेढीतीङागमःस्यात्॥नेड्वशीतितुनप्रवर्त्ततेअकृत्वादितिचेन्न॥
श्नमः पूर्वभागस्यानंगतयोक्तविधीनामप्राप्तेः॥कथमनंगतेतिचेत्॥इत्थं॥प्रत्ययविधौयत्पंचम्यन्तंनिर्दिष्टंधातोःप्रातिपदिकादित्यादितदादिन
स्मिन्प्रत्ययेपरतोंगमितिहिसूत्रार्थः॥इहतुयत्पंचम्यन्तंनिर्दिष्टंरुधादिभ्यइतिनास्मात्प्रत्ययःपरः॥यस्माच्चपरःपूर्वभागान्नासोतस्मिन्विधी
यमानेपंचम्यानिर्दिष्टः॥अतएवभिनत्तीत्यादावनोदीर्घोयञीतिनप्रवर्त्ततेनचश्नसोरल्लोपइत्यत्रविशेषणार्थंशित्करणंस्यादितिवाच्यं॥नसो
रल्लोपइत्युक्तेपिदोषाभावात्॥नन्वेवंनांतास्त्योर्ग्रहणंस्यात्॥तथाचकनेर्यङ्लुकिचकांतइत्यत्रापिस्यादितिचेन्न।सिद्धांतेपिश्नप्रत्ययसांत
योर्ग्रहणापत्तौवस्तइत्यादावतिप्रसंगसाम्यात्।साहचर्यात्प्रत्ययधात्वोर्ग्रहणमितितुतुल्यं।ननुनसोरल्लोपइत्युच्यमानेयत्रनप्रत्ययस्तत्किङ्
त्यानंतर्यंनत्रैवभविष्यतियत्नइवाचरतःयत्नतःक्षमनतइति॥मैवं॥अनुवर्तमानेनसार्वधातुकग्रहणेनप्रत्ययोविशेष्यते॥तथाचविध्यसंस्प
र्शान्निर्दिष्टपरिभाषानुपस्थितौनिमित्तसप्तमी॥सार्वधातुकनिमित्तस्यनप्रत्ययस्यास्तेश्चालोपःकृत्यनंतरइति॥ननुचातउत्सार्वधातुकइ
तिसूत्रेसार्वधातुकग्रहणंप्रत्याख्यातमितिचेन्न॥सतिशित्वेप्रत्याख्यानात्॥तदेवंश्नमःशित्वकरणसामर्थ्यात्क्रुनीतिसत्त्वसम्यामपिप
रिभाषानोपतिष्ठतइतिस्थितं।पूर्वपक्षत्वादनास्थयानयोक्तमितिवावर्णनीयं।इहसूत्रद्वयेषष्ठीप्रकृत्यपस्तोपिभाष्येस्थितः॥तथाहि॥षष्ठी
स्थानेयोगेनिसूत्रात्षष्ठीत्यनुवर्त्ततेसप्तम्यर्थनिर्देशेपूर्वस्याव्यवहितस्यषष्ठीस्यात्॥पंचम्यर्थनिर्देशेउत्तरस्याव्यवहितस्यषष्ठीस्यादिति।
तत्रइकोयणचीत्यादौसूत्रएवषष्ठीश्रवणात्नांषष्ठीमनूद्यपूर्वस्यानंतरस्यैषानत्तूत्तरस्यनवापूर्वस्यापिव्यवहितस्येत्येतावन्मात्रमुच्यते॥

मानेमुगित्यादौतुषष्ठ्याअश्रवणात्सापिप्रकल्प्यतइतिविशेषः॥सात्वानियतयोगत्वात्स्थानषष्ठीयस्यचस्थानषष्ठीतस्यैवकार्यनियमइति सोप्यर्थात्सिद्ध्यति॥यत्रतूभयनिर्देशस्तत्रोभयंनावश्यप्रकल्प्यंकार्यित्वनिमित्तत्वयोरेकत्रयुगपदसंभवात्ज्ञापकाच्च॥तथाचैकःपूर्वपर योरितिसूत्रेकैयटः॥सूत्रद्वयप्रमाणत्वाद्वाभवेतांप्रकल्पिकेषष्ठ्याविभक्तीतेनात्र ज्ञापनार्थत्वमाश्रितमिति॥नचपर्यायेणोभयकल्प नम्॥अतुल्यबलत्वात्॥तथाहि॥आनेमुगित्यत्रसप्तमीनिरवकाशासापूर्वत्रचरितार्थायाअतोयेयइतिपंचम्याःषष्ठींकल्पयति॥एवमी दासइतिसप्तम्याः॥तथातास्यनुदात्तेत्सूत्रेअभ्यस्तसिजर्थंसार्वधातुकेइतिसप्तमीनिर्देशंवस्यति सात्वसप्तम्युत्तरत्रचरितार्थेति न स्याएवषष्ठीकल्प्यते॥तथावह्रोर्लोपइत्यत्रबह्वोरितिपंचमी अकृतार्थायाइष्टेभेयःस्तिसप्तम्याःषष्ठींकल्पयति॥अतएवभूचबहोरिति पृथक्षष्ठीनिर्देशः॥तथागोतोणिदितिपंचमीसर्वनामस्थानइतिसप्तम्याःषष्ठींप्रकल्पयति॥गोशब्दस्यणित्वेप्रयोजनाभावाच्च॥नचतिष्ठ ति गौरित्यादौपूर्वस्यवृद्धिःफलमितिवाच्यम्॥गोशब्दंप्रतितिष्ठतेरनंगत्वात्॥एवंप्रायेणपंचम्याअकृतार्थतेति भाष्येस्पष्टं।आमिसर्वनाम्नःसु डित्यत्रापिपंचम्यनवकाशा॥आमीतिसप्तमीतूत्तरार्थतयासावकाशा॥यदितुइहआदित्यनुवृत्तपापंचम्यासामानाधिकरण्यंसंपाद्यसर्वे नाम्नइतिपंचम्यपिकृतार्थेतिब्रूयान्नहियद्योद्देशपक्षाश्रयेणपरत्वात्तस्मादित्युत्तरस्येतिभविष्यति।तदुक्तं।उभयनिर्देशेपरत्वात्पंचमी निर्देशइति॥वस्कनस्कनेहसामानाधिकरण्यम्॥वर्णाश्रमेतराणामित्यस्यसिद्ध्येसर्वनाम्नोविहितस्येतिव्याख्यानात्॥येषांनेषामित्या द्यर्थमकारात्परस्येतिव्याख्यानाच्च॥दीर्घाज्जसितुग्भवतीत्यत्रतुषष्ठ्याःस्थानेपंचमी॥तेनदीर्घस्यैवतुग्भवतिननुह्रस्वस्यसुराज्ञो येतिनिर्देशश्चेहलिंगं॥अन्यथाहिरवरिचेतिचत्वेनसुराज्ञायेतिचकारद्वयंनिर्दिशेत्॥प्रत्ययविधौनपंचमीनप्रकल्पिका॥षष्ठ्याअनुवृद्

विभक्तित्वात्॥ अग्नेरिङ्स्यचानुवादसंभवात्॥ तत्रानियमांप्रसंगेननियमकारिण्याः परिभाषायाअप्रवृत्तेश्चेतिदिक्॥ स्वंरूपंशब्दस्य शब्दसंज्ञा॥ शब्दस्यस्वरूपंसंज्ञिशब्दशास्त्रेयासंज्ञातांविना॥ अग्नेर्ढक्॥ आग्नेयी॥ आङोनयमहनः॥ आनयच्छते। आहते॥ इह अग्निआङ्यमहन्एषामेतत्सूत्रोपात्तानांप्रयोगसमवायिनस्तएवसंज्ञिनः। अशब्दसंज्ञेतिकिम्॥ उपसर्गेघोः किः। दाधाभ्योयथास्यात्॥ घुधातोः शब्दार्थान्माभूत्। शब्दःशब्दशास्त्रम्॥ नत्रसंज्ञेनिसप्तमीसमासः॥ नतुशब्दस्यसंज्ञेति॥ कर्मकरणमित्यादिष्वर्थसंज्ञासुस्वरूपग्रहणापत्तेः॥ स्यादेतत्॥ रूपग्रहणंविनापिस्वशब्देनतदेवग्रहीष्यते॥ प्रतीतावुपदेशानपेक्षत्वादसाधारणत्वादंतरंगत्वान्नियतोपस्थितिकत्वाच्च॥ अर्थोहिप्रतीतौसंबंधग्रहणमपेक्षतेसाधारणश्च। पर्यायैरपिप्रत्यायनात्॥ बहिरंगश्च। पदज्ञानजन्यबोधविषयत्वात्॥ नियतोपस्थितिकस्यअनुकरणदशायामप्रतीतेः। तत्किंरूपग्रहणेनेतिचेत्॥ अत्राहुः। इहशास्त्रेअर्थोपिविवक्षितोरूपवदितिज्ञापनार्थंरूपग्रहणं॥ तेनअर्थवद्ग्रहणेनानर्थकस्येतिउपपत्तिंभवति॥ ततोज्ञापकादर्थोग्राह्यःस्वंरूपमितिवचनाद्रूपंचेतिसामर्थ्यादर्थवतोरूपस्यग्रहणं॥ तेनकाशेकुशेइत्यत्रशेइतिमृत्यसंज्ञानभवति॥ एतत्सूत्रंभाष्येप्रत्याख्यातं॥ तथाहि॥ आरभ्यमाणेपिसूत्रेषष्ठ्युपपत्त्यैदेवताग्रांचःउदंचोभरताइत्यादयस्तावल्लोकवदर्थाएवगृह्यंते॥ अग्नेर्ढगित्यादौतुशब्दएवग्रहीष्यते॥ अर्थस्यप्रत्ययेनपौर्वापर्याभावात्॥ ङ्याप्प्रातिपदिकादित्यधिकाराच्च॥ उपसर्गेघोःकिरित्यादौघुधातुस्तूनग्रहीष्यते॥ दाधाघ्वेत्यारभ्यत्॥ उक्तंहि॥ व्यवहारायनियमः संज्ञायाः संज्ञिनिक्वचिदूहनि॥ अर्थवद्ग्रहणपरिभाषापिब्रुवादिसूत्रेराजिंपठित्वापुनर्भ्राजिंपठतिसिद्ध्यर्थंसिद्ध्यर्थम्॥ अग्नेर्ढगित्यादौहिशब्दविशिष्टस्यार्थस्योत्सर्गतउपस्थितौविशेष्येकार्यबाधादविशेषणीभूतेशब्देप्रवर्तमानेकार्यमुपस्थितार्थोपहितएवनत्वनर्थकेपि॥ अर्थस्यविशेषणविशेष्यभावव्यत्यासमात्रेणोपपत्तौसर्वात्मना

त्यागायोगात्॥गौणमुख्यन्यायोप्येतन्मूलः गौणस्यप्रथमतोऽनुपस्थितेः एतेनाभिव्यक्तपदार्थायेइत्यपिव्याख्यातम्॥तस्मान्न्यायतएवसकलनिर्वाहेसूत्रेनारंभणीयमिति॥ननूत्तरत्रचतुःसूत्र्यामनुवृत्तयेस्वरूपमित्यवश्यंवाच्यमेवेतिचेन्न अनुवृत्तेरनावश्यकत्वात्॥तथाहि॥अणुदित्सूत्रेनावत्स्वस्यापिसवर्णस्यदेवसिद्धं॥कथमन्यथाअवर्णमित्यत्रझरोझरीतिलोपः॥तत्रव्यक्तिभेदात्सावर्ण्यमितिचेत्तुल्यमपिबोध्यबोधकव्यक्त्योर्भेदात्॥तथातपरस्तत्कालस्येत्यत्रापि॥आदिरंत्येनेत्यत्रापिआदिग्रहणाकृत्यसिद्धम्॥आरक्तौलिंगंतुनादिचीत्यादिग्रहणेनविधिरित्यनुषार्तिककारस्तस्यचेतिवक्ष्यत्येव। वस्तुतस्तुनदपिनवाच्यम्॥व्यपदेशिवद्भावेनैवसिद्धेः॥अप्रातिपदिकेनेतितुनत्रैवप्रत्याख्यास्यामः॥अतएवयेनविधिस्तदाद्यंतत्वेप्रयोजनमित्याद्यंतवत्सूत्रस्थवार्त्तिकंसंगच्छतेइतिदिक्॥सिच्तद्विशेषाणांवृक्षाद्यर्थं॥अत्रसिदित्युपलक्षणंकिंचिल्लिंगंसमासज्यदृत्यंलिंगाविशेषाणांसंज्ञेतिवक्तव्यं तच्चलिंगंवृक्षादावासंजनीयमित्यर्थः॥एवमग्रेपि।तेनविभाषावृक्षमृगेतिसूत्रेविशेषाणाग्रेवग्रहणात् प्लक्षन्यग्रोधंप्लक्षन्यग्रोधाइतिसिद्ध्यति॥पित्यर्थायवचनस्यचस्वाद्यर्थं।चकाराद्विशेषाणांस्वरूपस्यचग्रहणं॥स्वेपुषः॥रैषंषंपुष्टः॥अम्बपोषंम्॥स्वपोषं॥जित्यर्थायवचनस्येवराजाद्यर्थम्॥सभाराजामनुष्यपूर्वाइनसभम्॥ईश्वरसभं॥नेहराजसभा।हरिश्चंद्रसभा।पर्यायेणयोवक्तिसहिपर्यायवचनः॥नचस्वस्यस्वेनसहविकल्पः॥नापिसामान्यविशेषयोर्भिन्नप्रकारकबोधजनकतयातुल्यार्थत्वाभावात्॥तुल्यार्थास्तुविकल्पेरन्निति न्यायात्॥इनशब्दोराजशब्दपर्यायइत्यादिव्यवहारस्तुभीमोभीमसेनइतिवत्॥स्त्रियांतस्यतद्विशेषाणांचमत्स्याद्यर्थं। पक्षिमत्स्यमृगान्हंति।मात्स्किकः॥शाकरिकः।पर्यायवचनान्न। अनिमिषान्हंतिा मैनस्येष्यतइतिभाष्यं॥मैनिकः॥मृगपक्षिणोलक्ष्यन्तेइतिषाः कर्त्तव्यः॥तेनस्वरूपस्यपर्यायाणांविशेषाणांचग्रहणमितिव्याख्यातारः॥इहवृद्धादौराजादौचन्यायेनैवाभिमतंसिध्यतीतितत्रैववक्ष्यते॥

दृतरतुसर्ववान्तनिकमेवेत्यवधेयं॥अणुदित्सवर्णस्यचाप्रत्ययः॥अत्राण्परेणणकारेपेत्युक्तं॥अणुदित्चसवर्णस्यसंज्ञास्यात्विधीयमानंविन्म
चकारात्स्वरूपस्य।अस्यच्वौ।शुक्लीस्यात्मालीस्यात्॥स्वरनेकाचोऽसंयोगपूर्वस्य॥क्विब्यतुःनिब्यतुः॥ऋदोरप्॥यवःस्तवःलवःपवः।उरण्र
परः कर्त्तीकिरति॥नचैवंऋदोरप्ह्रस्वांतेभ्यःकृञादिभ्योपिस्यादितिवाच्यं॥दीर्घोच्चारणवैयर्थ्यापत्तेः॥नन्वेवमपिअष्टनआविभक्तावित्यस्यम
वर्णग्रहोदुर्वारः॥नहितत्रापिसामर्थ्ये।ह्रस्वोच्चारणेह्यर्धमात्रिकस्यमात्रिकएवस्यादितिदीर्घग्रहणस्यउभयार्थतोपपत्तेरितिचेन्न।अप्रत्यय
इतिनिषेधात्॥दीर्घाणामनणत्वेनसवर्णग्राहकतानास्तीतिआगेवोक्तत्वाच्च॥ननुदीर्घाश्चेदनणस्तर्हिकारकोहारकइत्यादौरपरत्वंनलभ्ये
तेनिचेत्॥आंतोसिःनहिदीर्घाःक्वाप्यणग्रहणेननोपस्थाप्यंतइतिब्रूमः किंतुग्रहणकशास्त्रेनदुपजीव्येषुवर्णोपदेशादिषुचदृतरत्रतुवाक्यापरि
समाप्तिन्यायानवतारादस्त्येवाणग्रहणेन ——— दीर्घग्रहणमितिनत्वम्॥उदित्कुहोश्चुः।चकारोजगाद॥अप्रत्ययइतिनिषेधस्तुउणि
त्सुनप्रवर्त्तते॥उगित्करणसामर्थ्यात्॥अतएवाहुः॥भाव्यमानोणप्सवर्णान्नगृह्णातीति।तुक्लुक्नुक्तुडादयस्तुनोदितः।प्रतिज्ञानु
सिक्स्याःपाणिनीयइत्यभ्युपगमात्॥अप्रत्ययइतिकिं॥विधीयमानानांप्रत्ययागमादेशानांसवर्णग्राहकत्वंमाभूत्॥अतइञ्॥आर्द्धधातु
कस्येड्वलोवुक्॥अम्संवुद्धौइदमइश्इहहिसर्वत्रउपदेशइतिवचनात्सूत्रांतर्गतेष्वेवइञादिशब्देषुइत्संज्ञाप्रवर्त्तते॥लोपस्तुतत्रानुपू
र्व्यावाधितोपिपदस्वरूपपर्यालोचनायांप्रवृत्तः॥ततःस्वरूपमितिसंज्ञाबलात्जायमानापदार्थोपस्थितिरनुबंधविनिर्मुक्तस्येवभवति॥त
थाचउपस्थापकस्याणत्वात्सवर्णग्रहणंप्राप्तंनिषिध्यतइतिउचिते॥अतएवचनुर्दशस्वणउच्चारणार्थस्याकारस्येवैतत्संज्ञकानामपि
णकारादीनांलणमध्याकारस्यचपदपर्यालोचनायामेवलोपश्चबलवत्तरइतिन्यायेनापहारादितरांतर्भावेणैवसंज्ञाप्रवर्त्ततइतिसिद्धांतः॥

इदंचालोंत्यात्पूर्वउपधेतिसूत्रेनस्मिन्निति निर्दिष्टइत्यत्रचकैयटप्रभृतिभिरस्माभिश्चसमम्॥ इदंअकःइकोचीत्यादौसानुबंधाद्विभक्तिस्तुग्राह्यमिकबोधविशिष्टस्यविषयतयानस्यैवार्थवत्त्वमादाय॥ अन्योहिपञ्चाद्भवतिष्ठतेनतुप्रयुज्यतइतिकथंतत्रोविभक्तिःक्रियतां॥ इत्संज्ञाकार्यंतुआनर्थक्यस्यानदंगेष्विति न्यायेनप्रत्याख्येयप्रवर्त्तते॥ विभक्त्यर्थान्वयोप्येवं॥ दृष्टंहिडःमुडादावुपस्थापकेकृतस्यलिंगस्यतद्बोध्येफलप्रवर्त्तकत्वमितिदिक्॥ स्यादेतत्॥ उक्तरीत्याउदोष्ठ्यपूर्वस्येतिसौत्रेउच्छब्देप्रवृत्तादुत्संज्ञालस्येतित्स्वरंप्रवर्त्तयेदितिचेत्॥ सत्यं॥ अदएवैतत्समाधानायपूर्वैरार्यैःपराक्रांतमितिगृहाण॥ कथंतर्हिएओङ्सूत्रेतद्दूषणायप्रवृत्तमितिचेत्॥ तत्कालावधारणेनकृतार्थस्यतकारस्यानुबंधांतरवैयर्थ्यादितिगृहाण॥ अतएववैयाकरणइत्यत्रऐचश्चित्स्वरोनभवतिपचस्वेतिशपोप्येवं॥ नद्याभ्यामितिसूत्रेअचःपरस्यहेइत्यत्रचऐजचोश्चकारस्यप्रत्याहारेउपसंक्षयात्॥ यद्वा॥ इत्त्रिशादिष्वपिमास्तुसूत्रांतर्गतेषित्संज्ञाकिंतुफलप्रत्यासत्तेःपदार्थैरेवसास्तु॥ नैतेउपदिशाइतिचेन्नतेफलंभाजइत्तितुल्यम्॥ सामर्थ्यात्परंपरासंबंधेफलमितिचेत्संज्ञापितत्रैवास्तुसामर्थ्यादितितुल्यम्॥ उपदेशेत्वंहिग्रायोगिकेषुसंभवात्तत्प्रत्यापकनिष्ठमानुपूर्वीसाजात्यादाश्रीयते॥ नचैतन्नपरेष्वस्ति॥ प्रत्याप्येतकाराभावादितिदिक्॥ प्रकृतमनुसरामः॥ भाव्यमानोप्युकारादेशःसवर्णान्नगृह्णातीति॥ ऋतउदितिनपरकरणालिंगात्॥ तेनामुनाअमूभ्यामित्यत्रह्रस्वस्यहस्वःदीर्घस्यदीर्घःसिद्ध्यति॥ नचैवंसनाशंसेत्सुप्त्यणोपिसवर्णंगृह्णातितिवाच्यम्॥ आदेशविषयकंज्ञापकमित्युक्तत्वात्॥ यद्वा॥ अदसोसेरितिसूत्रेएवउच्चऊच्चेतिसमाहारद्वंद्वोक्त्या॥ अतएवसोर्लुकानिदेशःकृतःअतएवचऊदुपधायाइतिसूत्रेमोहइतिविकृतनिर्देशंप्रत्याख्यातुंभाष्यकारैरुकारांतरप्रश्लेषउक्तः॥ नन्वेवमपिअकःसवर्णइत्यत्रअकारोष्टादशानांग्राहकोस्तु॥ अणत्वादस्तुचसएवइकारादीनामपिग्राहकः आदिरंत्येनेतियुक्तेः। ईकारादयस्तुकथंग्राह्याः॥ नहिनद्वाचकः

ब्दस्तस्मिन्सूत्रेऽपनीतोस्ति॥ननुअकृशब्देनइकारादयोप्युपस्थिताइतिचेन्नहिवाक्यार्थेऽन्वेतुनाम॥पदार्थसंसर्गस्यवाक्यार्थत्वात्॥ननुतेपि
स्वार्थोपस्थापकाः। अनुच्चारितत्वादित्युक्तम्॥अतएवऋचंवेत्तीत्यादौशब्दविशेषंवेत्तीत्येवार्थोनतुतदर्थंवेत्तीति। तदुक्तंवार्त्तिककृता॥तत्रप्रत्या
हारग्रहणेसवर्णाग्रहणमनुपदेशात्ह्रस्वसंप्रत्ययादितिचेदुच्चार्यमाणसंप्रत्ययकत्वाच्छब्दस्यावचनमिति॥शब्दस्याप्रतीयमानस्य। अवचने
। अर्थाप्रतिपादकत्वमित्यर्थः॥अत्रोच्यते॥प्रत्याहारग्रहणेसर्वत्रस्ववाच्यवाच्येनिरूढालक्षणादीर्घाज्ज्ञापकात्॥प्रथमयोःपूर्वसवर्ण
इत्यत्रहिअकइत्यनुवर्त्तते॥नचाकृशब्दवाच्योदीर्घोत्रियोस्यनिषेधस्यविषयःस्यात्॥नन्वाकारोस्तीतिचेत्न। नादिचीत्यनेनैवनत्रनिषेधसि
द्धेः॥ष्टाङ्सिनामित्यादिनिर्देशाअपीहलिंगं॥नन्वेवमिकोयणचीतिसूत्रेईदातोर्ग्रहणंनस्यात्॥युगपद्वृत्तिर्ह्यविरोधात्॥तथाचसुब्ध्वास्यःदध्यान
येत्यादिनसिद्धेदितिचेन्न॥सनितात्पर्येयुगपद्वृत्तिर्ह्यस्यस्वीकारेबाधकाभावात्॥इहचाण्नद्याइत्यादिनिर्देशानांतात्पर्यग्राहकत्वात्॥यदितु
प्राचांमतेश्रद्धावशाद्युगपद्वृत्तिर्नाभ्युपेयतेहिंहरीदातोरपिइगच्छब्दयोर्लक्ष्णेवास्तु॥स्ववाच्यह्रस्ववाच्यत्वाविशेषात्॥स्ववाच्यतापि
परमस्तीत्यन्यदेतत्॥नन्वेवमपिशरीरमित्यादौशकारस्यस्थानसाम्याद्यकारादेशः प्राप्नोति। इकारवाच्योदीर्घःतत्सवर्णश्चशकारइतिअस्या
पिइग्ग्रहणेनग्रहणात्॥तथाशीनलमित्यादावपियण्प्रसंगः॥दीर्घःपरंनभवति॥अकृशब्दवाच्यतायाःदीर्घेविश्रांतितत्वात्तत्संबन्धग्रहेमाना
भावादिति॥अत्रोच्यते॥भवेदयंशकारस्ययकारादेशरूपोदोषः॥यदिस्ववाच्यसवर्णलक्षणांवदेम॥वयंतुस्ववाच्यवाच्येसत्येवब्रूमः॥नच
ईकारःशकारस्यवाचकः॥दीर्घाणामनणत्वेनसवर्णाग्राहकतायाअसकृदावेदितत्वात्॥भाष्यमतेतुअज्झलोःसावर्ण्यमेवनास्तीत्युक्तं॥तद्
यमिहनिर्गलितोर्थः॥अकारोष्टादशानांसंज्ञा॥एवमिदुतौ॥ऋलृइत्येतौपर्यायशब्दौत्रिंशतःसंज्ञे। ऋलृवर्णयोः सावर्ण्यस्योपसंख्यानत्वात्

ऋलृक्सूत्रेऽकृतिप्रकृतिभावदर्शनेनज्ञापितत्वाद्वा॥नचतुल्यव्यक्तिकसंज्ञाद्वयप्रणयनवैयर्थ्यंनदर्थमिहसूत्रांतराप्रणयनात्॥एचस्तृ
द्वृद्धाज्ञांसंज्ञाः॥यवलाद्वयोः॥रहोतुस्वस्यैवेति॥यद्यपिहकारआकारस्यसंज्ञेतिप्राप्तंतथापितत्परिहारायनाञ्चलावित्यत्रैवयत्नःकृतोनवि
स्मर्त्तव्यः॥वार्त्तिककारास्तुइहाणग्रहणंप्रत्याचख्युः॥तन्मतेस्यच्चावित्यादौजानिनिर्देशात्सिद्धम्॥अनुवाद्यविशेषणस्यचह्रस्वत्वस्ययहै
कत्ववद्विवक्षा॥विधिप्रदेशेनुपक्षेकत्ववद्विवक्षेतिसर्वेष्टसिद्धिः॥यद्यप्यस्मिन्पक्षेऋकारेणलृकारग्रहणंदुःसाधंतथापिऋलृक्सूत्रोक्तरी
त्यासमाधेयमितिदिक्॥ ॥तपरस्तत्कालस्य॥तःपरोयस्मात्सतपरः। नातपरोपितपरः द्विविधोप्ययंस्वसमानकालस्यग्राहकःस्यात्॥
तेनअत्इत्उत्इतिषण्णांसंज्ञाः। इदितिह्रस्वानां। अतएवोपसर्गादृतिधातावित्यत्रसावर्ण्यात्लृवर्णग्रहणंतपरत्वादीर्घेनेतिसिद्धांतः॥
पंचमीसमासोदाहरणंतुवृद्धिरादैजिति। इहसंज्ञायांऋनेतात्परत्वंसंज्ञिनोःफलतिङ्सुदृष्टित्वमिवेत्युक्तम्॥परंपरासंबंधेनलाक्षणिकस्यस्य
ऋकृतेतिपक्षेतुनकश्चिद्दोषः। अदेङ्गुणदित्यत्राप्येवंसिद्धं॥नत्रतकारस्योभयार्थतयासामर्थ्यविरहात्॥यदितुऊंकालसूत्रेवक्ष्यमाणरीत्याणदि
त्सूत्रेशब्दसंज्ञायामित्यनुवर्त्तते॥यदिवाकार्यकालपक्षमाश्रित्यभाव्यमानत्वादेवसवर्णग्रहणंवार्य्यते॥तदावृद्धिसूत्रेतपरकरणंस्पष्टार्थं
॥इहतुपंचमीसमासोनाश्रयणीयः॥अनएवशास्त्रांतेअदितिभाष्यंसंगच्छते॥गुणाभेदकाइतिपक्षेतुवृद्धिसूत्रेनपरकरणमुभयार्थं॥गुणां
तरयुक्तस्यग्राह्यत्वात्॥भेदकत्वेज्ञापकंतुअणुदित्सूत्रस्थमणग्रहणमितिहलन्त्यसूत्रएवोपपादितं। तथाचतत्सूत्रस्थंतत्कालस्येतिपदमपीह
ज्ञापकं। अन्यथाहि स्वस्यरूपस्येत्यनुवृत्त्यैवसिद्धेकिंतेन॥नचसावर्ण्यात्लृवर्णग्रहणार्थंतत्॥एवंहितत्रैवलृग्रहणंकुर्यात्॥ऋतिऋवेतिविहि
तेरेफद्वयमध्यंवोच्चारयेत्॥आइत्येवसिद्धेःतोदीर्घोयञीतिसूत्रेदीर्घग्रहणमपीहलिख्यमितिदिक्॥अतएवैतत्सूत्रेभाष्यादौहेधात्म्यात्तं

विध्यर्थनियमार्थवेति॥तथाहि॥अणितिनानुवर्त्तते॥तेनआकारादावनणितत्कालास्तेवर्णानांगुणभेदेप्यनेनग्रहणं॥अतोभिसऐस
त्यादौतूभयप्रसंगेपरत्वादस्यैवप्रवृत्तिः॥ननुसंज्ञानांबाध्यबाधकभावोनेत्युक्तमितिचेत्॥सत्यं।अविरोधेफलभेदेचभवत्येवसमावेशः इ
हतुविरोधएवास्ति॥अष्टादशग्राह्याःषड्ग्राह्याइतिहिविरुद्धं।संख्याकृतव्यवहारस्यपरस्परपरिहारेणैवदृष्टत्वात्॥अतएवह्रस्वादेर्घइतिसूत्रे
हिप्रभृत्युपसर्गस्येतिवक्तव्यमितिवार्त्तिकंसंगच्छतेइत्याहुः॥वस्तुतस्तुनेहसंज्ञासूत्रद्वयेसंख्योपात्तायेनविरोधःस्यात्किंतुअतोभिसइत्या
दौनपरकरणसामर्थ्याद्बाध्यबाधकभावोनुमीयतइतितत्त्वं॥वस्तुतस्तुतकारविशिष्टंसंज्ञानत्वणमात्रं।तत्कालस्येतितच्छब्दस्तुविशेष्य
मात्रंपरामृशति॥ननुविशिष्टं॥तदुच्चारणकालसदृशेलक्षणानुप्राचांमतेप्यस्त्येव।सर्वनामपदेपिस्तस्यैववाचकंतीयंतत्वमसीत्यादौलक्ष
णायाःपूर्वोत्तरतंत्रयोःस्थितत्वात्॥तथाचदिद्युभाद्यंतर्गतानप्यदिहपदैकदेशत्वेनानर्थक्यान्नाह्रस्वतापसंगएवनास्ति।विधत्युत्पत्तिरप्येवम
तिसंगच्छते॥वृद्धिसूत्रेअत्राकारःप्रयोगस्थैराकारैरर्थवानितिहरदत्तग्रंथस्तुप्राचांरीत्यानेनव्यवस्थितिर्निष्कर्षः॥सोयंविध्यर्थतायशः।यत्तुभ
णित्यनुवर्त्ततेतेनतन्नियमार्थमितिनपरोणत्तत्कालस्यैवेतिगुणानामभेदकत्वादनणसुनकश्चिद्दोषः॥अस्मिंश्चपक्षेतत्कालग्रहणंशक्यमकर्तुं
अणग्रहणानुवृत्तिस्त्वानावश्यकीनपरःस्वरूपस्यैवेतिनियमेनापीष्टसिद्धेः॥दिवऔदित्यत्रतत्परकरणंस्वरार्थंनतुकालावधारणार्थंभाव्यमा
ननयासवर्णग्रहणाप्रसक्तेः॥तथाचस्वरितःप्रयुज्यते।द्यौःपितःपृथिविमातरध्रुगिति।पृथिवीउतद्यौरित्युदात्तप्रयोगस्तुद्यौशब्दस्यबोध्यः
औदञ्चेर्घरित्यत्रतुमुखसुखार्थंतत्परकरणं॥व्याख्यानात्॥तेनसमिधानेअग्नावित्यादौतित्स्वरेनेतिहरदत्तादयः।यत्तुनविभक्तौतुस्माइ
स्यत्रजसादित्यत्रेदमिरुक्तं॥इदोदित्यत्रायंनिषेधोनभवति॥इदमस्यमुरित्युकारानुबंधकरणादनित्यत्वादस्येति।तदभ्युपगमवादमात्रं॥

नित्यस्वरप्रसंगाच्च नचैवंशपतिः॥ भस्मीयतवरणधसइत्यादावंतोदात्तश्रवणात्॥ तस्मादित्यादित्यपिमुखसुखार्थस्तकारः॥ एतदेवहुवचनेउक्तंतदुत्तरपदादिष्वप्येवमिनिदिक्॥ वस्तुतस्तुदिवौदित्यत्राप्येवमेवहल्लःस्वसनधर्मिणोनुदात्तेकृतेउदात्तस्वरितयोर्यणइत्येवस्वरितसिद्धेः। स्यादेतत्। प्लुतामध्यमाविलंबिताचेतितिस्रोवृत्तयः॥ तदुक्तं॥ अभ्यासार्थेप्लुतारुक्तिःप्रयोगार्थेतुमध्यमा। शिष्याणांतूपदेशार्थेवृत्तिरिष्टाविलंबितेति॥ नाम्नैकेन त्रिभागाधिकाः॥ तथाहि॥ प्लुतवृत्त्यायस्यांऋचिपठ्यमानायोनवपानीयपलानिस्रवंतितस्यामेवऋचिमध्यमवृत्त्यापठ्यमानायांह्रदश्चविलंबिताख्यांतु षोडश। एवंस्थितेयदिसूत्रकृद्विलंबितायांतपरकरणमकार्षीन्मध्यमायांप्लुतायांवातर्हिह्रस्वेनांतरेणपाठकालेऽतोभिसऐसनस्यात्॥ कालोवधारणेनदीर्घप्लुतयोरिवह्रस्वांतरस्यापिवारणादिति॥ तथाचवार्त्तिकं॥ प्लुतायांतपरकरणेमध्यमविलंबितयोरप्रसंख्यानंकालभेदादिति॥ अतएवनिपातनान्मध्यशब्देह्रस्वइतिसंहितासंज्ञासूत्रेकैयटः॥ अत्रसिद्धांतवार्तिककारास्त्वाहुः॥ सिद्धंतु अवस्थितावर्णावक्तुश्चिरास्थिरवचनाद्वृत्तयोविशिष्यंतइति॥ अस्यार्थः॥ व्यंजकीभूतोध्वनिर्यद्यपिबहुकालानुवर्त्ती॥ तथापिकश्चिन्मात्रापर्य्यंतमेवाभिव्यनक्ति॥ तदुत्तरकालोपहितस्तुस्वयमेवानुवर्त्तमानेननुपरमभिव्यनक्ति॥ यद्वा॥ ह्रस्वस्यव्यंजकोध्वनिर्वृत्तित्रयेपिमात्राकालएव। मध्यमविलंबितयोःप्रथमगृहीतध्वन्यनुनिष्यादिनातस्तोन्यूनकालेनध्वन्यंतरेणाभिव्यक्त्यंतरजन्यतेअभिव्यंग्यस्तुनभिद्यते॥ एवंदीर्घव्यंजकोपिसर्वत्राद्योध्वनिर्द्विमात्रएव॥ अनुनिष्यादीतुनतोन्यूनदृत्याद्यूत्यंव्यंग्यास्तुस्वतएवपरस्परविलक्षणाः॥ एतच्चसर्वंकैयटेनध्वनितं॥ तस्मादुच्चारणप्रयोगमात्राकालंप्रतीयतेवर्णास्तुनित्याएव। वर्णोत्पत्तिपक्षेतुतदनुनिष्यादीदूरादपियात्यः कश्चिद्ध्वनिरवश्याभ्युपेयः॥ तस्यैवकालभेदाद्वृत्तित्रैविध्यं। वर्णास्तुवृत्तिभेदेप्येकरूपाएव केचिद्ध्वन्यात्मकएवास्याध्वनित्वेनप्रकल्प्यनाद्यनित्यपक्षेतुकालरूपोपाधिविशेषावच्छिन्नस्यैवव्यक्तित्वमितिदिक्॥ उक्तंच भाष्ये। ध्वनिःस्फोटःशब्दः

नांध्वनिस्फारवत्तुल्यस्थते॥अस्योमहांश्चकेषांचिदुभयंतत्स्वभावतइति॥अस्यार्थः॥शब्दोहिद्धाव्यंजकोव्यंग्यश्च॥शब्दानांव्यंग्यानांव्यंजक
त्वेनसंबंधीयोध्वनिःसएवमहानल्पश्चलस्थते।तदुभयंव्यंग्यव्यंजकत्वंकेषांचिदेवतालवादिन्यापारजन्यानामेवनतुभेर्यादिजन्यानामपि।
कुतः।स्वभावतः।कारणवैलक्षण्यात्॥अत्रउभयमितिभावप्रधानोनिर्देशः॥उभयरूपतेत्यर्थः॥ ।आदिरंत्येनसहेता॥ अंत्येनेतासहोच्चा
र्यमाणआदिर्वर्णोवर्णसंघातोवामध्यगानांसंज्ञास्यादादेःस्वरूपस्यच॥वर्णोयथाअत्॥संघातस्तकारुञ्॥इहहिअभूततद्भावेकृभ्वस्ती
नःकृञ्ग्रहीतेयेतिञकारेणप्रत्याहारः॥आद्यंतौतावदवयवौ॥ताभ्यामवयवीसमुदायआक्षिप्यते॥तस्यचयुगपल्लक्ष्येप्रयोगाभावात्तत्तदव्य
वेषुसंज्ञावत्तरंतीमध्यमेषुविश्राम्यतिनत्वाद्यंतयोःसंज्ञारूपांतर्भावेणतयोःपारार्थ्यनिर्णयात्॥अतःस्वरूपमित्यनुवर्त्तते॥स्वरूपंचादेरेवगृ
ह्यतेनांत्यस्यअप्राधान्यात्॥अंत्येनेतिह्यप्रधानेतृतीयातेनदध्यत्रेत्यादौकेवलएवयकारःप्रवर्त्ततेनणकारसहितइतिकेयटादयः॥अत्रेदंवक्तव्यं
।प्रत्याहारेष्वाद्यावाचकास्तत्रग्रहणकशास्त्रंसावकाशमितिग्रहणकशास्त्रस्यभाष्यादिपर्यालोचनयाणवाचकत्वंतावदाद्यवर्णेविश्रांतेअंत्यस्तु
नात्सर्यग्राहकःसहयग्रहणान्तुविशिष्टहिभक्त्युत्पत्तिरितिद्योतकोनरवैषम्यमितिस्थितम्।ञ्नोत्यस्येत्संज्ञयापत्तेस्तस्यकथंसंज्ञित्वप्रसक्तिः।अ
न्यथाजादिसंज्ञानामपिणकारादावतिप्रसक्तेः कउद्धारः।किंच॥अस्तुविशिष्टस्ययणसंज्ञातथापिदध्यत्रेत्यत्रयणशब्दाप्रवृत्तेरसंगतमेव
न्यायसाम्येनङ्कशब्दस्यैवस्थानित्वप्रसक्त्याङ्कारस्यस्थानित्वासंभवात्॥अंत्येनेतिकिम्॥सुडितिनृतीयैकवचनावयवेनमाभूदिति
वृत्तिकाराः।टाङसिङसामित्यादिनिर्देशेनरकारोनपूर्वोनइतिनिर्णयादितिभावः॥नन्वेवमपिटकारांतस्यसंघस्यटाटकारोंत्योभवत्येवेति
चेत्॥न।व्यक्तौतांत्यताविरहात्॥ इहहिअंत्यत्वप्रयुक्तायस्येत्संज्ञातेनप्रत्याहारइतिसुडनपुंसकसूत्रेहरदत्तः॥नचैवंरप्रत्याहारसि-

ष्टिः णस्त्रे नुनासिकप्रतिज्ञासामर्थ्यादनंत्येनापिप्रत्याहारात्॥ इदंतु वक्तव्यं॥ औदृष्टित्वस्यानन्यार्थत्वेनयातेनैवमुदप्रत्याहारः॥प्रत्यासत्तेश्च॥
तथाचांत्यग्रहणंमास्त्विति॥अत्रेदंसमाधानं॥मध्यमेनेनासहितंआदिस्तदुत्तरेषामपिग्राहकोमाभूत्॥एवंअंत्येनसहितोमध्यमः पूर्वेषांसंज्ञा
माभूदित्यादिग्रहणं। इतेनिकिम्। प्रत्याहारोयथास्यात्॥ सहिअनंत्येनापिअनुनासिकप्रतिज्ञासामर्थ्याद्भवतीत्युक्तम्नचैतदितेत्यस्य
विरहेलभ्यते॥ नवीनास्तुसहासमंताद्एतीतिसहेतामध्यमोवर्णःस्वरूपमितिचानुवर्तते॥अंत्येनादिःअण्इत्यादिसंज्ञकोभवतीत्यर्थः।आ
द्यंतसमभिव्याहाराच्च। सहेतामध्यमोवर्णोलभ्यते॥ वृद्धिगुणादिसंज्ञास्विवेहापिसामानाधिकरण्यात्संज्ञात्वावगतिः॥अस्मिंश्चव्याख्या
नेहलंत्यमित्यत्रेतराश्रयशंकापिनास्तीत्याहुः॥आद्यंतावयवद्वारासमुदायानुकरणेनैवंसंज्ञेयंवक्तव्येति॥ येनविधिस्तदंतस्य ॥
विशेषणंतदंतस्यसंज्ञास्यात्तस्यचरूपस्य॥एरचूचयः॥जयः॥अयः॥ओरावश्यके॥अवश्यलाभ्यं॥ इहयेनेतिकरणेतृतीयाननुकर्तृ
रिक्योगलक्षणषष्ठ्याबाधितत्वात्॥ विधिरितिहिकर्मणिकिप्रत्ययः॥तेनकर्मणोभिहितत्वाद्उभयप्राप्तावितिनियमस्यनायंविषयः॥कर
णंचपरतंत्रंकर्त्राधिष्ठितस्यैवकरणत्वात्॥एवंचेहतृतीययापारतंत्र्यलक्षणयेमुविभक्तौनलक्षणेतिनेपाणिकोहोषस्तन्निर्मूलः॥नचव्यत्य
यानुशासनवैयर्थ्यापत्तिस्तन्मूलम्। तिङ्स्वपितस्यतुल्यत्वात्॥रथोगच्छतीत्यादौव्यापारेलक्षणायास्त्वयापिस्वीकारात्॥अतएवप्रयाजशे
षेणहवींष्यभिघारयतीत्यत्रप्रयाजशेषंहविष्युक्षारयेदितिमीमांसकाव्याचख्युरितिदिक्। नचैवंजित्वादौदृकारादीनांपारतंत्र्यंधात्वादीनांच
स्वातंत्र्यंकथंप्रादीनामिवतत्स्यादीनामिवचस्वरूपतःसंभवतिकिंतुवैवक्षिकम्॥ तेनविशेषणमप्रधानंतच्चात्यंतस्यविशेष्यस्यसंज्ञेतिफलितं॥
विशेष्यसन्निधौचविशेषणत्वंभवतिसन्निधिस्तुक्वचित्साक्षान्निर्देशेनयथाईदूदेदिवचनंप्रगृह्यमितिहिवचनस्यक्वचिदधिकारात्॥यथाएरजि

त्यत्रधातोः कचिदाक्षेपाद्यथा इकोझलित्यत्रसनाधातोः। इकोयणचिण्वोयवावइत्यादौतुनकथंचिदपिविशेष्यसन्निधिः अतोनेदंप्रवर्त्तते॥
स्यादेतत्ऊठ्योष्ठ्यपूर्वस्येत्यत्र ओष्ठ्यपूर्वकत्वं धातोरेवविशेषणंस्यान्नतुऊकारस्यसहिदिशेषणत्वा दृदेतस्यसंज्ञा॥संज्ञाचसंज्ञिनंप्रत्या
यति॥ननुस्वयंविशेषणादियोगमनुभवतितत्कथंसंकीर्णमित्यादावतिव्याप्तिः॥पूर्त्तेमित्यादावव्याप्तिश्चएवमुनश्चप्रत्ययादित्यत्राप्यसंयो
गपूर्वत्वमंगस्यप्रत्ययस्यवाविशेषणंस्यान्नतूकारोनस्यतनश्चाश्नुहीत्यादावतिव्याप्तिः विशेषणंचयद्यंगस्यतदानश्नुहिइत्यादावतिव्या
प्तिः अथप्रत्ययस्यनहिनश्नुहीत्यादिसिद्ध्यतुअश्नुहीत्यादौतुदोषएवेति॥अत्राहुः। गुणप्रधानभावसापेक्षेयंसंज्ञातथाचउनश्चप्रत्ययादित्या
दौविशेषणसंबंधवेलायांगुणभावास्फुरणात्तमनुभूयपश्चाद्धिशेष्यसंबंधेविशिष्टसंज्ञाभवति॥इहहिविशिष्टस्यवैशिष्ट्यं॥ननुविशेष्येवि
शेषणमिति।व्याख्यानात्॥अतएवनविशिष्टेवैशिष्ट्यंनाप्येकत्रद्वयमितिदिक्॥तथाचवार्त्तिकं॥येनविधिस्तदंतस्येतिचेत्तद्ग्रहणेषाधीनांतदं
तेपाधितप्रसंगः।सिद्धंतुविशेषणविशेष्ययोर्यद्येष्टत्वादिति।ग्रहणेपाधीनांगृह्यमाणविशेषणत्वेसमतानामोष्ठ्यपूर्वत्वादीनामित्यर्थः॥य
द्येष्टत्वादित्यनेनेदंदर्शयतिचतुर्विधेषुविशिष्टवैशिष्ट्यबोधेषुमध्येविशिष्टस्यवैशिष्ट्यमेवेहसंमतंनत्वितरत्रिकव्याख्यानात्तस्यानुरोधा
च्च॥इहसिद्धांताभिमतंविशेषणविशेष्यभावंस्फुटीकर्त्तुबहूनिवार्त्तिकानिप्रवृत्तानि॥तद्यथा।समासप्रत्ययविधौप्रतिषेधः।द्वितीयाश्रितेत्यादौश्रि
तादयोविशेष्यास्तद्विशेषणंचसुप्एवंनडादिभ्यःफगित्यादौनडादिविशेष्यंप्रातिपदिकंविशेषणमितिफलितोर्थः॥एतेनग्रहणवताप्रातिपदिके
नतदन्तविधिर्नास्त्री—त्यपिव्याख्यातंतस्याप्युदाहृतप्रतिषेधसमानविषयकत्वस्यदिवउत्सूत्रेकृतादिभिरुक्तत्वात्॥अतएवगोस्त्रियोरि
तिसूत्रेगोतंयत्प्रातिपदिकमितिव्याख्यातं॥एतेनशेषोध्यसखीत्यादौग्रहणवतेतिप्रतिषेधसंचारयंतोहरदत्तादयःप्रत्युक्ताः।प्रकृतमनुसरामः

॥श्रितादयोविशेष्याइत्युक्तम्॥तेनहितीयाश्रितेतिसमासःकृष्णश्रितइत्यत्रैवभवतिननुकृष्णंपरमश्रितइत्यादावपि॥तथानडादिभ्यःफक्॥
नाडायणःनेहसूत्रेनडस्यापत्यंसौत्रनाडिः॥अनुशतिकादित्वादुभयपदवृद्धिः॥ननुकृष्णंपरमश्रितइत्यत्रसमासप्राप्तिरेवनास्ति॥अत्रहिस
मासात्सुबुत्पत्तिहितःतेनश्रितांतंसुबंतमेवनभवति॥अत्रकैयटहरदत्तौ॥संबुध्यंतमुदाहर्त्तव्यंकृष्णंपरमश्रितेतिएतद्धिप्रत्ययलक्षणेनसुबंतं
भवतिश्रितांतंचश्रूयतेइति॥स्यादेतत्॥सिद्धांतेश्रितादीनांविशेष्यत्वेपितत्रसुबंतत्वंबाधितम्॥नचातएवान्वयानुपपत्त्याश्रितादिशब्दानां
ततत्प्रकृतिकेलक्षणेतिवाच्यं॥संबुध्यंतएवमुख्यार्थपुरस्कारेणावकाशलाभात्॥तथाचकृष्णश्रितमित्यादिनसिद्ध्येदिति॥उच्यते॥समासतद्धि
तप्रकरणेसर्वत्रश्रितादीनांनडादीनांचतत्तत्प्रकृतिकेलक्षणेवरुद्धासेपेनदीभिश्चेत्यादौभ्येत्यस्यबाधात्॥नहितत्रसंबुद्ध्यंतसंभवति॥
पूर्वकालैकेत्यादौसंबुद्ध्यंतसंभवेपिएकविभक्तावित्यादिसौत्रनिर्देशोनसिध्येत्॥तस्मात्सामान्यापेक्षज्ञापकबलेनैकरूप्यायसर्वत्रतत्त
त्प्रकृतिकेलक्षणेतिस्थितेदत्तहरदत्तयोःकैयटहरदत्तकृतंभंक्त्वाव्याख्यानमनादेयमित्यवधेयं॥अस्यापवादमाह॥उगितोर्णयहणवृ
जीमिति॥उगितावर्णेनचप्रातिपदिकंविशेष्यतइतिफल्गुतीर्थः॥महांतमतिक्रांतातिमहतीउपसर्जनत्वान्ङीरादिलक्षणस्यङीषोऽभावेउगि
दंतत्वान्ङीप्॥बृहन्महन्नोर्गौरादित्वंनास्तीत्यपिकेचित्॥युक्तंचैतत्॥महनेसौभगायेत्यादौविभक्तेरुदात्तत्वसिद्धयेशतुरनुमइतिसूत्रे
नयजादयुदात्तत्वेबृहन्महतोरुपसंख्यानमितिवार्त्तिकस्यारभ्यमाणत्वान्ङीपोप्युदात्तत्वसिद्धेः॥अतद्धन्॥दाक्षिः॥नचेहसामर्थ्यात्तदंतवि
धिः॥अस्यापत्यंइदंकामइत्यत्रचरितार्थत्वात्॥नचैवमिञोञित्वंव्यर्थंस्यादितिवाच्यं॥बाह्वादिभ्यश्चेत्यत्रयथायथंवृद्ध्यादयुदात्तभ्यांचरि
तार्थत्वात्॥तन्नेवमपिऔपगविरित्यादावेवस्यान्नतुदाक्षिरिति॥अकारस्येहानर्थकत्वादितिचेन्न॥वर्णग्रहणेअर्थवत्परिभाषायाअत्रइ

स्तेः॥तथाचैतत्सूत्रशेषेवार्तिक॥अलैवानर्थकेनेति॥अतएवसंघातेनार्थवतैव॥तेनस्त्रियाङ्तीयङ्ङ्हैवभवति॥स्त्रियौपरमस्त्रियौनेहशस्त्र्यौशस्त्र्यः॥तथास्महनपूषार्यम्णांशौसौचेत्यत्रहनइत्यत्रसंघातग्रहणेप्रीहनग्रहणंनतेनप्रीहानावित्यादौशौसौचेतिनियमाभावस्तेः दीर्घैःसिद्धतिउदस्थास्तंभोरित्यत्रवापदांतस्येत्यतःपदग्रहणानुवृत्तिपक्षेपिउदेवविशेष्यः॥अननुवृत्तौतुनकश्चित्क्षतिः॥उभयथाप्यनर्थकस्याग्रहणान्नेहगर्मुत्थास्यतिगर्मुत्सुवर्णतृणयोः॥ननुशस्त्र्यौप्रीहानावित्यत्रप्राप्तिरेवनास्तिपदांगाधिकारेनस्यतदुत्तरपदस्यचेतिचकारेणनाम्नहीदंनत्वापितदुत्तरपदमितिचेत्॥सत्यं॥पदांगाधिकारइतिवचनसत्वेनथैवकिंत्वेतद्दूषितंभाष्येसौत्रेणतदंतविधिनैवगतार्थत्वात्॥अंनएषपरमश्वासावतिमहांश्चेतिविग्रहेपरमानिमहानितिसिद्धतिवचनाश्रयणेतुनैतत्सिद्धेत्॥अतिमहच्छब्दस्यमहदुत्तरपदत्वेप्यनंगत्वात्॥परमविशिष्टस्यांगत्वेपिमहदुत्तरपदत्वाभावात्॥सौत्रेणतदंतविधिनातुसातमहतइतिदीर्घमुपलक्षणंनुमागमश्चेहसिद्धति।नचेहग्रहणवतेतिनिषेधःशंक्यः॥समासप्रत्ययविधौइत्यनेनसहसमानविषयःसइत्युक्तत्वात्॥सौत्रेणजन्मजरसःपांसुचिब्रह्मणःपदमुपेतुमिच्छतामितिभारविप्रयोगोव्याख्यानः॥अलैवेत्यस्यापवादःपठ्यतेभाष्ये॥अनिनस्मन्ग्रहणान्यर्थवताचानर्थकेनचतदंतविधिंप्रयोजयंतीति॥अनराजेत्यर्थवतासाम्नेत्यनर्थकेनइनदंडीत्यर्थवतावाग्मीत्यनर्थकेनअस्मुपयाइत्यर्थवतासुश्रोताइत्यनर्थकेनमनसुशर्मेत्यर्थवतासुप्रथिमेत्यनर्थकेन।एतच्चेणःषीध्वमितिसूत्रेगग्रहणेनार्थवद्ग्रहणपरिभाषायाअनित्यत्वज्ञापनात्सिद्धं॥परिवेविषीध्वमित्यत्रहिषीध्वंशब्दस्यानर्थकत्वादेवाग्रहणेसिद्धेकिंतन्निवृत्त्यर्थेनअंगग्रहणेनेतिदिक्॥सूत्रस्योदाहरणांतराण्याहवार्त्तिककारः॥प्रयोजनंसर्वनामाव्ययसंज्ञायां॥अन्वर्थसंज्ञयाक्षिप्तःसंज्ञीसर्वादिभिर्विशिष्यतेइतिफलितोर्थः॥उपपदविधौभयाढ्यादिग्रहणं।भयंचआढ्यादयश्चेतिहेदुः॥तेनस्वच्

प्रकरणे मैघर्त्तिभयेषु कृञ इति सूत्रेवाक्यभित्वाऽपपदेनमेघर्त्तीविशेष्येतेभयेननुपपदंयदितुभयाढ्यशब्दयोर्द्वंद्वंकृत्वाआदिशब्देनबहुव्रीहिः
किंयेनतदाक्षेमप्रियमद्वैरप्युपपदंविशेष्येनसिद्धांतेनुक्षेमादयःउपपदेनविशेष्यंतेभयंकरःअभयंकरःआढ्यंकरणंस्वाढ्यंकरणं।ङीप्प्रतिषेधेस्व
स्त्रादिग्रहणं।स्वसापरमस्वसा॥अपरिमाणविस्तादिग्रहणंच।प्रतिषेधेप्रयोजनमित्यनुवर्त्तते।द्विगुनासन्निधापितमुत्तरपदेविस्तादिभिर्विशे
ष्यतेइतिभावः।द्विविस्ताद्विपरमविस्ताद्यावित।द्विपरमावित।दितिः।दैत्यःआदित्यः।दित्यदित्यादित्येतिसूत्रेअदितिग्रहणंनकर्त्तव्यंपरमदित्यादिभ्य
स्त्वनभिधानान्नभवतीतिभावः।रोणण्याअण्।रौणीतिसूत्रेणचातुरर्थिकः आजकरोणः॥मैंहकरोणः॥तस्यच।तस्यचेतिवक्तव्यं॥उक्तान्यवक्ष्य
माणानांचसर्वेषामयंशेषः॥तथाचेहसूत्रेस्वरूपमित्यनुवर्त्ततेइतिफलितोर्थः।ननुव्यपदेशिवद्भावेनरोणइतिसिद्धमितिचेन्न॥व्यपदेशिव
द्भावोप्रातिपदिकेनेतिनिषेधादितिभाष्यकाराः।यद्यपिरोणीशब्दोनप्रातिपदिकेनतथापिअप्रातिपदिकेनेत्यत्रवाक्येप्रातिपदिकग्रहणेलिंगवि
शिष्टस्यापिग्रहणात्स्त्रीप्रत्ययान्तैरपिव्यपदेशिवद्भावोनास्तीतिभावः॥यथाकथंचित्प्रातिपदिकग्रहणेलिंगविशिष्टग्रहणमितिन्यायेसू
त्रेवक्ष्यते॥ननुयदितुभयेत्युच्यतेस्वरूपग्रहणंचानुवर्त्ततेतर्हिव्यपदेशिवद्भावोऽप्रातिपदिकेनेत्यस्यनिर्विषयत्वंस्यादितिचेन्न॥सूत्रेता
ढुकदशांताडुदित्यादिसावकाशत्वात्॥नचतत्रांतग्रहणसामर्थ्यादेवव्यपदेशिवद्भावोनभविष्यतीतिवाच्यम्॥समासप्रत्ययविधौप्रतिषेध
इत्येतन्नाधेनांतग्रहणस्यचरितार्थत्वाज्ज्ञापकसिद्धेयंपरिभाषा।पूर्वात्तसपूर्वादिनिरितिवक्तव्येपूर्वादिनिःसपूर्वाच्चेतियोगविभागश्चेहज्ञा
पकः।वस्तुतस्तुभयाढ्यादाविवसूत्रांताढुकदशांताडुदित्यादावपिविशेषणविशेष्यभावव्यत्यासमात्रेणसिद्धेंतग्रहणसामर्थ्यमपिसूपपाद
मितिपरिभाष्याश्रयणंव्यर्थम्॥नचैवंगोकुलमित्यत्रह्रस्वःस्यादितिवाच्यं॥उपसर्जनंयोगेशब्दस्तदंतस्यप्रातिपदिकस्यह्रस्वनिधानात्॥

सन्निधानाच्च श्रुतिपदिकप्रत्येवविशेषणताश्रयणात्॥गोशब्देचतदभावात्॥अतएवराजकुमारीसूत्रइत्यत्रनहस्वः॥उपसर्जनंयत्स्त्रीप्रत्ययांतंतदंतस्यप्रातिपदिकस्येत्यत्रापिसन्निधानाश्रयणात्॥एषैवतवापिगतिःनह्युक्तपरिभाषेहसंभवतिव्यपदेशिवद्भावोःप्रातिपदिकेनग्रहणवतेतिचपरिभाषाह्ययमपिप्रत्ययविधिविषयकमितिदिवउत्सूत्रेकैयटहरदत्ताभ्यामुक्तत्वात्॥एवंचपूर्वादिनिरितियोगविभागोव्यर्थःकिंबहुनापूर्वादिनिरित्यत्रनतदंतग्रहणसंभवात्सपूर्वाच्चेतिसूत्रेव्यर्थेव्यपदेशिवद्भावेनसिद्धेतस्येतिप्रकृतवार्त्तिकमपिनकर्त्तव्यं॥स्वरूपग्रहणमस्यारब्धातमितिदत्तः।रथसीताहलेभ्योयहिधौ।नहहतीतियत्॥रथ्यःपरमरथ्यः।सीत्येपरमसीत्येसेत्रं।सीतयासंमितमित्यर्थः॥नौवयोधर्मेतियत्।हलस्यकर्षेहल्यः।मतजनहलात्करणजल्पकर्षेष्विनियत्॥यहिधाविनिकिं।हलसीराट्ठगितिदत्तविधौतदंतग्रहणंमाभूदितिकैयटेः॥अत्रेदंवक्तव्यं।हलसीरादितिहिःपठ्यतेतस्येदमित्यधिकारेनहहतीत्यधिकारेचतत्रोभयत्रापितदंतविधिरिष्टएवआद्यस्यप्राग्दीव्यतीयत्वाल्लुक्॥हिहलःअपरस्यश्रवणं॥हैहलिकः॥स्पष्टंचेदंचतुर्थेहरदत्तग्रंथे।युक्तंचैतत्।रथ्यइत्यत्तहहतीतिस्थशब्दस्यहिरुपादानमेतदर्थमितिभाष्येप्युक्तत्वात्॥वहत्यधिकारस्थरथहलयोःकृपादानसामर्थ्याल्लुभ्योहितदंतविधिरविशेषादुभयत्रापिस्यादेव॥नचैवमिहपहिधावित्यसंगतमितिवाच्यम्।तस्योपलक्षणत्वात्॥यद्वा॥रथाद्यदिनिसूत्रेरथाद्रथांगेइतिवेढकीत्युक्तौतत्प्रकारकशब्दबोधस्योपपादयितुंशक्यत्वेपिहलग्रहणेनदुपपादनस्यवक्तुमशक्यत्वेनहलग्रहणेननतदंतविधिः।अस्तुवासंरब्धापूर्वपदस्वेतिकैयटाशयः।नस्मैहितमितिप्रकरणेशरीरावयवाद्यदितिसूत्रेरथाच्चेतिवार्त्तिकं॥तत्राप्ययंतदंतविधिर्बोध्यः॥यत्तुतत्रकैयटोवक्ष्यति॥हलसीराशब्दाभ्यांसाहचर्याच्चतुर्थीप्रायविहितएवयंतिदंतविधिमाहुरितिं।तत्राहुरितिअस्वरसोज्ञेयं॥असमासेनिष्कादिभ्यइत्यसमासग्रहणेननस्मिन्प्रकरणेविशिष्यापिनदंतविधेर्ज्ञापितत्व

यासाहचर्याश्रयणेपितदंतविधेर्दुर्वारत्वादित्यवधेयम्॥सुसर्वार्द्धदिक्शब्देभ्योजनपदस्य।सुपांचालकः।सुमागधकः॥सर्वपांचालकःअर्द्धपांचालकःअकृच्छ्रादपिबहुवचनदिषयादितिवुञ्॥सुसर्वार्द्धाज्जनपदस्येत्युत्तरपदवृद्धिःदिक्शब्दः॥पूर्वपांचालकः॥अपरपांचालकःपूर्ववद्वुञ्॥दिशोमद्राणामित्युत्तरपदवृद्धिः॥ऋतोर्द्धिमद्धिधावयवानां ऋतुवाचिनःशब्दाद्योरद्धिमान्वृद्धिनिमित्तंप्रत्ययःतद्धिधानेअवयवान्नोपूर्वपदत्वेइतिशेषः॥तदंतविधिरिहवाचनिकएव॥शारदःपूर्वोभागःपूर्वशरत्पूर्वापराधरोत्तरमित्येकदेशिसमासः॥तत्रभवंपूर्वं शारदंसंधिवेलाऋतुनक्षत्रेभ्योण्॥अवयवादृतोरित्युत्तरपदवृद्धिः॥वृद्धिमदितिकिं॥शारषण्यइत्यत्रतदंतविधिर्माभूत्॥तेनतत्रऋत्वणेवभवतिपूर्वप्रावृषमिति॥अवयवानांकिं।पूर्वेस्यांशरदिभवंपौर्वशरदिकमित्यत्राण्नभवतिकिंतुकालाठञेवभवतितत्रहियथाकथंचित्तत्कालवाचिनोगृह्यंतेनतुरूढ्यैवेत्यर्थः॥उत्तरत्रसंधिवेलाऋतुनक्षत्रेणविशेषणात्॥अतएवसायंप्रातिकः॥पौनःपौनिकइत्यादिसिद्ध्यति॥ठञ्विधौसंख्यायाः॥हेषष्टीपरिमाणसंख्यातिषग्रहेतद्धितार्थस्यसमासेकृतेआर्हादिनिठकौनभवतिसंख्यायास्तदंतविधौप्रतिषेधात्॥तेनमाग्वतेरितिठञ्नभवति।अर्द्धपूर्वेतिलुगपवादः॥सोस्यांशवस्नभृनयइत्यतःसोस्येत्यनुवर्त्तमानेनदस्यपरिमाणमित्यत्रपुनःप्रत्ययार्थस्यसमर्थविभक्तिनिर्देशात्।पुनर्निर्देशेनहिप्रकृतालुकसंबद्धाद्विलक्षणमिदमिहिनिसूच्यते॥यद्वा॥अनुवर्त्तमानेनसोस्येत्यनेनसहितंपरिमाणसंख्यायादित्येतत्सावत्प्रत्ययंविधत्तेनतस्तुस्यलुकिकृतेपुनस्तदस्यपरिमाणमितिवचनसामर्थ्यात्स्वार्थेतज्ज्ञातीयःप्रत्ययःतस्यविधानसामर्थ्यान्द्विगुनिमित्तत्वाभावाद्दालुङ्नभविष्यति॥एतच्चवृत्तिकारमतमाश्रित्योक्तम्॥भाष्यकारमतेतुतमधीष्टइतिसूत्रेणभूतार्थेप्रत्ययंकृत्वाद्विषाष्टिकइत्यादिसाध्यंनह्यत्रार्द्धेतिलुक्प्राप्नोतिअनर्हीयत्वात्॥यद्यपितमधीष्टइत्यत्रकालादितिवर्ततेतथापिकालेसंख्येयेवर्तमानात्षष्टिशब्दादुत्पत्तिर्नविरु

ष्यतेरमणीयादिभ्यस्त्वनभिधानान्न भवति। परिमाणार्थैतुलुक्दुर्वीरः॥तथाहि॥प्राग्वतेष्ठञिति ठञ्नदहीत्यतः प्राक्तेनक्रीतमित्येवमाद्यर्थास्तेषु भवति॥अर्हत्यर्थेचेति॥ततःपरेष्वियेर्थावर्त्तयतीत्यादयआकालिकडाद्यंतवचनेइत्येवमंतास्तेष्वपिभवति॥एवंचठञआर्हीयानार्हीन्यार्थसाधारणत्वेपि परिमाणार्थस्यतदर्हतीत्यतःप्राङ्निर्देशात्तत्रोत्पन्नष्ठञआर्हीयएव।नचतदस्येतिपुनरुपादानमात्रेणार्हीयत्वमपगच्छति।नहिकाकोवाप्यनइत्यार्हीयत्वंनिवर्त्ततेकिंचयद्यार्हीयत्वंनिवर्त्तेत॥तर्हिजीवितपरिमाणादन्यत्रापिलुङ्नस्यात्॥द्वौनिष्कौपरिमाणमस्यहिनिष्कः नचहिनिष्कपूर्वान्निष्कानिष्क वचनस्यार्थोस्तिनिष्कार्थं स्यादिति॥परिमाणातिरिक्तेष्वार्हीयार्थेषुवचनस्यसावकाशत्वात्॥तस्माद्यस्यषष्टिर्जीवितपरिमाणं षष्टिमसौ भूतोभवतीति मयीष्टोभूतइत्येवंहि सार्थिकः साधनीयः॥तदस्येतिनुर्त्तर्कव्यम्।सोस्येत्यनुवृत्त्येवेष्टसिद्धेरितिस्थितम्।धर्मान्नञः॥धर्मंचरतिधार्मिकः॥अधर्मंचरतिआधर्मिकः॥अधर्माच्चेत्येतन्नवक्तव्यंपदांगाधिकारेतस्यतदुत्तरपदस्यचप्रयोजनं।इष्टकेषीकामालभारिषु।इष्टकचितं।।पक्केष्टकचितं।इषीकतूलेनमुंजेषीकतूलेन।मालभारी॥उत्पलमालभारी॥इहोत्तरपदाधिकारेप्रयोजनस्योदाहरणात्पदांगेतिपदशब्दउत्तरपदपरइतिकैयटादयः॥अनएवपरममहत्परिमाणमित्यत्रपरममहतोद्रव्यस्यपरिमाणमितिषष्ठीतत्पुरुषः॥सामानाधिकरण्येहिआत्मनइत्यात्मेत्यादित्युदयनाचार्योव्याचख्युः॥यत्तुतत्रवर्द्धमानेनोक्तम्।पदांगाधिकारइत्यत्रकेवलपदाधिकारोगृह्यतेनतूत्तरपदाधिकारः॥अन्यथाइष्टकेषीकामालानामित्यत्रपुनस्तदेतद्विधुपसंख्यानंव्यर्थंस्यात्॥तथाचपरममहत्परिमाणमित्यत्रकर्मधारयपक्षेप्यात्वप्रसक्तिर्नास्त्येवेतितदेतदनवहिताभिधानं।इष्टकेषीकेत्यस्यप्रयोजनत्वेनोदाहरणात्॥उपसंख्यानांतरस्यगगनकुसुमायमानत्वात्॥तस्मादाचार्योक्तमेवसम्यक्॥एतेनसतनतनेशतमोरतनमन्यतइतिभारविप्रयोगेओजःसहोंभस्तमसस्तृतीयायाइत्यलुक्कुतोनेत्याशंक्यवर्द्धमानोक्तरीत्याउत्तरप

दाधिकारेतदुत्तरपदग्रहणंनास्तीतिदुर्घटवृत्तिकारोक्तिरप्यपास्ता॥ यद्पिओजःसहइतिसूत्रेहरदत्तेनोक्तं॥ ओजःप्रभृतीनामुत्तरपदाक्षिप्तंपूर्वपदंप्रतिविशेष्यत्वादितितदपिवार्तिकविरोधादुपेक्ष्यं।विशेष्यविशेषणभावनिर्णयायैवइहत्यवार्तिकानांप्रवृत्तिरितिकैयटवदेवस्वयमपिव्याख्यातत्वात्॥ भारविप्रयोस्त्वित्थं समाधेयः॥ रतंरृतिःनैशंतमसोरतमितिषष्ठीतत्पुरुषः॥ नपुंसकेभावेक्तस्ययोगेशेषविवक्षायांषष्ठी॥ततःसततंनैशतमोरतंयस्मिन्नितिबहुव्रीहिः॥ यद्वा। रतुवर्तनेप्रज्ञाद्यैकविधानमितिभावेक्तः सततंनैशतमसोरतंवृत्तिर्येषुतेइतिप्राग्वत्॥ अंगाधिकारेप्रयोजनान्याह॥ प्रयोजनंमहदप्यस्वसूत्रसृणांदीर्घविधौ॥ महान्परश्रमहान् आपत्तिरितिस्वापः॥ नपूजनादितिसमासांतनिषेधः॥ नन्वेवमपिसंवत्सरसमर्गेभ्योपईदितीकारःप्राप्नोतिनत्वंसमासांतः॥पेनऋकूपूरित्यप्रत्ययइवनिषेध्येतइतिचेत् सत्यं॥ ह्यंतरुपसर्गेभ्यइत्यत्रापइतिकृतसमासांतस्यानुकरणंप्रथमांतं।अन्होदंतेतिनिषद्व्यत्ययेनषष्ठ्यर्थेप्रथमा।इहत्यंस्वापइतिभाष्यंचास्मिन्व्याख्यानेप्रमाणमित्यवधेयं।स्वसारीपरमस्वसानसृणोपरमनसृणोपरमसृणीदस्यस्याद्यनडहोनुम्।पद्भावःप्रयोजनं।हिपदःपश्यकेवलस्योदाहरणंतुपादयतेरप्रत्ययःपात्पदःपदेत्यत्र।इहहौलुप्तविण्णोपोत्तमित्यत्र॥उत्तरपदाधिकारेतुपादशब्दोविशेष्यमेव।तेनपादस्यपदाज्यातिगोपहतेष्वितिपद्भावःपादेनोपहतंपदोपहतमित्यत्रैवभवतिइहतुनद्व्यंघ्रिपादेनोपहतंद्व्यंघ्रिपादोपहतमिति।उत्तरसूत्रेष्येवंतेनपद्यत्यतदर्थेहिमकाषिहतिषुचेतियङ्भावइहैवभवति॥पादेनकषतीतिपत्काषीइहतुनप्रत्ययपादकाषी।यत्तुपरमपत्काषीतिप्रयोगःसपरमश्वासौपत्काषीचेतिविग्रहेणसमाधेयइतिभाष्यंकैयटयोःस्थितम्॥यूपंवयंअतियूपंअतिवयम्।अस्थ्यामरमास्थ्नोअनड्वान्परमाड्वान्॥द्युपथिमथिपुंगोसखिचतुरनडुत्तत्रिग्रहणं।द्यौःसुद्यौःपंथाःसुपंथाः॥नपूजनादितिसमासांताभावः मंथोःपरममंथाः॥ पुमान् परमपुमान् गौःसुगौः॥सखासुसख्यौ सख्यायेसुसख्यायै॥चत्वारःपरमचत्वारः अनड्वाहः

परमानङ्वाहः। त्रयाणां परमत्रयाणां॥ भाष्येतुपरमपंथाः परमगौरित्युदात्तम्॥ नञ्समासांतापत्तिः॥ नञ्जनादिनिषेधस्तुनास्तिस्वमिर्भामेवेतिवक्ष्यमाणत्वात्॥ अत्रत्यकश्चित्कोयमपपाठइतिकैयटः॥ समासांतविधेरनित्यतयावासमाधेयं॥ यद्वापरमुदाहरणांतरमित्यर्थः॥ अपंथा अगौरित्यत्रनञ्ततत्पुरुषात्प्रथोविभाषेतिसाधुत्वंयत्तुपरमसखायाविति पठितंभाष्येनञ्बहुव्रीहिर्बोध्यः। गौणनङ्णित्वेइष्येतेएवअस्त्याद्यनङुत्एतच्चमिदंचेत्यादित्सूत्रेहितीयाश्रितेत्यत्रचस्पष्टं। अनुद्युक्षोवरुणइंद्रसखाआग्नेयादिमरुत्सखेत्यादिप्रयोगाश्चैवमेवसंगच्छंतेएतेनयेसंज्ञासूत्रेशोभनैःसखासुसखिरित्युदाहरन्हरदत्तेव्याख्यासकारस्त्वापास्तः॥ त्रेरुत्वइतितुत्रिशब्दार्थसमवेतसंख्याद्यभिधायिशब्दमात्रविषयव्याख्यानादेवभवतिप्रियत्रीणांअतित्रीणांप्रार्ध्न्येतुस्यादेवपरमत्रयाणामित्याहुः। अत्रव्याख्यानेप्रमाणंमृग्यं। इहचदंतंगणिकाइत्यनकर्त्तव्यं। तदंतग्रहणेनैवेष्टसिद्धेरित्युक्तंनविस्मर्त्तव्यं॥ प्रत्ययग्रहणेयस्मात्सविहितस्तदादेस्तदंतस्यग्रहणं। दृढप्रत्ययाक्षिप्तस्यधातुप्रातिपदिकाद्यवयवसमुदायस्यप्रत्ययेनविशेषणात्ततदंतविधिर्लभ्यते॥ अंगसंज्ञासूत्रेयस्मात्प्रत्ययविधिस्तदादिप्रत्ययेइतियोगंविभज्यपरिभाषात्वेनव्याख्यानादंशोनरलाभः॥ इदंचसंज्ञाविधौनप्रवर्त्ततेसुप्तिङंतंपदमितिज्ञापकात्॥ उत्तरपदाधिकारेपिनप्रवर्त्ततेतदर्थस्यतल्लेखयदणलासेष्विनिसूत्रेलेखग्रहणाज्ज्ञापकादिनिरुच्यते अस्यापवादमाहप्रत्ययग्रहणेत्यादि। यत्रपंचम्यंतंप्रत्ययस्यविशेषणंनतत्रतदंतग्रहणंनेत्यर्थः॥ यस्यारदाभ्यांनिष्ठानइत्यत्र। तेनदृब्धीर्णेत्यत्रदृधातोस्तकारस्यनिष्ठांतप्रत्ययघटकीभूतस्यनत्वंनभवति। दृढघटकेसंज्ञाविधावुत्तरपदाधिकारेरदाभ्यांस्यनासीलुटोरित्यादौचप्रत्ययोविशेष्यतयाश्रीयतेइतरत्रतुविशेषणतयेतिफलितोर्थः॥ तदिदंसकलंसूत्रेणैवसिद्ध्यतिइतिस्थितम्॥ सौत्रस्यतदंतविधेर्वाचनिकमपवादमाह॥ वार्त्तिककारः। यस्मिन्विधिस्तदादावल्ग्रहणे। अ

त्रिस्नुधात्विति इयङ्। वङ्चयधेहभवतिस्त्रियौ भ्रुवाविति एवमिहापिसिद्ध्यतिस्त्रियः भ्रुवइति। तदेतन्विध्यपवादस्तस्मादिविधिः अतोविशेषणेनैव॥वृद्धि
र्यस्याचामादिस्तद्वृद्धं॥यस्यसमुदायस्यावयवानामचांमध्येप्रथमिकोऽचवृद्धिसंज्ञकः सवृद्धसंज्ञकःस्यात्। आम्रगुप्तीयः॥वृद्धाच्छः। अचामि
तिजातौवर्तुवचनेनेनहूयोरपिभवति॥शालीयः। एकस्यापिभवतिल्यपदेशिवद्भावात्॥ज्ञाब्राह्मणीतस्याअपत्यंज्ञीयः। वानामधेयस्य। पौरुषे
यंनामतस्यवृद्धसंज्ञावास्यादित्यर्थः॥उभयत्रविभाषेयं॥देवदत्तीनामप्राप्तेवा मदेवादीनांचप्राप्तेआरंभात्॥देवदत्तीयाः॥देवदत्ताः॥विधायमू
र्त्तिकपटेनवामनीमिति श्रीहर्षः॥गोत्रोत्तरपदस्यच। नित्यंवृद्धसंज्ञावक्तव्येतिशेषः॥कैबलचारायणीयाः ओद्दनपाणिनीयाः। घृतरौढीयाः॥कैबल्य
यस्यचारायणस्यशिष्यादित्यास्तिर्थ्यः॥पणनंपण्यः॥घञर्थेकविधानमितिकः॥सोस्यास्तीतिपणी। पणिनोगोत्रापत्यंपाणिनः। अण्। गाथिविद
थिकेशिगणिपणिनश्चेतिप्रकृतिभावे॥ननोपूनीञ्॥पाणिनिः॥स्यादेतत्॥ण्यक्षत्रियार्षञितइतिसूत्रेणेहइञोलुक्प्राप्नोति॥आर्षाद्यून्युत्प
न्नस्त्रीप्रतिषेधेन॥आर्षग्रहणेनऋष्यंधकेतिसूत्रेविहितस्यऋष्यणएवग्रहणात्॥अस्यचऔत्सर्गिकत्वात्॥यद्वा॥पाणिनशब्दोयौगिकोऽपत्य
गोत्रढञ्सुबिधौतुरूढस्तेनोक्तं॥एतच्चशास्त्रांतरेएकशेषनिर्देशाद्वाभगवतःपाणिनेः सिद्धमितिवार्तिकनिर्देशाद्दासीपुत्रस्यपाणिनेरितिश्रव्य
कारव्यवहाराच्चनिर्णीयते॥नन्वेवमपिपाणिनेःस्त्रियाः पाणिनीयादितिनसिध्यति॥वृद्धाच्छंबाधित्वाइञश्चेत्यणः प्रसंगात्॥नचछेविवक्षितेपूर्वि
लुगितिइञोलुकिसतिनापमित्रंतदितिवाच्यं।प्रत्ययलक्षणेनद्वंतत्वानपायात्॥अत्राहुः॥इञश्चेत्यत्रकण्वादिभ्योगोत्रेइत्यतोगोत्रग्रहणमनु
वर्त्ततेनचपूर्वसूत्रएवतत्स्मर्यतेतेनापत्याधिकारादन्यत्वेनप्राप्तंलौकिकंगोत्रंविहायगोत्राधिकारोगृह्यतेस्मरितेनाधिकारइतिवचनात्॥ कण्व
दिभ्यगर्गादिभ्यश्चेतर्गणः॥ननोगर्गादिभ्योयञ्रितिविधीयमानोयञ्पारिभाषिकएवगोत्रेभवतितत्रापिअधिकारसत्वात्॥तेनइञश्चेत्यत्रापिपारिभ

षिके गोत्रेयङ्श्रतदंताच्छ्वेषणङित्यर्थः फलितः॥यङ्लक्षणप्रतिपदोक्तपरिभाषयाकण्वादिसूत्रेयञ्विवृत्त्यनेनचशारेभाषिकेविहितत्वान्नस्यैव प्रत्ययकः॥एवंचार्थाधिकारादिञश्वेत्यत्रापितथा॥पाणिनिरितितुयूनिइञ्ननुगोत्रेतेनाणोऽप्राप्तेनिर्बाधः ञप्रत्ययइतिस्थितम्॥रूढ्यापत्यैरेढिः॥अतइञ्॥अनंतरेगोत्रेवा॥नचैवमिञश्वेत्यण्प्रसंगः॥नह्यचःप्राच्यभरतेष्वितिनिषेधात्॥स्यादेतत्॥यदिगोत्रोत्तरपदस्यरूढसंज्ञाविधीयते ॥नहिपिंगलकाण्व्यस्यछाचःपैंगलकाण्वाइत्यत्ररूढाच्छःस्यात्॥इष्यतेतुकण्वादिभ्योगोत्रेइत्यण्॥सत्यं॥अतएवापरितोषादुक्तंवार्त्तिककृत्या ॥गोत्रांताह्लाप्तमस्तत्वदितिशैषिकाधिकारेप्राग्दीव्यतोणित्यत्रवाइत्यमतिदेशःकर्त्तव्यइत्यर्थः॥अपत्याधिकारादन्यत्वाच्च॥लौकिकगोत्रस्य ण्यादेरनपाणिनीयाइत्यादिसिद्धमितिभावः॥किमविशेषेण नेत्याह॥जिह्वाकात्यहरितकात्यवर्ज्यम्॥कतशब्दोगर्गादिः॥जिह्वाचप्रकारेहरितवर्णेचैककात्यः॥तस्यछाचाइत्यर्थेणेवभवतिजैह्वकाताः हारितकाताः॥त्यदादीनिच॥एतानिरूढसंज्ञानिस्युः॥त्यदीयं॥अदसीयम्॥इदमीयं॥किमीयं॥त्वादायनिः॥मादायनिः॥उदीचांरूढादिर्ञ्यङ्॥प्रत्ययोत्तरपदयोश्चेतित्वमावादेशौ॥यङ्प्राचांदेशे॥यस्याचामादिरितिनंडूकप्लुत्यानुवर्त्तते॥यङ्यस्याचामादिस्तद्रूढसंज्ञंवास्यात्तद्देशाभिधाने॥एणीपचनीयः॥गोनर्दीयः॥भोजकटीयः॥एडितिकिम्॥आहिच्छत्रः॥कान्यकुब्जः॥विधेयसंज्ञासंबंधबलेनप्रत्यय विभक्त्युच्चारणाच्चप्राग्ग्रहणमाचार्यनिर्देशार्थं॥व्यवस्थितविभाषाचेयं॥तेनकौंडदेवदत्तशब्दोरप्राग्देशवाचिनोर्नरूढसंज्ञातेनकौंडोदेवदत्तइत्य णेवभवति॥प्राग्देशवाचिनस्तुदेवदत्तशब्दस्यभवत्येवरूढसंज्ञाततःकाश्यादित्वाद्रूढलक्षणोढक्प्रत्ययोभवतः॥शैषिकेष्वितिवक्तव्यं॥सेपुरिकीसेपुरिका॥स्कौनगरिकीस्कौनगरिका॥सेपुरंस्कौनगरंचवाहीकग्रामौ॥तत्ररूढत्वाद्ग्रामेभ्यश्चेतिठक्प्रत्ययोभवतःशैषिकेष्वितिवचनादपत्येरूढलक्षणः फिञ्नविकारेचनित्यंरूढेतिमयण्न॥तदेवंकुणिमतंभाष्यमतंचानुसृत्यप्राग्ग्रहणमाचार्यनिर्देशार्थमितिव्याख्यातं॥जयादित्यस्तुप्राग्विदेशेयेसंतितेग्रा

चः पुरुषास्तेषांयोदेशः तदभिधानेइतिव्याचख्यौ॥प्राचामित्यस्यचश्रूयमाणदेशविशेषणत्वेसंभवति अध्याहर्त्तव्येनमतेनेत्यनेनान्वयोनक
ल्पइतिनस्याशयः॥अस्मिन्पक्षेवाहीकग्रामेदेवदत्तइत्यत्रकौडइत्यत्रवाः वृद्धत्वादेवठञ्भिठौनभवतइतिस्पष्टं॥किंतुसैषुरिकीत्यादिभाष्यो
क्तत्वंवचनेनेवसाधनीयंस्यादितिदिक्॥देशइतिकिम्॥गोमतीनामप्राग्देशनदीनत्रभवामत्स्याः गौमताः॥देशग्रहणेननदीनगृह्यतेनदी
देशोग्रामाइतिपृथगुपादानालिंगात्॥प्रागादिदेशविभागस्त्वित्थम्॥शरावतीनामनदी॥उत्तरपूर्वाभिमुखीतस्यादक्षिणपूर्वस्यांदिशिव्यव
स्थितोदेशःप्राग्देशः॥उत्तरापरस्यामुदग्देशः॥उक्तंच॥प्रागुदंचौविभजतेहंसःक्षीरोदकंयथा॥विदुषांशब्दसिद्ध्यर्थंसानःपातुशरावती॥
अमरसिंहोप्याह॥शरावत्यास्तुमौलुधेः। देशःप्राग्दक्षिणःप्राच्यउदीच्यःपश्चिमोत्तरइति॥अमरव्याख्यातारस्तुऐशानीतोनैर्ऋत्यांपश्चिमाभि
मुखीशरावतीतिवदंति॥उभयेषामपिप्रागुदक्स्वरूपेनविवादः॥वाहीकदेशस्तुप्रागुदग्बहिर्भूतः॥बहिषष्टिलोपोयञ्चेतिव्युत्पादनादिनिवि
क्षणम्॥तच्चिंत्यम्॥अव्ययात्त्यविनिसूत्रेकाश्यादिभ्यष्ठञ्ठाविनिवार्तिकंव्याचक्षाणेनभगवतापाकलनाम्नोग्रामस्योदीच्यवाहीकोभयरूप
तामभ्युपगमात्॥नत्रहरदत्तादिभिस्तथैवानुवादाच्च॥तस्माद्वाहीकोदेशविशेषइत्येवनत्वं॥तथाचकर्णपर्वणि॥पंचानांसिंधुषष्ठानामनरयेसंस्मृतंता
॥वाहीकनामतेदेशानतत्रद्विवसंवसेदिति॥एतेनधर्मबहिर्भूतत्वाद्वाहीकाइत्युक्तंभवति॥शतद्रुविपाशाद्रावतीवितस्ताचंद्रभागेतिपंचनद्यः
सिंधुनदस्तुषष्ठः तन्मध्यदेशोवाहीकइतितद्व्याख्यातारः॥व्युत्पत्तेस्तुनतथैवदर्शितं॥वहिष्कृत्यवहीकाश्चविपाशायांपिशाचकाः॥तयोरपत्यंवाहीकानेषासृष्टिःप्रजापतेरिति॥एतच्चवि
वेचनंवाहीकग्रामेभ्यश्चेत्यादावुपपाद्यतेइतिसर्वंसुस्थम्॥ ॥इतिश्रीविद्वन्मुकुटरत्नस्यस्रस्वीधरसूरेःसूनुनाभट्टोजिभट्टेनकृतेशब्दकौस्तुभेप्रथमाध्यायस्यप्रथमःपादः
न्हिकम्॥पादश्चायंसमाप्तः॥ ॥ वाराणसीप्रसादस्यनियोगेनप्रयत्नतः॥काशीसस्तन्तसुद्रायामंकितोयंशिलास्तरेः॥१॥ श्रीकाशीजी मे ज्ञानवापीके पूर्वफाटकपर महाराज शिवला
ल दुबेजीके मकानमे छपी जिनको रे ना होय उनको इस ग्रंथके संपादक श्रीबाबूवाराणसीप्रसादजीके पास याकचौरी गली मे [illegible]ईप तापसिंहके दुकानपर मिलेगी॥ ता: २अगस्त स॰ १८७६ ई॰

॥इतिश्रीशब्दकौस्तुभस्यनवान्हिकंसमाप्तम्॥